# SELF STUDY REPORT

**FOR**

**1st CYCLE OF ACCREDITATION**

# SHREE SOMNATH SANSKRIT UNIVERSITY

**SHREE SOMNATH SANSKRIT UNIVERSITY, RAJENDRA BHUVAN ROAD, VERAVAL, DIST.-GIR SOMNATH**
**362266**

**www.sssu.ac.in**

**Submitted To**

**NATIONAL ASSESSMENT AND ACCREDITATION COUNCIL**

**BANGALORE**

**Executive Summary**

***Introduction:***

## विश्वविद्यालयस्य परिचयः

समग्रायै मानवजात्यै भारतदेशेन दत्तम् अनुपमम् उपायनं नाम संस्कृतभाषा, उदात्तं सारगर्भं संस्कृतसाहित्यं च। सम्प्रति भारते विदेशेषु सर्वत्र अस्य साहित्यस्य गहनम् अध्ययनं समारब्धं वर्तते। गुजराते अपि संस्कृतस्य शास्त्राणां च अध्ययनाय उत्कृष्टसुविधा उपलब्धा स्यात् इति धिया गुजरातसर्वकारेण २००५तमे वर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य स्थापना कृता। १७.२.२००६तमे दिनाङ्के विश्वविद्यालयानुदानायोगेन विश्वविद्यालयाय २(एफ्) इत्याख्या मान्यता दत्ता। श्रीसोमनाथन्यासेन गुजरातस्य गीरसोमनाथजनपदे वेरावलनगरे विश्वविद्यालयाय सप्तदश-एकड-मिता भूमिः दत्ता, किञ्च तस्यां भूमौ विराजमानम् ऐतिहासिकं भवनं नवीकृत्य मुख्यभवनत्वेन समर्पितम्। २००६-२००७तमे शैक्षणिकवर्षे विश्वविद्यालयस्य मुख्यकेन्द्रे अनुस्नातककक्षासु अध्यापनस्य शुभारम्भः जातः। ५.२.२००७तमे दिनाङ्के तत्कालीनेन गुजरातराज्यस्य मुख्यमन्त्रिणा, साम्प्रतिकेन च भारतराष्ट्रस्य प्रधानमन्त्रिणा श्रीनरेन्द्र मोदी महाभागेन विश्वविद्यालयभवनस्य उद्घाटनं कृतम्। "पूर्णता गौरवाय" इति वाक्यं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ध्येयवाक्यं वर्तते। विश्वविद्यालयोऽयं प्रतिष्ठाप्राप्तये 'गुणवत्ताम्' एव ध्यायति।

अस्य विश्वविद्यालयस्य स्थापनानन्तरं गुजरातराज्यस्य सर्वासामपि पाठशालानां विश्वविद्यालयेन सह सम्बद्धताकारणेन तासु सर्वासु अपि पारम्परिकपाठशालासु अधीयानाः छात्राः शास्त्रि-आचार्यादिप्रगताध्ययनान्तरं विश्वविद्यालयीयपरीक्षाः उत्तीर्य सर्वमान्याः पदवीः इतः प्राप्नुवन्ति। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कार्यक्षेत्रं समग्रं गुजरातराज्यम् अस्ति। सम्प्रति गुजरातस्य विभिन्नेषु भागेषु विश्वविद्यालयेन संलग्नानि त्रिचत्वारिंशत् पदविकाभ्यासक्रमकेन्द्राणि (डिप्लोमा-सेंटर्स्), पञ्चत्रिंशत् संस्कृतमहाविद्यालयाः, एकः विश्वविद्यालयसञ्चालितः महाविद्यालयः (कॉलेज), षड्भिः विभागैः युक्तम् अनुस्नातकभवनम्, एकम् अनुसन्धानकेन्द्रं, विंशतिः पी.जी.डी.सी.ए केन्द्राणि च कार्यरतानि सन्ति। अहमदाबादे स्वनिर्भरशिक्षाशास्त्रि- (B.Ed.) महाविद्यालयस्यापि संलग्नता विश्वविद्यालयेन दत्ता अस्ति।

कालक्रमेण विश्वविद्यालये विद्यावारिधिः, तत्त्वाचार्यः चेत्येतौ संशोधनात्मकौ अभ्यासक्रमौ अपि प्रारब्धौ। ततः अद्यावधि बहवःशोधच्छात्राः संशोधनाय पञ्जीकरणं कृत्वा विविधशास्त्रेषु गुणवत्तायुक्तं शोधकार्यं प्रस्तूय उपाधिमपि प्राप्तवन्तः। २०१०-२०११तमवर्षात् सङ्गणकविद्यायां P.G.D.C.A. (पोस्ट-ग्रेज्युएट-डिप्लोमा-इन्-कम्प्यूटर-ऐप्लिकेशन्स्) इति स्वनिर्भरः अभ्यासक्रमोऽपि आरब्धः। २०१०तमात् वर्षात् शास्त्र्यभ्यासक्रमे, आचार्याभ्यासक्रमे, शिक्षाशास्त्र्यभ्यासक्रमे च विकल्पाधारितश्रेयोऽङ्कप्रणाली (C.B.C.S.) तथा च षाण्मासिकसत्रपरिक्षाणाम् आरम्भः जातः। विश्वविद्यालयसंलग्नमहाविद्यालयेषु विश्वविद्यालयसञ्चालितमहाविद्यालये, अनुस्नातकभवने च वेदः, ज्योतिषशास्त्रम्, नव्यव्याकरम्, पुराणेतिहासः, सर्वदर्शम्, साहित्यम्, वास्तुशास्त्रम्, पौरोहित्यम्, धर्मशास्त्रम्, स्वामिनारायणवेदान्तः, रामानुजवेदान्तः, नव्यन्यायः चैतानि शास्त्राणि अध्याप्यन्ते। शास्त्रिस्तरे आङ्ग्लभाषा, सङ्गणकम्, हिन्दी, गुजराती, इतिहासः, अर्थशास्त्रम्, प्राचीनराजनीतिशास्त्रं चेत्यादिविषयाः, किञ्च वैदिकगणितम्, कर्मकाण्डम्, ज्योतिषशास्त्रम्, वास्तुशास्त्रम्, 'संस्कृत टीचिंग', 'पोस्ट ग्रेज्युएट डिप्लोमा इन संस्कृत गुजराती एन्ड हिन्दु स्टडीस्', 'ग्रेज्युएट डिप्लोमा इन संस्कृत गुजराती एन्ड हिन्दु स्टडीस्', मन्दिरव्यवस्थापनम्, सङ्गीतम्, नाट्यशास्त्रम्, योगः चेति विषयेषु वर्षात्मकपदविकाभ्यासक्रमाः सञ्चाल्यन्ते। आभासीयरीत्या (ओनलाइन) सभाष्या गीताविषये पदविकापाठ्यक्रमोऽपि सञ्चाल्यते यत्र शताधिकाः वैदेशिकाः अपि अधीयानाः सन्ति। व्यावसायिकच्छात्रेभ्यः बाह्यपरीक्षालेखनव्यवस्थाऽपि विश्वविद्यालयेन कल्पिता वर्तते।

विश्वविद्यालयपरिसरे आनुषङ्गिकव्यवस्थारूपेण ग्रन्थालयः, परिसंवादकक्षः, परिषत्कक्षः, वेदमन्दिरम्, यज्ञशाला, सङ्गणकप्रयोगशाला, सरस्वतीमन्दिरम्, छात्रावासः, क्रीडाङ्गणम्, व्यायामशाला च सन्ति। प्रतिवर्षं विश्वविद्यालयद्वारा छात्राणाम् अध्यापकानाञ्च ज्ञानवृद्धये विविधसङ्गोष्ठ्यः, राज्यस्तरीय-राष्ट्रस्तरीय-अन्ताराष्ट्रियस्तरीयाः परिसंवादाः आयोज्यन्ते। नियतकार्यक्रमत्वेन प्रतिवर्षं विश्वविद्यालये संस्कृतसप्ताहोत्सवः, युवमहोत्सवः, पदवीदानसमारोहः, विविधसांस्कृतिकोत्सवाश्च आयोज्यन्ते। इतः चिताः छात्राः विविधसंस्कृतविश्वविद्यालयैः आयोज्यमानासु सांस्कृतिक-शैक्षणिक-क्रीडादिस्पर्धासु यशस्वितया विश्वविद्यालयस्य प्रतिनिधित्वं कुर्वन्ति।

Link for English Version: https://sssu.ac.in/images/NAAC_Criteria/doc/parichay%20English.DOCX

*Vision:*

**अस्माकं ध्येयम् (Our Vision)**

श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य ध्येयम् इदं वर्तते -

- **गुणवत्ताद्वारा पूर्णता** -

“सर्वाः संस्थाः गुणवत्तायां श्रेष्ठतायै स्पर्धन्ते। श्रीसोमनाथसंस्कृतविश्वविद्यालयः ततः भिन्नः नास्ति। वर्तमानस्य भविष्यतश्च अत्यधिकस्पर्धायुते जगति प्रतिष्ठाप्राप्तये विश्वविद्यालयः गुणवत्तामेव आश्रयते। गुणवत्ता काचिद्यात्रा, न तु गन्तव्यस्थानं किञ्चित्” इति श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ध्येयम्। गुणवत्तायाः आग्रहेण एव कार्ये पूर्णता आयाति। भारतीयसंस्कृतौ पूर्णतायै अनितरसाधारणं महत्त्वं वर्तते। पूर्णतायै यतमानः एव मनुष्यः आत्मस्वरूपस्य बोधम्, जीवनस्य चरमलक्ष्यं चापि साधयति। तदनुसारमेव ‘पूर्णता गौरवाय’ इति विश्वविद्यालयस्य ध्येयवाक्यम् अस्ति। वाक्यम् एतत् महाकवेः कालिदासस्य मेघदूतात् स्वीकृतम्। एतत् वाक्यं जीवने पूर्णतां श्रेष्ठतां च प्राप्तुं प्रेरयति, विश्वविद्यालयस्य अस्य स्थापनायां कारणभूतम् आदर्शम् उद्देश्यं च सुस्पष्टतया अभिव्यनक्ति।

- **सर्वत्र संस्कृतमयता -**

विश्वविद्यालयः सर्वविधव्यवहारे सर्वविधक्रियाकलापे च संस्कृतमयताम् आश्रयते। विश्वविद्यालयस्य शैक्षणिकक्रियाकलापेषु विविधेषु च कार्यक्रमेषु संस्कृतमयतानिमित्तं विशिष्टाः उपक्रमाः विधीयन्ते। विश्वविद्यालयस्य शैक्षणिक-प्राशासनिकक्रियाकलापेषु सञ्चाल्यमानाः विविधाः उपक्रमाः संस्कृतमयतां द्योतयन्ति। सर्वत्र सस्कृतमयता स्यात् इति आशयेन विश्वविद्यालयोऽयं स्वपरिसरे, समीपवर्तिक्षेत्रेषु च संस्कृतवायुमण्डलनिर्माणार्थं सततं यतमानो वर्तते ।

- **उत्कृष्टम् अनुसन्धानं ग्रन्थप्रकाशनं च** –

कस्यापि समाजस्य भौतिक-सांस्कृतिकाध्यात्मिकप्रगतौ अनुसन्धानं नितराम् आवश्यकम्। अनुसन्धानद्वारा वर्तमानस्य ज्ञानराशेः वर्धनेन, व्यवहारे प्रयोगोपायान्वेषणेन, आलोडनेन, कालोचितार्थघटनेन चैव समाजस्य विकासः भवति। एतत् कार्यं समाजद्वारा संस्थापितानि शिक्षणसंस्थानानि एव प्रामुख्येन आश्रयते। अतः विविधशास्त्राणां पोषणाय समाजोपकाराय च अयं विश्वविद्यालयः विविधैः उपक्रमैः उत्कृष्टानुसन्धानाय अनुसन्धित्सून् सततं प्रेरयति। ज्ञानम् एव सर्वेषां दुःखानां निवर्तकं भवति। ग्रन्थाः ज्ञानस्य निर्वाहकाः भवन्ति। तस्मात् विश्वविद्यालयोऽयम् उत्कृष्टानां ग्रन्थानां प्रकाशनाय अपि निरन्तरं यतते। ।

- **छात्राणां सर्वाङ्गीणविकासः -**

छात्राः विश्वविद्यालयस्य केन्द्रस्थाने वर्तन्ते। ते एव राष्ट्रस्य भविष्यत् अपि वर्तन्ते। विद्योपार्जनावस्थायां सर्वतो अनुशासिताः विकासशीलाश्च छात्राः भविष्यति काले राष्ट्रस्य सर्वतो विकासं साधयिष्यन्ति। तस्मात् शास्त्रशिक्षणद्वारा तेषां

बौद्धिकविकासः, क्रीडाशिक्षणद्वारा शारीरिकविकासः, वक्तृत्व-चित्रादिकलाप्रोत्साहनद्वारा तेषां मानसिकविकासः च यथा स्यात् तदर्थं विश्वविद्यालयः यतते। काले काले विविधकार्यक्रम-कार्यशाला-विशिष्टव्याख्यानादीनाम् आयोजनेन छात्राणां चरित्रनिर्माणम्, मूल्यशिक्षणम्, व्यक्तित्वविकासं च कर्तुम् अपि विश्वविद्यालयः प्रयतते।

- **योग्यनागरिकनिर्माणम् -**

सुराष्ट्रनिर्माणाय योग्यनागरिकनिर्माणं महत्त्वं भजते । तदर्थं विश्वविद्यालयस्य पाठ्यक्रमाः, सर्वे क्रियाकलापाः च नैतिकमूल्यान्विताः भवन्ति। राष्ट्रभक्तिजागरणाय, देशहिताय, सामाजिकदायित्वनिर्वहणाय, संस्कारविकासाय च विश्वविद्यालयः सर्वमूल्यसमावेशकनीतिं परिपालयति ।

- **व्यावसायिकशिक्षणेन सह पारम्परिकशिक्षणस्य अन्वयः -**

विश्वविद्यालयः छात्राणाम् उद्योगप्राप्तिसामर्थ्यविवर्धनाय संस्कृतभाषासाहित्ये विद्यमानं विज्ञानम्, दर्शनम्, वैश्विकमूल्यानि इत्यादिकस्य परिपोषणार्थं परिव्याप्त्यर्थं पुनरुज्जीवनार्थं च प्राचीनभारतीयविज्ञानेन सह आधुनिकवैज्ञानिकचिन्तनस्य समन्वयं विदधाति ।

- **रुचिकरं नवाचारयुक्तं च शिक्षणम्-**

भारतीयेषु शास्त्रेषु निगूढानां चिरन्तनतत्त्वानां नवाचारैः बोधनाय विश्वविद्यालयस्य आचार्याः निरन्तरं विविधान् प्रयोगान् कुर्वन्ति। किञ्च परिवर्तमाने काले व्यवहारे शास्त्रीयसिद्धान्तानाम् अनुप्रयोगस्य अवकाशाः अपि परिवर्तन्ते। विश्वविद्यालयोऽयं तद्विषये अपि निरन्तरं चिन्तनरतो भवति।

- **समाजाय योगदानम् -**

विश्वविद्यालयः अनुसन्धान-सहयोग-बहिर्मुखकार्यक्रमैः सुस्थिरविकासाय सामोद-स्वस्थ-सर्वसमावेशितसमाजं प्रोन्नयति । सफलसामाजिकक्रियासु आत्मानं व्यापारयितुं सर्वविधभेदभावान् विरुध्य नैतिकपक्षेऽवस्थातुं च प्रेरयति ।

Link for English Version:

https://sssu.ac.in/images/NAAC_Criteria/doc/dhyeyam%20in%20english.DOCX

***Mission:***

**अस्माकं लक्ष्यम् (Our Mission)**

श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य लक्ष्यम् इदं वर्तते -

- भारतीयज्ञानपरम्परायाः आधारेण सद्विद्यादानम्
- शिक्षाद्वारा अध्येतृषु विश्वकल्याणकारिणां भारतीयमूल्यानाम् आरोपणम्
- स्त्रीणाम्, उपेक्षितबान्धवानां च कृते संस्कृताध्ययनाय विशेषसौकर्यकल्पनम्
- प्रबुद्धनागरिकनिर्माणद्वारा राष्ट्रनिर्माणम्
- संस्कृत-शास्त्र-शिक्षणे गुणवत्ताधानम्
- संस्कृत-शास्त्र-शिक्षणाय उत्कृष्टानां भौतिकसुविधानां कल्पनम्
- उत्कृष्टानां शास्त्रज्ञानां निर्माणम्, तेषां सार्थक-शोधकार्येषु विनियोगश्च
- वैदिकज्ञानस्य, परम्परागतशिक्षायाश्च प्रसारः
- संस्कृतभाषायाः साहित्यस्य च व्यापिका प्रगतिः, अवबोधनम्, विकासश्च
- आधुनिकप्रवाहेण सह प्राचीन-भारतीय-ज्ञानस्य समन्वयः

- संस्कृत-शास्त्राणां वर्तमानपरिस्थितिषु सान्दर्भिकतायाः बोधनद्वारा, शास्त्राणां प्रायोगिकपक्षस्य शिक्षणद्वारा च उत्तमायाः आजीविकायाः प्राप्तौ समर्थानां नागरिकाणां निर्माणम्

'सा विद्या या विमुक्तये' इति भारतस्य एषः उद्घोषः। तदर्थम् अनुशासितं जीवनम्, धर्मार्थकामानां परिशीलनपूर्वकं सन्तुलितरूपेण जीवने उपयोगः भवति चेत् तादृशी विद्या समाजाय राष्ट्राय विश्वकल्याणाय च उपयोगिनी भवतीति विद्याविषयिणीम् एताम् एव उदात्तां दृष्टिं चरितार्थां कर्तुं विश्वविद्यालयः अयं प्रयतमानः अस्ति। स्वीयैः विविधैः शैक्षणिकोपक्रमैः विश्वविद्यालयः अयम् एतादृश्याः एव सद्विद्यायाः वितरणं निरन्तरं कर्तुं समीहते।

भारतीया दृष्टिः समष्ट्याः कल्याणं काङ्क्षति इति तु प्रसिद्धम् एव। अतः अध्ययनकाले अध्येतृषु भारतीयमूल्यानाम् आरोपणेन समग्रसृष्ट्याः प्रत्येकं जीवस्य कल्याणाय यतमानानां विश्वमानवानां निर्माणं भविष्यति इति विश्वविद्यालयः दृढं विश्वसिति।

भारतीयायाः विद्यायाः जीवनमूल्यानां च ज्ञानपूर्वकं व्यवहारे आचरणमेव विमुक्तये भवितुम् अर्हति। एतदर्थं परिसरे कक्षासु औपचारिकं पाठनं तु भवति एव, किन्तु आचार्यस्य व्यवहारेण छात्राणां व्यवहारशिक्षणं दृढतरं भवति इति विश्वविद्यालयस्य विचारसरणिः वर्तते। तदनुसारमेव भारतीयग्रन्थेषु विलसन्ती संस्कृतभाषा अध्येतॄणां व्यवहारे अपि अवतरेत् इति आशयेन परिसरे सर्वत्र संस्कृतमयताम् आनेतुं विश्वविद्यालयः यतते। शास्त्रमर्मज्ञानेन सहितम् आधुनिकसन्दर्भे शास्त्राशयस्य प्रकटीकरणसामर्थ्यम्, प्राचीनेन सह आधुनिकस्य समन्वयसामर्थ्यं चापि अध्येतृषु विकसेत् इत्यतः इतिहास-आङ्ग्ल-सङ्गणक-भाषाविज्ञानादिशिक्षणाय अपि समानं महत्त्वं दीयते अत्र।

अत्र विदुषीणां स्त्रीणाम् अपि निर्माणं स्यात् इत्यतः विश्वविद्यालयः विविधैः उपक्रमैः कन्याशिक्षणाय महत्त्वं ददाति। वाल्मीकि-व्यास-कालिदासाः संस्कृतरत्नाकरस्य अनुपमानि रत्नानि। गिरिजनाः, वनवासिनः, समाजेन उपेक्षिताः बान्धवाश्च श्रीसोमनाथविश्वविद्यालयेन विशेषतया अवधीयन्ते। एतेषु एव केचित् आधुनिकाः वाल्मीकि-व्यास-अम्बेडकरसदृशाः भविष्यन्ति इति विश्वविद्यालयस्य विश्वासः। अतः एतेषां कृते यथा संस्कृतशिक्षणधारायां प्रवेशः सुलभः सुकरश्च स्यात् तथा विश्वविद्यालयः निरन्तरं प्रयतते।

वर्तमानविद्यार्थिनां शिक्षणेन विश्वविद्यालयोऽयं भविष्यतः भारते कस्यचित् गुणवत्ताप्रधानस्य, राष्ट्रोत्कर्षकेन्द्रितस्य, सर्वभूतकल्याणकारिणः च वातावरणस्य निर्माणाय यतते। तस्मात् विश्वविद्यालयस्य कार्यप्रणाली तथा वर्तते यथा प्रत्येकम् उपक्रमे शिक्षार्थिनः अमीषां मूल्यानां प्राधान्यं द्रष्टुं शक्नुयुः।

परिसरीयाः विद्वांसः आचार्याः विश्वविद्यालयस्य अन्तेवासिनः तथा प्रबोधयन्ति येन ते भविष्यतः अन्वयाय समुचिततया शास्त्रमर्मज्ञापनाय समर्थाः भवेयुः। संस्कृतच्छात्रैः अमीभिरेव संस्कृतं समाजस्य विविधाः धाराः व्याप्स्यति इति विश्वविद्यालयः मनुते। तस्मात् अत्र शास्त्राध्ययनं कृतवन्तः शिक्षार्थिनः संस्कृतभाषां संस्कृतशिक्षण-अनुसन्धान-पौरोहित्य-योग-सुरक्षा-क्रीडा-कला-सङ्गीतादिषु योजितवन्तः, योजयिष्यन्ति च।

Link for English Version :

https://sssu.ac.in/images/NAAC_Criteria/doc/Lakshyam%20in%20English%20(1).DOCX

**SWOC**

***Institutional Strength :***

विश्वविद्यालयस्य शक्तिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः 'पूर्णता गौरवाय' इति सिद्धान्तम् अङ्गीकृत्य स्वीयेषु सर्वेषु अपि क्रियाकलापेषु 'गुणवत्ता'धानाय एव प्राधान्यं यच्छन् संस्कृत-शास्त्राणां प्रसारकार्ये निरन्तरं यतमानः वर्तते। अयं विश्वविद्यालयः संस्कृताध्यापनं कारयन् विशिष्टः विश्वविद्यालयः अस्ति। अस्य विषयः '**संस्कृतम्**' एव अस्य प्रधानं बलं वर्तते। यद्यपि समाजे संस्कृतं जानानाः विरलाः एव तथापि संस्कृतविषये, वेदानां विषये, शास्त्राणां विषये च आदरः सर्वेषां हृदि वर्तत एव। विश्वविद्यालयस्य उद्घाटनावसरे श्रीनरेन्द्र मोदी महोदयेन उक्तं यत्, "अस्य विश्वविद्यालयस्य स्थापना मनुष्याणां संस्करणरूपायाः महत्याः क्रान्तेः आरम्भबिन्दुः अस्ति" इति। संस्कृतम् अजानानाः अपि संस्कृतविषये आदरवन्तः

सामाजिकाः अस्यां क्रान्त्यां तनु-धन-चित्तं च अर्पयितुं सदैव उत्सुकाः भवन्ति। समाजस्य प्रत्येकस्मात् स्तरात् लभमानं प्रोत्साहनमेव विश्वविद्यालयस्य महत् बलस्थानम् अस्ति। वेरावलनगरस्य आढ्येन (मत्स्यग्रहणोद्योगरतेन) खारवासमाजेन असकृत् अस्मै विश्वविद्यालयाय कृतं बहुविधं साहाय्यम् अत्र निदर्शनम्।

श्रीसोमनाथन्यासः, बी.ए.पी.एस., एस.जी.वी.पी., सन्तराममन्दिरं, शान्तिमन्दिरं, भागवतविद्यापीठं, पश्चिमाम्नायस्य श्रीशारदापीठम् इत्यादि नैकाः सम्पन्नाः आध्यात्मिकसंस्थाः, श्रीरमेशभाई ओझा, पूज्यः मोरारी बापु, भद्रेशस्वामी चैतत्सदृशाः महापुरुषाः च गुजराते सन्ति। ईश्वर-जीव-ब्रह्म-मोक्षादिविषये सर्वासां विभावनाः विभिन्नाः किन्तु सर्वेषां मतानां स्रोतः तु संस्कृते निबद्धानि शास्त्राणि एव। इत्थं सर्वाः इमाः संस्थाः, महापुरुषाः च विश्वविद्यालयस्य समर्थनाय, साहाय्याय, प्रचाराय, प्रसाराय च सदैव अहमहमिकया सज्जाः भवन्ति। इमाः संस्थाः, महापुरुषाः च विश्वविद्यालयस्य महान्ति शक्तिकेन्द्राणि वर्तन्ते। श्रीसोमनाथन्यासेन विश्वविद्यालयाय अर्पिता भूमिः तथा च मुख्यभवनं; बी.ए.पी.एस द्वारा विश्वविद्यालयाय निर्मितं भव्यं प्रवेशद्वारं, श्रीलक्ष्मीनायणयज्ञशाला, त्रिवेणीसन्दर्भग्रन्थालयः च अत्र निदर्शनम्।

गुजराते विश्वविद्यालयस्य स्थापनायाः प्रागेव नैकाः पारम्परिकसंस्कृतपाठशालाः संस्कृतशास्त्राध्यापनरताः आसन्। स्थापिते एव विश्वविद्यालये सर्वाः अपि इमाः विश्वविद्यालयेन सह संलग्नाः समजायन्त। एतेन सपदि एव समग्रे गुजराते विश्वविद्यालयस्य ख्यातिः उत्तरदायित्वञ्च प्रासरत्। विश्वविद्यालयस्य प्रारम्भकाले तत्रत्याः विद्वांसः गुरवः एव विश्वविद्यालयकेन्द्रम् आगत्य अध्यापनम् अपि अकुर्वन्। तेषु नैके सम्प्रति विश्वविद्यालयस्य परीक्षासमितौ, शैक्षिकपरिषदि, कार्यकारिणीपरिषदि च सेवां यच्छन्ति। गुजराते व्याप्ताः इमाः पाठशालाः, तत्र अध्यापनरताः गुरवश्च विश्वविद्यालयस्य महान्ति बलस्थानानि वर्तन्ते।

भारतस्य विभिन्नेभ्यः राज्येभ्यः अध्ययनाय आगच्छन्तः विश्वविद्यालयस्य विद्यार्थिनः विद्यार्थिन्यः च सामान्यविश्वविद्यालयेषु आधुनिकविद्याः अधीयानेभ्यः छात्रेभ्यः सर्वथा विलक्षणाः। ते इमे विनीताः, सदैव अध्ययने दत्तच्चित्ताः, विश्वविद्यालयस्य विविधोपक्रमेषु अहमहमिकया भागग्राहिणः, कार्यक्रमाणाम् आयोजने अपि साहाय्यभूताः च विश्वविद्यालयस्य भूषणानि सन्ति। अध्ययनसमाप्तौ अपि स्वोद्योगक्षेत्रे वर्तमानाः ते विविधैः प्रकारैः निरन्तरं विश्वविद्यालयस्य हितं कुर्वन्ति। विश्वविद्यालयस्य इमे छात्राः अपि विश्वविद्यालयस्य महती शक्तिः वर्तते।

काले काले नियुक्ताः गुजरातराज्यस्य राज्यपालाः, मुख्यमन्त्रिणः, शिक्षणमन्त्रिणः, शिक्षणविभागस्य सचिवाः च भाषायाः विषये आदरवशादेव सर्वदा विश्वविद्यालयस्य अपेक्षाः पूरयितुम् उत्सुकाः भवन्ति। समग्रस्य अपि गुजरातराज्यशासनस्य समर्थनं विश्वविद्यालयस्य महत् बलस्थानम्। काले काले विश्वविद्यालयेन ये विद्वांसः कुलपतयः प्राप्ताः ते, विश्वविद्यालयस्य सर्वेषु विभागेषु वर्तमानाः सक्रियाः कर्मचारिणः, विश्वविद्यालयस्य विद्वांसः आचार्याः सर्वेऽपि इमे विश्वविद्यालयस्य महान्ति बलस्थानानि सन्ति।

Link for English Version:

https://sssu.ac.in/images/NAAC_Criteria/doc/SWOC_Strenth%20English.docx

***Institutional Weakness :***

विश्वविद्यालयस्य दौर्बल्यम्

स्वीयया विशिष्टया कार्यप्रणाल्या श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः संस्कृतशास्त्राणाम् अध्यापनप्रसारानुसन्धानपथे निरन्तरम् अग्रेसरः वर्तते, किन्तु विश्वविद्यालयस्य कतिपयानि एतानि दौर्बल्यानि विश्वविद्यालयस्य विकासयात्रां मन्थरीकुर्वन्ति –

**भौगोलिकस्थितिः** –

1. विश्वविद्यालयोऽयं गुजरातराज्यशिक्षणविभागकार्यालयात् गान्धीनगरात् प्रायः ४५० किलोमीटरपरिमिते दूरे वर्तते। अतः शिक्षणविभागसम्बद्धानां लघूनां कार्याणां कृते अपि विश्वविद्यालयीयैः अधिकारिभिः प्रवासे दिनानि यापनीयानि भवन्ति।
2. एतेनैव कारणेन नित्यशः गमनागमनस्य दुष्करत्वात् अनुवर्तनस्य अभावात् शिक्षणविभागसम्बद्धानि कार्याणि कदाचित् विलम्ब्यन्ते।

3. देशस्य विविधेभ्यः प्रान्तेभ्यः, गुजरातस्य दूरस्थक्षेत्रेभ्यश्च आगतानां छात्राणां गमनागमने क्लेशः अनुभूयते यतो हि निकटे विमानपत्तनाभावः, रेलयानानां न्यूनता, लोकयानानां दुरुहता इत्येतानि कारणानि नित्यं सन्ति।
4. अस्मिन् नगरे विभिन्नसेवादातृणां वणिजाम् अभावात् विश्वविद्यालयद्वारा विभिन्नसेवाप्राप्त्यर्थं यानि विज्ञापनानि दीयन्ते तेषां प्रतिभावः अत्यल्पः अथवा सर्वथा न प्राप्यते। एतेन कारणेन क्वचित् बलात् अल्पगुणवत्तायुक्ताः सेवाः अपि अधिकमूल्यदानेन प्राप्तव्याः भवन्ति।
5. विश्वविद्यालये सेवाकार्यं कर्तुं जनाः अस्मिन् क्षेत्रे आगन्तुं सज्जाः न सन्ति। अतः विश्वविद्यालयेन विज्ञाप्यमानानां शैक्षणिक-शिक्षणेतरपदानां च प्रतिभावत्वेन अत्यल्पाः एव अभ्यर्थिनः आवेदनं कुर्वन्ति। क्वचित् आवेदकानाम् अभावेन पदानि प्रदीर्घकालं यावत् रिक्तानि एव भवन्ति।

- **पर्यावरणस्य स्थितिः** –

विश्वविद्यालयपरिसरः अरबीसमुद्रस्य तटे वर्तते। परिसरस्य पृष्ठभागे 'इन्डियन रेयोन' नामकस्य निगमस्य अतिविशालः यन्त्रागारः अस्ति। कारणेनानेन अधोलिखिताः समस्याः उत्पद्यन्ते –

1. समुद्रतटस्य सान्निध्यकारणेन वायौ आर्द्रता लावणिकता च अत्यधिका वर्तते। नैके कर्मचारिणः छात्राः च सन्धिवातः, त्वग्रोगः, शीतार्तता इत्यादिभिः रोगैः ग्रस्ताः भवन्ति।
2. वायौ आर्द्रतायाः कारणेन सङ्गणकानि, प्रिन्टर्स्, स्केनर्स्, जलयन्त्राणि इत्यादीनि विद्युत्सञ्चालितानि यन्त्राणि अतिशीघ्रं निष्क्रियाणि भवन्ति। धातुनिर्मितासु नलिकासु अपि अवरोधः भवति। भवनेषु अपि नित्यलावणिकवायुप्रवाहकारणेन विकाराः जायन्ते।
3. समुद्रतटस्य सान्निध्यात् परिसरे प्राप्यमाणं भूगर्भजलं क्षारयुक्तं भवति। तद् न पानयोग्यं न वा स्नान-प्रक्षालनादियोग्यं भवति। एतत् जलं वृक्षेषु सेचनाय अपि प्रयोगार्हं न भवति। तस्मात् भोजनपानादेः कृते अपेक्षितस्य मधुरजलस्य अभावः वर्तते।
4. परिसरीया भूमिः पाषाणमयी वर्तते, अतः भवननिर्माणादौ महत्काठिन्यम् अनुभूयते। ईदृश्यां भूमौ वृक्षाः शीघ्रं न प्ररोहन्ति। तस्मात् परिसरे हरितिमसर्जने अपि महान् क्लेशो भवति तथा च लावणिकजलसंयोगात् तेषां वृद्धौ रूपे च महान् दुष्प्रभावः आपतति।
5. यन्त्रागारस्य सान्निध्यात् यन्त्रागारस्य धूमनलिकाभ्यः अहर्निशं मुच्यमानः धूमः दुर्गन्धः च विश्वविद्यालयपरिसरं निरन्तरं मलिनीकरोति, छात्रालये निवसतः छात्रांश्च रोगयुक्तान् करोति।

- **अध्येतृसंख्याभावः**

आभियान्त्रिक्यादि-अध्ययनधाराणां वैपुल्यात् सामाजिकाः तत्तुलनाया संस्कृताध्येतॄणां वित्तोपार्जनसामर्थ्यं शङ्कन्ते। तस्मात् कारणात् व्याकरणादिशास्त्राणाम् अध्ययनाय आगन्तारः छात्राः विरलाः एव। तत्रापि अधिकांशाः शास्त्रिकक्षाम् उत्तीर्य वृत्त्यन्वेषणरताः, कर्मकाण्डादिलघुलघुवृत्तिषु प्रेरिताः भवन्ति। तस्मात् अनुस्नातकक्षासु अध्येतृसंख्या विरलतरा भवति। तस्मात् विश्वविद्यालयः मुख्यकेन्द्रे मीमांसा-न्याय-धर्मशास्त्रादीनां नैकेषां महत्त्ववतां शास्त्राणाम् अध्यापनं सुकरं नास्ति। यानि शास्त्राणि अध्याप्यन्ते तेषां कृते अपि पर्याप्तानां प्राध्यापकानां नियुक्तौ असमर्थः। सामान्यतः मेधाविनां तथापि निर्धनानां छात्राणाम् अत्र निःशुल्कवत् अध्ययनं भवति। सम्पूर्णतया सर्वकारीयधनेन एव प्रचालन् अयं विश्वविद्यालयः अधिकान् शोधप्रकल्पान् कर्तुं नार्हति।

Link for English Version:

https://sssu.ac.in/images/NAAC_Criteria/doc/SWOC_Weakness%20in%20English.docx

***Institutional Opportunity :***

**विश्वविद्यालयाय अवसराः**

संस्कृतशास्त्राणां प्रचार-प्रसाराय श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य अत्यधिकः विकासः आवश्यकः। तदर्थं विश्वविद्यालयः नैकान् अवसरान् पश्यति। ते यथा -

- **राष्ट्रियाध्यापकशिक्षापरिषद्द्वारा विश्वविद्यालयेन संयुक्त-शास्त्रि-शिक्षाशास्त्रिपाठ्यक्रमस्य सञ्चालनाय सद्यः प्राप्ता अनुमतिः -**

एतया अनुमत्या अपि विकासस्य द्वारम् उद्घाटितम्। शिक्षाशास्त्रिपदवी व्यावसायिकी पदवी वर्तते। अतः नैके छात्राः अस्मिन् अभ्यासक्रमे अध्येतुम् उत्सुकाः भवेयुः। एतेन परिसरे अध्येतॄणां संख्यायाम् अभिवृद्धिः अवश्यं भविष्यति। गुजरातराज्यस्य अयं प्रथमः पाठ्यक्रमः भविष्यति। एतदतिरिच्य आगामिवर्षे विश्वविद्यालयः ऑनलाईन तथा दूरस्थशिक्षाद्वारा पदविकापाठ्यक्रमान्; ‘एम्.-ए.-इन्-हिन्दु-स्टडीस’ तथैव च एम. ए. इन् संस्कृत (जनरल) इति पाठ्यक्रमान् आरप्स्यते।

- **सर्वकारस्य आनुकूल्यम्** – गुजरातराज्यस्य सर्वकारः संस्कृतविषये आदरातिशयवशात् अस्य विश्वविद्यालयस्य विषये अत्यन्तम् आनुकूल्यम् अस्ति। तस्मात् विश्वविद्यालये अतिथि-आवासः, योगभवनम्, ग्रन्थालयभवनम् इत्यादीनां भौतिकसुविधानाम् इतरासां सुविधानां च आवश्यकताः तैः सपदि पूर्यन्ते।
- **विश्वविद्यालयद्वारा सृज्यमानाः सुविधाः** –

सद्यः एव गुजरातसर्वकारद्वारा उदारतया प्राप्तेन अनुदानेन विश्वविद्यालयपरिसरे ‘गार्गी’ कन्याछात्रावासः, ‘श्रीः’ अतिथिभवनं, ‘बृहस्पतिः’ ग्रन्थालयः, ‘पातञ्जलम्’ योगभवनम् तथैव च क्रीडाङ्गणं च निर्मीयमाणानि सन्ति। परिसरे जायमानेन सुविधावर्धनेन विश्वविद्यालयस्य विकासः भविष्यति। सद्यः एव ‘ज्योतिः’ इत्याख्यः विश्वविद्यालयस्य अन्तर्जालीयः ज्ञाननिधिः अपि विश्वविद्यालयेन लोकाय समर्पितः।

- **गुजरातराज्यस्य धार्मिक-आध्यात्मिकसंस्थानां समर्थनम्** –

सर्वाः अपि धार्मिक्यः आध्यात्मिक्यश्च संस्थाः राज्ये संस्कृतस्य पोषणार्थं स्थापितस्य अस्य विश्वविद्यालयस्य विविधैः प्रकारैः समर्थनाय सदैव उत्सुकाः भवन्ति।

- **राष्ट्रियशिक्षानीतौ संस्कृताय प्राप्तं महत्त्वम् -**

२०२०तमे वर्षे केन्द्रसर्वकारेण अधिकृतायां राष्ट्रियशिक्षानीतौ संस्कृतस्य मुख्यधारायाम् आनयनस्य विषये यत्नः, शालासु अपि प्रारम्भिककक्षासु एव संस्कृताध्यापनस्य आरम्भः, योगायुर्वेदज्योतिषवास्त्वादिविद्यानां विषये महत्त्वोपस्थापनम्, प्रगताध्ययनाय अपेक्षितस्य साहित्यस्य महता प्रमाणेन भारतस्य प्रादेशिकभाषासु अनुवादः, भाषाविश्वविद्यालयस्य बहुविषयकता इत्येते पक्षाः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य समाजे व्याप्तये अत्यन्तम् उत्तमानि साधनानि भविष्यन्ति।

- **संस्कृतमहाविद्यालयानां सहयोगः, संस्कृतबोर्ड इत्यस्य स्थापना च -**

गुजरातस्य उत्तरदिशि अम्बाजीतः दक्षिणदिशि मगोदपर्यन्तं, पूर्वदिशि दाहोदतः पश्चिमदिशि द्वारकापर्यन्तं सर्वासु दिक्षु समर्थैः न्यासैः संस्थापिताः संस्कृतमहाविद्यालयाः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन सह संलग्नाः वर्तन्ते। एतेषु केचन महाविद्यालयाः छात्रसङ्ख्यादृष्ट्या, अध्यापकसंख्यादृष्ट्या, परिसरस्य विशालतादृष्ट्या च विश्वविद्यालयस्य समृद्धये उपकारकाः सन्ति। एतैः महाविद्यालयैः विश्वविद्यालयोऽयं सम्पूर्णं गुजरातं व्याप्नोति। ऐषमः गुजरातसर्वकारेण एतेषां महाविद्यालयानाम् इतोऽधिकाय विकासाय ‘गुजरातराज्यसंस्कृतबोर्ड’ इत्यस्य स्थापना कृता। एतेन महाविद्यालयानां शैक्षणिकस्तरः वर्धिष्यते। गुजरातराज्ये विद्यमानानां महाविद्यालयानां संवर्धनाय गुणवत्तायुक्तशिक्षणाय च अवसरः समुपस्थापितोऽस्ति। तेषां गुणवत्ताबलेन विश्वविद्यालयस्य न केवलं भविष्यत्काले छात्राणां संख्यायाम् अभिवृद्धिः अपितु बहुविषकतादृष्ट्या विविधविविधाधाधुनिकनवीनविषयाणां सङ्कल्पनाः किञ्च तासां कार्यान्वयनं साधयितुं विश्वविद्यालयः सुतरां समर्थः भविष्यति।

Link for English Version:

https://sssu.ac.in/images/NAAC_Criteria/doc/SWOC_opportunity%20in%20English.docx

***Institutional Challenge :***

विश्वविद्यालयाय समाह्वानानि

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुरतः विशिष्टानि समाह्वानानि अपि सन्ति। तानि यथा -

- **संस्कृतं प्रति, भारतीयविद्याः प्रति च जनानाम् अभिप्रायस्य परिवर्तनम् -**

संस्कृतसदृशे विषये, भारतीयविद्याविषये च प्रगताध्ययनं सम्भवति, किञ्च प्रगताध्ययने सति समाजशास्त्रम्, अर्थशास्त्रम्, भौतिकविज्ञानम्, मनोविज्ञानम्, विधिशास्त्रम्, मन्दिरप्रबन्धनादिदिविषयेषु सम्यक् गतिः भवितुम् अर्हतीति तादृशबोधजागरणद्वारा समाजे संस्कृतशास्त्रनिहिततत्त्वजिज्ञासाविषये प्रवृत्तिसम्पादनम्, तदर्थं संस्कृतसम्भाषणं तन्मुखेन संस्कृतं प्रति आत्मीयतासम्पादनम्, विविधशास्त्रीयविषयोपरि विविधानां व्याख्यानानाम् उपस्थापनम्, उत्तमलेखानां प्रस्तुतिः इत्येतादृशाः उपायाः विश्वविद्यालयस्य समाह्वानरूपेण विद्यमानाः सन्ति।

- **संस्कृतशिक्षणेन अर्थोपार्जनसम्भावनानां विषये समाजस्य अभिप्रायपरिवर्तनम्** –

संस्कृतविषये स्वहृदि आदरं वहत्सु छात्रेषु अपि केवलं कर्मकाण्डादिलघुलघुकर्मणि प्रवृत्तिर्दृश्यते। अतः तेषां पुरतः वैश्विकदृष्ट्या राष्ट्रदृष्ट्या च संस्कृतशास्त्रनिहितज्ञानाहरणद्वारा विशिष्टोपलब्धिविषये सम्भावनाजागरणम्, यथा लोकसेवा-प्रान्तसेवाऽऽयोगादिषु वृत्तिप्राप्तिः, योगशिक्षकता, अनुवादकौशलम्, न्यायालये न्यायोपस्थानम्, शोधदृष्ट्या संस्कृतग्रन्थानां महत्त्वप्रदर्शनम्, वैदिकग्रन्थेषु संस्कृतशास्त्रेषु च जल-आयु-भूगर्भ-कृषि-वाणिज्य-प्रबन्धनविज्ञानानां संशोधनम्, व्यक्तित्वनिर्माण-कौशलविकासादिविषयेषु गीतादिग्रन्थानाम् उपयोगः, कोरोनादिसङ्क्रमणस्य सङ्कटकाले आत्मनियन्त्रणम्, अनुशासितजीवनशैल्याः सम्पादनम् इत्येतेषां विषयाणां सम्यक् उपस्थापनद्वारा तेषु संस्कृतशास्त्रपठने, शास्त्रनिहिततत्त्वानाम् अवगाहने रुच्युत्पादनम्, प्रोत्साहनम् इत्यादीनि समाह्वानानि श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य पुरतः सन्ति।

- **उत्तममानवनिर्माणम्**

कोरोनादिसङ्क्रमणस्य सङ्कटकाले आत्मनियन्त्रणम्, अनुशासितजीवनशैल्याः सम्पादनम्, तेन मुखेन सम्पूर्णविश्वस्मिन् भारतीयजीवनस्य कृते यादृशी सद्भावना, सम्भावना च समजनि, तादृशजीवनं संस्कृताधारितमेव। तादृशजीवनचर्यां स्वयमाचर्य सम्पूर्णविश्वस्य पुरतः जीवनादर्शान् स्थापयितुम्, उत्तमानां छात्राणां पङ्क्तिं निर्मातुं विश्वविद्यालयस्य पुरतः एकं समाह्वानं वर्तते। येषु मानवेषु सत्यम्, त्यागः, तपः, आर्जवम्, सेवा आदयः सद्गुणाः अन्विताः भविष्यन्ति।

- **संस्कृतशास्त्राणां सान्दर्भिकताप्रतिपादनम्** –

संस्कृतशास्त्राणि यद्यपि महान्ति सन्ति, तथापि तेषां वर्तमाने काले व्यवहारे यथा अध्यात्मनि अनुप्रयोगः भवितुमर्हति तथा व्यवहारे अपि शास्त्रसिद्धान्तानां प्रयोगप्रतिपादनस्य महत् समाह्वानं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुरतः वर्तते।

- **राज्ये संस्कृताय समुचितस्थानस्य प्रापणम् -**

गुजरातराज्ये षष्ठकक्षातः संस्कृताध्ययनं कार्यते। अत्र नैकेषु विश्वविद्यालयेषु कलाशाखायाम् अपि संस्कृतं पाठ्यते। किन्तु समाजे भारतीयविद्यानां महत्त्वस्य पुनःप्रतिष्ठापनाय, सामाजिकेषु च भारतीयतायाः पुनर्जागरणाय च संस्कृतस्य यथा महत्त्वं वर्तते तथा स्थानस्य गुजरातराज्ये प्रापणम् इति एतत् सम्प्रति श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुरतः महत् समाह्वानं वर्तते।

- **भौगोलिक-पर्यावरणगतसमस्यानां सम्मुखीकरणम् -**

विश्वविद्यालयस्यास्य पुरतः नैकाः भौगोलिक्यः पर्यावरणगताः समस्याः सन्ति, यासां विविधैः उपायैः समाधानमपि विश्वविद्यालयस्य विकासयात्रायां महत् समाह्वानं वर्तते। क्षारयुक्तस्य जलस्य मधुरजलवत् उपयोगस्य कृते संस्कृतशास्त्रनिहितानां तत्त्वानाम् अन्वेषणम्।

- **छात्रसंख्यायाः समस्यायाः सम्मुखीकरणम् -**

विविधसंस्कृतशास्त्राणाम् इतराधुनिकविषयैः सह सम्बन्धस्थापनद्वारा बहुधानाम् आयामानां सर्जनम्, तेषां क्रियान्वयनमुखेन आधुनिकजीवनसमस्यानां विषये संशोधनम्, तदर्थं छात्रेषु आकर्षणम् एकं समाह्वनम् अस्ति। तद्यथा संस्कृतम् आधुनिकभाषाविज्ञानम्, योगः सामाजिकं सामरस्यं च, यज्ञानां विविधसंस्काराणां च महत्त्वम्, काव्येषु निहितं तत्त्वं जीवने आनन्दस्य प्राप्तिश्च।

Link for English Version:

https://sssu.ac.in/images/NAAC_Criteria/doc/SWOC_challenge%20in%20English.docx

**Criteria wise Summary**

***Curricular Aspects :***

**प्रथम-निकषः (सारः)**

अस्मिन् प्रथमनिकषे पाठ्यचर्यायाः संरचना विकासश्च, शैक्षिकनमनीयता, पाठ्यचर्यासंवर्धनम्, प्रतिपुष्टिप्रणाली इति चतुर्णां विषयाणां प्राधान्येन विमर्शः कृतोऽस्ति।

1. **पाठ्यचर्यायाः संरचना विकासश्च**

अत्र विश्वविद्यालयपरिसरे अध्याप्यमानविषयाणां विवरणमस्ति। पाठ्यचर्यायां स्वीकृतानां शास्त्रग्रन्थानां स्थानीय-प्रादेशिक-राष्ट्रिय-वैश्विकविकास्य दृष्ट्या पाठ्यक्रमस्योपगोगिता दर्शिताऽस्ति। अत्र पाठ्यक्रमस्य परिणामस्य सन्धानम् एवं पाठ्यक्रमः तत्परिणामाश्च गुणमित्या सह प्रदर्शिताः सन्ति। शास्त्रिकक्षायां वेद-पुराण-साहित्यशास्त्र-व्याकरण-ज्योतिष-सर्वदर्शनविषयाः संस्कृतमाध्यमेन उपलभ्यन्ते। शास्त्रिकक्षायाः मुख्यगौणविषयकपत्राणां अनिवार्यसस्कृतं च इति १२० प्रश्नपत्राणां शतप्रतिशतं पाठ्यक्रमः संस्कृतेन समुपलभ्यते। आचार्य-तत्त्वाचार्यकक्षयोः सर्वप्रश्नपत्राणि संस्कृतमाध्यमेनोपलभ्यन्ते पाठ्यन्ते च। तत्त्वाचार्यकक्षायाः लघुशोधनिबन्धः संस्कृतभाषायां विलिख्यते। अत्र विश्वविद्यालये पाठ्यक्रमसंरचनायां शास्त्राध्यापने अनुसन्धाने कक्षेतरक्रियाकलापेषु संस्कृतमनुस्यूतं वर्तते। विगतपञ्चवर्षेषु सञ्चालितेषु पाठ्यक्रमाः पुनरीक्षिताः तद्वृत्तांशाः अपि अत्र प्रस्तुता वर्तन्ते। विश्वविद्यालयस्य पाठ्यक्रमे येषु पाठ्यपत्रेषु उद्यमिता, आमूलशास्त्राध्ययनम्, सर्जनात्मकं लेखनम्, कौशलविकासः, उद्योगप्राप्तिसामर्थ्यम् इत्येतान् बिन्दून् लक्ष्यीकृत्य पाठ्यक्रमसंरचना कृता विद्यते।

1. **शैक्षणिकनमनीयता**

विश्वविद्यालये विविधायामवन्तोऽभिनवाः पाठ्यक्रमाः कल्पिताः सन्ति। आचार्यकक्षायां योगशास्त्रस्य एम.ए. पाठ्यक्रमः अपि सञ्चाल्यते। पदविकापाठ्यक्रमाध्ययनस्याप्यवसरः विश्वविद्यालयेन प्रदीयते। अस्याः गुणमित्याः समर्थनाय विद्यासङ्कायस्यैवं विद्यापरिषदः उपवेशनमपि यथासमयं भवति। विश्वविद्यालयेऽध्याप्यमानविषयेषु प्रत्यक्षदूरस्थशिक्षणपद्धत्योः स्वयमधितन्त्रिमाध्यमेन पाठ्यक्रमाः सञ्चालिताः भवन्ति। शास्त्रि-आचार्य-तत्त्वाचार्य-शिक्षाशास्त्रि-अभ्यासक्रमेषु विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या ऐच्छिकपाठ्यपत्रप्रणाल्या च प्रवर्तितानां पाठ्यक्रमाणाम् अनुसरणं क्रियते। संपूरकपरिवर्धकपाठ्यक्रमाः, श्रेयःप्रणालीव्यवस्थाः अपि विश्वविद्यालये सञ्चाल्यमानानां पाठ्यक्रमाणां शैक्षणिकनमनीयतां प्रदर्शयन्ति।

1. **पाठ्यचर्यासंवर्धनम्**

विश्वविद्यालयस्य पाठ्यचर्यारूपरेखायां विशिष्टपाठ्यांशाः तथा च व्यावहारिकता वर्तते। अस्यां पाठ्यचर्यायां छात्रस्य गुणानां समग्रविकासः भवेद् एतदर्थं विशेषावधानं दीयते। तस्मात् छात्रः विभिन्नकौशलानि गुणांश्च अर्जयति। पाठ्यचर्यायाः क्रियान्वयनं प्रभविष्णुतया भवेदिति हेतोः एतस्याः अद्यतनत्वमपि सम्पाद्यते। विश्वविद्यालयपाठ्यक्रमे स्त्रीपुरुषसमानता, पर्यावरणजागरूकता, मानवीयमूल्यसंवर्धनम्, चरित्रनिर्माणम्, नीतिमत्ता, सहिष्णुता, सात्त्विकता, काव्यकलाकौशलम्, भारतीयपरम्पराज्ञानम्, वास्तुशास्त्रीयविषयाणां ज्ञानम्, सरलभाषाशिक्षणम्, ज्योतिष-मन्दिरप्रबन्धनमित्यादिविविधविषयेषु पाठ्यचर्यायामंशानां निवेशः वर्तते। शिक्षणक्रमे आङ्‌लाध्ययन-सङ्गणक-प्रादेशिकभाषा-इतिहास-अर्थशास्त्राणामध्ययनस्यावसराः कल्पिताः सन्ति। शास्त्रिकक्षायाम् इतिहासः, प्राचीनराजनीतिशास्त्रम्, अर्थशास्त्रम्, समाजशास्त्रम् इति विषयाः अपि पाठ्यन्ते। तत्र प्राचीनराजनीतिशास्त्रम् अर्थशास्त्रं च इत्यत्र कौटिल्यस्य अर्थशास्त्रं शुक्रनीतिः च पाठ्येते, तथा च भाषावैज्ञानिकानां परिचयः, संस्कृतसम्भाषणमपि पाठ्यते। विगतपञ्चवर्षेषु जीवनकौशलप्रद-मूल्यसंवर्धक-पाठ्यपत्राणां समावेशः कृतः। दर्शन-ज्योतिष-व्याकरण-वेद-साहित्य-पुराणविषयकाः अन्तःशास्त्रीयज्ञानसंवर्धकाः प्रशिक्षणकार्यक्रमाः अपि विश्वविद्यालयेन आयोज्यन्ते यत्र कति के च छात्राः भागं गृहीतवन्तः तदपि दर्शितम् अस्ति अत्र।

1. **प्रतिपुष्टिप्रणाली**

अस्य विश्वविद्यालयस्य पाठ्यक्रमनिर्माणे विविधनियमनिर्माणे च नैके विद्वांसः आमन्त्र्यन्ते। अभ्यासक्रमसमित्यां निश्चितः अभ्यासक्रमः विद्यासङ्काये विद्यापरिषदि च विमृश्यते। पाठ्यक्रमाणां प्रतिपुष्टिः तस्याः विभिन्नलाभग्राहिभ्यः यथासमयं स्वीक्रियते। यथा विद्यार्थिभ्यः, अध्यापकेभ्यः, अभिभावकेभ्यः, पूर्वच्छात्रेभ्यः, वृत्तिप्रदातृभ्यश्च प्रतिक्रियां प्रतिपुष्टिं च स्वीकर्तुं सम्यक् प्रणाली विद्यते। एतेभ्यः अभिभावकादिभ्यः आगतायाः पाठ्यचर्याणां प्रतिपुष्टेः सम्प्राप्तायाः सूचनायाः च प्रासङ्गिकताम् औचित्यं च परिलक्ष्य समवलोकनं क्रियते, येन समाजस्य आवश्यकतापरिपूर्तिः भवति।

***Teaching-learning and Evaluation :***

**द्वितीय-निकषः (सारः)**

मूल्याङ्कनप्रत्यायनयोः प्रक्रियायाः अस्मिन् द्वितीयनिकषे विश्वविद्यालये विविधपृष्ठभूमिवतां विविधकौशलयुक्तानाञ्च छात्राणां प्रभविष्णुना अध्यापनेन अभिवृद्धिर्भवेत् तदर्थं क्रियमाणाः विभिन्नाः प्रयासाः वर्णिताः सन्ति। अस्य निकषस्य केन्द्रभूताः प्रमुखांशाः एवं भवन्ति –

1. **छात्रनामाङ्कनं छात्रविवरणिका च**

अस्मिन् विश्वविद्यालये सञ्चाल्यमानपारम्परिकपाठ्यक्रमेषु छात्राणां प्रवेशनार्थं तान् आक्रष्टुं व्यूहान् अवलम्ब्य विभिन्नेषु पाठ्यक्रमेषु छात्राणां प्रवेशप्रक्रिया उत्तमप्रशासितप्रक्रियायुक्ता सती पारदर्शिनी भवेत् तदर्थम् अधितन्त्रिद्वारा प्रवेशप्रक्रिया भवति। यत्र राज्य-केन्द्र-शासितैः संबद्धानां नियामकव्यवस्थानां मानदण्डानाञ्च अनुपालनं भवति। अत्र  विभिन्नसामाजिक-आर्थिक-सांस्कृतिक-शैक्षिकपृष्ठभूमिभ्यः आगतानां छात्राणाम् (बालकानां बालिकानाञ्च) उत्तमतया प्रातिनिध्यम् अस्ति।

1. **छात्रवैविध्यस्य आवश्यकतानां सम्पूर्तिः**

विभिन्नवर्गीयच्छात्राणाम् अधिगमस्तरस्य मूल्याङ्कनाय अभिगमप्रणाली विद्यते। विश्वविद्यालयोऽयं विभिन्नपृष्ठभूमीनाम्, विभिन्नक्षेत्राणां च छात्राणाम् आवश्यकताः परिपूरयितुं नैकविधान् विशिष्टोपायान् कल्पयति। अध्यापकैः विभिन्नकक्ष्यासु, वाग्वर्धिनीसभायां, विभिन्नकार्यक्रमेषु, कालिकपरीक्षासु च छात्राणां सततं मूल्याङ्कनं विधीयते येन मन्दाधिगन्तृणाम् अग्रसराधिगन्तृणां च छात्राणाम् अभिज्ञानं भवति। अपि च नूतनप्रविष्टानां छात्राणाम् अपेक्षाः पूरयितुं सेतुपाठ्यक्रमः अपि सञ्चाल्यते।

1. **शिक्षणाधिगमप्रक्रिया**

अयं विश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनार्थं गुरुकुलकेन्द्ररूपं संस्कृतवातावरणं जनयित्वा छात्रेषु सर्जनात्मकतया सह मूल्यव्यवस्थाम् उत्पादयति। विभिन्नशास्त्राणाम् अध्यापने परम्परागतप्राच्याधिगमप्रणाल्याः अपि उपयोगः क्रियते तद्यथा - मार्गदर्शक-च्छात्रव्यवस्था, छात्रावासे छात्राणां गुरुकुलवत् दिनचरी, गुरुकुलपद्धत्या दीक्षान्तसमारोहस्य आयोजनम् इत्यादि। गुरुकुलपद्धत्या अधीयानाः छात्राः समग्रदेशे विभिन्नशैक्षणिकप्रतियोगितासु भागं गृहीत्वा स्वप्रावीण्यप्रदर्शनपुरस्सरं विश्वविद्यालयस्य गौरवमभिवर्धयन्ति। अत्र उच्चतरसंस्कृताध्ययनसंस्थाभिः आधुनिकविषयाध्येतृच्छात्राणां प्रवेशार्थं तत्सम्बद्धपाठ्यक्रमाः अपि सञ्चाल्यन्ते। अत्रत्याः शिक्षकाः वैयक्तिकं सामूहिकं चोभयविधम् अध्यापनं समावेशयन्ति।

1. **अध्यापकविवरणिका तद्गुणवत्ता च**

शास्त्राध्ययनैः सह नूतनपाठ्यक्रमाणां सङ्गणकीय-भाषाशास्त्रप्रभृतीनाम् उदीयमानानां क्षेत्राणां यथा संस्कृतमातृकासम्पादनम्, सङ्गणकीयभाषाशास्त्रम् इत्यादिषु संशोधनकार्यार्थम् अपि च नूतनपाठ्यक्रमेषु

उदीयमानक्षेत्रीयपाठ्यक्रमेषु छात्राणाम् अभियाचनां पूरयितुम् अस्मिन् विश्वविद्यालये योग्यतावन्तः अध्यापकाः उपलभ्यन्ते। एतेषां शिक्षकाणां नियुक्तौ पर्याप्तप्रक्रियानुपालनं विधीयते। अत्रत्याः अध्यापकाः स्वक्षेत्रे साम्प्रतिकविकासान् ज्ञात्वा स्वीयकार्ये सतताभिवृद्धिमभीप्सावन्तः व्यक्तिस्तरे संस्थास्तरे च उत्कृष्टतायाः कृते परिश्राम्यन्ति। राष्ट्रिय-अन्ताराष्ट्रियसङ्गोष्ठी, वाक्यार्थसभा, कविगोष्ठी इत्यादिकार्यक्रमेषु च भागग्रहणार्थं प्रोत्साहनं प्रदीयते।

1. **मूल्याङ्कनप्रक्रिया तत्परिष्करणोपायाश्च**

पाठ्यक्रमाणां विविधस्तरेषु छात्रैः सम्पादितस्य ज्ञानस्य कौशलानां च मापनाय उत्तमा पारदर्शिनी च मूल्याङ्कनप्रक्रिया अनुपाल्यते। शैक्षणिकव्यवहारेण सह प्राशासनिककार्येषु अपि संस्कृतस्य समावेशोऽस्ति। परीक्षायाम् उत्तरलेखने, शोधप्रबन्धेषु, लघुशोधप्रबन्धेषु संस्कृतभाषायाः अभिव्यक्तिमाध्यमत्वेन उपयोगः भवति। सञ्चालिताः विभिन्नाः पाठ्यक्रमाः तेषां परिणामैः युक्ताः वर्तन्ते। एते परिणामाः वैश्विकस्तरीयाः भवेयुः अथ च नियोक्तॄणाम् अभियाचनानुसारं भवेयुः एतद्विषये विशदचिन्तनं कृत्वा नावीन्यं सम्पाद्यते। परीक्षाप्रश्नप्रत्राणां गुणात्मकता, पारदर्शिव्यवस्था, छात्राणां प्रतिपुष्टिव्यवस्था, निर्धारिते समये परीक्षानिर्वहणम्, काले फलितांशघोषणा च विश्वविद्यालये नियमानुगुणं भवति।

1. **छात्रस्य निष्पत्तिः अधिगमपरिणामाश्च**

कार्यक्रमाणां परिणामस्य आधारेण सत्रान्तपरीक्षायाः आधारेण एतत्सुनिश्चितं क्रियते यत् विभिन्नकार्यक्रमाणां, कार्यक्रमविशिष्टानां, पाठ्यक्रमपत्राणां च परिणामाः छात्रैः कियता परिमाणेन प्राप्ताः सन्तीति। परीक्षायाः एतन्महत्त्वाधारेण विश्वविद्यालये एका समीचीना परीक्षाप्रक्रिया अस्ति। यत्र विश्वसनीया परीक्षापद्धतिः, मूल्याङ्कनप्रणाली, यथासमयं परीक्षापरिणामोद्घोषणा च भवति। २०१५ इति शैक्षणिकवर्षादारभ्य विंशत्यधिकाः छात्राः विश्वविद्यालय-अनुदान-आयोग-राष्ट्रियपात्रतापरीक्षां, कनिष्ठ-शोधाध्येतृवृत्तिं, राज्यपात्रतापरीक्षां च उत्तीर्णवन्तः।

1. **छात्रसन्तुष्टेः सर्वेक्षणम्**

छात्रसंन्तुष्टेः स्तरः छात्राणामनुभवानामाधारेण, बौद्धिकोपलब्धीनामाधारेण च निर्णीयते। तदर्थं विश्वविद्यालयः छात्रसन्तुष्टिसर्वेक्षणम् अनुपालयति।

***Research, Innovations and Extension :***

**तृतीय-निकषः (सारः)**

मूल्याङ्कनप्रत्यायनयोः अस्मिन् तृतीयनिकषे विश्वविद्यालयस्य अनुसन्धानं, नवाचारः, विस्तारः, संशोधनसंस्कृतिमभिवर्धयितुं सुविधाः, समाजोपयोगिपरियोजनाः, अन्तःशास्त्रीयमनुसन्धानं, नानाशास्त्राणां परिज्ञानम् इत्यादिविषयाणां विमर्शः कृतोऽस्ति। अस्मिन् निकषे सप्त प्रधानसूचकाः सन्ति, येषां सारः अधः प्रदीयते।

1. **अनुसन्धानप्रोन्नयनं सौविध्यानि च**

अनुसन्धानस्य प्रगतेः निमित्तं विश्वविद्यालये अनुसन्धानसमितिः अस्ति। तस्य विवरणं कार्यवृत्तं च अत्र निरूपितं वर्तते। विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां वरिष्ठशोधच्छात्राणां शोधोत्तरानुसन्धातृणाम् अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां सङ्ख्या सप्त सन्ति। विश्वविद्यालयपरिसरे यज्ञशाला, संगणकप्रयोगशाला, सूचनासम्प्रेषणप्रविधिप्रयोगशाला, योगशिक्षणकेन्द्रम्, अनुसन्धानकेन्द्रम्, पाण्डुलिपिसंरक्षणकेन्द्रम्, दृश्य-श्रव्यसामग्रीनिर्माण-चित्राङ्कनशाला इत्यादीनि सौविध्यानि सन्ति। अनुसन्धानस्य प्रोन्नत्यै विश्वविद्यालयस्य गुणात्मकशोधकार्यप्रवृत्तेः शोधनीत्यनुसारं सुचारुयोजनायाः नियमाः सन्ति। एतावता ६७ ग्रन्थाः प्रकाशिताः सन्ति।

1. **अनुसन्धानाय आर्थिकस्रोतसां सङ्ग्रहः**

विश्वविद्यालयेन अनुसन्धानाय आर्थिकस्रोतसां संग्रहार्थं साहाय्यं क्रियते। संस्कृतग्रन्थस्य टीका-व्याख्यालेखनार्थं प्रोत्साहनधनराशिः दीयते। अन्तःशास्त्रीयाणाम् अन्तर्विभागीयानाञ्च अनुसन्धानकार्याणां कृते विनिमयार्थं विश्वविद्यालयेन शिक्षकाः प्रेरिताः भवन्ति। विद्यावारिधिकार्यशाला, अनुसन्धानात्मकग्रन्थप्रकाशनम्, शोधपत्रिकाप्रकाशनम् इत्यादीनाम् व्यवस्थापनाय प्रकाशनाय च आर्थिकस्रोतसां सङ्ग्रहः राज्यसर्वकारस्य आर्थिकानुदानेन तथा च विश्वविद्यालयस्य स्वकीयार्थिकप्रबन्धनेन भवति। शिक्षकाणां शोधलेखानां प्रकाशनाय अपि विश्वविद्यालये शोधज्योतिः वाक्यार्थज्योतिः इति पत्रिकामाध्यमेन सहभागात्मकः सहयोगः अस्ति। विगतपञ्चवर्षेषु अध्यापकैः नवाचारविषये पुरस्काराः सम्माननानि चाधिगतानि। विश्वविद्यालयेन अभिनवानां सद्यः स्थापितानां  संस्थानां मार्गदर्शनं प्रदत्तम्।

1. **नवाचारयुता अन्योन्याश्रयव्यवस्था**

नानाक्षेत्रेषु नवोन्मेषाय व्यवस्था विश्वविद्यालये वर्तते। नवाचारादिविषयेषु गोष्ठी आयोजिता भवति। अनुसन्धानकार्ये कृतिचौर्यं कदाचारं च निरोद्धुं विश्वविद्यालयेन "उरुकुण्ड"-तन्त्रांशमाध्यमेन शोधकार्याणां परीक्षणं भवति। ये अध्यापकाः  राज्य-राष्ट्रिय-अन्ताराष्ट्रियास्तरे पुरस्कृतिं प्राप्तुवन्ति, अथ च सर्जनात्मक-विमर्शात्मकशास्त्रीयलेखनं कुर्वन्ति, विश्वविद्यालयः तेभ्यः धनराशिं प्रदाय प्रोत्साहयति। विश्वविद्यालयद्वारा विगतेषु पञ्चवर्षेषु ५४ छात्राः 'विद्यावारिधिः' इति उपाधिना विभूषिताः सन्ति।

1. **शोधप्रकाशनानि पुरस्काराश्च**

विश्वविद्यालयस्य अध्यापकाः विगतपञ्चवर्षेषु ISSN मानकयुक्तशोधपत्रिकासु  १५४ शोधलेखानां प्रकाशनं, ISBN शोधपत्रिकासु  १०५ शोधलेखानां , ४० पुस्तकानाञ्च प्रकाशनं कृतवन्तः। विश्वविद्यालयेन अन्ताराष्ट्रियस्तरीया "शोधज्योतिः" इति प्रवरसमीक्षित-शोधपत्रिका प्रतिवर्षं प्रकाश्यते।

1. **परामर्शः**

अस्य विश्वविद्यालयस्य शिक्षकाणां ज्ञानस्य अनुभवस्य च विनिमयार्थं विश्वविद्यालये परामर्शनीतिः विद्यते। अध्यापकाः अन्यसंस्थानां कृते स्वीयविशेषज्ञतां विस्तीर्य विश्वविद्यालयस्य कृते किञ्चित् आदायं प्राप्नुवन्ति।

1. **विस्तारगतिविधयः**

छात्रेषु प्रभावोत्पादनाय संवेदनशीलताविकासाय सामाजिकविकासाय च वृक्षारोपणम्, महिलासशक्तीकरणम्, स्वच्छताभियानम्, वीथीनाटकम्, राष्ट्रियसेवायोजना, महानुभावानां जन्मजयन्ती इत्यादयः बहवः कार्यक्रमाः विश्वविद्यालयेन सम्पाद्यन्ते। विस्तारगतिविधीनां कृते सर्वकारात् मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु सप्त  पुरस्काराः/ सम्माननानि च प्राप्तानि। विगतपञ्चवर्षेषु उद्योगिसमुदायस्य तथा च अशासकीयसंस्थानानां सहयोगेन राष्ट्रियसेवायोजना-संस्कृतसम्भाषणशिबिर-योगशिबिर-स्वच्छताभियानादिमाध्यमेन नैके कार्यक्रमाः सम्पादिताः। विश्वविद्यालयः अन्याः अपि संस्थाः संस्कृतं प्रति प्रेरयति तदर्थञ्च साहाय्यमाचरति। एतदर्थं स्वर्णिमगुजरातसंस्कृतमहाकुम्भम्, संस्कृतसम्भाषणशिबिराभियानम्, संस्कृतसम्भाषणशिबिरान्वितं जनपदसम्मेलनम्, गृहं-गृहं प्रति संस्कृतम् इत्यादिकार्यक्रमान् आयोजयति। संस्कृतभाषायाः  विकासाय, भारतीयसंस्कृतेः संरक्षणाय, आधुनिकविज्ञानेन सह संस्कृतवाङ्मयस्य सम्बन्धसिद्धये, मानवीयमूल्यबोधस्य सम्प्रतिष्ठायै, विशेषतः विश्वकल्याणाय एवञ्च संस्कृताध्ययनाध्यापनयोः प्रोत्साहनाय विश्वविद्यालयस्य अध्यापकाः कर्मचारिणश्च सर्वदा प्रयन्तशीलाः सन्ति।

1. **सहयोगाः**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः फ्रेन्च-इन्स्टीट्यूट-ऑफ-पॉण्डीचेरी, संस्कृतभारती, विद्याभारती, हैडल्बर्ग-विश्वविद्यालयः, गोपालकृष्णट्रस्ट इत्यादिभिः राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिभिः एकोनविंशति-संस्थाभिः सह शैक्षिक-अभिबन्धान् (MoU) कृतवान्। एताभिः संस्थाभिः सह विश्वविद्यालयः शास्त्रग्रन्थानां प्रकाशनं, संस्कृतभाषानैपुण्यवर्गाः, कार्यशालाः इत्यादिकार्यक्रमान् आयोजितवान्।

***Infrastructure and Learning Resources :***

**चतुर्थ-निकषः (सारः)**

“मूलसंरचना अधिगमस्रोतांसि च” इत्याख्ये चतुर्थनिकषे विश्वविद्यालयस्य भौतिकी सुविधा तथा च पठनपाठनयोः तेषां समुपयोगः, परिसरसौविध्यानाम् अनुरक्षणम् इत्यादिविषयाणां विमर्शः प्रस्तुतोऽस्ति। अत्र चत्वारः प्रधानसूचकाः सन्ति।

1. **भौतिकसौविध्यानि**

विश्वविद्यालये शैक्षणिकपाठ्यक्रमाणां सम्यङ् निर्वहणाय भौतिकसुविधानां पर्याप्तता वर्तते। शैक्षणिकविकासेन सह भौतिकसाधनानामपि वृद्धिः जायमाना अस्ति। विश्वविद्यालयः स्वीय-साधनसामग्रीसम्बद्धव्यवस्थाः वर्धापयन् अस्ति। विश्वविद्यालयस्य शैक्षणिकभवने अध्ययनाय पर्याप्ताः वर्गखण्डाः सन्ति, तेषु चाध्ययनाय अध्यापनाय च साधनानि उपलभ्यन्ते। विश्वविद्यालय-शैक्षणिकभवने एकः सभाखण्डः, एकः गोष्ठीकक्षः, प्राशासनिकभवने एकः सुधर्मा-नामाख्यः गोष्ठीकक्षश्च अस्ति। मुक्ताङ्गणम्, विशालक्रीडाङ्गणम्, संस्कृते विज्ञानमिति चित्रवीथी, सुभाषितफलकानि, ध्यानकेन्द्रम्, क्रीडासाधनानि, पाण्डुलिपिसंसाधनकेन्द्रम्, दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला योगकेन्द्रं च वर्तते। भारतवाण्याः जालपुटे विश्वविद्यालयस्य ग्रन्थाः उपारोपिताः सन्ति। महिलाकेन्द्रम्, छात्रमार्गदर्शनकेन्द्रम्, छात्रसमस्यानिवारणप्रकोष्ठः तथा च सांस्कृतिकप्रवृत्तिकेन्द्रमपि वर्तते। शैक्षणिकभवने सर्ववर्गखण्डेषु अन्तर्जालसुविधा ’वाय्-फाय्’-माध्यमेन उपलब्धा अस्ति। छात्राणां कृते सङ्गणकशाला, द्वयोः प्रकोष्ठयोः स्थायि-प्रोजेक्ट-यन्त्रं तथा अन्यत्र आवश्यकतानुसारं चलत् प्रोजेक्टर-यन्त्रम् उपलब्धम् अस्ति। अध्यापकानां कृते अपि सङ्गणकयन्त्रस्य मुद्रणयन्त्रस्य च व्यवस्था अस्ति।

1. **अधिगमसंसाधनरूपेण ग्रन्थालयः**

विश्वविद्यालयस्य ग्रन्थालये छात्राणां पाठ्यक्रमसम्बद्धाः सूचनाः, ज्ञानं कौशलानि च सम्पादयितुं छात्रान् समर्थान् कर्तुं ग्रन्थाः, शोधपत्रिकाः, तदितराधिगमसामग्र्यश्च उपलब्धाः सन्ति। ग्रन्थालयस्य आधुनिकीकरणाय SOUL तन्त्रस्य उपयोगः क्रियते। विश्वविद्यालयस्य २९ शोधच्छात्राणां संशोधननिबन्धाः शोधगङ्गायाम् उपारोपिताः सन्ति। ग्रन्थालये २२ विरलपुस्तकानि, ३३ मातृकाः तथा च १६ मुद्रितानि दुर्लभपुस्तकानि सन्ति। ग्रन्थालयस्य जालपुटे संस्कृतसूचनासङ्ग्रहः (Sanskrit Database) स्थापितः अस्ति। ग्रन्थालयस्य सहयोगेन भारतवाणी-जालपुटे २४ पुस्तकानि स्थापितानि सन्ति। वेदानां पठनाय सान्द्रमुद्रिकाः (CDs) ग्रन्थालये उपलब्धाः सन्ति। विश्वविद्यालयेन विगतपञ्चवर्षेषु पत्रिकाक्रयणाय ९९४८८, पुस्तकक्रयणाय २२११३६० तथा च संस्कृतसन्दर्भाणाम् (E-Resources) क्रयणाय २७४८० रूप्यकाणाम् उपयोगः कृतो वर्तते। ग्रन्थालयस्य ग्रन्थानाम् अन्वेषणं परिसरे स्थित्वा SOUL तन्त्रेण अपि कर्तुं शक्यते। ग्रन्थालये अवकाशदिनानि विहाय समष्टिरूपेण प्रतिदिनम् ५४ पुस्तकानाम् आदान-प्रदानं भवति। ई.पी.जी. पाठशालायाः अन्तर्जाले विश्वविद्यालयस्य अध्यापकैः कृतानि व्याख्यानानि स्थापितानि सन्ति। छात्राणां कृते शास्त्रप्रवेशाय शास्त्रपरिचयप्रकल्पस्य अङ्गतया अध्यापकैः निर्मितानि ३६ व्याख्यानानि विश्वविद्यालयस्य Youtube Channel उपरि स्थापितानि सन्ति। शास्त्रपरिचयार्थं शास्त्रपरिचायिका पुस्तिका तथा च उपर्युक्तानि सर्वाण्यपि पुस्तकानि विश्वविद्यालयस्य ’ज्योतिः’ इति संस्थागतनिधौ (Repository) स्थाप्यमानानि सन्ति।

1. **सूचनाप्राविधिकी मूलसंरचना**

विश्वविद्यालयस्य अध्यापकेभ्यः कर्मचारिभ्यः छात्रेभ्यः च संस्थाकीय-विद्युत्पत्रसङ्केताः प्रदत्ताः सन्ति। विश्वविद्यालये प्रतिदशच्छात्रम् एकं सङ्गणकयन्त्रम् अस्ति। विश्वविद्यालये माननीयकुलपतेः कार्यालये निवासस्थानेऽपि अन्तर्जालसुविधा अस्ति। कुलसचिवकार्यालये, प्राशासनिकभवने कार्यालयेषु, शैक्षणिकभवने अध्यक्ष-आचार्यकार्यालययोः, अध्यापकानां कार्यालये तथा च छात्राणां कृते अपि अन्तर्जालसुविधा अस्ति। विश्वविद्यालये जनसम्प्रेषणकेन्द्रम्, दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला च वर्तते।

1. **परिसरसौविध्यानाम् अनुरक्षणम्**

विगतपञ्चवर्षेषु शैक्षणिकसुविधायै ५०.१४ लक्षरूप्यकाणां तथा च भौतिकसुविधायै २८.१९ लक्षरूप्यकाणाम् उपयोगः कृतोऽस्ति। विश्वविद्यालये विविधसाधनानां समुपयोगाय, उद्यानपालनाय, काष्ठकार्याय, विद्युत्समीकरणाय, अन्यसम्बद्धकार्याय च वार्षिकः अनुबन्धः (AMC) कृतो वर्तते। भौतिकसुविधाः, ग्रन्थालयः, ग्रन्थालयस्य सुविधाः, विविधयन्त्र-तन्त्राणाम् उपयोगः, विविधसाधनानां संरक्षणपूर्वकं समुपयोगस्य व्यवस्थाः, तदर्थं च अनुदानस्य व्यवस्था इत्यादिमाध्यमेन विश्वविद्यालयोऽयं परिसरसौविध्यानाम् अनुरक्षणं करोति।

***Student Support and Progression :***

**पञ्चम-निकषः (सारः)**

पञ्चमनिकषे विश्वविद्यालये अप्रगतपृष्ठभूमिवतां छात्रवृत्तिः, शुल्कमुक्तिः, छात्राणां विकासः, विविधस्पर्धासु प्रवृत्तिषु च छात्राणां सहभागिता इत्यादयः क्रियमाणाः विभिन्नाः प्रयासाः वर्णिताः सन्ति। निकषस्य केन्द्रभूताः प्रमुखांशाः एवं भवन्ति-

1. **छात्राणां प्रोद्बलनम्**

अस्मिन् विश्वविद्यालये पठतां छात्राणां प्रोद्बलनार्थं परिसरे परामर्शकेन्द्रम्, छात्रसमस्यानिवारणकेन्द्रम्, प्रतियोगितापरीक्षाप्रशिक्षणकेन्द्रम् इत्याद्याः प्रकल्पाः विद्यमानाः सन्ति। अधिगमे काठिन्यमनुभवतां छात्राणां कृते विशिष्टाः अन्तरांशाः अपि कल्पिताः सन्ति। अस्मिन् परिसरे शास्त्राणि वैदिकवाङ्मयं च अध्येतुं समाजस्य सर्ववर्गीयाः छात्राः विद्यार्थिन्यश्च समानावसरं लभेरन् तदर्थम् उपायाः क्रियन्ते। कार्यफलकमुद्रणम्, सर्जनात्मकलेखनं, मातृकासंशोधनमित्यादिकार्यक्रमेषु प्रशिक्षणद्वारा तेषां छात्राणां कौशलानि अभिवर्धयितुं छात्राणां कृते अवसराः कल्प्यन्ते। अत्रत्याः छात्राः समग्रदेशे आयोज्यमानासु संस्कृतस्पर्धासु प्रतिभागिनः भवन्ति। अनया पारम्परिकपद्धत्या शास्त्राध्ययनप्रोत्साहनार्थं प्रेरणा प्राप्यते। विश्वविद्यालयेन प्रतिवर्षं युवमहोत्सवस्य आयोजनं क्रियते। तत्र  उपचत्वारिंशत् शैक्षणिक-सांस्कृतिक-क्रीडास्पर्धाः भवन्ति। अनेन शारीरिकमानसिकशैक्षणिकयात्रायां छात्राः अग्रेसराः भवन्ति। कालिदाससप्ताहादिकार्यक्रममाध्यमेन छात्राणां सर्वाङ्गीणविकासो भवति तथा च कौशलचतुष्टयं वर्धते। अभिनवकविसम्मेलनेन छात्रेषु कवित्वशक्तिः काव्यरचनाकौशलञ्च वर्धते। छात्राः स्वकवितादिप्रातिभं ’मेधा’-’सोमज्योतिः’पत्रिकासु प्रकाशयन्ति तथा च सभायां प्रस्तूय अन्यान् अपि प्रेरयन्ति। श्रीमद्भागवतमाश्रित्य आमुखपटले व्याख्यानमालायां द्वादश व्याख्यानानि प्रस्तुतानि। ’रामायण एवं व्यक्तित्वविकासः, संस्कृतवाक्याभ्यासः, षोडशसंस्कारेषु मानवजीवनमूल्यानि, रघुवंशम् (द्वितीयसर्गः) कथं पठेम’ इत्यादीनाम् अल्पकालीनानां पाठ्यक्रमाणाम् आरम्भो जातः।

अत्र विगतपञ्चवर्षेषु सर्वकारयोजनातिरिक्तसंस्थया प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिः लाभान्वितानां छात्राणां विवरणम् अस्ति। यथा ‘पोस्ट-मैट्रिक’, राष्ट्रियसंस्कृतसंस्थानपक्षतः शोधच्छात्रवृत्तिः, राष्ट्रियच्छात्रवृत्तिः, निःशुल्कभोजननिवासयोः व्यवस्था एतत् सर्वं विश्वविद्यालयेन क्रियते। विविधासु स्पर्धात्मकपरीक्षासु छात्राः उत्तीर्णाः भवेयुः तदर्थं विश्वविद्यालयेन प्रतिवर्षं वर्गाः आयोज्यन्ते, तत्र छात्राः लाभान्विताः भवन्ति। छात्राणां कृते संस्कृतसम्भाषणवर्गस्य, आङ्ग्लवर्गस्य, वाग्वर्धिनी-सभायाः च आयोजनं क्रियते। छात्रेभ्यः वृत्तिपरामर्शः अपि विश्वविद्यालयेन दीयते।

1. **छात्राणां प्रगतिः**

विश्वविद्यालयस्थच्छात्राः अत्र सर्वकारवृत्तिं सर्वेषु क्षेत्रेषु प्राप्नुवन्ति। अन्याभ्यः संस्थाभ्यः छात्राः पठनार्थम् अत्र आगच्छन्ति। अत्रत्याः छात्राः अन्यसंस्थाः अपि गच्छन्ति। राज्य-राष्ट्रियस्तरीयप्रतियोगितासु अस्माकं छात्राः भागं गृह्णन्ति, तत्र विजयमपि प्राप्नुवन्ति। छात्राणां सर्वाङ्गीणविकासाय शास्त्रीयस्पर्धाः प्रगतप्रशिक्षणवर्गाः, क्रीडायोगाभ्यासादयः कार्यक्रमाः भवन्ति।

1. **विविधस्पर्धासु प्रवृत्तिषु च छात्राणां सहभागिता**

अयं विश्वविद्यालयः सामाजिकन्यायसन्दर्भे लाभग्राहिणां विकासाय सर्वसमावेशिव्यवहारान् प्रवर्तयति। विश्वविद्यलयस्थाः योगवर्गीयाः छात्राः द्वितीयराष्ट्रिययोगस्पोर्ट्स-प्रतियोगितायां भागं गृहीत्वा स्थानं प्राप्तवन्तः। अनया प्रतियोगितया छात्राणां शारीरिकविकासः अभवत्। तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठे समायोजिते प्रातिभसमारोहे छात्राः भागं गृहीत्वा पदकानि प्राप्नुवन्ति, अनेन छात्राणां प्रतिभास्फोटनं भवति। प्राशासनिक-शैक्षणिकसमितिषु छात्राणां सहभागिता अस्ति। विश्वविद्यालये छात्राणां व्यक्तित्वविकासाय, प्राशासनिककौशलवर्धनाय, शैक्षणिकयोग्यता-सम्पादनाय, कार्यक्रमादिसञ्चालनस्य च क्षमतालाभाय विविधाः समितयः निर्मिताः सन्ति। 'मेधापत्रिका'-(भित्तिपत्रिका)-माध्यमेन छात्राणां स्वसर्जनात्मकप्रतिभायाः प्रदर्शनं संस्कृतभाषायां भवति। 'सोमज्योतिः'-त्रैमासिकपत्रिकायां छात्रप्रातिभवैभवं वर्तते। अस्मिन् छात्रैः स्वरचना-प्रकाशनार्थम् अवसरः प्राप्यते। रेखाचित्रप्रदर्शिन्यादिमाध्यमेन छात्रेषु रुच्युत्पादनम् अधिकाधिकज्ञानं च वर्धते। विश्वविद्यालयभवनेषु छात्रैः एव सङ्कलितानि सुभाषितानि भित्तौ स्थापितानि सन्ति। 'वाटब्रन्ट्-गुजरात' इत्याख्ये कार्यक्रमे छात्राः प्रदर्शिनीपुरस्सरं भागं गृहीतवन्तः। अस्मिन् विश्वविद्यालये पूर्वच्छात्रसङ्घः अपि कार्यरतो वर्तते। प्रतिवर्षं पूर्वच्छात्रसङ्घस्य सम्मेलनं भवति। विश्वविद्यालयद्वारा विविधकार्यक्रमेषु पूर्वच्छात्राः आमन्त्र्यन्ते। विश्वविद्यालयस्य पूर्वच्छात्राः आर्थिक-साहाय्यमपि कुर्वन्ति। प्राक्तनच्छात्राः इदानीं स्वकीय-सर्वकार-सेवानुभव-उपस्थापनमाध्यमेन तैः अधिगतनूतनशैक्षणिक-सूचनानुभवस्य श्रावणमाध्यमेन एतत्कालीनान् विश्वविद्यालयीयाँश्छात्रान् उपकुर्वन्ति।

*Governance, Leadership and Management :*

**षष्ठ-निकषः (सारः)**

मूल्याङ्कनप्रत्यायनयोः अस्मिन् निकषे विश्वविद्यालयस्य प्रशासन-नेतृत्व-प्रबन्धनविषयेषु विवरणं प्रदत्तमस्ति। अस्य विश्वविद्यालयस्य फलद्भिः प्रारम्भैः नीतयः परिचीयन्ते। ताश्च नीतयः अस्मिन् विश्वविद्यालये मानवसंसाधनव्यवस्थया, नियुक्तिप्रबन्धनेन, प्रशिक्षणप्रबन्धनेन, वित्तीयप्रबन्धनेन च परिलक्षिताः भवन्ति। अस्य निकषस्य मुख्यबिन्दव एवं सन्ति -

1. **संस्थायाः दूरदृष्टिः नेतृत्वञ्च**

अस्मिन् विश्वविद्यालये मूल्यव्यवस्थयाधिगतेन फलोत्पादकेन नेतृत्वेन तथा च संवादात्मकनिर्णयप्रक्रियया विश्वविद्यालयेन प्राप्तव्यविषयस्य अधिगमनं क्रियते। अयं विश्वविद्यालयः संस्कृतमयं वातावरणम् आपादयितुं विविधोपक्रमान् क्रियान्वयीकरोति। विश्वविद्यालयस्य दूरदृष्टि-ध्येययोः स्वरूपादारभ्य तयोः पूर्तये सिद्धये च संस्थाद्वारा परिपाल्यमानाः पूर्वयोजनाः, प्रयोगविधयः, प्रशासनप्रणाल्यः, अध्यापकानां प्रवृत्तयः, वित्तसम्बद्धानि संसाधनानि, आन्तरिक्त-गुणवत्ता-आश्वासनकेन्द्रद्वारा क्रियमाणानि कार्याणि, तेषां व्यूहाः, प्रणाल्यश्च यथानियमं प्रवर्तन्ते। अयं विश्वविद्यालयः समानकार्यवतां संस्कृतबान्धवानां सदृशसंस्थानां च लाभग्राहिभिः सह स्वस्थं संवादं स्थापयितुं योग्यकार्यप्रणाल्याः स्वध्येयपूर्त्यर्थं नैकोपायान् करोति।

1. **व्यूहविकासः परिनियोजनं च**

अस्य विश्वविद्यालयस्य नेतृत्वेन विश्वविद्यालयस्य कृते सुस्पष्टा दूरदृष्टिः ध्येययोजना च प्रकल्पिता अस्ति। विश्वविद्यालयस्य शैक्षणिक-प्राशासनिक-विभागाः कार्यकलापाश्च सहभागितायाः पारदर्शकतायाश्च तत्त्वैः नियम्यन्ते। शैक्षणिकैः प्राशासनिकैश्च अंशैः साकं विशिष्टयोजनाभिः विकासलक्ष्याणाम्, संस्थागतप्रावधानानाम्, निर्देशतत्त्वानां च परिनिर्माणं कृत्वा तत्र गुणवत्तायाः अभिवृद्धिः भवेत् तदर्थं विश्वविद्यालयस्य विविधाः परिषदः व्यूहविकासस्य परिनियोजनं कुर्वन्ति। यथा विश्वविद्यालयस्य निर्णेतृनिकायेषु अध्यापकानां भागग्रहणं भवति। भविष्यद्योजनाः सुष्पष्टरूपेण चिन्तिताः भवन्ति। विश्वविद्यालयेन विकेन्द्रीकरणपद्धतेः आश्रयणं स्वीक्रियते। विश्वविद्यालयस्य अधिनियमाः संस्कृतानुवादसहिताः विद्यन्ते। प्राशासनिके प्रबन्धने सञ्चिकानामुपरि सूचनाफलकादिषु च संस्कृतस्य उपयोगः क्रियते।

1. **अध्यापकसशक्तीकरणव्यूहाः**

अनेन विश्वविद्यालयेन शिक्षकाणां वृत्तिगतक्षमतायाः उन्नयनाय विविधाः प्रयासाः विधीयन्ते। प्राध्यापकानाम् अभिविन्यासपाठ्यक्रमे, पुनश्चर्यापाठ्यक्रमे, स्वल्पकालिकपाठ्यक्रमे, अध्यापकविकासकार्यक्रमे, वृत्तिविकासकार्यक्रमे तथा च विभिन्नेषु अध्यापकसशक्तीकरणकार्यक्रमेषु प्रतिभागिताविषये विगतपञ्चवर्षेषु स्थितिः स्पष्टतया अत्र विस्तृता अस्ति। तथैव विश्वविद्यालये शिक्षकाणां शिक्षणेतरकर्मचारिणां च कार्यनिष्पादनशैल्याः विषये अवलम्ब्यमानप्रक्रियाः साधु विवृताः सन्ति। अयं विश्वविद्यालयः आजीविकाप्रदानेन सह मानवसंसाधनानां निष्पत्तिमूल्याङ्कनम्, वृत्तिविषयकविकास-कार्यक्रमाणाम् आयोजनम्, योग्यप्रतिपुष्टिसंसाधनस्य आश्रयणम् अपि च प्रतिक्रियाणां विश्लेषणं कर्तुं योग्यान् व्यूहान् समाश्रयते।

1. **वित्तीयप्रबन्धनं संसाधनसङ्ग्रहश्च**

अस्मिन् विश्वविद्यालये वित्तलेखानिर्माणं यथानियमं यथाकालञ्च भवति। वित्तस्य सदुपयोगः भवेद् एतदर्थं प्रतिष्ठापितप्रक्रियाः पद्धतयः च आश्रीयन्ते। अतः आर्थिकस्रोतसां सङ्ग्रहस्य कृते, योजनानिर्माणस्य योग्यवितरणस्य च कृते प्रतिष्ठापितप्रक्रियाः पद्धतयश्च सन्ति। सर्वविधवित्तीयप्रबन्धनविषये वित्तसमितिः, कार्यकारिणीपरिषत् च वर्तते। विश्वविद्यालयस्य विविधकार्यक्रमेषु वित्तविषयकयोः आय-व्यययोः आन्तरं बाह्यञ्च लेखापरीक्षणं भवति तथा च तद्विषये रचितानां तन्त्राणाम् अत्र विवरणं प्रदत्तमस्ति। विविधसंसाधनानां समुपयोगार्थम्, वित्तराशेः सङ्ग्रहार्थञ्च विश्वविद्यालयेन अवलम्ब्यमाना नीतिः प्रक्रिया च अत्र समुपवर्णिता अस्ति। अन्याभ्यः संस्थाभ्यः दातृभ्यश्च प्राप्तस्य आर्थिकसाहाय्यस्य विवरणं प्रक्रिया च स्पष्टरूपेण अत्र प्रदर्शिता अस्ति।

1. **आन्तरिकगुणवत्ता-आश्वासन-व्यवस्था**

विश्वविद्यालये आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रं कार्यरतम् अस्ति। एतत् केन्द्रं स्वनियन्त्रितम् उत्तरदायित्वद्वारा विश्वविद्यालयस्य शैक्षणिक-प्राशासनिक-अंशेषु गुणवत्ता-प्रबन्धनप्रणाल्योः कथम् उत्कृष्टता आगच्छेत् एतदर्थं नैकविधान्

उपायान् आयोजयति। अस्मिन् निकषे आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रद्वारा परिकल्पितानां गुणवत्ताश्वासनव्यूहानाम्, प्रक्रियाणां च योगदानविषये, निर्धारित-नियमानुसारम् अध्यापनाधिगमेषु क्रियान्वयनपद्धतेः समीक्षणविषये, उत्तमकार्यान्वयनपद्धतेः विषये, गुणवत्तासंस्कृतिविकासार्थं छात्रेभ्यः साधूच्चारणादि-अभ्यासार्थं च आयोजितानां गुणवत्ताकार्यक्रमाणां विषये, आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रस्य नियमितानाम् उपवेशनानां विषये तथा च विगतपञ्चवर्षेषु सम्पादितक्रमविकास-विषये समग्रं विवरणं प्रदत्तमस्ति।

***Institutional Values and Best Practices :***

**सप्तम-निकषः (सारः)**

सप्तमे निकषे सांस्थिकमूल्यानि अत्युत्तमाः परिपाटयश्च वर्णिताः सन्ति। अस्य निकषस्य प्रधानसूचकाः त्रयः सन्ति -

1. **सांस्थिकमूल्यानि सामाजिकोत्तरदायित्वानि च**

विश्वविद्यालयोऽयं लैङ्गिकसमताप्रोन्नतये कार्यक्रमान् आयोजयति। लैङ्गिकसमानताम् आनेतुं स्त्रीपुंसमानताविषये विगतेषु पञ्चवर्षेषु विभिन्नाः कार्यक्रमाः सञ्जाताः। परिसरेऽस्मिन् कुमारच्छात्रालयः कन्याछात्रालयश्च वर्तते तथा चात्र कन्या-कुमारयोः लैङ्गिकसंवेदनशीलतायां नियमानुसारं छात्राणां प्रवेशादारभ्य पठित्वा पदवीं प्राप्य निर्गमनं यावत् सर्वेषां नियमानां परिपालनं क्रियते। पर्यावरणसमस्या-जलवायुपरिवर्तनसदृशेषु विषयेषु जागरूकता, व्यर्थवस्तुप्रबन्धनस्य विषये तरलत्याज्यवस्तुप्रबन्धनम्, घनत्याज्यवस्तुप्रबन्धनम्, वैद्युतवस्तुत्याज्यप्रबन्धनम् इति विषयेषु योग्यनियमानां परिपालनम्, वृष्टिजलसङ्ग्रहस्य योग्यप्रणाली इत्यादिप्रबन्धनं वर्तते। । परिसरे हारित्यपरिपाटयः आश्रीयन्ते। वृक्षाणां बाहुल्येन परिसरोऽयं हरितवर्णेन प्रतिभाति। हारित्योपक्रमे व्यर्थवस्तुप्रबन्धने च धनव्ययः विश्वविद्यालयेन क्रियते। व्यर्थवस्तूनां प्रबन्धनं कृत्वा यः धनलाभः भवति तस्य विनिमयः हारित्योपक्रमे क्रियते। दिव्याङ्गजनेभ्यः शैक्षणिकभवने, प्राशासनिकभवने, छात्रालये च गमनागमन-प्रसाधन-व्यवस्था तथा च ग्रन्थालयेऽध्ययनस्य व्यवस्था विद्यते। विश्वविद्यालयस्य स्थानिकसमुदायेन नगरस्थजनैश्च सह संस्कृतसम्भाषणमाध्यमेन सम्बन्धः वर्तते। श्रीसोमनाथविन्यासस्य समुपस्थित्या प्रथमज्योतिर्लिङ्गस्य कारणेन संस्कृत-सांस्कृतिकवातावरणेन विशेषतः लाभः विश्वविद्यालयेन सम्प्राप्यते। अत्र शास्त्रोपासनया प्रधानमूल्यानां संरक्षणं भवति। भारतीयनागरिकेषु राष्ट्रियभावनाजागरणाय यजुर्वेदस्थ-राष्ट्रसूक्तादिप्रेरितानां सर्वेषां राष्ट्रियपर्वणां समायोजनं भवत्यत्र। शास्त्रोपासनया विश्वबन्धुत्वभावनाविकासे वैश्विकमूल्यानां वास्तविकं दर्शनं मनोवाक्कर्मभिः भवति। रामायण-गीतादिग्रन्थानां समुपासनया महापुरुषाणां पुण्यतिथिञ्चाश्रित्य आदर्शव्यवहार-परम्परा प्रवहति।

1. **अत्युत्तमाः परिपाटयः**

विश्वविद्यालयेन कतिपयोपक्रमेषु उत्तमपरिपाटयः नित्यम् अनुष्ठीयन्ते, यत्कारणात् नियमितकार्येषु उत्तमः प्रभावः प्रतिफलति। तत्र परिपाटिद्वयं विश्वविद्यालयेऽस्मिन् अत्युत्तमरूपेण अनुष्ठीयते - सर्वत्र संस्कृतमयता, गुणवत्तायुक्तं ग्रन्थप्रकाशनं च। 'सर्वत्र-संस्कृतमय'-क्रियाकलापेन विश्वविद्यालये शैक्षणिकभवने, छात्रावासे, परिसरे च छात्राः अध्यापकाः परस्परं संस्कृतेन व्यवहरन्ति। शैक्षणिकभवने प्राशासनिकभवने च कार्यरताः लिपिकाः सेवकाश्चापि शनैः शनैः संस्कृतवातावरणप्रभावेण संस्कृतेन व्यवहारं कर्तुं प्रेरिताः। तेऽपि लघु-लघु संस्कृतवाक्यैः व्यवहरन्ति तथा च सञ्चिकायां निर्दिष्टसंस्कृतवाक्यानां प्रयोगपूर्वकं टिप्पणीं लिखन्ति।

विश्वविद्यालयः संस्कृत-संस्कार-संस्कृतिसमर्थकसद्विचारान् ग्रन्थीकर्तुं बद्धपरिकरः वर्तते। भारतस्योच्चतरशिक्षासन्दर्भे ग्रन्थप्रकाशने यद्विशिष्टाः परिपाटयः वर्तन्ते ताः लक्षीकृत्य स्वप्रकाशनानि जगतः पुरस्तात् प्रस्तौति। तत्र अप्रकाशितग्रन्थाः, अन्यभाषागतगद्यग्रन्थानां सरलमानकसंस्कृतमाध्यमेन अनुवादाः, विश्वविद्यालयेन आयोजितेषु राष्ट्रिय-अन्ताराष्ट्रियपरिसंवादेषु प्रस्तुतानां शोधपत्राणां सङ्ग्रहाः, वार्षिकशोधपत्रिका-'शोधज्योतिः', 'वाक्यार्थज्योतिः'ग्रन्थः, नियतकालिकतया 'सोमज्योतिः'-वार्तापत्रम् इत्येतेषां प्रकाशनं प्रमुखमस्ति। विश्वविद्यालयस्य प्रकाशनमिदं गुणवत्तासम्पन्नम्, सामान्यशुल्कयुतम्, नवोदयानां लेखकानाम् अनुवादकानां कवीनां च कृते उत्साहवर्धकम्, प्रेरणामूलम्, संस्कृत-उच्चशिक्षालोके लाभप्रदम्, प्राप्तप्रतिष्ठम्, गौरववर्धकम्, ज्ञानप्रदम्, रसवर्धकम्, सुलभ्यम्, विषयवैविध्यसम्पन्नं च वर्तते।

1. **सांस्थिकं वैलक्षण्यम्**

अस्मिन् विश्वविद्यालये शास्त्राध्ययनेन सह छात्राणां व्यक्तित्वविकासोऽपि एकं लक्ष्यमस्ति। परिसरे संस्कृतसम्भाषणं प्रचाल्यते। संस्कृतलेखनस्य सम्भाषणस्य च विशिष्टं शिक्षणमपि प्रदीयते। शास्त्रीयसांस्कृतिकचित्रक्रीडादिषु रुचिनिर्माणाय प्रतिवर्षं युवमहोत्सवस्य आयोजनं क्रियते। प्रतिवर्षमायोज्यमानेन दीक्षान्तसमारोहेण छात्राः उपनिषच्छिक्षायाः दीक्षान्तप्रवचनेन स्वजीवनाय उदात्तां दृष्टिं प्राप्य नीतिमत्तापूर्णादर्शजीवनाय बद्धपरिकराः भवन्ति। छात्राणां ज्ञानविकासाय, बौद्धिकविकासाय, कार्यसम्पादनाय च स्पर्धात्मकपरीक्षा-प्रशिक्षणवर्गाणाम् आयोजनं क्रियते। अन्वयानां संस्करणस्य केन्द्रं वर्तते एतत् लक्ष्यं निधाय संस्कृतक्षेत्रे संशोधनदृष्ट्या सह ज्ञानवृद्धिः, विविधक्षेत्रे राष्ट्रस्तरीयः विकासः, स्पर्धाभिश्च विविधः ज्ञानलाभः संस्कृत-संस्कार-संस्कृतीनां संरक्षणाय विश्वविद्यालयोऽयं यत्स्थापितो वर्तते तच्छात्राणां प्रगत्या अनुभूयते।

**Profile**

**BASIC INFORMATION**

| **Name and Address of the University** | |
|---|---|
| Name | SHREE SOMNATH SANSKRIT UNIVERSITY |
| Address | Shree Somnath Sanskrit University, Rajendra Bhuvan Road, Veraval, Dist.- Gir Somnath |
| City | Veraval |
| State | Gujarat |
| Pin | 362266 |
| Website | www.sssu.ac.in |

**Contacts for Communication**

| **Designation** | **Name** | **Telephone with STD Code** | **Mobile** | **Fax** | **Email** |
|---|---|---|---|---|---|
| Vice Chancellor | Gopabandhu Mishra | 02876-244531 | 9426687450 | 02876-244417 | vc@sssu.ac.in |
| IQAC / CIQA coordinator | Lalitkumar A. Patel | 02876-244532 | 9879834071 | 02876-244529 | lp4220@sssu.ac.in |

| **Nature of University** | |
|---|---|
| Nature of University | State University |
| **Type of University** | |
| Type of University | Affliating |

**Establishment Details**

| | |
|---|---|
| Establishment Date of the University | 12-04-2005 |
| Status Prior to Establishment,If applicable | |

**Recognition Details**

**Date of Recognition as a University by UGC or Any Other National Agency :**

| Under Section | Date | View Document |
|---|---|---|
| 2f of UGC | 17-02-2006 | View Document |
| 12B of UGC | | |

**University with Potential for Excellence**

| | |
|---|---|
| Is the University Recognised as a 'University with Potential for Excellence (UPE)' by the UGC? | No |

**Location, Area and Activity of Campus**

| Campus Type | Address | Location * | Campus Area in Acres | Built up Area in sq.mts. | Programmes Offered | Date of Establishment | Date of Recognition by UGC/MHRD |
|---|---|---|---|---|---|---|---|
| Main campus | Shree Somnath Sanskrit University, Rajendra Bhuvan Road, Veraval, Dist.- Gir Somnath | Urban | 17.58 | 19631.42 | Thirty One (UG - PG) | | |
| Institutes | University College, Shree Somnath Sanskrit University, University Campus, Rajendra Bhuvan Road, Veraval, Dist.- Gir | Urban | 17.58 | 2563 | Twelve (UG) | 12-04-2005 | 17-02-2006 |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | Somnath 362266 | | | | | | |

## ACADEMIC INFORMATION

### Affiliated Institutions to the University

| Type of Colleges | Permanent | Temporary | Total |
|---|---|---|---|
| Education/Teachers Training | 0 | 1 | 1 |
| Specification of Degree with Sanskrit/Urdu/Persian/Arabic Nomenclature | 0 | 35 | 35 |

### Furnish the Details of Colleges of University

| | Number |
|---|---|
| Constituent Colleges | 1 |
| Affiliated Colleges | 36 |
| Colleges Under 2(f) | 0 |
| Colleges Under 2(f) and 12B | 0 |
| NAAC Accredited Colleges | 0 |
| Colleges with Potential for Excellence(UGC) | 0 |
| Autonomous Colleges | 0 |
| Colleges with Postgraduate Departments | 25 |
| Colleges with Research Departments | 0 |
| University Recognized Research Institutes/Centers | 1 |

| | |
|---|---|
| **Is the University Offering any Programmes Recognised by any Statutory Regulatory Authority (SRA)** | : No |

### Details Of Teaching & Non-Teaching Staff Of University

| Teaching Faculty | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | Professor | | | | Associate Professor | | | | Assistant Professor | | | |
| | Male | Female | Others | Total | Male | Female | Others | Total | Male | Female | Others | Total |
| Sanctioned | 5 | | | | 6 | | | | 17 | | | |
| Recruited | 3 | 1 | 0 | 4 | 3 | 0 | 0 | 3 | 9 | 4 | 0 | 13 |
| Yet to Recruit | 1 | | | | 3 | | | | 4 | | | |
| On Contract | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 1 | 0 | 1 |

| Non-Teaching Staff | | | | |
|---|---|---|---|---|
| | Male | Female | Others | Total |
| Sanctioned | | | | 22 |
| Recruited | 20 | 2 | 0 | 22 |
| Yet to Recruit | | | | 0 |
| On Contract | 7 | 1 | 0 | 8 |

| Technical Staff | | | | |
|---|---|---|---|---|
| | Male | Female | Others | Total |
| Sanctioned | | | | 1 |
| Recruited | 1 | 0 | 0 | 1 |
| Yet to Recruit | | | | 0 |
| On Contract | 0 | 0 | 0 | 0 |

**Qualification Details of the Teaching Staff**

| Permanent Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt. | 1 | 1 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 2 |
| Ph.D. | 2 | 0 | 0 | 3 | 0 | 0 | 6 | 3 | 0 | 14 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 3 | 1 | 0 | 4 |

| Temporary Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| Ph.D. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 1 | 0 | 1 |

| Part Time Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| Ph.D. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

**Distinguished Academicians Appointed As**

| | Male | Female | Others | Total |
|---|---|---|---|---|
| Emeritus Professor | 0 | 0 | 0 | 0 |
| Adjunct Professor | 0 | 0 | 0 | 0 |
| Visiting Professor | 0 | 0 | 0 | 0 |

**Chairs Instituted by the University**

| Sl.No | Name of the Department | Name of the Chair | Name of the Sponsor Organisation/Agency |
|---|---|---|---|

| Sl.No | Name of the Department | Name of the Chair | Name of the Sponsor Organisation/Agency |
|---|---|---|---|
| 1 | Not Applicable | Not Applicable | Not Applicable |

| Provide the Following Details of Students Enrolled in the University During the Current Academic Year | | | | | | |
|---|---|---|---|---|---|---|
| Program | | From the State Where College is Located | From Other States of India | NRI Students | Foreign Students | Total |
| UG | Male | 98 | 21 | 0 | 0 | 119 |
| | Female | 9 | 0 | 0 | 0 | 9 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| PG | Male | 28 | 18 | 0 | 0 | 46 |
| | Female | 36 | 1 | 0 | 0 | 37 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Doctoral (Ph.D) | Male | 6 | 5 | 0 | 0 | 11 |
| | Female | 2 | 2 | 0 | 0 | 4 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Diploma | Male | 42 | 14 | 0 | 0 | 56 |
| | Female | 17 | 2 | 0 | 0 | 19 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Pre Doctoral (M.Phil) | Male | 4 | 14 | 0 | 0 | 18 |
| | Female | 0 | 7 | 0 | 0 | 7 |
| | Others | 0 | 0 | 0 | 0 | 0 |

| | |
|---|---|
| **Does the University offer any Integrated Programs?** | No |

**Details of UGC Human Resource Development Centre, If applicable**

| | |
|---|---|
| Year of Establishment | Nill |
| Number of UGC Orientation Programs | 0 |
| Number of UGC Refresher Course | 0 |
| Number of University's own Programs | 0 |
| Total Number of Programs Conducted (last five years) | 0 |

**Details of Programmes conducted on Indian Knowledge Systems**

| Sl.No | Programmes | No of Programmes |
|---|---|---|
| 1 | Number of Shastra Adhyapana Prashikshana Programmes conducted in last five years | 26 |
| 2 | Number of Shastra Vakyartha Prashikshana Programmes conducted in last five years | 33 |
| 3 | Number of Sanskrit Drama Training Programmes conducted in last five years | 0 |
| 4 | Number of Manuscriptology Training Programmes conducted in last five | 0 |

| | | |
|---|---|---|
| | years | |
| 5 | Number of Sanskrit Drama Festivals held in last five years | 5 |
| 6 | Number of Sanskrit Poetry Writing Training Programmes held in last five years | 0 |
| 7 | Number of Sanskrit Sambhashana Shibirams held in last five years | 2 |
| 8 | Number of Teachers Training Programs | 7 |
| 9 | Number of Translations Training Programs | 0 |

**QIF**

**1.Curricular Aspects**
**1.1 Curriculum Design and Development**
***1.1.1 Curricula developed/ rare shastric texts adopted have relevance to the local/ national/ regional/ global developmental needs with learning objectives including programme outcomes, programme specific outcomes and course outcomes of all the programmes offered by the University.***

**विकसिता पाठ्यचर्या/ स्वीकृता दुर्लभाः शास्त्रग्रन्थाः, स्थानीय-राष्ट्रिय-प्रादेशिक-वैश्विक-विकासस्य आवश्यकतया अधिगमोद्देश्यैः पाठ्यक्रमस्य परिणामैः सह निर्दिष्टपाठ्यक्रमस्य परिणामैः, विश्वविद्यालयेन प्रवर्तितानां सर्वेषां पाठ्यक्रमाणां च परिणामैः सङ्गतिं भजन्ते।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विविधकक्षासु वेदव्याकरणसाहित्यन्यायदर्शनपुराण-ज्योतिषविषयाः पाठ्यन्ते । वेदविषयाभ्यासेन (वैदिकसूक्तानाम्,CC/CE-111) वैदिकदेवताविषयकं ज्ञानं भवति।पर्यावरणसुरक्षादृष्ट्या तन्महत्त्वम् अस्ति ।शुक्लयजुर्वेदमाध्यन्दिनसंहिता-दर्शपूर्णमासयागेन(CC112)सन्धिकाले अनुष्ठानेन रोगमुक्तिः भवति । वेदस्य उपनिषदां भाष्याणां च अभ्यासः भवति। वैदिकसाहित्यस्याध्यनेन वैदिकप्रकल्पाः स्थानीयकक्षातः वैश्विकविकासाय उपयोगिनः भवन्ति । तेषु ग्रन्थेषु सामाजिकैकतायाः प्राचीनसंस्कृत्याः अस्मितायाः  उपदेशः प्राप्यते। साहित्यशास्त्रे नाट्यशास्त्रम्(CC413), रघुवंशम् (CC-112) सदृशाः दुर्लभग्रन्थाः सन्ति । अनेन साहित्यशास्त्रकाव्यशास्त्रपरिचयो भवति । रघुवंशेन नैतिक-धार्मिक-सांस्कृतिकमूल्यबोधः भवति नाट्यशास्त्राभ्यासेन नाट्यकलायाः परिचयः प्राप्यते । पुराणेतिहासविषये रामायण(CC-124)महाभारत(CC-3510)श्रीमद्भागवत(CC-359)विष्णुपुराणानाम् अभ्यासेन त्यागबलिदानप्रेमभक्तिभावश्रद्धासद्भावाः  विकसिता भवन्ति । व्याकरणविषये प्रौढमनोरमा (CC-425) व्याकरणसिद्धान्तकौमुदी(CC-537) लघुशब्देन्दुशेखर(CC-413) परमलघुमञ्जूषा(CC-424)-महाभाष्या(CC-411)ग्रन्थाः पाठ्यन्ते । व्याकरणशास्त्राध्ययनेन छात्रेषु भाषानैपुण्यम् वाक्चातुर्यम्, अर्थगाम्भीर्यं च भवति । संस्कृतभाषायाः नैपुण्येनान्यभाषासु अपि प्रावीण्यमागच्छति। संस्कृतव्याकरणेन वैज्ञानिकरीत्या शब्दशुद्धिः वाक्यशुद्धिः भाषाशुद्धिः भवति । दर्शनशास्त्रे साङ्ख्यकारिका(CC-124)तर्कसङ्ग्रहः(CC/CE-123)न्यायसिद्धान्तमुक्तावली(CC-236)-ब्रह्मसूत्रशाङ्करभाष्य(CC-426)-योगसूत्र(CC-424)-श्रीमद्भगवद्गीता(CC-3612)-दुर्लभग्रन्थानामभ्यासः भवति। तेन छात्रस्य तत्त्वज्ञानं वर्धते । साङ्ख्यशास्त्रस्य पुरुषप्रकृत्योः बोधेन पुराणस्य सृष्टिप्रक्रियायां तार्किकत्त्वं द्रष्टुं शक्नोति । सत्त्वरजस्तमोगुणानां ज्ञानेन बुद्धिविकासः भवति ।  आधुनिकमानसशास्त्रेण सह दर्शनशास्त्राभ्यासः सङ्गतिं भजते । ज्योतिषशास्त्रे मुहूर्तचिन्तामणि(CC-122, CE-122)जातकालङ्कार(CC-124)बृहत्संहिता(CC-537)जातकपारिजात(CC-426)मानसागरी(CE-422)हस्तसञ्जीवनी(CC-5410)ति दुर्लभग्रन्थानाम् अभ्यासः भवति। मनुष्यस्य जीवने ग्रहोपग्रहाणां प्रभावः भवति। ज्योतिषशास्त्रस्य एभिः अभ्यासग्रन्थैः अस्माकं प्राचीनस्य विज्ञानस्य ज्ञानं भवति। अनेन पाठ्यक्रमेणानेन ज्योतिषशास्त्रस्य होरास्कन्धस्य सामान्यतथ्यानां ज्ञानं भविष्यति । लोकोपकारार्थं ज्योतिषशास्त्रस्य उपयोगः भविष्यति । ज्योतिषशास्त्रस्य परम्परायाः विकासः भविष्यति । योगविषये पातञ्जलयोगस्याभ्यासः भवति। अनेन स्वास्थ्यलाभो मानसिकी शान्तिश्च भवति आहारविहारसन्दर्भे मार्गदर्शनञ्च प्राप्तं भवति ।अद्यापि प्राचीनयोगस्य महत्त्वं विश्वे स्वीकृतमस्ति । विश्वयोगदिवस्यायोजनं समग्रे विश्वे भवति ।

विश्वविद्यालये मन्दिरव्यवस्थापनस्य पदविकाभ्यासक्रमोऽप्यस्ति । मनुष्यस्याध्यात्मिकविकासाय मन्दिरस्यापि महत्त्वमस्ति। मन्दिरव्यवस्थापनस्याभ्यासक्रमे मन्दिरस्य रचना सन्दर्भेऽप्यभ्यासो भवति । तेन भारतीयशिल्पकलायाः ज्ञानं भवति । विशेषं तत्कालीनस्य नृत्यस्य परिचयः प्राप्यते । मन्दिरस्याध्यात्मिके वातावरणे कलायाः परोक्षरूपेण शिक्षणमपि प्राप्यते । मन्दिरस्य व्यवस्थापनाय मन्दिरस्य प्रचार-प्रसारयोः ज्ञानं भवति । अस्याः पदविकायाः अभ्यासं कृत्वा छात्राः विदेशे अपि सम्यक् व्यवस्थां कर्तुं शक्नुवन्ति। वैदिकगणितस्यापि पदविकाभ्यासक्रमो वर्तते । तस्मिन्

प्राचीनवैदिककालीनगणितम् (प्रश्नपत्रम्-1) शास्त्रकालीनगणितम् (प्रश्नपत्रम्-2) एवं श्रीभारतीकृष्णतीर्थस्वामिना रचितं वेदगणितम् (प्रश्नपत्रम्-3) अपि पाठ्यते । अनेन भारतीयगणितशास्त्रस्येतिहासविषये छात्राः ज्ञानं प्राप्नुयुः वैदिककालतः आरभ्य वर्तमानसमयपर्यन्तं गणितस्य या परम्परा पद्धतिः वा वर्तते तस्याः विवेचनात्मकम् अध्ययनमपि भवति । गणितविषये भारतीयं चिन्तनं पूर्वकालतः एव गभीरमासीत् इति अनेनाभ्यासक्रमेण ज्ञातुं शक्यते । कर्मकाण्डस्य पदविकाभ्यासक्रमेण प्रारम्भिकपूजनविधिः एवं स्तुतिः (प्रश्नपत्रम्-1), संस्कारकर्मशान्तिविधिश्च प्रश्नपत्रम्-2) एवम् उत्तरक्रियाश्राद्धविधिश्च (प्रश्नपत्रम्-3) अध्याप्यन्ते । अनेन धार्मिकविधिविधानानां ज्ञानं प्राप्यते। हिन्दुधर्मे जन्मविवाहादिषु कार्येषु कर्मकण्डमवश्यकमस्ति । कर्मकाण्डस्य पौरोहित्यस्य वा व्यवस्थितं प्रभाविकं ज्ञानमस्याभ्यासक्रमस्य मुख्यः उद्देश्यं वर्तते । विविधानां यज्ञानामप्याभ्यासो भवति । प्रायोगिकमपि कार्यं भवति । मन्त्राणां श्लोकानां शुद्धोचारणस्य अभ्यासः क्रियते । अनेन अभ्यासक्रमेण पौरोहित्यस्य प्राचीनभारतीयपरम्परायाः रक्षणं भवति । संस्कृतप्रशिक्षणस्यापि पदविकाभ्यासक्रमे पाठन(प्रश्नपत्रम्-1)-लेखन(प्रश्नपत्रम्-2)-सम्भाषण(प्रश्नपत्रम्-3)-अभियोग्यतानां पाठनं भवति । तेन छात्रः धाराप्रवाहेण संस्कृतभाषायाः अस्खलितगत्याः वाग्व्यवहारस्य कौशल्यं प्राप्नोति। अद्य संस्कृतस्य अभ्यासः सर्वेषु स्थानेषु संस्कृत- माध्यमेन न भवति । अतः संस्कृतानुरागिणां कृते संस्कृतसम्भाषणमपि अपेक्षितं भवति । विश्वविद्यालस्य अनेन अभ्यासक्रमेण छात्राः संस्कृतसम्भाषणे निपुणाः भवन्ति । तेन मूलसंस्कृतग्रन्थानां पठन-पाठनं कर्तुं शक्नुवन्ति । संस्कृतभाषायाः अभ्यासं कृत्वा अन्यभाषायाः अभ्यासः अपि सरलतया कर्तुं शक्नुवन्ति । ज्योतिषशास्त्रस्य पदविकाभ्यासक्रमे छात्रःज्योतिषस्य सिद्धान्तसंहिताहोराख्यानां त्रयाणां स्कन्धानां महत्त्वपूर्णानां विषयाणां ज्ञानं प्राप्नोति । मुहूर्तलद्दशान् विषयान् ज्ञात्त्वा समाजस्य योग्यं मार्गदर्शनं कर्तुं शक्नोति । वास्तुशास्त्रस्य पदविकाभ्यासक्रमेण भवनादीनां निर्माणस्य वैज्ञानिकं ज्ञानं प्राप्तं भवति। भवनमन्दिरनिर्माणाय अस्माकं प्राचीनवैज्ञानिकी या पद्धतिः आसीत् ,तां वैज्ञानिकपद्धतिम् अनुलक्ष्य भवननिर्माणं कर्तुं शक्यते । विश्वविद्यालयस्य सम्बद्धमबाविद्यालयेषु स्वामिनारायणवेदान्त-रामानुजवेदान्त-वास्तुशास्त्र-धर्मशास्त्राणाम् पदव्यभ्यासक्रमाणाम् अपि एवं च विविधानां पदविकानाम् अभ्यासः भवति । विश्वविद्यालयेन अभ्यासक्रमाः पाठयन्ते ते परिणामैः सह सङ्गतिमपि भजन्ते। अस्मिन् विश्वविद्यालये संस्कृतसाहित्यस्य दुर्लभानां ग्रन्थानां अध्ययनं अध्यापनं च भवति।

एतेषां ग्रन्थानाम् अध्ययने अस्माकं प्राचीनपरम्पराणां, प्राचीनविज्ञानस्य, संशोधनानाम् अस्मितानां च ज्ञानं भवति। तत् ज्ञानं साम्प्रतयुगे अपि तथैव उपकारकमस्ति। विश्वविद्यालये अभ्यासं कुर्वन्तः छात्राः अपि स्वजीवने तस्य लाभं प्राप्नुवन्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

***1.1.2 Percentage of programe where syllabus revision was carried out during the last five years***

**विगतपञ्चवर्षेषु विहितस्य पाठ्यक्रमपुनरीक्षणस्य प्रतिशतता।**

**Answer:** 10.13

1.1.2.1 How many Programmes were revised out of total number of Programmes offered year-wise during the last five years

विगतपञ्चवर्षेषु सञ्चालिताः कति पाठ्यक्रमाः प्रतिवर्षं पुनरीक्षीताः?

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 02 | 22 | 00 | 00 |

1.1.2.2 Number of all Programmes offered by the institution year-wise during the last five years

विगतपञ्चवर्षेषु संस्थायां कति पाठ्यक्रमाः प्रतिवर्षं सञ्चालिताः?

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 50 | 50 | 48 | 46 | 43 |

| File Description | Document |
|---|---|
| Minutes of relevant Academic Council/BOS meeting | View Document |
| Details of Programme syllabus revision in last 5 years (Data Template) | View Document |
| Any additional information | View Document |

***1.1.3 Average percentage of courses having focus on indepth-shastric learning/ creative writing/ employability/ entrepreneurship/ skill development/ Interdisciplinary/ Indigenous Knowledge base with modern application during the last five years***

**विगतपञ्चवर्षाणाम् आमूलशास्त्राध्ययनं/ सर्जनात्मकलेखनं/ उद्यमिताम्/ उद्योगप्राप्ति-सामर्थ्यम्/ कौशलविकासम्/ अन्तश्शास्त्रीयं/ देशजज्ञानप्रणालीं च लक्ष्यीकृत्य प्रवर्तितानां पाठ्यपत्राणां प्रतिशतं मध्यमानस्य मानम्।**

**Answer:** 100

1.1.3.1 Number of courses having focus on employability/ entrepreneurship/ skill development year-wise during the last five years

विगतपञ्चवर्षेषु उद्यमिताम्/ उद्योगप्राप्ति-सामर्थ्यं/ कौशलविकासं च लक्ष्यीकृत्य प्रवर्तितानां पाठ्यपत्राणां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 546 | 546 | 544 | 627 | 623 |

1.1.3.2 Number of courses in all Programmes year-wise during the last five years

विगतपञ्चवर्षेषु सर्वेषु कार्यक्रमेषु सम्मिलितपाठ्यपत्राणां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 546 | 546 | 544 | 627 | 623 |

| File Description | Document |
|---|---|
| Programme/ Curriculum/ Syllabus of the courses | View Document |
| Minutes of the Boards of Studies/ Academic Council meetings with approvals for these courses | View Document |
| Details of courses having focus on employability/ entrepreneurship/ Indigenous knowledge (Data Template) | View Document |
| Any additional information | View Document |

***1.1.4 All Syllabi related to Sanskrit/Shastra subjects are available through Sanskrit medium.***

**सर्वे संस्कृतसम्बद्धाः शास्त्रसम्बद्धाः च पाठ्यांशाः संस्कृतमाध्यमेन उपलभ्यन्ते।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयेऽत्र परिसरे अनेके शास्त्रसम्बद्धा: संस्कृतसम्बद्धा: पाठ्यक्रमा: अध्याप्यन्ते । संस्कृतसम्बद्धा: शास्त्रसम्बद्धाश्च पाठयक्रमा: समे (१००%) अत्र विश्वविद्यालये संस्कृतमाध्यमेन समुपलक्ष्यन्ते । अत्र स्नातककक्षायां ये पाठ्यक्रमा: अध्याप्यन्ते ते सन्ति - १. वेद:, २ पुराणम्, ३. साहित्यशास्त्रम्, ४. व्याकरणम्, ५. ज्योतिषम्, ६. सर्वदर्शनम् । एते षड् विषया: संस्कृतमाध्यमेनोपलब्धा: सन्ति । एतेषु षट्सु पाठ्यक्रमेषु छात्रा: मुख्यत्वेन गौणत्वेन वा विषयचयनं कर्तुमर्हन्ति । एक: विषय: मुख्यत्वेन अङ्गीकर्तव्य: वर्तते, अपरश्चैको विषयो गौणत्वेन अङ्गीकर्तव्य: । स्नातककक्षायाम् (शास्त्रिकक्षायां) प्रत्येकस्मिन् वर्षे द्वे सत्रे भवतः आहत्य त्रिषु वर्षेषु षट् सत्राणि भवन्ति । मुख्यविषये प्रतिसत्रं पत्रद्वयं भवति । द्वादशानामपि पत्राणाम् अध्ययनमध्यापनं च संस्कृतमाध्यमेन विधीयते । स्नातककक्षायां गौणरूपेण स्वीकृते विषये प्रतिसत्रम् एकैकपत्रं भवति । प्रत्येकं छात्र: स्वीयमुख्येन विषयेण सहानिवार्यत्वेनैकं गौणं विषयं स्वीकरोति । स्नातककक्षायां गौणविषयस्य प्रतिसत्रमेकं पत्रं भवति। आहत्य षट्सु सत्रेषु षट् पत्राणि भवन्ति एतेषां समेषां प्रश्नपत्राणां संस्कृतमाध्यमेन पाठ्यक्रमा: समुपलब्धा: सन्ति। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्यास्य स्नातककक्षायां प्रत्येकस्मिन् सत्रे एकैकम् अनिवार्यसंस्कृतपत्रं समेषां छात्राणां कृते समानं भवति । अध्ययनकारिणां समेषां छात्राणां व्याकरण-काव्य-दर्शनशास्त्राणां परिचयो भवेदथ च तेषां स्वस्वशास्त्राध्ययनोपकारकतया व्याकरणादिविषयाणां प्राथमिक: परिचय: स्यात् तदर्थं षट् अनिवार्यप्रश्नपत्राणि संस्कृतविषयसम्बद्धानि भवन्ति । एतेषां षण्णां पत्राणामपि संस्कृतमाध्यमेन पाठ्यक्रमा: समुपलब्धा: सन्ति । एवं शास्त्रिकक्षायाः आहत्य षड्भिः विषयैः सर्वैः च षड्भिः सत्रैः सम्बद्धानां मुख्य-गौण-विषय-पत्राणामनिवार्यसंस्कृतस्य च १२० प्रश्नपत्राणां १००% पाठ्यक्रमाः संस्कृतेन समुपलभ्यन्ते।

परिसरेऽत्राचार्यकक्षासु वेद-व्याकरण-ज्योतिष-साहित्यशास्त्र-दर्शनशास्त्र-पुराणविषया: मुख्यविषयत्वेन गौणविषयत्वेन चाध्याप्यन्ते । अनुस्नातककक्षासु प्रथमं पत्रम् अनिवार्यपत्रम् । तत: त्रीणि पत्राणि स्वस्य मुख्यविषयसम्बद्धानि ततश्च एकं पत्रं गौणविषयस्य भवति । आहत्य प्रतिसत्रम् अनुस्नातककक्षायां पञ्च पत्राणि, आहत्य चत्वारि सत्राणि च भवन्ति । चतुर्णामनिवार्यपत्राणां द्वादशानां मुख्यविषय-सम्बद्धपत्राणां चतुर्णां च गौणविषयसम्बद्धानां पत्राणां सकला: पाठ्यक्रमा: संस्कृतमाध्यमेन समुपलब्धा: सन्ति । अध्ययनाध्यापनयोः परीक्षाणां च माध्यमं संस्कृतमस्ति ।

स्नातकोत्तरे पाठ्यक्रमे तत्त्वाचार्यपाठ्यक्रम: समग्रोऽपि संस्कृतमाध्यमेन समुपलभ्यते । तत्त्वाचार्य (M.Phil) कक्षाया: सत्रद्वयं भवति । तत्र प्रथमे सत्रे पत्रद्वयं भवति । द्वितीयसत्रे चैकं पत्रम् एकश्च लधुशोधनिबन्धो लेख्यो भवति । एतानि सर्वाणि पत्राणि संस्कृतमाध्यमेन अध्याप्यन्ते ।

उपर्युक्तानां समेषामपि पाठ्यक्रमाणां कृते पाठ्यग्रन्थाः वाराणस्यादिस्थितानां प्रकाशनसंस्थानानां यानि प्रकाशनानि भवन्ति, तेषां पठनपाठनकर्मणि प्रायेण उपयोग: क्रियते । अथ च सरलसंस्कृतभाषया लिखितानां श्रीसोमनाथसंस्कृतविश्वविद्यालय-प्रकाशितानां काव्यप्रकाशाचमनम्, दशरूपकप्रभा, शोधप्रविधिः इत्यादीनां ग्रन्थानाम् उपयोगः पठनपाठने भवति।

विश्वविद्यालयः अयं न केवलं पाठ्यक्रमस्य संस्कृतेन रचनाविषये आग्रहवान् वर्तते, अपि तु अमीषां विषयाणां कक्षासु पाठनम् अपि पूर्णतया संस्कृतेनैव भवेत् इति निश्चिनोति।

अत्र तत्त्वाचार्यपदव्यै, विद्यावारिधिपदव्यै च प्रस्तूयमानः शोधप्रबन्धः अनिवार्यतया संस्कृतेन एव लेखनीयः भवति। एतेषां मूल्याङ्कनवेलायां मूल्याङ्कनकाराः अपि स्वीयं प्रतिवेदनं संस्कृतेनैव समर्पयन्ति। शोधप्रबन्धसमर्पणात् पूर्वं शोधच्छात्रैः कर्तव्या स्वविषयस्य प्रस्तुतिः, शोधपदवीदानात् पूर्वं शोधच्छात्राणां विषयनिष्णातैः सह जायमाना मौखिकी परीक्षा (Viva-voce) चापि अनिवार्यतया संस्कृतेनैव भवति।

भाषाध्ययनं न केवलं कक्षायाम् अपि तु जीवनस्य प्रत्येकं क्षेत्रे भवति इति विचिन्त्य अत्र दैनिकी प्रार्थना अपि संस्कृतेन क्रियते। तत्र सर्वेऽपि छात्राः गणप्रार्थनायां भागं गृह्णन्ति, तत्र प्रार्थनायाः अङ्गतया पठ्यमानानि सुभाषितानि, पञ्चाङ्गम्, शब्दरूप-धातुरूपाभ्यासः, सूचनाः इत्येते सर्वे उपक्रमाः छात्रैः संस्कृतेनैव सम्पाद्यन्ते।

विश्वविद्यालये पदवीदानसमारोहः, युवमहोत्सवः, संस्कृतसप्ताहोत्सवः इत्यादिषु आमन्त्रणपत्राणि, सूत्रसञ्चालनं, सूचनाः इत्यादि सर्वं संस्कृतेनैव भवति। एतेषु कार्यक्रमेषु समुपस्थाय विभिन्नेषु सन्दर्भेषु संस्कृता वाक् कथं प्रयोक्तव्या इति विवेकं छात्राः लभन्ते। प्रतिवर्षम् विश्वविद्यालयेन अनुष्ठीयमानाः इमे क्रियाकलापाः एव कक्षेतरकाले छात्राणां

भाषाशिक्षणाय विश्वविद्यालयेन परिकल्पिताः पाठ्यक्रमाः इव सन्ति। एतेषु कार्यक्रमेषु सञ्चालनकरणे छात्राणां सहभागिता भवति।

छात्रेषु इतोऽधिकं संस्कृतवाक्पाटवम् आधातुं 'वाग्वर्धिनी परिषत्' इत्याख्यः छात्राणां विशेषः उपक्रमः विश्वविद्यालयेन अनुष्ठीयते। अत्र विश्वविद्यालये अधीयानः प्रत्येकं छात्रः गुरोः उपस्थितौ मञ्चम् आरुह्य स्वविषयमण्डनस्य अवसरं लभते।

विश्वविद्यालयेन सञ्चाल्यमानायाः वाक्यार्थपरिषदः अङ्गतया काले काले विश्वविद्यालयस्य आचार्याः शास्त्रीयविषयान् आश्रित्य विशिष्टव्याख्यानानि संस्कृतेन प्रस्तुवन्ति। वाक्यार्थपरिषन्निमित्तेन आचार्यवाण्याः श्रवणावसरः अपि संस्कृतभाषाधिग्रहणे छात्रान् नितराम् उपकरोति।

इत्थं विश्वविद्यालये अत्र पाठ्यक्रमसंरचनायां, शास्त्राध्यापने, अनुसन्धाने, कक्षेतर-क्रियाकलापेषु चापि सर्वत्र संस्कृतम् अनुस्यूतं वर्तते।

| File Description | Document |
|---|---|
| Provide UG and PG Syllabus prepared in Sanskrit | View Document |
| Provide link of the University website | View Document |

**1.2 Academic Flexibility**

***1.2.1 Whether the University has designed and offered any Innovative Courses/ Courses in emerging area/ Sanskrit based courses including scientific and technical literature leading to both traditional and modern degrees (e.g. Shastri, B.Sc. etc) with combination of yoga/ Ancient and Modern Mathematics/ Economics/ Management/ Law/ Computer Science/ Theoretical Ayurveda/ Krishi-parashara/ Vrikshayurveda etc. If yes give details.***

**विगतेभ्यः पञ्चभ्यः वर्षेभ्यः प्रवर्तितेषु सर्वेषु विविधायामवत्सु पाठ्यपत्रेषु (वैज्ञानिक-प्रौद्योगिक-साहित्यसमाश्रयेण शास्त्री/ बीएस्.सी-प्रभृति पारम्परिकाधुनिकोपाधिनाम्ना योगशास्त्रस्य प्राचीन-आधुनिकगणितयोः/ अर्थशास्त्रस्य/ प्रबन्धनशास्त्रस्य/ विधिशास्त्रस्य/ सङ्गणकविज्ञानस्य/ आयुर्वेदसिद्धान्तस्य (दर्शनस्य)/ कृषिपाराशरस्य/ वृक्षायुर्वेदस्य च सङ्घटनेन समारब्धानि नवीनपाठ्यपत्राणि तथा उदयमानविषयकपाठ्यपत्राणि/ संस्कृताश्रितपाठ्यपत्राणि) अभिनवपाठ्यपत्राणि।**

**Answer:**

अद्य संस्कृतनिष्णातात् समाजस्य याः अपेक्षाः सन्ति ताः मनसि निधाय श्रीसोमनाथसंस्कृतविश्वविद्यालयेन नैके विविधायामवन्तः अभिनवाः पाठ्यक्रमाः कल्पिताः सन्ति। सम्प्रति विश्वविद्यालयपरिसरात् साहित्य-पुराणादिषु षट्सु शास्त्रेषु शास्त्रिपदवी, आचार्यपदवी, ततः प्रगता तत्त्वाचार्यपदवी, विद्यावारिधिपदवी चापि अधिगन्तुं शक्यते। सर्वाः अपि एताः पारम्परिक्यः पदव्यः सन्ति। प्रायः संस्कृतपाठशालाभ्यः मध्यमां प्राक्शास्त्रिपदवीं वा उत्तीर्य छात्राः शास्त्रिकार्यक्रमे प्रवेशं स्वीकुर्वन्ति। कलायां, वाणिज्ये, विज्ञाने अथवा अन्यस्याम् आधुनिकधारायां द्वादशीं कक्षां यावत् अधीत्य अपि विशिष्टजिज्ञासावन्तः केचन छात्राः एतान् पारम्परिककार्यक्रमान् प्रविशन्ति, शास्त्रेषु निपुणतां च सम्पादयन्ति।

एतेनैव समम् अध्ययनधारान्तरे स्नातकादिपदवीमवाप्तवतां कृते आधुनिकधारायाम् 'एम्. ए. (योगः)' इति पाठ्यक्रमः अपि प्रवर्तते। एतस्य अध्ययनेन 'एम्.ए' इति आधुनिकी पदवी लब्धुं शक्यते। पाठ्यक्रमे अस्मिन् योगस्य शास्त्रीयपक्षेण समं प्रायोगिकपक्षः अपि पाठ्यते। अत्र अधीयानाः छात्राः योगस्पर्धासु, प्रदर्शनेषु च भागं वोढुं प्रेर्यन्ते। नैकैः योगच्छात्रैः योगच्छात्राभिः च विविधासु योगस्पर्धासु धवलं यशः सम्पादितं वर्तते। नित्यशः योगाभ्यासेन निरामयत्वं प्राप्यते। योगासनैः प्राणायामैः च रोगोपचारः अपि भवति इति अध्ययनैः ज्ञायते। तस्मात् एव एम्. ए (योगः) इति पाठ्यक्रमे योगचिकित्सा, शारीरिकविज्ञानम् इत्यादयः विषयाः अपि पाठ्यन्ते। एतेन कस्मिन् रोगे किम् आसनं कश्च प्राणायामः लाभप्रदः भवति

इति छात्राः जानन्ति। शारीरिकविज्ञानस्य अध्ययनेन कस्य आसनस्य कस्यां प्रणाल्यां कीदृशः प्रभावः भवति इति छात्राः ज्ञातुं प्रभवन्ति। इत्थं प्रत्येकं जनस्य प्रकृत्यनुसारं ते समुचितानि आसनानि, प्राणायामान् योगक्रियाः च सूचयितुं शक्नुवन्ति। अस्मिन् पाठ्यक्रमे अधीत्य नैके छात्राः योगशिक्षकत्वेन आजीविकां प्रतिष्ठां च लब्धवन्तः सन्ति।

विश्वविद्यालयस्य परिसरे अधीयानानां छात्राणां कृते शास्त्री, आचार्यः इत्यादिपाठ्यक्रमाणाम् अध्ययनेन सममेव पदविका-(डिप्लोमा)-अध्ययनस्य अपि अवसरः विद्यते। योगेतरशास्त्रेषु अधीयानाः नैके छात्राः सामाजिकाः च विश्वविद्यालयेन सञ्चाल्यमाने योग-पदविकापाठ्यक्रमे योगशिक्षां लभन्ते। एतेन ते आत्मनः स्वास्थ्यं रक्षन्तः ते समाजे अपि योगविद्यायाः प्रसाराय सज्जाः भवन्ति। डिप्लोमापाठ्यक्रमे अधीयानाः नैके छात्राः अन्ताराष्ट्रिययोगदिवसम् उपलक्ष्य सामाजिकानां शालाच्छात्राणां च मार्गदर्शनं कुर्वन्ति।

विश्वविद्यालये अस्मिन् शास्त्राध्ययनं कुर्वन्तः नैके छात्राः विद्यालयेषु, महाविद्यालयेषु, संस्कृतपाठशालासु च शिक्षकाः भूत्वा शात्रपरम्पराम् अग्रे नेतुम् इच्छुकाः भवन्ति। एतादृशानां कृते विश्वविद्यालयः 'संस्कृतपाठन' विषये अतिविशिष्टं पदविकापाठ्यक्रमं रचितवान्। सर्वेषु स्तरेषु कथम् आदौ संस्कृतेन एव संस्कृतपाठनं, ततश्च संस्कृतेन एव शास्त्रपाठनं शक्यते इति अस्मिन् पाठ्यक्रमे बोध्यते। संस्कृतेन संस्कृतपाठनस्य कलायां ज्ञातायां ते वरीयांसः शिक्षकाः भवन्ति। समाजे संस्कृतसदृशम् अतिमहत्त्वपूर्णं विषयं प्रति जागरूकतायाः आनयने एते महतीं भूमिकां वहन्ति।

विश्वविद्यालये शास्त्राणि अधीत्य नैके छात्राः मन्दिर-सञ्चालनरताः भवन्ति। एतान् एव मनसि निधाय विश्वविद्यालयेन 'मन्दिरव्यवस्थापन'-विषये विशिष्टः पदविकापाठ्यक्रमः रचितो वर्तते। 'मन्दिर-व्यवस्थापन'-पाठ्यक्रमं पठित्वा विद्यार्थिनः मन्दिरसम्बन्धिनीः देवसपर्यादि-आभ्यन्तरव्यवस्थाः, मन्दिर-रचना-व्यवस्थापनादिसम्बन्धिनीः बाह्यव्यवस्थाः च चारुतया निर्वोढुं क्षमाः भवन्ति। अस्मिन् अभ्यासक्रमे अधीत्य नैके छात्राः सम्प्रति विदेशेषु अपि मन्दिरसञ्चालनरताः सन्ति।

पारम्परिकधारायां शास्त्रिपदवीम् अवाप्य पौरोहित्ये लब्धपदविकानां कृते भारतीयसैन्ये 'धर्मगुरुः' इति पदलाभस्य अवसर सर्वकारेण कल्पितो वर्तते।

विश्वविद्यालयेन ज्योतिष-वास्तु-विषये अपि पदविकाभ्यासक्रमाः सञ्चाल्यन्ते। एषु अभ्यासक्रमेषु अधीत्य नैके ज्योतिष-वास्तु-परामर्शकत्वेन जीविकां लब्धवन्तः सन्ति।

भारतीय-शास्त्रीय-सङ्गीतस्य मूलानि संस्कृते एव सन्ति। संस्कृतज्ञो हि सम्यक् सङ्गीतज्ञो भवितुम् अर्हति। तस्मात् वाद्यसङ्गीतविषये गानविषये च विश्वविद्यालयेन जिज्ञासूनां कृते पदविकाभ्यासक्रमः रचितः अस्ति। विश्वविद्यालये अधीत्य नैके छात्राः सम्प्रति धर्मोपदेशकत्वेन कार्यरताः सन्ति। सङ्गीतज्ञानं तेषां प्रस्तुतिं प्रभावशालिनीं मनोरमां च कर्तुं नितराम् उपयुक्तम्।

गणितशास्त्रे भारतस्य योगदानम् अनितरसाधारणम्। शास्त्राध्ययनरताः छात्राः एतेन अवश्यं परिचिताः भवेयुः इति धिया विश्वविद्यालयेन 'वैदिकगणित'-विषये पदविकापाठ्यक्रमः कल्पितो वर्तते। अस्य अध्ययने छात्राः भारतीयमनीषिणां वैज्ञानिक्या दृष्ट्या परिचिताः भवन्ति। ते कठिनान् अपि गणनासम्बद्धान् प्रश्नान् अतिवेगेन विना प्रमादं समाधातुं समर्थाः भवन्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Minutes of relevant Academic Council/BOS meeting(अध्ययनमण्डलस्य/विद्वत्परिषदः उपवेशनकार्यवृत्तम्) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***1.2.2 Percentage of Programmes in which Choice Based Credit System (CBCS)/ elective course system has been implemented (Preceeding academic year data)***

**विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां प्रतिशतता। *(प्रगतवर्षस्य दत्तांशः)***

**Answer:** 80

1.2.2.1 Number of Programmes in which CBCS/ Elective course system implemented.

विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां सङ्ख्या।

Answer: 24

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Minutes of relevant Academic Council/BOS meetings (अध्ययनमण्डलस्य/ विद्वत्परिषदः उपवेशनकार्यवृत्तम्) | View Document |
| Institutional data (Data Template)( सांस्थानिकदत्तांशः देयः (दत्तांशप्रारूपम्) ) | View Document |

***1.2.3 University provides the flexibility of bringing together the conventional face-to-face mode, MOOCs, online education and allow students to choose and combine the courses they are interested in. Provide details.***

**विश्वविद्यालयेन प्रत्यक्षशिक्षणविधायाः सामूहिकमुक्तान्तर्जालपाठ्यक्रमस्य *(MOOCs)* अतितन्त्रीयशिक्षाणां च परस्परसमन्वयनाय नमनीयता प्रकल्पिता, येन स्वरुचिपूर्णानां पाठ्यक्रमाणां चयने संयोजने च च्छात्राः अनुमताः। क्रियान्वयनविवरणं देयम्।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः नानाविधशास्त्राणामभ्यासक्रमं चालयति । तत्तद्विद्यासंकायाः वेद-साहित्य-व्याकरण-पुराण-ज्योतिष-दर्शन-योग-वेदान्त-धर्मशास्त्र-नव्यन्यायादयो विषयाः अभ्यासक्रमे सन्ति । एतेषु विषयेषु स्नातकानुस्नातकतत्त्वाचार्यविद्यावारिधयः पाठ्यक्रमाः विश्वविद्यालयेन सञ्चाल्यन्ते । २०१९ - २०२० शैक्षणिकवर्षतः समसामयिकयोः प्रत्यक्षदूरस्थशिक्षणपद्धत्योः स्वयम् – अधियन्त्रिमाध्यमेन च पाठ्यक्रमाः सञ्चालिताः स्युः एतस्यां दिशि विश्वविद्यालयः अयं बद्धपरिकरो दृश्यते। QLM 1.2.3 इत्यत्र दर्शितपद्धत्यनुसारम् अभ्यासक्रमाः प्रचलेयुः एतदर्थं विश्वविद्यालयेन एका समितिः रचिता असीत्, यया च समित्या एतद्विषयकाभ्यासक्रमनिर्माणाय परिचिन्तनं कृत्वा प्रस्तावः प्रदत्तः विद्यते। सम्प्रति विश्वविद्यालये अस्मिन् तादृशं प्रावधानं कल्पितं वर्तते यत् 'स्वयम्' प्लेट्फोर्म द्वारा कतिपयपाठ्यक्रमान् अधीत्य ततः क्रेडिट् प्राप्य छात्राः इतः पदवीग्रहणं कर्तुं शक्नुवन्ति। विश्वविद्यालयः एवंविधान् अभ्यासक्रमान् संरच्य भविष्यत्काले सञ्चालयितुं शक्नोति । विश्वविद्यालयेन रघुवंशं कथं पठेम, रामायण और व्यक्तित्त्वविकास, संस्कृतवाक्याभ्यासः, संस्कारों का  मानव जीवन पर प्रभाव,  Dipoma in The Shrimadbhagvad-Gita  and its Commentaries  इत्येते अभ्यासक्रमाः E-Course /Online Course माध्यमेन २०२० - २०२१ शैक्षणिकवर्षतः प्रचाल्यन्ते ।

रघुवंशं कथं पठेम इत्यस्मिन् ई-पाठ्यक्रमे महाकविकालिदासकृतस्य रघुवंशस्य द्वितीयसर्गस्य पाठनं कृतम्। तत्र प्रत्येकं पद्यस्य पदच्छेदः, पदपरिचयः, सरलसंस्कृतेन पदार्थः, हिन्दीभाषया पदार्थः, गुजरातीभाषया पदार्थः, सन्धि-समास-विग्रहः, अन्वयः, आकाङ्क्षा, अलङ्कारविवरणम्, सरलसंस्कृतेन भावार्थः, हिन्दीभाषया भावार्थः, गुजरातीभाषया भावार्थः, तद्धित-कृदन्त-शब्दपरिचयः, धातुरूपाणि, विशेषपौराणिकसन्दर्भाः, मल्लिनाथकृतायाः सञ्जीवनीटीकायाः आवश्यकतानुसारम् उपयोगः चेति अंशाः समाविष्टाः

रामायणं जीवनस्य कृते उपयोगि संस्कृते रचितम् आदिमहाकाव्यं विद्यते इति अनुसन्धाय श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'रामायण और व्यक्तित्वविकास' इति ऑन लाईन पाठ्यक्रमः सञ्चालितः। रामायणे निरूपितानां व्यक्तित्वविकासानुकूलविषयाणां चयनं कृत्वा अस्मिन् पाठ्यक्रमे विश्वविद्यालयस्य कुलपतीनाम् आचार्याणां तथा अन्येषां विश्वविद्यालयानां विदुषां द्वारा अस्मिन् पाठ्यक्रमे आहत्य ३६ व्याख्यानानि ऑनलाईनमाध्यमेन स्वीकृतानि।

एतेषु व्याख्यानेषु रामायणस्य परिचयः, विभिन्नाः रामायणग्रन्थाः, रामायणे वर्णितानि जीवनमूल्यानि एवं रामराज्यस्य अवधारणा, नारीधर्मः भक्तिः, कर्तव्यपरायणता, नेतृत्वम्, जीवनप्रबन्धनं, पारिवारिकभावना, सामाजिकभावना, राष्ट्रभावना इत्यादयः विषयाः अध्यापिताः। तत्र अनुशिक्षणमाध्यमेन छात्रैः उपस्थापितानां जिज्ञासानां समाधानं कर्तुम् अपि व्याख्यानानि गृहीतानि।

कापि भाषा अभ्यासेनैव आत्मसात् कर्तुं शक्यते। संस्कृतभाषायाः ईषत्परिचयवतां जिज्ञासूनां वाग्व्यवहारकौशलवर्धनाय श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'संस्कृतवाक्याभ्यासः' इत्याख्यः ऑनलाईन-पाठ्यक्रमः सञ्चालितः। पाठ्यक्रमेऽस्मिन् कारकपरिचयः, द्वितीयादीनां विभक्तीनां प्रयोगक्षेत्राणि, वाच्यपरिवर्तनं, व्यवहारे अपेक्षितानां क्त्वा-ल्यप्-तुमुन्-ल्युडादीनां कृत्प्रत्ययानां पाठनं च क्रियते।

संस्कारों का मानवजीवन पर प्रभावः इत्ययम् अपि ऑनलाईन पाठ्यक्रमः विश्वविद्यालयद्वारा सञ्चाल्यते। पाठ्यक्रमे अस्मिन् आदर्शमानवस्य निर्माणे शास्त्रस्य भूमिकाविषये निष्णातानां व्याख्यानानि आयोज्यन्ते। तत्र विविधानां संस्काराणां परिचयः, संस्काराणां विधानं धर्मशास्त्रेषु, पुराणेषु वेद-वेदाङ्गेषु च निरूपितानां संस्काराणां विषये पाठ्यते। येषां बालानां संस्कारविधानं जातं तेषां प्रत्यक्षोदाहरणानि अपि प्रस्तूयन्ते।

अस्मद्विश्वविद्यालयसम्बद्धेन सारंगपुरस्थेन बी.ए.पी.एस स्वामिनारयाण संस्कृतमहाविद्यालयेन Dipoma in The Shrimadbhagvad-Gita and its Commentaries इत्ययं पाठ्यक्रमः ऑनलाईनमाध्यमेन सञ्चाल्यते। पाठ्यक्रमे अस्मिन् श्रीमद्भगवद्गीतायाः विभिन्नानां टीकानां भाष्याणां च परिचयः कार्यते। शाङ्कर-रामानुज-स्वामिनारायणा-भाष्याणां गूढार्थाः प्रकाश्यन्ते। उपर्युक्तानां त्रयाणाम् अपि भाष्याणां तुलनाद्वारा श्रीमद्भगवद्गीतायाः विभिन्नानाम् अर्थानां परिचयः कार्यते। योगः, धर्मः, स्थितप्रज्ञः इत्यादिपदानां मर्मविषये चर्चा प्रवर्त्यते। स्वाध्यायकार्यं Online Course & PGDCA इत्यत्र Online परीक्षाग्रहणं भवति ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide Link to MOOCs, online Platform(सामूहिकमुक्तान्तर्जालपाठ्यक्रमस्य अन्तर्जालानुबन्धः,) | View Document |

**1.3 Curriculum Enrichment**

***1.3.1 Institution integrates cross cutting issues as reflected in Sanskrit literature relevant to Gender, Environment and Sustainability, Human Values and Professional Ethics and traditional system of shastric learning into the Curriculum.***

**संस्था संस्कृतसाहित्ये शास्त्रपरम्परायां च प्रतिफलितान् स्त्रीपुरुष-पर्यावरण-स्थिरता-मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राधिगमप्रणालीविषयकान् सर्वत्रानुस्यूतांशान् पाठ्यचर्यायां समन्वयति।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पाठयक्रमे परस्परविरुद्धांशानां परिहाराय पाठ्यचर्यायां समावेश: अस्ति। यथा स्त्रीपुरुषयो: समानतादृष्ट्या विवाहाय कन्याचयने केवलं पुरुषस्यैवाधिकार: नास्ति , कन्यापि स्वयंवरमाध्यमेन इष्टं पतिं प्राप्नोति। तत्त्वाचार्यकक्षायां प्रसन्नराघवं (प्रश्नपत्रम्-3) स्त्रीपुरुषयो: समानताया: निर्देशं करोति। तथैव अभिज्ञानशाकुन्तले (CF-233) अपि शकुन्तला दुष्यन्तस्य चयनं करोति तयोः गान्धर्वविवाहं च करोति । चम्पूरामायणे (CE-534) सीतास्वयंवरप्रसङ्गस्य निर्देश: अस्ति । उत्तररामचरिते (CE-422) सीतारामयो: प्रसन्नदाम्पत्यजीवनं वर्णितमस्ति । स्त्रीणां कृते शिक्षणमपि आसीत् । पुरुषवत् स्त्रिय: अपि कलाकुशलतां दर्शितवत्य: आसन् । नैषधीयचरिते (CC-413) दमयन्त्या: चित्रकलायां नैपुण्यं वर्णितमस्ति । वैदिकसूक्तेषु (CC/CE-111) देवदेवीनां स्तवनम् अस्ति । पुराणेतिहासे (CC-5411) राधाचरित्रम् अस्ति ।

शास्त्रीकक्षायां पर्यावरणस्य एकं पत्रं (प्रश्नपत्रम्-8) वर्तते। तेन छात्रेषु पर्यावरणं प्रति जागरूकता निर्मीयते। अभिज्ञानशाकुन्तल(CF-233) नाटके शकुन्तलादय: वृक्षारोपणं जलसेचनं कुर्वन्ति। भौतिकसमृद्धयर्थं वृक्षाणां यत् कर्तनं भवति तत् प्रति निर्देशं कृत्वा निन्दति। उत्तररामचरिते(CE-411) अपि कवि: प्रकृत्या: सौम्यस्वरूपम् एवं रौद्रस्वरूपं

वर्णयति । तत्रस्थं वर्णनं मनुष्यस्य पर्यावरणं प्रति प्रेम सूचितम् अस्ति । वैदिकसाहित्यस्य अभ्यास: भवति । तस्मिन् वैदिकसूक्तानां(CC/CE-111) चयनयागस्य(CC-411) पाठ्यक्रमः अस्ति । यज्ञादीनां विधिविधानम् अपि पाठ्यविषय: वर्तते । यज्ञेन पर्यावरणशुद्धिः भवति । इत्थं पृथ्वीजलादीनां शुद्धि: भवति । पुराणशास्त्रे (CC-359) गजेन्द्रमोक्षप्रसङ्गद्वारा प्राणिभिः सह सद्भावो वर्णितः अस्ति । पुराणे जलतः सृष्टिरुत्पन्ना इति निरूपणं विद्यते । एवं तान् प्रति अस्माकम् अपि नैतिकं कर्तव्यम् अस्ति तत् अभ्यासक्रमस्य माध्यमेन सूच्यते ।

मानवमूल्यानां संवर्धनाय रक्षणाय च वेददर्शनपुराणसाहित्यानां विषयाणामध्यापनं भवति। श्रीमद्भगवद्गीता(CC-3612) विष्णुपुराणं(CE-422) भागवतपुराणं(CC-111, CC-359) रामायणं(CC-112) महाभारतं(CC-3510) चम्पूरामायणम्(CE-544) एषां ग्रन्थानाम् अध्यापनं भवति। तेषु ग्रन्थेषु कर्तव्यबोधः ,भारतीयसंस्कृत्या: मानवीयमूल्यानां शिक्षणं, प्रेम, राजधर्मः, नीतिमत्ता,करुणा,भक्तिः, चरित्रनिर्माणम् इत्येते गुणाः शिक्षिता भवन्ति । न्यायसिद्धान्तमुक्तावली(CC-236) ब्रह्मसूत्रशाङ्करभाष्यम्(CC-412), योगसूत्रम्(CC-424) इत्येषां ग्रन्थानाम् अभ्यासेन मनुष्यस्य मनसि ये द्वन्द्वा: भवन्ति तेषां परिहार: मनःशुद्धिः तार्किकशक्तिः च भवति । भागवतपुराणस्य(CC-359) अभ्यासेन मनसि विकाराणां शमनं भवति । कृष्णचरितं पठित्वा मनसि भक्तिभाव: उत्पन्न: भवति । सदैव परमात्मन: व्यापकताया: ज्ञानं भवति । सात्त्विकभावस्य शक्त्या मनसि द्वन्द्वानां शमनं भवति । महाभारतस्य(CC-3510) अभ्यासेन परस्परं विरोधिभावानां परिहाराय उपदेश: प्राप्यते । कौरवसदृशा: असद्विचारवन्त: जना: एवं पाण्डवसदृशा: सद्विचारवन्त: जना: समाजे भवन्ति । तत्र कथं व्यवहर्तव्यम् – इति मार्गदर्शनं प्राप्यते । वैदिकशान्तिमन्त्रेषु समभावः प्रदर्शितः अस्ति ।

विश्वविद्यालयस्य परिसरे योगविषयस्य पदव्या एवं पदविकाया अभ्यासक्रमस्य शिक्षणं भवति । तत्र स्वास्थ्यम् अनुलक्ष्य शिक्षणं दीयते, प्रायोगिकं शिक्षणम् अपि छात्रा: प्राप्नुवन्ति । मनुष्यस्य शरीरम् स्वस्थं भवेत् मन: प्रफुल्लितं शुद्धं शान्तं विकाररहितं भवेत् तदर्थम् अयम् अभ्यास: महत्त्वपूर्ण: अस्ति । छात्रेण अनेन अभ्यासेन स्वास्थ्येन सह वृत्तिः अपि प्राप्यते ।

राजधर्मः अपि ज्ञातव्यः इति राजनीतिसन्दर्भे कौटिल्यस्यार्थशास्त्रमपि(EF-111) पाठ्यते । अनेन नेतृत्वस्य गुणानां विकास: भवति । महाभारतस्य शान्तिपर्वणि(CC-411) राजधर्मस्य वर्णनमस्ति । एतेषां अभ्यासेन सत्यम् आत्मसम्मानः ,विद्या, नेतृत्वं, नैतिकता एवंविधा गुणा ज्ञायन्ते ।

मनुष्यस्य आन्तरिकी संवेदना प्रकटीभवेत् तदर्थं काव्यनिर्माणकौशल्याय काव्यतत्त्वस्य ज्ञानाय काव्यशास्त्रस्य शास्त्रीयान् ग्रन्थान् छात्रा: पठन्ति। यथा- मनुष्यस्य भावसंवेदनानां प्रकटीकरणाय अभिज्ञानशाकुन्तल(CF-233)ग्रन्थस्य पठनं भवति। श्रीमद्भागवतेन(CC-359) छात्रा: भक्तिरसम् आस्वाद्य श्रीकृष्णचरित्रं ज्ञात्वा अम्बरीषसदृशानां भक्तानां जीवनं पठित्वा मानसिकीं शक्तिं श्रद्धां विश्वासं च लभन्ते।

श्रीसोमनाथसंस्कृतविश्वविद्यालये विविधपदविकाभ्यासक्रमा: अपि सन्ति । अस्मिन् विश्वविद्यालये ज्योतिषशास्त्रस्य पदविकाभ्यासक्रम: अस्ति । तेन छात्र: भारतीयपरम्परानुगुणं ज्ञानं प्राप्नोति । छात्र: अभ्यासानन्तरं स्वतत्रं कार्यालयं संस्थाप्य वृत्तिम् अपि प्राप्तुं शक्नोति । तथैव वास्तुशास्त्रस्य अपि पदविकाभ्यासक्रम: अस्ति । तेन छात्र: प्राचीनविज्ञानस्य भारतीयसंस्कृत्या: वास्तुविद्याया: ज्ञानं प्राप्नोति । अभ्यासेन भवननिर्माणस्य वैज्ञानिकं ज्ञानं प्राप्नोति । तेन स्वावलम्बिव्यवसायं वृत्तिं च प्राप्तुं शक्नोति । मन्दिरव्यवस्थापनस्य अपि पदविका अभ्यासक्रम: प्रचलति । तेन मन्दिरस्य व्यवस्थासन्दर्भे ज्ञानं प्राप्नोति । अनेन अभ्यासेन छात्र: देशे विदेशे च मन्दिरे सम्यक् सुन्दरव्यवस्थां कर्तुं शक्नोति । विशेषतः तेन वृत्तिम् अपि प्राप्तुं शक्नोति । विश्वविद्यालयस्य परिसरे संस्कृतसम्भाषणस्य पदविकाभ्यासक्रम: अपि अस्ति । छात्र: अस्य अभ्यासं कृत्वा संस्कृतभाषायां प्रावीण्यं प्राप्तुं शक्नोति । संस्कृतभाषाबोधेन अन्यभाषाया: भाषाशिक्षणं सरलं भवति । वृत्यर्थमपि अयं अभ्यासक्रम: अपि लाभप्रद: अस्ति ।

इत्थं श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रचलन्त: अभ्यासक्रमा: स्वाश्रयेण वृत्तिं प्राप्तुउपकारकाः सन्ति । ते छात्रस्य कृते उपयोगिनः सन्ति । विशेषतः सर्वकारस्य अधिकारिरूपेण कर्मचारिरूपेण वा पदम् अपि प्राप्नुवन्ति ।

| File Description | Document |
|---|---|
| The list of courses where the above topics are included | View Document |

| | |
|---|---|
| प्रधानानां पाठ्यपत्राणां सूची यत्र उपर्युक्तविषयाः योजिताः। | |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| A description of courses which address Gender, Environment and Sustainability, Human Values and Professional Ethics, traditional system of shastric learning स्त्रीपुम्भिदासंवेदने, पर्यावरणस्य स्थिरतायाः विकासस्य मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राध | View Document |

***1.3.2 Number of value-added courses imparting transferable and life skills offered during the last five years.***

### विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धकानाञ्च पाठ्यपत्राणां सङ्ख्या।

**Answer:** 50

1.3.2.1 How many new value-added courses are added within the last 5 years

विगतपञ्चवर्षेषु कति मूल्यसंवर्धक-पाठ्यपत्राणि योजितानि?

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 14 | 10 | 10 | 08 | 08 |

| File Description | Document |
|---|---|
| List of value added courses (Data Template) combined with 1.3.3 मूल्यसंवर्धकपाठ्यपत्राणां सूची दत्तांशप्रारूपानुगुणं सांस्थानिकदत्तांशः 1.3.3 बिन्दुना युक्ता। | View Document |
| Brochure or any other document relating to value added courses पञ्चदशतः विंशतिहोरापर्यन्तं ततोऽधिकं वा प्रचालितानां मूल्यसंवर्धकपाठ्यपत्राणां नामानि। | View Document |
| Any additional information अतिरिक्ताः सूचनाः। | View Document |

***1.3.3 Average Percentage of students enrolled in the courses under 1.3.2.***

### *1.3.2* बिन्दोः अनुरूपं जीवनकौशलप्रदे मूल्यसंवर्धके च पाठ्यपत्रे प्रविष्टानां छात्राणां प्रतिशतता।

**Answer:** 46.32

1.3.3.1 Number of students enrolled in value-added courses imparting transferable and life skills offered year-wise during the last five years

विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धक-पाठ्यपत्राणां प्रतिवर्षीया सङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 80 | 98 | 90 | 54 | 70 |

| File Description | Document |
|---|---|
| List of students enrolled (Data Template) combined with | View Document |

| | |
|---|---|
| 1.3.2 प्रविष्टानां छात्राणां सूची (दत्तांशप्रारूपम्) 1.3.2 बिन्दुना युक्ता। | |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***1.3.4 Percentage of students undertaking field projects/ internships/ training programmes/ summer assignments etc. (Preceeding academic year data)***

### क्षेत्रकार्यपरियोजनासु अन्तःप्रशिक्षणेषु प्रशिक्षणपाठ्यक्रमेषु ग्रीष्मावकाशस्तकार्येषु गृहीतभागानां छात्राणां प्रतिशतता। *(प्रगतवर्षस्य)*

**Answer:** 68.28

1.3.4.1 Number of students undertaking field project or internships

क्षेत्रकार्यपरियोजनासु ग्रीष्मावकाशादिषु कार्याणि कुर्वताम्/ अन्तःप्रशिक्षणं प्राप्नुवतां छात्राणां सङ्ख्या।

Answer: 127

| File Description | Document |
|---|---|
| List of Programmes and number of students undertaking field projects / internships (Data Template) पाठ्यक्रमाणां तथा क्षेत्रकार्यपरियोजनाः विरामकालीनकार्याणि कुर्वताम्/ अन्तःप्रशिक्षणं प्राप्नुवतां छात्राणां सूची (दत्तांशप्रारूपम्) | View Document |
| Any additional information | View Document |

***1.3.5 University Curriculum has units and sub-units of the modern subjects like History, Political Science, Education, Psychology, Economics and statistics etc. have contents from Sanskrit based knowledge and being taught in Sanskrit medium. Modern Sanskrit Literature is also included in the curriculum, Provide details.***

### इतिहास-अर्थशास्त्र-शिक्षाशास्त्र-मनोविज्ञान-सङ्ख्याशास्त्र-समाजशास्त्र-राज्यशास्त्रेत्याद्याधुनिक-विषयभागोपभागाः अपि संस्कृतमाध्यमेन पाठ्यमानाः सन्ति। आधुनिकसंस्कृतसाहित्यमपि पाठ्यचर्यायामन्तर्भावितम्, विवरणं देयम्।

**Answer:**

विश्वविद्यालये अस्मिन् पठन्तः छात्रा शास्त्रेषु पारङ्गताः तु भवेयुः एव, किन्तु तेन समम् एव वर्तमानाः परिस्थितीः अपि जानीयुः इति धिया पाठ्यक्रमस्य संरचनायां द्वितयं चिन्तनं कृतम्। पारम्परिके शिक्षण-क्रमे आङ्ग्लाध्ययनं, सङ्गणकम्, प्रदेशिकभाषाः, इतिहासः, अर्थशास्त्रम् इत्येतेषाम् अध्ययनस्य अवसराः कल्पिताः। तत्रापि पारम्परिकम् आधुनिकेन सह सम्बद्धुं यत्र यत्र शक्यं तत्र संस्कृत-शास्त्रेभ्यः महत्त्वपूर्णाः अंशाः चित्वा सन्निवेशिताः। यथा इतिहासविषये(OE-111) रामायणमहाभारतयोः इतिहासः वर्णितः अस्ति । तस्मिन् नृपस्य, गुप्तचरस्य, मन्त्रिणः वर्णनम् अस्ति तत् आधुनिकयुगस्य सन्दर्भे अपि सार्थकम् अस्ति । 'इतिहासः' इति विषयः अपि संस्कृतस्य अध्ययनाय एव यथा पूरकः स्यात् तथा एव कल्पितो वर्तते। इत्थं शास्त्राणाम् अध्ययनेन युगपद् एव यस्मिन् कालखण्डे ते ग्रन्थाः विरचिताः तस्मिन् काले राष्ट्रस्य राजनैतिकी सांस्कृतिकी च परिस्थितिः का आसीत् इत्यपि अपरत्र छात्राः ज्ञातुं शक्नुवन्ति।

शास्त्रिकक्षासु पठतां छात्राणां कृते चतुर्थ-पत्रत्वेन इतिहासः, प्राचीनराजनीतिशास्त्रम् अर्थशास्त्रं च, समाजशास्त्रम्, अर्थशास्त्रं च इति एते विकल्पाः विश्वविद्यालयेन प्रदीयन्ते। अमीषु विकल्पेषु 'प्राचीनराजनीतिशास्त्रम् अर्थशास्त्रं च' इत्यस्य विषयस्य सर्वः अपि पाठ्यक्रमः कौटिल्येन विरचितस्य अर्थशास्त्रस्य शुक्रनीतेः च आधारेण परिकल्पितः वर्तते। आचार्यद्वितीयवर्षस्य द्वितीये सत्रे अनिवार्यविषयत्वेन(CF-544) भाषाविज्ञानं, लिपिविज्ञानं, आयुर्वेदपरिचयः, भारतीयानां वैज्ञानिकानां परिचयः च पाठ्यन्ते। सोस्यूर-सदृशाः भाषाविज्ञानस्य प्रवर्तकाः विद्वांसः संस्कृतव्याकरणादेव प्रेरिताः आसन्। भाषाविज्ञाने प्रारम्भिकावस्थायां संस्कृतशास्त्राणामेव कालोचिता पुनःप्रस्तुतिः आसीत्। भाषाविज्ञानस्य ध्ययनेन

संस्कृतशास्त्राणां विषये आधुनिकसन्दर्भे कथं चिन्तयितुं शक्यते इति छात्राः अवगच्छन्ति। एतस्य पत्रस्य बहुलं विषयवस्तु संस्कृतसाहित्यादेव उद्धृतम्। अयं विषयः संस्कृतमाध्यमेन एव पाठ्यते।

शास्त्रिस्तरीये पाठ्यक्रमे आचार्य-स्तरीये पाठ्यक्रमे तत्त्वाचार्यस्तरीये पाठ्यक्रमे च नैकेषु स्थानेषु आधुनिकस्य संस्कृत-साहित्यस्य अंशाः समावेशिताः सन्ति। शास्त्रि-स्तरे प्रथमः विषयः सर्वेषां शास्त्राणाम् अध्ययनं कुर्वद्भ्यः अनिवार्यः। अस्य अङ्गतया प्रथमे वर्षे 'अष्टाध्यायी-भाष्य-प्रथमा-वृत्तिः' इत्यस्याः व्याकरणशास्त्रेण सम्बद्धायाः आधुनिक्याः कृतेः प्रथम-भागस्य कारक-प्रकरणेन सह सम्बद्धाः अंशाः उभयोः अपि सत्रयोः सन्निवेशिताः सन्ति। नूतनस्य पाठ्यक्रमस्य सप्तम-विषयत्वेन उपलब्धेषु विकल्पेषु 'क्रियात्मकं संस्कृतम्' अन्यतमं वर्तते। पुरा इदमेव शास्त्रिस्तरे चतुर्थपत्रत्वेन 'संस्कृत-सम्भाषणम्' इति नाम्ना पाठ्यते स्म। अस्य पाठ्यपुस्तकत्वेन राष्ट्रियसंस्कृतसंस्थानद्वारा प्रकाशितानां 'प्रथमा दीक्षा'(CE-111/112), 'द्वितीया दीक्षा'(CE-233/244) 'तृतीया दीक्षा'(CE-355/366) चेति ग्रन्थानाम् अध्यापनं भवति। तत्त्वाचार्यपाठ्यक्रमे द्वितीये सत्रे सर्वेषाम् अपि छात्राणां कृते 'जानकीजीवनम्' इत्यस्य आधुनिकस्य कविवरस्य काव्यं पाठ्यविषयत्वेन समावेशितं वर्तते किन्तु । स्वामिनारायणवेदान्ते सत्सङ्गजीवनम्-४(CC-359), वटपत्तनशास्त्रार्थः(CC-3511), मुण्डकोपनिषदः स्वामिनारायणभाष्यम्(CC-3512), भगवद्गीतायाः स्वामिनारायणभाष्यम् (CC-248) अपि पाठ्यते । सङ्क्षेपरामायणम्(CE-3611), विदुरनीतिशतकम् (OE-355) चेति द्वे कृती यद्यपि पुरातन्यौ तथापि तयोः वर्तमानानां पद्यानां प्रगतभाषाशिक्षणाय कृतम् आधुनिकं निरूपणं विश्वविद्यालयस्य पाठ्यक्रमे निवेशितं वर्तते ।

इत्थं विश्वविद्यालयस्य अस्य पाठ्यक्रमे प्राचीनस्य आधुनिकस्य च सुष्ठुः समन्वयः वर्तते। नैकत्र आधुनिकानां विषयाणां पाठनाय प्राचीनांशाः संगृहीताः, नैकत्र च आधुनिकानां विदुषां कृतयः अपि समावेशिताः सन्ति।

| File Description | Document |
|---|---|
| List of units and sub-units of the modern subjects आधुनिक-विषयभागोपभागानां सूची। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

**1.4 Feedback System**

***1.4.1 Structured feedback received from***

***1) Students***

***2) Teachers***

***3) Employers***

***4) Alumni***

***5) Parents***

***for design and review of syllabus semester wise/year-wise***

**अर्धसत्रप्रणाल्याः, वार्षिकसत्रप्रणाल्याः वा पाठ्यांशसंरचनार्थं समीक्षार्थञ्च संरचिता प्रतिपुष्टिः स्वीक्रियते -**

**१. छात्रेभ्यः**

**२. अध्यापकेभ्यः**

**३. वृत्तिदातृभ्यः**

**४. पूर्वच्छात्रेभ्यः**

**५. अभिभावकेभ्यः**

**Answer:** A. Any 4 of the above (अ. उपरि निर्दिष्टेषु कानिचित् चत्वारि)

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information (Upload) अतिरिक्ताः सूचनाः (उपारोपणीयम्) | View Document |
| Action taken report of the University on feedback report as stated in the minutes of the Governing Council, Syndicate, Board of Management (Upload) हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनं शासिपरिषदः कार्यवृत्तानुरूपं विश्वविद्यालयेन कृतकार्यस्य प्रतिवेद | View Document |
| URL for stakeholder feedback report URL हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनम् | View Document |

*1.4.2 Feedback processes of the institution may be classified as follows:*

**संस्थायाः प्रतिपुष्टिप्रक्रिया अधोलिखितक्रमेण विभज्य दर्श्यते** –

**Answer:** A. Feedback collected, analysed, action taken and available on website(अ. प्रतिपुष्टिः सङ्गृहीता, विश्लेषिता, क्रियान्विता च, जालस्थाने उपलभ्यते च।)

| File Description | Document |
|---|---|
| Upload Stakeholder feedback report, Action taken report of the university on it as minuted by the Governing Council, Syndicate, Board of Management. हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनं, शासिपरिषदः कार्यवृत्तानुरूपं विश्वविद्यालयेन क्रियान्वयस्य प्रतिवेदनम् उपारोपणीयम्। | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| URL for feedback report हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनस्य सन्धानम्। | View Document |

***1.4.3 The feedback thus obtained is***

***• Discussed in the Statutory Bodies of the University like Academic Council/ Executive Council etc.***

***• Is used for restructuring the curriculum***

***• Discussed with Traditional scholars/ Peers***

**इत्थं सङ्गृहीता प्रतिपुष्टिः -**

**· विश्वविद्यालयस्य विद्वत्परिषदि/ शासिपरिषदि/ न्यायसभायाम्/ अन्येषु प्राधिकारेषु चर्चिता।**

**· पाठ्यचर्यायाः पुनः निर्माणाय उपयुज्यते।**

**· पारम्परिकैः विद्वद्भिः प्रवरगणैः सह चर्चिता।**

**Answer:**

श्रीसोमनाथ-संस्कृत-विश्वविद्यालयस्य विविधानि सत्तामण्डलानि सन्ति तत्र विविधा अधिकारिणः शिक्षणविदश्च स्वीयज्ञानस्य अनुभवस्य दीर्घदृष्टेश्च लाभेन विश्वविद्यालयस्य नियमोपनियमानां सर्जने संरक्षणे संस्करणे च महद् योगदानं कुर्वन्ति । सह वीर्यं करवावहै इति वैदिकीम् आदर्शविचारधाराम् उपादाय सर्वे विशेषविदः सम्भूय सहचिन्तनं विधाय

विश्वविद्यालयस्य विविधान् नियमान् निर्माय सुशासनं सम्पादयन्ति । विश्वविद्यालयस्य महत्त्वपूर्णः कश्चन आधारो भवति तर्हि स पाठ्यक्रमः भवति । पाठ्यक्रमनिर्माणं तु विविधैः विद्वद्भिः मिलित्वा चर्चाविमर्शं कृत्वा विधीयते । श्रीसोमनाथ-संस्कृत-विश्वविद्यालये समये समये सम्पूर्णभारतवर्षतः श्रेष्ठान् विषयनिष्णातान् आचार्यानाहूय पाठ्यक्रमस्य संरचना विधीयते । विश्वविद्यालये विविधाः विषयाः प्रचलन्ति तत्र वेदः, व्याकरणम्, ज्योतिषम्, साहित्यम्, पुराणम्, दर्शनम्, योग इत्यादयो विषया भवन्ति । अन्ये अपि विषयाः सन्ति ये खलु विश्वविद्यालयसम्बद्धेषु संस्कृतमहाविद्यालयेषु प्रचलन्ति तत्र स्वामिनारायणवेदान्तः धर्मशास्त्रम् इत्याद्या विषयाः सन्ति । सम्प्रति विश्वविद्यालये यावन्त उपलब्धाः सन्ति विषयाध्यापकाः तेषां विषयाणां विभागाः प्रचलन्ति । उपर्युक्ताः सप्त विषयास्तत्र चलन्ति । एतेषां पाठ्यक्रमनिर्माणे महान् श्रमः विद्वद्भिः उह्यते । विविधस्तरतः प्रतिपुष्टयोपि गृह्यन्ते । तासां प्रतिपुष्टीनां समीक्षां विधाय पाठ्यक्रमनिर्माणे सहकारिता गृह्यते । समये समये छात्राः अभिभावकाः प्राध्यापकाः नियोक्तारः पूर्वच्छात्राश्च यान् प्रतिभावान् यच्छन्ति तेषामपि आधारः गृह्यते । एतेषां विषयबिन्दूनां चर्चा-परामर्शः विद्यासङ्घायेषु विधीयते अभ्यासक्रमसमितिषु च विधीयते । विद्यासङ्घायेषु चर्चितानां विषयाणां विशिष्टतया समीक्षणं संशोधनं च विद्वत्परिषदि भवति । विद्वत्परिषदि विद्वांसो विमर्शं कृत्वा यन्निर्धारयन्ति, तस्य पुनः विमर्शः कार्यकारिणीपरिषदि (E.C.) भवति, ततः पाठ्यक्रमः मान्यो भवति सर्वेषु च श्रीसोमनाथसंस्कृतविश्वविद्यालये तत्सम्बद्धमहाविद्यालयेषु अध्ययनाध्यापनपरम्परायां तस्य समावेशो भवति । पूर्वतनसत्ताधिकारमण्डलेन यन्निश्चितं तत्र विशेषविमर्शं कृत्वा ऊर्ध्वतनसत्तामण्डलेन निर्णयः स्वीक्रियते ।

विश्वविद्यालयेन विविधा डिप्लोमापाठ्यक्रमाः अपि प्रचाल्यन्ते तत्रापि नैके आवश्यकतानुसारं डिप्लोमापाठ्यक्रमाः सञ्जाताः विद्यन्ते । २६-१२-२०१७ दिनाङ्के संयुक्तत्वेन आयोजितायां विद्वत्परिषदि (A.C.) कार्यकारिणीपरिषदि (E.C.) च डिप्लोमा इन सङ्गीत एवं डिप्लोमा इन नाट्यशास्त्र इत्यनयोः पाठ्यक्रमयोः प्रारम्भं कर्तुं निर्णयः कृत आसीत् । तद्नुसारमेष पाठ्यक्रमः श्रीवरतन्तु-संस्कृत-महाविद्यालये नाट्यशास्त्रे पदविका (डिप्लोमा इन नाट्यशास्त्र) तथा श्री-सोमनाथ-संस्कृत-युनिवर्सिटी संचालिते महाविद्यालये (Constituent College) सङ्गीते पदविका (डिप्लोमा इन सङ्गीत) इत्येष पाठ्यक्रम प्रारब्धः आसीत् ।

अभ्यासक्रमसमितौ कार्यं कृतवतां राष्ट्रस्तरीयविदुषां सूचिः –

1. प्रो. भागीरथि नन्द लालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठ
2. प्रो. मदनमोहन पाठक लालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठ
3. प्रो. जयकान्तसिंह शर्मा लालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठ
4. प्रो. रामराज उपाध्याय लालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठ
5. प्रो. देवीप्रसाद त्रिपाठी लालबहादुरशास्त्रि-राष्ट्रिय-संस्कृतविद्यापीठ

| File Description | Document |
|---|---|
| Upload the Minutes of the Academic Council/ Executive Council etc. विद्वद्परिषदादीनां निर्णयान् उपारोपयतु | View Document |
| Any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

**2.Teaching-learning and Evaluation**

**2.1 Student Enrollment and Profile**

***2.1.1 Average percentage of students from other States and Countries during the last five years***

**विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां मध्यमानस्य प्रतिशततायाः मानम्।**

**Answer:** 11.84

2.1.1.1 Number of students from other states and Countries, year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 40 | 24 | 15 | 19 | 4 |

| File Description | Document |
|---|---|
| List of students (other states and countries) छात्रसूची (अन्येभ्यः राज्येभ्यः/ राष्ट्रेभ्यश्च) | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Copy of the domicile certificate/passport from respective countries) अधिवासप्रमाणपत्रम् /आज्ञापत्रम् (सम्बद्धदेशानां) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.1.2 Demand Ratio (Average of last five years)***

**अभियाचनायाः अनुपातः (विगतानां पञ्चानां वर्षाणां मध्यमानम्)**

**Answer:** 28.46

2.1.2.1 Number of eligible applications received for admissions to all the Programmes year-wise during the last five years

विगतपञ्चवर्षेषु प्रचाल्यमानेषु पाठ्यक्रमेषु प्राप्तार्हताणाम् आवेदनपत्राणां वार्षिकक्रमेण समष्टिसङ्ख्या

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 96 | 58 | 53 | 91 | 72 |

2.1.2.2 Number of seats available year-wise during the last five years.

विगतेषु पञ्चवर्षेषु प्रतिवर्षम् उपलब्धानां स्थानानां सङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 260 | 260 | 260 | 260 | 260 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.1.3 Average percentage of seats filled against seats reserved for various categories (SC, ST, OBC, Divyangjan, etc.) as per applicable reservation policy during the last five years***

**विगतेषु पञ्चसु वर्षेषु, आरक्षणनीत्यनुसारेण, नानाप्रवर्गेभ्यः (अनुसूचितजातिः, अनुसूचितजनजातिः, अन्य-अप्रगतजातिः, दिव्याङ्गजनाः, इत्यादयः) निर्दिष्टेषु आरक्षितस्थानेषु, सम्पूरितानाम् आरक्षितस्थानानां प्रतिशतं मध्यमानस्य प्रतिशतता।**

**Answer:** 21.1

2.1.3.1 Number of actual students admitted from the reserved categories year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् आरक्षितप्रवर्गेभ्यः प्राप्तप्रवेशानां छात्राणां सङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 37 | 22 | 21 | 31 | 23 |

2.1.3.2 Number of seats earmarked for reserved category as per GOI/State Govt. rule year-wise during the last five years

विगतपञ्चवर्षेषु  भारतशासनस्य अथवा राज्यशासनस्य नियमानुरूपम् आरक्षितप्रवर्गेभ्यः निर्दिष्टानां स्थानानां वार्षिकक्रमेण समष्टिसङ्ख्या

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 127 | 127 | 127 | 127 | 127 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

**2.2 Catering to Student Diversity**

***2.2.1 The institution assesses the learning levels of the students, after admission and organises special programmes (including spoken Sanskrit shibirams/ camps/ workshops/ summer schools etc.) for advanced learners and slow learners***

**छात्राणां प्रवेशानन्तरं संस्था तेषाम् अधिगमस्तरान् परीक्षते, अग्रसराधिगन्तॄणां मन्दाधिगन्तॄणां च कृते विशिष्टान् शैक्षिकपाठ्यक्रमान् *(संस्कृतसम्भाषणशिबिराणि/ आवासीयशिबिराणि/ कार्यशालाः/ ग्रीष्मकालिकशिबिराणि इत्यादि)* आयोजयति।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालये शास्त्रिस्तरे आचार्यस्तरे च विभिन्नवर्गीयाः छात्राः प्रविशन्ति। अतः तेषाम् अधिगमस्तरः अपि भिन्नः भिन्नः भवति। एतेषां छात्राणाम् अधिगमस्तरस्य मूल्याङ्कनाय विश्वविद्यालये अभिगमप्रणाली विद्यते। अतः अयं विश्वविद्यालयः विभिन्नपृष्ठभूमीनाम्, अप्रगतसमुदायानां, विभिन्नक्षेत्राणां च छात्राणाम् आवश्यकताः परिपूरयितुं नैकविधान् विशिष्टान् उपायान् कल्पयति। अध्यापकैः विभिन्नकक्ष्यासु, वाग्वर्धिनीसभायां, विभिन्नकार्यक्रमेषु, कालिकपरीक्षासु च छात्राणां सततं मूल्याङ्कनं विधीयते येन मन्दाधिगन्तॄणाम् अग्रसराधिगन्तॄणां च छात्राणाम् अभिज्ञानं भवति। विश्वविद्यालयेन मन्दाधिगन्तॄणाम् अग्रसराधिगन्तॄणां च छात्राणाम् अभिज्ञानार्थम् अधोलिखिता प्रक्रिया अनुपाल्यते -

1. शास्त्रिकक्षायां प्रविष्टानां छात्राणां मन्द-अग्रसराधिगन्तृनिर्धारणं तेषां पूर्वतनपरीक्षायाः परिणामस्य आधारेण क्रियते। येषां छात्राणां ६० प्रतिशतम् अथवा ततोऽधिकाः अङ्काः भवन्ति, ते अग्रसराधिगन्तृच्छात्राः इति निर्धार्यन्ते, इतरे मन्दाधिगन्तारः छात्राः।
2. शास्त्रिद्वितीयवर्षे तृतीयवर्षे च अपि सततम् आन्तरिकमूल्याङ्केन सह तेषां सत्रार्द्ध-सत्रान्तपरीक्षायाः परिणामस्य आधारेण निर्धारणं भवति।

3. आचार्यकक्षायां प्रविष्टानां छात्राणाम् अपि तेषां पूर्वतनपरीक्षायाः परिणामस्य आधारेण मन्द-अग्रसराधिगन्तृनिर्धारणं क्रियते। प्रमाणपत्रीयक-पदविकाकार्यक्रमयोः प्रविष्टानां छात्राणामपि निर्धारणं तथैव क्रियते।
4. तत्त्वाचार्यकक्षायां (M.Phil.) प्रविष्टानां छात्राणां मन्द-अग्रसराधिगन्तृनिर्धारणं प्रवेशपरीक्षायाः परिणामस्य आधारेण क्रियते।

यदा उपर्युक्तप्रक्रियया मन्दाधिगन्तृणाम् अग्रसराधिगन्तृणां च छात्राणाम् अभिज्ञानं भवति, ततः विश्वविद्यालेयन -

**मन्दाधिगन्तृणां छात्राणां कृते** –

1. प्रवेशानन्तरं मन्दाधिगन्तृणां छात्राणां सेतुपाठ्यक्रमरूपेण संस्कृतसम्भाषणवर्गाः आयोज्यन्ते। एतेषु वर्गेषु स्वरुच्यनुगुणम् अग्रसराधिगन्तारः छात्राः अपि स्वकौशलवर्धनाय प्रविशन्ति।
2. मन्दाधिगन्तृणां छात्राणां कृते अध्यापकाः अतिरिक्तान् वर्गान् स्वीकृत्य तेषाम् अधिगमस्तरस्य अभिवृद्ध्यर्थं वैयक्तिकमार्गदर्शनं कुर्वन्ति।
3. मन्दाधिगन्तृणां छात्राणां कृते अधिगमस्तरवर्धनाय प्रतिसप्ताहं वाग्वर्धिनी-परिषदः आयोजनं क्रियते, अत्र अमीषां छात्राणाम् उपरि विशेषरूपेण ध्यानं दीयते।
4. मन्दाधिगन्तृणां छात्राणां कृते विश्वविद्यालयस्य अध्यापकैः अतिरिक्ताः कक्ष्याः स्वीकृत्य अध्यापनं कार्यते। अपि च एतदर्थम् छात्रैः सह आत्मीयतासम्पादनार्थं यत्नः क्रियते।
5. यदा छात्राभिभावकानां विश्वविद्यालये गोष्ठी भवति तदा मन्दाधिगन्तृणां छात्राणां विषये तेषाम् अभिभावकाः सूच्यन्ते। अपि च अभिभावकैः सह अध्यापकानां गोष्ठ्यां यः निष्कर्षः प्राप्यते, तस्य विश्वविद्यालयेन कार्यान्वयनं क्रियते।

**अग्रसराधिगन्तृणां छात्राणां कृते**

अग्रसराधिगन्तारः छात्राः तेषां पूर्वतनपरीक्षायाः परिणामस्य आधारेण कक्ष्यासु, वाग्वर्धिनीपरिषदि, विभिन्नकार्यक्रमेषु स्वकीयप्रतिभया तथा च अध्यापकानां सततं मूल्याङ्कनेन अभिज्ञायन्ते। इतोऽपि तेषाम् अधिगमस्तरस्य अधिका वृद्धिः भवेत् तदर्थं विश्वविद्यालयेन इत्थं क्रियते–

1. इमे छात्राः UGC-NET, G-SET/SLET प्रतियोगिपरीक्षासु स्वकीयाम् अर्हतां साधयेयुः तदर्थं निर्दिश्यन्ते। एतदर्थं २०१५-२०१६ शैक्षिकवर्षाद् आरभ्य विश्वविद्यालये “UGC NET-JRF/SLET/SET प्रशिक्षणकेन्द्रम्” अपि सञ्चाल्यते। यत्र प्रतिवर्षं नैके छात्राः एतासु प्रतियोगिपरीक्षासु स्वकीयाम् अर्हतां साधयन्ति।
2. एतेषाम् छात्राणां कृते अखिलभारतीयशास्त्रीयस्पर्धा-राज्यस्तरीयस्पर्धासु प्रावीण्यसम्पादनार्थं विशिष्टं प्रशिक्षणं प्रदीयते।
3. विभिन्नप्रतियोगितासु विजेतृणाम् छात्राणां कृते विश्वविद्यालयेन विविधाः पुरस्काराः, प्रमाणपत्राणि च प्रदीयन्ते। यथा वाग्वर्धिनीपरिषदि समग्रे वर्षे ये छात्राः सर्वाधिकरूपेण भागं गृहीत्वा उत्तमं प्रदर्शनं प्रदर्शयन्ति तेभ्यः विश्वविद्यालयेन “वाग्भूषणपुरस्कारः” प्रदीयते।
4. एतैः छात्रैः विभिन्नस्पर्धासु प्राप्तानां विशिष्टपुरस्काराणां, प्रतियोगिपरीक्षासु प्राप्तस्य साफल्यस्य च विवरणं विश्वविद्यालयस्य वार्तापत्रे सोमज्योतिषि, वार्तापत्रेषु च प्रकाश्यते, येन छात्राः प्रोत्साहनं प्राप्नुवन्ति।
5. एतेषां छात्राणां कृते इतरविश्वविद्यालयैः आयोजितासु प्रतियोगितासु भागग्रहणार्थं प्रोत्साहनं मार्गदर्शनं च प्रदीयते।
6. एतादृशच्छात्राणां प्रशिक्षणस्य प्रतियोगितार्थं गमनागमनस्य च व्ययः अस्मद्-विश्वविद्यालयेन क्रियते।
7. विभिन्नशास्त्रप्रशिक्षणवर्गेषु, ग्रीष्मकालिकशिबिरेषु च भागग्रहणाय एतेषां छात्राणां कृते प्रोत्साहनं दीयते।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

***2.2.2 Student - Full time teacher ratio***

**छात्राणां पूर्णकालिकाध्यापकानां च अनुपातः**

**Answer:** 8.45

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

| Other Upload Files | |
|---|---|
| 1 | View Document |

**2.3 Teaching- Learning Process**

***2.3.1 Student centric methods, such as experiential learning, participative learning and learning through dialogue mode and use of hermeneutics in the teaching of knowledge texts and Kavyas, problem solving methodologies are used for enhancing learning experiences.***

**अनुभवात्मकः अधिगमः, सहभागी अधिगमः, संवादपद्धत्या अधिगमः इत्यादयः छात्रकेन्द्रितविधयः, वादपद्धत्या शिक्षणं, शास्त्राणां काव्यानां च पाठने टीकाभाष्यादिपद्धतयः समस्यापरिष्कारविधिविज्ञानानि च अधिगमानुभवसमभिवर्धनाय उपयुज्यन्ते।**

**Answer:**

श्रीसोमनाथ-संस्कृत-विश्वविद्यालये षड् विभागाः सन्ति- वेद-विभागः, साहित्य-विभागः, व्याकरण-विभागः, पुराण-विभागः, ज्योतिष-विभागः दर्शन-विभागश्च। षट्सु विभागेषु छात्रकेन्द्रितपद्धतिमाश्रित्य सरल-मानकसंस्कृत-शैलीमाध्यमेन संस्कृतभाषया छात्राः छात्र्यश्च अध्याप्यन्ते ।

1. अत्र प्रत्येकं विभागानुसारं पाठनस्य वैशिष्ट्यम् एवम्प्रकारेण विद्यते-

| क्रम सं. | विभागाः | पाठनस्य वैशिष्ट्यम् |
|---|---|---|
| 1. | वेद-विभागः | 1. पदच्छेदपूर्वकं स्वरपूर्वकञ्च मन्त्राणाम् अध्यापनम्।<br><br>2. एकस्यैव मन्त्रस्य विभिन्नभाष्यकारमतानुरोधेन अर्थवैभिन्यकारणाद् मन्त्रार्थानां विभिन्नभाष्यकारमतवैभिन्यप्रस्तुतिपूर्वकम् अध्यापनम्।<br><br>3. कर्मकाण्डस्य प्रायोगिकं ज्ञानम्।<br><br>**प्राचीनाचार्याः-** आचार्य-सायणः, महर्षि-दयानन्दः, महर्षि-अरविन्दः प्रभृतयः।<br>**नवीनाचार्याः-** मैक्समूलर, कीथ, रॉथ प्रभृतयः। |
| 2. | साहित्य-विभागः | 1. **काव्यग्रन्थ-विषये-** अन्वयः, पदच्छेदः, प्रतिपदं व्याख्या, समासादिवृत्तिनिरूपणम्, रसभावादिनिरूपणम्, छन्दोलंकारनिर्णयः, सरलभावार्थकथनं काव्यरचनाकौशलञ्च।<br><br>2. **लक्षणग्रन्थविषये-** लक्षणनिरूपणम्, लक्षणस्य उदाहरणेषु समन्वयः, पूर्वाचार्याणां मतसमीक्षणम्। |
| 3. | व्याकरण-विभागः | 1. व्याकरणविषये सूत्रार्थः, **उदाहरणे सूत्रार्थस्य प्रवृत्तिः कथं भवति, प्रत्युदाहरणे सूत्रार्थस्य अप्रवृत्तिः कथं भवती**ति सूत्रार्थसमन्वयपूर्वकं बोध्यते।<br><br>2. वैयाकरणसिद्धान्तानां छात्रेभ्यः मत-मतान्तरपूर्वकं ज्ञानं प्रस्तूयते।<br><br>3. प्रश्नोत्तरशैल्या महाभाष्यस्य अध्यापनम्। |
| 4. | पुराण-विभागः | 1. व्याख्यानशैली- यस्याः अपरनामानि नारदशैली, व्यासशैली, श्रीशुकदेवशैली विद्यन्ते।<br><br>2. दूरदर्शनस्थ-धार्मिक-धारावाहिक-निदर्शनम्।<br><br>3. चित्रफलकानि। |

| | | |
|---|---|---|
| | | 4. कक्षायां कथाकाराणां समुल्लेखः तेषां श्रवणञ्च।<br><br>5. पुराणेषु यस्य स्थानस्य उल्लेखः, तत्र यात्रा अथवा यन्त्रे तस्य निदर्शनम्। |
| 5. | ज्योतिष-विभागः | 1. ग्रन्थप्रतिपाद्यविषयाणां सोदाहरणम् अध्यापनम्। यथा- राजयोगस्य अध्यापन-काले कस्यचिद् राजसदृशस्य जनस्य अथवा उद्योगपतेः कुण्डल्याः निदर्शनम्, प्रव्रज्या-योगस्य अध्यापन-काले कस्यचित् सन्न्यासिनः कुण्डल्याः निदर्शनम्, रोगविमर्शकाले रुग्णस्य कुण्डलीनिदर्शनम् । |
| 6. | दर्शन-विभागः | 1. दर्शनस्य सिद्धान्तानाम् उदाहरणविधिमाध्यमेन अध्यापनम्।<br><br>2. विविधज्ञानवृद्धाचार्याणां व्याख्यानद्वारा छात्रेभ्यः विषयस्य अनुभवात्मकं ज्ञानं दीयते।<br><br>3. संवादात्मकशैलीद्वारा छात्रैः सह शास्त्रचर्चा विधीयते। |

उपर्युक्तविभागेषु केषुचित् अभ्यासक्रमेषु पाठ्यपुस्तकस्य अध्यापनं टीकासहितमपि भवति। यथा-

| **क्रम सं.** | **मूलग्रन्थः** | **टीकाग्रन्थः** |
|---|---|---|
| 1. | तर्कसङ्ग्रहः | दीपिका-टीका |
| 2. | ध्वन्यालोकः | लोचन-टीका |
| 3. | सांख्यकारिका | तत्त्वकौमुदी |
| 4. | ब्रह्मसूत्रम् | शाङ्करभाष्यम् |
| 5. | योगसूत्रम् | व्यासभाष्यम् |
| 6. | न्यायसूत्रम् | वात्स्यायनभाष्यम् |
| 7. | न्यायसिद्धान्तमुक्तावली | किरणावली |
| 8. | नाट्यशास्त्रम् | अभिनवभारती |

एतदतिरिक्तं यथाविषयम् अपरटीकाः अपि पाठनक्रमे स्पर्धाव्याजेन समाह्रियन्ते।

एतदतिरिच्य पर्यावरणविषये ज्ञानस्य क्रियान्वितिसम्पादनाय प्राध्यापकाः छात्रान् यथासम्भवं तत्तत्स्थानं नयन्ति। छात्रेभ्यः वास्तविकपरिस्थितेः निदर्शनं कारयन्ति। येन पर्यावरणसम्बन्धिज्ञानं बुद्धौ चित्रितम् अविस्मरणीयञ्च भवति। एवमेव कम्प्यूटरविषयेऽपि पाठितानि विषय-वस्तूनि क्रियायामानेतुं संगणकप्रऽयोगशालायां प्रयोगात्मकसंगणकशिक्षणं प्रदीयते।

अत्र सर्वत्र विभागेषु प्राध्यापकाः अध्यापनस्य किञ्चिद् दिनानन्तरं यदा छात्राणां ज्ञानसम्बन्धिनम् अनुभवं प्राप्नुवन्ति, तदा येषां छात्राणां कृते विषयस्य ज्ञानदृष्ट्या विषयग्रहणसंस्कारदृष्ट्या च अधिकः यत्नः अपेक्षितो भवति, तेषां छात्राणां समूहं निर्माय छात्रालयादिषु तेषां सहायतां कर्तुं पाठयितुञ्च निर्दिशन्ति कक्षायाः अन्यान् सुयोग्यान् छात्रान् तथा च स्वयम् अध्यापकाः अपि तान् अतिरिक्तसमये पाठयन्ति। सुयोग्यच्छात्राणां सहायताग्रहणविषये मूलं कारणं विद्यते यत् पाठनस्य लाभः पठनापेक्षया दशगुणितोऽधिको भवति, तस्मात् सुयोग्याः छात्राः सहायतार्थम् उत्सुकाः दरीदृश्यन्ते।

1. **छात्रकेन्द्रिताः सहगामि-अधिगम- कार्यक्रमाः-**

| **क्रम सं.** | **कार्यक्रमाः** | **संक्षिप्तकार्यविवरणम्** |
|---|---|---|
| 1. | वाग्वर्धिनी परिषत् | इयं परिषत् पूर्णरूपेण छात्राणां कृते विद्यते। परिषदियं प्रतिसप्ताहम् आयोज्यते। नामानुगुणमेव अत्र छात्राणां वाचि वृद्धिर्भवेत् तदर्थं प्रत्येकं छात्राय संस्कृतभाषया शास्त्रविषयकस्य स्वकौशलस्य विकासाय अवसरो दीयते। |
| 2. | संस्कृतसम्भाषणवर्गः | अत्र संस्कृतविश्वविद्यालये शास्त्रिप्रथमवर्षे अन्यविषयस्यापि छात्राः आगच्छन्ति येषां पूर्वतनपरीक्षायां मुख्यविषयः संस्कृतं न भवति। तान् |

| | | |
|---|---|---|
| | | छात्रान् संस्कृतभाषादृष्ट्या दृढीकर्तुं वर्षारम्भे मासपर्यन्तं संस्कृतसम्भाषणवर्गः चाल्यते। |
| 3. | नेट/स्लेट/सेट -प्रशिक्षणकेन्द्रम् | विश्वविद्यालय-अनुदान-आयोगद्वारा राज्यद्वारा च क्रमेण निर्धारितायां प्राध्यापकपात्रतापरीक्षायां (नेट/स्लेट/सेट) सफलतां प्राप्तुं विश्वविद्यालयेन छात्राणां कृते नेट/स्लेट/सेट-प्रशिक्षणकेन्द्रम् आयोज्यते। |

छात्रेभ्यः गृहकार्यरूपेण स्वाध्यायकार्यं प्रदीयते। स्वाध्यायकार्यस्य सम्पादनं विभिन्नटीकानां सहायतया क्रियते। अनन्तरं तस्य कक्षायां पठनं भवति। पठनानन्तरं विविधाः प्रश्नाः भवन्ति। एतदपि विषयस्य सुस्पष्टतायामेकं कारणं विद्यते सहैव टीकायां लिखितस्य विषय-वस्तुनः अपि ज्ञानं भवति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |

***2.3.2 Percentage of teachers using ICT for effective teaching with Learning Management Systems (LMS), E-learning resources etc.***

**अधिगम-प्रबन्धन-प्रणाली*(*अ.प्र.प्र*)*-वैद्युत-अधिगम-संसाधन*(*वै.अ.स*)*-प्रभृतिभिः सह सूचना-संप्रेषण-प्राविधिकीं *(*सू.सं.प्रा*)* प्रभाविशिक्षणार्थम् उपयुञ्जताम् अध्यापकानां प्रतिशतता।**

**Answer:** 95.45

2.3.2.1 Number of teachers using ICT

सूचना-सम्प्रेषण-प्राविधिकीम् (सू.सं.प्रा) उपयुञ्जताम् अध्यापकानां सङ्ख्या

Answer: 21

| File Description | Document |
|---|---|
| Upload List of teachers (using ICT for teaching) based on Data Template दत्तांशप्रारूपाधारेण सूचना-संप्रेषण-प्राविधिकी (सू.सं.प्रा) (अ.प्र.प्र., वै.अ.सं) उपयुञ्जताम् अध्यापकानां सूची उपारोपणीया | View Document |
| Provide link for webpage describing the " LMS/ Academic management system" जालपुटस्य सन्धानं दीयतां यत्र अधिगम-प्रबन्धन-प्रणाली (अ.प्र.प्र) वैद्युत-अधिगम-संसाधनानां (वै.अ.स) विवरणं लभ्यते | View Document |

***2.3.3 Ratio of mentor to students for academic and stress related issues (preceding academic year data)***

**शैक्षिकसमस्याविषये, उद्वेगविषये च छात्राणां कृते उपलब्धानाम् उपदेष्टृणाम् अनुपातः *(*प्रगतवर्षस्य दत्तांशः*)***

**Answer:** 12.4

2.3.3.1 Number of mentors

उपदेष्टृणां सङ्ख्या

Answer: 15

| File Description | Document |
|---|---|
| Upload year-wise list of number of students, full time teachers and mentor/mentee ratio <br> छात्राणां तथा पूर्णकालिकाध्यापकानां वार्षिकी सूची तथा उपदेष्टृ-उपदेश्यानामनुपातश्च उपारोपणीयः | View Document |

***2.3.4 University encourages the Grurukula method of teaching/ Pathashalas/ Traditional Oriental Learning System (TOLS)/ Gurukula/ Shastrapeethas***

**विश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनं/ पाठशालाः/ परम्परागतप्राच्याधिगमप्रणालीः/ गुरुकुलानि/ शास्त्रार्थपीठानि च पोषयति।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनार्थं प्रोत्साहनं करोति। विश्वविद्यालये अध्यापनाय आधुनिकसामग्रीयुक्तवर्गाणां व्यवस्थया सह विभिन्नशास्त्राणाम् अध्यापने परम्परागतप्राच्याधिगमप्रणाल्याः अपि उपयोगः क्रियते।

पारम्परिकज्ञानप्रदानस्य विभिन्नमाध्यमेषु पारम्परिकगुरुकुलपद्धतिः उत्तमा वर्तते, अनया पद्धत्या छात्राणां शास्त्रेषु नैपुण्यसम्पादनं सुनिश्चितं कर्तुं शक्यते। अनया गुरुकुलपद्धत्या अधीतवन्तः छात्राः समग्रदेशे विभिन्नशैक्षणिकप्रतियोगितासु भागं गृहीत्वा स्वप्रावीण्यप्रदर्शनपुरस्सरं विश्वविद्यालयस्य गौरवम् अभिवर्धयन्ति। अस्मिन् विश्वविद्यालये विभिन्नशास्त्राणाम् अध्यापने परम्परागतप्राच्याधिगमप्रणाल्याः उपयोगार्थम् अधोलिखिताः उपायाः अनुष्ठीयन्ते -

1. गुरुशिष्यपरम्परायां गुरुशिष्ययोः मध्ये कश्चन आत्मीयः सौहार्दपूर्णः सम्बन्धः भवति। तम् आन्तरिकम् आत्मीयं सम्बन्धं पुनर्ज्जीवयितुं विश्वविद्यालये मार्गदर्शक-च्छात्रव्यवस्था (mentor-mentee system) परिपाल्यते, यत्र प्रत्येकम् अध्यापकस्य कृते कतिपयच्छात्राः निर्धार्यन्ते। स च अध्यापकः तेषां छात्राणाम् अधिगमस्तरस्य मूल्याङ्कनपूर्वकं शिक्षणेतरसमस्यानां निराकरणं करोति।
2. विश्वविद्यालयस्य छात्रावासे वसतां छात्राणां दिनचरी गुरुकुलवत् भवति। यत्र प्रातः जागरणम्, सन्ध्यादिकं नित्यं कर्म, सामूहिकी प्रार्थना, आत्मनः भोज्यपदार्थस्य स्वयमेव ग्रहणम्, पात्रप्रक्षालनम्, मध्याह्ने आसने पङ्क्तौ उपविश्य सहभोजनम्, रात्रौ अपि सामूहिकी प्रार्थना, अमरकोष-शब्दरूप-धातुरूपाणां कण्ठस्थीकरणं च समाविष्टं भवति।
3. छात्रावासे वसन्तः छात्राः प्रातः सायं सन्ध्यावन्दनम् कुर्वन्ति। तेन सह तुलसीपूजनं, भगवद्गीतापारायणम्, स्तोत्रपाठम्, यथाकालं यागागिकं च कुर्वन्ति।
4. अध्यापकाः अपि छात्रावासं गत्वा छात्रेषु गणजीवनस्य भावनाम् अभिवर्धयितुं तेषां सिद्धता भवेत् तदर्थं मार्गदर्शनं प्रयच्छन्ति।
5. अस्मिन् विश्वविद्यालये छात्रेभ्यः न केवलं शास्त्रीयं ज्ञानं प्रदीयते, अपि तु शास्त्रीयं ज्ञानं व्यवहारे समागच्छेत्, तदर्थं तेभ्यः व्यावहारिकीं शिक्षाम् अपि दीयते। यस्य निदर्शनं छात्रद्वारा गुरुचरणस्पर्शादिक्रियारूपेण द्रष्टुं शक्यते।
6. विश्वविद्यालये प्रतिवर्षं दीक्षान्तसमारोहस्य आयोजनम् अपि गुरुकुलपद्धत्या भवति यत्र कुलपतिः प्राचीनभारतीयगुरुकुलपरम्परानुसारं “सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमद” इत्यादि-उपनिषद्वाक्याधारेण छात्रान् उपदिशति। अस्मिन् दीक्षान्तसमारोहे सर्वेषां परिवेशः अपि भारतीयवेशभूषाधारेण भवति। दीक्षान्तसमारोहस्य सञ्चालनम् अपि गुरुकुलपद्धत्या क्रियते।
7. अस्मिन् विश्वविद्यालये शास्त्रीयविषयाणाम् अध्यापनं परम्परागतप्राच्याधिगमप्रणाल्या क्रियते यत्र अध्यापकाः ग्रन्थस्य पङ्क्तिशः अध्यापनं विधाय वर्गे एव छात्राणाम् अधिगमस्तरस्य संवर्धनं भवेत् तदर्थं सततं मूल्याङ्कनं कुर्वन्ति।
8. वैदिकमन्त्राणाम् उच्चारणे वैशिष्ट्यकारणात् किञ्च पुराणविषयेऽपि विविधपौराणिककथानां धार्मिकतया तेषाम् अध्ययनं मन्त्रादेः उच्चारणम् अभिलक्ष्य स्वरादिसिद्धये हस्तसञ्चालनपूर्वकं किञ्च पौराणिककथानाम् अध्यापनं पारम्परिकरीत्या क्रियते।

9. विश्वविद्यालये प्रतिवर्षं गुरुकुलप्रणालीं सम्पोषयितुं गुरुपूर्णिमा, व्यासपूजनम्, सरस्वतीपूजनम्, गणेशपूजनादिकार्यक्रमाः अपि समायोज्यन्ते।
10. अस्मिन् विश्वविद्यालये कासुचित् कक्ष्यासु प्राचीनगुरुकुलपरम्परानुसारं छात्राः आसने उपविश्य शास्त्राध्ययनं कुर्वन्ति।
11. अनेन विश्वविद्यालयेन सम्बद्धाः षट्त्रिंश-महाविद्यालयाः सन्ति यत्र परम्परागतप्राच्याधिगमप्रणाल्या अध्यापनाय विश्वविद्यालयः यथासमयं मार्गदर्शनं करोति। एतेषु महाविद्यालयेषु अयं विश्वविद्यालयः गुरुकुलपद्धतिं सम्पोषयितुं विशिष्टानां शास्त्रीयकार्यशालानाम् आयोजनं करोति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |

**2.4 Teacher Profile and Quality**

***2.4.1 Average percentage of full time teachers against sanctioned posts during the last five years***

**अनुमोदितानि पदानि लक्ष्यीकृत्य गतेषु पञ्चसु वर्षेषु नियुक्तानाम् अध्यापकानां मध्यमानस्य प्रतिशतता।**

**Answer:** 55.86

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.2 Average percentage of full time teachers with Ph.D. during the last five years***

**गतेषु पञ्चसु वर्षेषु, विद्यावारिधिः (पीएच.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।**

**Answer:** 91.78

2.4.2.1 Number of full time teachers with Ph.D. year-wise during the last five years

विगतपञ्चवर्षेषु, विद्यावारिधिः (पीएच्.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 16 | 13 | 15 | 15 | 14 |

| File Description | Document |
|---|---|
| List of number of full time teachers with PhD and number of full time teachers for 5 years (Data Template) गतेषु पञ्चसु वर्षेषु विद्यावारिधिमतां पूर्णकालिकाध्यापकानां तथा पूर्णकालिकाध्यापकानाञ्च सूची | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.3 Average teaching experience of full time teachers in number of years***

**पूर्णकालिकाध्यापकानाम् अध्यापनानुभवस्य वर्षप्रमाणेन मध्यमानम्**

**Answer:** 11.5

2.4.3.1 Total experience of full-time teachers

पूर्णकालिकाध्यापकानाम् अध्यापनानुभवस्य समष्टिसङ्ख्या

Answer: 253

| File Description | Document |
|---|---|
| List of Teachers including their PAN, designation, dept and experience details (Data Template) आयकरसङ्ख्या-पदवी-विभाग-अनुभवानां विवरणसहिता अध्यापकसूची | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.4 Average percentage of full time teachers who received awards, recognition, fellowships at State, National, International level from Government recognised bodies during the last five years***

**विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।**

**Answer:** 4.97

2.4.4.1 Number of full time teachers receiving awards from state/ national/ international level from Government recognised bodies year-wise during the last five years

विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 4 | 00 | 00 | 01 | 00 |

| File Description | Document |
|---|---|
| Institutional data: as per Data Template सांस्थानिकदत्तांशः देयः (दत्तांशप्रारूपम्) | View Document |
| e-copies of award letters (scanned or soft copy) पुरस्कारसम्बद्धानां पत्राणां वैद्युतप्रतिलिपयः | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.5 Average percentage of full time teachers from other States against sanctioned posts during the last five years***

**विगतपञ्चवर्षेषु अनुमोदितेषु पदेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।**

**Answer:** 32.41

2.4.5.1 Number of full time teachers from other states year-wise during the last five years -

विगतपञ्चवर्षेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या -

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 11 | 09 | 09 | 09 | 09 |

| File Description | Document |
|---|---|
| List of full time teachers from other state and state from which qualifying degree was obtained (Data Template) अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां सूची। राज्यस्य नामसहिता यतः तैः प्रमाणपत्रं प्राप्तम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.6 University has devised a mechanism to enable the young faculty to learn shastras under learned Gurus. Specify the names of Gurus from whom the teachers/ faculty members have studied Shastras/ Veda Shakhas.***

**विश्वविद्यालयः युवाध्यापकान् वरिष्ठविदुषां सन्निधौ शास्त्राध्ययनाय प्रोत्साहयति। गुरूणां नामानि सूचयन्तु येभ्यः अध्यापकाः शास्त्राणां वेदशाखानां वा पारम्परिकम् अध्ययनमकुर्वन्।**

**Answer:**

श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः युवप्राध्यापकानां गुरूणां सन्निधौ शास्त्राध्यनविषये युवप्राध्यापकानां ज्ञानवर्द्धनाय वाक्यार्थपरिषदम्, शास्त्रपुनश्चर्या-कार्यशालां शास्त्रीयव्याख्यानमालादिकञ्च आयोजयति। एतेषु कार्यक्रमेषु विद्वद्भ्यः प्राप्तज्ञानं तत्तद्विभागीयप्राध्यापकैः सरलभाषया छात्रेभ्यः प्रदीयते। विश्वविद्यालयस्य छात्रावासे रात्रौ प्रार्थनातः पूर्वम् प्राध्यापकाः स्वविषयानुरोधेन पाठयन्ति। तत्र कार्यक्रमेष्वपि विद्वद्भ्यः प्राप्तज्ञानं स्व-स्वकक्षायां छात्रेभ्यः ददति। एतदतिरिक्तं विद्वद्भ्यः प्राप्तज्ञानस्य उपयोगः विषयानुरोधेन शोधलेखेष्वपि क्रियते।

**1.** श्री-सोमनाथ-संस्कृत-विश्वविद्यालयस्थ-व्याकरण-सङ्कायः श्री ब्रह्मर्षि-संस्कृत-महाविद्यालये, नडियादे व्याकरणविषयं समाश्रित्य डॉ. पुष्पा दीक्षित महोदयायाः त्रयोदशदिवसात्मकं कार्यक्रमम् (18-30 दिसम्बर, 2018) आयोजितवान्। अत्र व्याकरणस्य विषयः आसीत्- **धातूद्देश्यकाः प्रत्ययाः।** एतत्कार्यक्रमतः प्राप्तं ज्ञानं व्याकरण-विषयस्य प्राध्यापकौ प्रो. विनोद कुमार झा, डॉ. दीपेश विनोद कतिरा छात्रेभ्यः दत्तवन्तौ। ताभ्यां पाठितं यत् धातुमाश्रित्य तिङ्प्रत्ययानां तिङन्तरूपाणि तथा च केषाञ्चित् तुमुन्-क्त-क्तवतु-कृत्प्रत्ययादीनां कृदन्तरूपाणि कथं महता अल्पीयसा प्रयासेन समेषां धातूनां सम्पन्नानि भवन्ति।

**2.** श्री-सोमनाथ-संस्कृत-विश्वविद्यालयस्थ-व्याकरण-सङ्कायः श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावल तथा युनिवर्सिटीऑफ हैडलवर्ग, जर्मनी इत्यनयोः शैक्षिकाभिबन्धार्गतं डॉ. आनन्दमिश्रमहोदयस्य तज्ज्ञतायां चतुर्दिवसात्मिकां (11-14 मार्च, 2019) **संस्कृताध्ययनम् अङ्कीयमानविकी च** इति कार्यशालां आयोजितवान्। एतत्कार्यक्रमतः प्राप्तं ज्ञानं डॉ. दीपेश विनोद कतिरा, डॉ. जानकीशरण आचार्यः दत्तवन्तौ।

**3.** श्री-सोमनाथ-संस्कृत-विश्वविद्यालयस्थ-दर्शन-सङ्कायः प्रो. वसिष्ठ त्रिपाठिमहोदयस्य न्यायविषयं समाश्रित्य (03-05/02/2017) कार्यक्रमम् आयोजितवान्। ततः न्यायसिद्धान्तमुक्तावलीस्थ-अनुमानखण्-डगतपूर्वपक्षव्याप्तेः सिद्धान्तव्याप्तेश्च ज्ञानं सरलतया प्राध्यापकाः प्राप्तवन्तः।

**4.** वाक्यार्थपरिषदः रचना 2014-2015 शैक्षणिकसत्रे सञ्जाता। तस्मिन् समये अस्याः परिषदः नियमावली अपि निर्मिता। अस्यां परिषदि द्वौ संयोजकौ भवतः। संयोजकचयनम् अनुस्नातकविभागस्य अध्यक्षेण तथा च विश्वविद्यालय-सञ्चालित-महाविद्यालयस्य प्राचार्येण आहूतायाम् अध्यापकसभायां भवति। अनन्तरं संयोजकद्वयं अग्रिमां व्यवस्थां यथानियमं करोति। परिषदः आरम्भः उद्घाटनसत्रद्वारा समाप्तिश्च समापनसत्रद्वारा भवति। 2014-2015 शैक्षणिकसत्रतः आरभ्य इयं परिषद् अद्यापि चलति। वाक्यार्थपरिषदि अत्रत्याः प्राध्यापकाः प्राध्यापिकाश्च भागं गृह्णन्ति। अत्र परिषदि सर्वे प्राध्यापकाः प्राध्यापिकाश्च आवश्यकरूपेण स्व-स्व-विषये व्याख्यानं कुर्वन्ति। वर्षान्ते **शोध-ज्योतिः** इति ग्रन्थे शोधलेखानां समीक्षणपूर्वकं प्रकाशनं भवति।

**5.** शास्त्रपुनश्चर्या-कार्यशालायाः आयोजनं प्रत्येकं विभागेन क्रियते। तदर्थं सञ्चिकामाध्यमेन प्राशासनिकप्रक्रियया अनुमानितव्ययराशेः दिनाङ्कादीनाञ्च अनुमतिः स्वीक्रियते। विदुषां नामानि सङ्कायाध्यक्षेण सह विचार-विमर्शं कृत्वा विभागीयप्राध्यापकैः निर्णीयन्ते। शास्त्रपुनश्चर्या-कार्यशाला वर्षे सकृदेव आयोज्यते। इयं कार्यशाला दिवसत्रयव्यापिनी भवति। अत्र कमपि ग्रन्थविशेषं निश्चित्य तत्रत्यान् मुख्यविषयान् आधारीकृत्य प्रायेण दश व्याख्यानानि भवन्ति। अत्र

कार्यशालायां ग्रन्थविशेषस्य पङ्क्तिशः क्रियते अर्थः। विश्वविद्यालयस्य सर्वेऽपि षड् विभागाः आवश्यकरूपेण अस्याः शास्त्रपुनश्चर्या-कार्यशालायाः आयोजनं कुर्वन्ति। शास्त्रपुनश्चर्या-कार्यशालायामपि व्याख्यानान्ते विविधाः प्रश्नाः भवन्ति।

**6.** शास्त्रीयव्याख्यानमालायां तत्तद्विषयस्य सम्पूर्णदेशाद् विशिष्टाः विद्वांसः आहूयन्ते। विदुषां नामानि सङ्कायाध्यक्षेण सह विचार-विमर्शं कृत्वा विभागीयप्राध्यापकैः निर्णीयन्ते। अनन्तरं विषयेऽस्मिन् कुलपतेरपि परामर्शः गृह्यते। सञ्चिकामाध्यमेन प्राशासनिकप्रक्रियया अनुमानितव्ययराशेः दिनाङ्कादीनाञ्च अनुमतिः स्वीक्रियते। विविधविषयमाश्रित्य विशिष्टा विदन्तः व्याख्यानानि कुर्वन्ति। अत्र समाहूताः विद्वांसः अग्रे प्रस्तूयन्ते।

**7. उपर्युक्त-कार्यक्रमेषु मार्गदर्शयितृणां बाह्यविदुषां नामानि तथा च तेभ्यः प्राप्तज्ञानम्-**

| **क्रम सं.** | **विदुषां नामानि** | **विषयः** | **प्राप्तज्ञानम्** | **समयः** | **कार्यक्रमाः** |
|---|---|---|---|---|---|
| 1. | प्रो. वासुदेव शर्मा | ज्योतिषम् | चिकित्साक्षेत्रे ज्योतिषस्य योगदानम् | 06/10/2016 | शास्त्रीयव्याख्यानमाला |
| 2. | प्रो. लक्ष्मीश्वर झा | वेदः | अपौरुषेयवाक्यं वेदः | 06/10/2016 | |
| 3. | प्रो. हंसधर झा | ज्योतिषम् | ग्रहदृष्टिः, ग्रहाणां उच्चनीचस्थितिविचारः | 06/10/2016 | |
| 4. | डॉ. लम्बोदर मिश्र | वेदः | यज्ञानां वैज्ञानिकत्वम् | 06/10/2016 | |
| 5. | प्रो. पंकज चांदे | साहित्यम् | नाट्यशास्त्रस्य अध्यायस्य चर्चा | 13/08/2016 | |
| 6. | प्रो. अभिराज राजेन्द्र मिश्र | साहित्यम् | आधुनिकसंस्कृतसाहित्यस्य वैशिष्ट्यम् | 13/08/2016 | |
| 7. | डॉ. गौतम पटेल | साहित्यम् | पाठसमीक्षाविषये चर्चा | 13/08/2016 | |
| 8. | प्रो. वसन्त कुमार भट्ट | व्याकरणम् | संस्कृतव्याकरणशास्त्रे विवक्षा | 14/08/2016 | |
| 9. | प्रो. रमेश चन्द्र पण्डा | व्याकरणम् | महाभाष्ये नित्यानित्यशब्दविमर्शः | 16/08/2016 | |
| 10. | प्रो. श्रीकिशोर मिश्र | वेदः | वेदार्थज्ञानस्य प्रशंसा | 11-13/09/2017 | वेदवेदाङ्गसङ्कायेन आयोजिता शास्त्रपुनश्चर्या कार्यशाला |
| 11. | प्रो. लक्ष्मीश्वर झा | वेदः | ब्राह्मणभागस्य प्रामाण्यम् | 11-13/09/2017 | |
| 12. | प्रो. एच. एम. पाण्डेय | वेदः | लघुपाराशरीयशास्त्रानुसारम् आयुर्विचारः | 11-13/09/2017 | |
| 13. | डॉ. राजेन्द्र प्रसाद शुक्ल | ज्योतिषम् | ग्रहादियोगविचारः | 11-13/09/2017 | |
| 14. | प्रो. रामकिशोर त्रिपाठी | दर्शनम् | आधुनिकयुगे दर्शनानां प्रयोजनम्, पठनस्य आवश्यकता, शास्त्रस्य सरलता | 18/07/2019 | दर्शनशास्त्रीयव्याख्यानमाला |
| 15. | प्रो. रहसविहारी द्विवेदी | साहित्यम् | काव्यशास्त्रे वागर्थविचारः | 21/09/2019 | विशिष्टव्याख्यानम् |
| 16. | श्री कृष्णदत्त | पुराणम् | व्यासशुकपरम्परयोः | 20-23 | कार्यशाला |

| | शास्त्री | | मूलज्ञानम् | नबम्वर, 2019 | |
|---|---|---|---|---|---|

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |

***2.4.7 Qualified faculty are available for new programmes/ emerging areas of study (computational linguistics, Computational Sanskrit, Translation Studies, Comparative Philosophy, Comparative Aesthetics, Yogic Science, Yoga Darshan, Samskrit Journalism, Sanskrit manuscriptology, Management, Jurisprudence, Cultural tourism, Temple Culture and Administration, Vastushastra, Medicinal Astrology etc.)***

**नूतनपाठ्यक्रमाणाम् उदयमान-क्षेत्राणां (सङ्गणकीय-भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तुलनात्मकदर्शनं, तुलनात्मकं सौन्दर्यशास्त्रं, योगविज्ञानम्, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रम्, प्रबन्धनशास्त्रं, विधिशास्त्रं, सांस्कृतिकयात्रिकं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) अध्यापनाय योग्यतावन्तः अध्यापकाः उपलभ्यन्ते।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः शास्त्राध्ययनैः सह नूतनपाठ्यक्रमाणां सङ्गणकीय-भाषाशास्त्रप्रभृतीनाम् उदीयमानानां क्षेत्राणां यथा संस्कृतमातृकासम्पादनम्, सङ्गणकीयभाषाशास्त्रम्, वास्तुशास्त्रम्, तुलनात्मकदर्शनम् इत्यादिषु अपि संशोधनकार्यार्थं छात्रान् प्रोत्साहयति। अतः तादृशेषु नूतनपाठ्यक्रमेषु उदीयमानक्षेत्राणां पाठ्यक्रमेषु च छात्राणाम् अभियाचनां पूरयितुं अयं विश्वविद्यालयः जागरुकः अस्ति। श्रीसोमनाथसंस्कृतविश्वविद्यालये अमीषां नूतनविषयाणाम् अध्यापनाय योग्यतावन्तः अध्यापकाः उपलभ्यन्ते।

अस्य विश्वविद्यालयस्य बहवः अध्यापकाः स्वकीयं शोधकार्यम् उदीयमानक्षेत्रेषु विधाय एतेषु विषयेषु विशेषयोग्यतां सम्पादितवन्तः। तद्यथा -

| क्रम | अध्यापकस्य नाम | उपाधिः | उदीयमानक्षेत्रस्य नाम | शोधकार्यस्य शीर्षकम् | विश्वविद्यालयस्य नाम यतः उपाधिः प्राप्तः |
|---|---|---|---|---|---|
| 1. | डॉ. दीपेश विनोद कतिरा | विद्या-वारिधिः | प्रयोगात्मकं भाषाशास्त्रम् | Error Analysis in Modern Sanskrit Literature | भारतीय-प्रौद्योगिकी-संस्थानम्, मुंबई |
| 1. | डॉ. नरेन्द्रकुमार पण्ड्या | विद्या-वारिधिः | संस्कृत-मातृकाशास्त्रम् | शङ्करशर्मकृत-अलङ्कारशङ्करस्य समीक्षितपाठसम्पादनं विवेचनात्मकम् अध्ययनं च | गुजराज-विश्वविद्यालयः, अहमदाबादः |
| 1. | डॉ. जानकीशरण आचार्यः | विद्या-वारिधिः | संस्कृत-मातृकाशास्त्रम् | कृष्णविरचित-स्वोपज्ञ-प्रभाव्याख्यायासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकम् अध्ययनं च | श्रीसोमनाथसंस्कृत-विश्वविद्यालयः, वेरावलम् |
| 1. | डॉ. जयेशकुमार मुंगरा | विद्या-वारिधिः | योगविज्ञानम् | A study of Effect of Kriya and Pranayama training on Hemotological and Physiological Variables | सौराष्ट्र-विश्वविद्यालयः, राजकोट |
| 1. | सुश्री विदुषी बोल्ला | विद्या-वारिधिः | सङ्गणकीय-संस्कृतम् | सङ्गणकमाध्यमेन शाब्दिकार्थसिद्धान्तावगमदृशा परमलघुमञ्जूषायाः परिशीलनम् | राष्ट्रिय-संस्कृत-विश्वविद्यालयः, क.जे. सौमेया-परिसरः, मुम्बई |

| | | | | | |
|---|---|---|---|---|---|
| 1. | डॉ. बी. उमा महेश्वरी | पदविका | योगविज्ञानम् | योगविज्ञानम् | राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपतिः |

**उदीयमानक्षेत्रीयपाठ्यक्रमेषु एतस्मिन् विषये विश्वविद्यालयेन क्रियमाणाः प्रयत्नाः-**

1. अनुवादशास्त्रे दक्षतां सम्पादयितुं विश्वविद्यालयेन २९ तः ३० नवम्बर २००८ यावत् अखिलभारतीय-अनुवादकला-दक्षताप्राप्ति-कार्याशाला समायोजिता।
2. २९.११.२०१२ तः ०७.११.२०१२ यावत् राष्ट्रिय-पाण्डुलिपि-मिशन-नवदेहली इति संस्थायाः सहयोगेन चत्वांरिद्-दिनानां मातृकाशास्त्रं लिपिशास्त्रं च आश्रित्य कार्यशाला आयोजिता समायोजिता आसीत्, यत्र विश्वविद्यालयस्य अध्यापकाः भागं गृहीतवन्तः आसन्।
3. २४.०८.२०१४ तः २८.०८.२०२० पर्यन्तं पञ्चदिवसात्मिका वैदिकगणितविषयस्य उपरि एका कार्यशाला समायोजिता, यत्र वैदिकगणितविशेषज्ञाः आगत्य पाठितवन्तः। विश्वविद्यालये वैदिकगणितम् इति विषये पदविकाकार्यक्रमः अपि प्रचलति।
4. विश्वविद्यालयः काले काले अभिनवपाठ्यक्रमाणां विषये कार्यशालाः समायोजयति, यत्र न केवलं छात्राः अपितु आधुनिकविषयेषु उदीयमानविषयेषु रुचिमन्तः अध्यापकाः अपि भागं गृह्णन्ति। यथा हैड्लबर्ग-विश्वविद्यालयेन सह जातस्य शैक्षिकाभिबन्धस्य अङ्गतया ११.०३.२०१९ तः १४.०३.२०१९ यावत् "संस्कृतशिक्षणम् अङ्कीयमानविकी च" इति विषये एका कार्यशाला आयोजिता आसीत्। यत्र विश्वविद्यालयस्य द्वौ अध्यापकौ डॉ. दीपेश कतिरा, डॉ. जानकीशरण आचार्यः च भागं गृहीतवन्तौ।
5. उदीयमानक्षेत्रेषु विश्वविद्यालयस्य प्राध्यापकानाम् इतोऽपि अभिवृद्धिं सम्पादयितुं नैकाभिः संस्थाभिः सह श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य अभिबन्धाः (MoU) विद्यन्ते। यत्र प्राध्यापकाः प्रकल्पमाध्यमेन उदीयमानक्षेत्रेषु योग्यतां सम्पादयितुं शक्नुवन्ति।

इत्थम् अस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालये शास्त्राध्ययनेन सह नूतनपाठ्यक्रमाणाम् उदीयमानक्षेत्राणां च विषये अपेक्षितयोग्यतावन्तः प्राध्यापकाः उपलभ्यन्ते ये छात्राणाम् एतादृशविषयेषु मार्गदर्शनं कर्तुं शक्नुवन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

***2.4.8 Specify the names of Shastra-Chudamani/ Emeritus/ Adjunct Faculty/ Fellows/ Visiting Professors/ Post Doctoral Fellows on the rolls of the University.***

**विश्वविद्यालयेन सह सम्बद्धानां शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणां, संयोजिताचार्याणां, प्रतिष्ठिताचार्याणां, विद्यावारिध्युत्तरशोधरतानां विदुषां च नामानि सूचयन्तु।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्यादीनां कार्यशाला-सङ्गोष्ठी-सम्मेलनादिमाध्यमेन लाभं प्राप्नोति।

1. विश्वविद्यालयस्य वेद-पुराण-व्याकरण-साहित्य-ज्योतिष-दर्शनविभागैः प्रतिवर्षं शास्त्रीयविषयमादाय कार्यशालाः समायोज्यन्ते यत्र राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणाम्, प्रतिष्ठिताचार्याणां च लाभः विश्वविद्यालयेन प्राप्यते।
2. श्रीसोमनाथसंस्कृतविश्वविद्यालयः प्रतिवर्षं राष्ट्रियम् अन्ताराष्ट्रियं वा सम्मेलनं समायोजयति, यत्र शास्त्रचूडामणिविदुषः, लब्धपुरस्काराः, शास्त्रनदीष्णाः विद्वांसः समागत्य स्वकीयज्ञानेन विश्वविद्यालयस्य शास्त्रसपर्यां सम्पोषयन्ति येन छात्राः लाभान्विताः भवन्ति।
3. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कार्यकारिणीपरिषदि (Executive Council), विद्वत्परिषदि (Academic Council), अभ्यासक्रमसमितौ, सङ्कायसमितौ (Faculty members) च बहवः लब्धपुरस्काराः राष्ट्रस्तरीयाचार्याः, शास्त्रनदीष्णाः विद्वांसः सभ्यरूपेण समागच्छन्ति।

4. स्वकीयशास्त्रज्ञानं सम्पोषयितुम् अस्य विश्वविद्यालयस्य केचन अध्यापकाः अवकाशदिनेषु प्रतिष्ठितविदुषां सान्निध्ये शास्त्राध्ययनाय गच्छन्ति।
5. अस्मिन् विश्वविद्यालये सम्बद्धमहाविद्यालयानां बहवः प्राध्यापकाः आगत्य शोधकार्यं कुर्वन्ति। तद्यथा श्रीवरतन्तुसंस्कृतमहाविद्यालयस्य डॉ. कालिदासभाई-ठाकर अस्य विश्वविद्यालयस्य Doctoral Fellow भूत्वा स्वकीयं शोधकार्यं कृतवान्।

विगतेषु पञ्चवर्षेषु श्रीसोमनाथसंस्कृतविश्वविद्यालये बहवः शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणां मार्गदर्शनम् अभवत्, तेषु केषाञ्चन विदुषाम् नामावलिः अत्र प्रस्तूयते -

| क्रमः | नाम | पदनाम | संस्थानाम |
|---|---|---|---|
| 1. | प्रो. गौतम पटेलः | राष्ट्रपतिपुरस्कृतः निवृत्तः आचार्यः | गुजरात विश्वविद्यालयः, अहमदाबादः |
| 1. | "पद्मश्रीः" प्रो. अभिराजराजेन्द्र मिश्रः | निवृत्तः कुलपतिः | सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. पङ्कज चांदे | राष्ट्रपतिपुरस्कृतः निवृत्तः कुलपतिः | महर्षि पाणिनी संस्कृत एवं वैदिक विश्वविद्यालयः, उज्जयिनी |
| 1. | प्रो. दयानन्द भार्गवः | राष्ट्रपतिपुरस्कृतः निवृत्तः आचार्यः | जयनारायण व्यास विश्वविद्यालयः, जोधपुरम् |
| 1. | प्रो. वशिष्ठ त्रिपाठी | राष्ट्रपतिपुरस्कृतः निवृत्तः प्रतिकुलपतिः | सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी |
| 1. | "पद्मश्रीः" चमूकृष्णः शास्त्री | न्यासी –SPF | संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली |
| 1. | डॉ. वाचस्पति मिश्रः | प्राचार्यः | स्वामिनारायण संस्कृत महाविद्यालयः, जैतलपुरम् |
| 1. | डॉ. राजेन्द्रप्रसाद शुक्लः | निवृत्तः प्राचार्यः | श्री हीरापुरी संस्कृत महाविद्यालय, असारवा |
| 1. | प्रो. रामपूजन पाण्डेयः | आचार्यः | सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. राजाराम शुक्ल | कुलपतिः | सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. विष्णुपद महापात्रः | आचार्यः | श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृत विश्वविद्यालयः, नवदेलही |
| 1. | प्रो. ब्रजभूषण ओझा | आचार्यः | सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. वसन्तकुमार भट्टः | राष्ट्रपतिपुरस्कृतः निवृत्तः आचार्यः | गुजरात विश्वविद्यालयः, अहमदाबादः |
| 1. | डॉ. पुष्पा दीक्षित | निवृत्ता आचार्या | शासकीय कन्या स्नातकोत्तर महाविद्यालय, बिलासपुरम् |
| 1. | प्रो. भगवतशरण शुक्लः | आचार्यः | काशी हिन्दू विश्वविद्यालयः, वाराणसी |
| 1. | डॉ. श्यामसुन्दर झा | निवृत्तः आचार्यः | मुक्तानन्द संस्कृत महाविद्यालयः, मगोद |
| 1. | प्रो. रमेशचन्द्र पण्डा | निवृत्तः कुलपतिः | महर्षि पाणिनी संस्कृत एवं वैदिक विश्वविद्यालयः, उज्जयिनी |
| 1. | प्रो. श्रीकिशोर मिश्रः | आचार्यः | काशी हिन्दू विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. उमाशङ्कर शर्मा "ऋषिः" | राष्ट्रपतिपुरस्कृतः निवृत्तः आचार्यः | पटना विश्वविद्यालयः, पटना |
| 1. | प्रो. श्रीनिवास वरखेडी | कुलपतिः | कवि कुलगुरु कालिदास संस्कृत विश्वविद्यालयः, रामटेकम् |
| 1. | प्रो. अर्कनाथ चौधरी | निदेशकः | राष्ट्रिय संस्कृत विश्वविद्यालयः, जयपुरपरिसरः |

| | | | |
|---|---|---|---|
| 1. | डॉ. विश्वनाथ धितालः | सहायकाचार्यः | भारतीय प्रौद्योगिकी संस्थानम्, काशी हिन्दू विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. जयप्रकाश नारायण द्विवेदी | पूर्वनिदेशकः | द्वारकाधीश प्राच्यविद्या अनुसन्धान संस्थानम्, द्वारका |
| 1. | प्रो. मिथिलाप्रसाद त्रिपाठी | राष्ट्रपतिपुरस्कृतः कुलपतिः | महर्षि पाणिनी संस्कृत एवं वैदिक विश्वविद्यालयः, उज्जयिनी |
| 1. | प्रो. ललित त्रिपाठी | आचार्यः | राष्ट्रिय संस्कृत विश्वविद्यालयः, गङ्गानाथझापरिसरः, प्रयागराजः |
| 1. | प्रो. श्रीकिशोर मिश्रः | आचार्यः | काशी हिन्दू विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. कमलेशदत्त त्रिपाठी | राष्ट्रपतिपुरस्कृतः आचार्यः | काशी हिन्दू विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. गङ्गाधर पण्डा | आचार्यः | जगन्नाथ संस्कृत विश्वविद्यालयः, पुरी |
| 1. | प्रो. भीमसिंहः | निवृत्तः आचार्यः | कुरुक्षेत्र विश्वविद्यालयः, कुरुक्षेत्रम् |
| 1. | डॉ. बलराम शुक्लः | सहायकाचार्यः | दिल्ली विश्वविद्यालयः, नवदेहली |
| 1. | प्रो. गोपालकृष्ण दासः | अध्यक्षचरः | उत्कलविश्वविद्यालयः, भूवनेश्वरम् |
| 1. | प्रो. कृष्णकान्त शर्मा | आचार्यः | काशी हिन्दू विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. शिवजी उपाध्यायः | निवृत्तः आचार्यः | काशी हिन्दू विश्वविद्यालयः, वाराणसी |
| 1. | प्रो. शङ्करजी झा | आचार्यः | पंजाब विश्वविद्यालयः, चण्डीगढम् |
| 1. | डॉ. आनन्द मिश्रः | आचार्यः | हैडलबर्ग विश्वविद्यालयः, जर्मनी |
| 1. | प्रो. रामकरण शर्मा | कुलपतिचरः | कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालयः, दरभंगा |

विश्वविद्यालयेन आयोजितेषु कार्यक्रमेषु यथा सम्मेलनम्, सङ्गोष्ठी, कार्यशाला, व्याख्यानमाला, वाक्यार्थसभा, विशिष्टव्याख्यानम् इत्यादिषु एतेषां प्रतिष्ठिताचार्याणां तत्तद्विषयेषु व्याख्यानानि भवन्ति यत्र तत्तद्विभागस्य अध्यापकाः भागं गृहीत्वा लाभान्विताः भवन्ति।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |

***2.4.9 Specify the systems adopted to recharge academically and rejuvenate teachers (e.g. learning with traditional Gurus, providing research grants, study leave, nomination to national/ international conferences/ seminars, in-service training, organizing national/ international conferences, vakyartha-Sadhas, Shastrtha-Sabha, Shastra-Pareeksha, Shastra-spardha/ Samskrita-Kavi-Samavaya (Sanskrit Poets' Meet) etc.)***

**अध्यापकान् शैक्षिकरूपेण पुनर्नवीकर्तुम् अभिगृहीताः व्यवस्थाः सूचयतु- यथा- पारम्परिकगुरूणां सविधे अध्ययनम्, अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम्/**

**सेवारतप्रशिक्षणं, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलनस्य आयोजनं, वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकवि-समवायः इत्यादयः।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्राध्यापकान् शैक्षिकरूपेण पुनर्नवीकर्तुम् अभिग्रहीता व्यवस्था विद्यते- वाक्यार्थपरिषत्, शास्त्रपुनश्चर्याकार्यशाला, शास्त्रीयव्याख्यानमाला, राष्ट्रिय-अन्ताराष्ट्रियसम्मेलनम्, कविसम्मेलनम्, सेवारतप्रशिक्षणं कार्यशालादिकञ्च। एतच्छैक्षणिक-कार्यक्रमेषु प्राध्यापकाः भागं गृह्णन्ति। राष्ट्रिय-अन्ताराष्ट्रियसम्मेलनसम्पादनेन विभिन्नकार्यक्रमसम्पादनस्य अनुभवं प्राप्नुवन्ति, कविसम्मेलनेन पद्यनिर्माणकलां पद्यप्रस्तुतिञ्च जानन्ति। विश्वविद्यालयेऽस्मिन् अध्ययनावकाशव्यवस्था अपि विद्यते। एभिः प्राध्यापकाः शैक्षणिकरूपेण यथासमयं पुनर्नवीनीकृताः भवन्ति।

1. **श्रीसोमनाथसंस्कृतविश्वविद्यालये सम्पन्न-राष्ट्रिय-अन्ताराष्ट्रियसम्मेलनानां विवरणम्-**

| क्रम सं. | प्राध्यापक-नामानि | पदम् | कार्यक्रमाः | समयः |
|---|---|---|---|---|
| 1. | प्रो. देवेन्द्रनाथ पाण्डेयः<br>डॉ. नरेन्द्रकुमार पण्ड्या | संयोजकः | संस्कृतवाङ्मये शिवतत्त्वम् (अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठी) | 07-09 फरवरी, 2016 |
| 2. | प्रो. विनोद कुमार झा | संयोजकः | परिभाषार्थविचारः<br>(व्याकरणशास्त्रीया राष्ट्रियसङ्गोष्ठी) | 02-03 फरवरी, 2017 |
| 3. | डॉ. शत्रुघ्न पाणिग्राही | संयोजकः | कर्मकाण्डसंस्कारविज्ञानम्<br>(राष्ट्रियसम्मेलनम्) | 11-13 सितम्बर, 2017 |
| 4. | प्रो. देवेन्द्रनाथ पाण्डेयः<br>डॉ. जानकीशरण आचार्यः | स्थानीय-सचिवः<br>अतिरिक्त-स्थानीय-सचिवः | अखिलभारतीयप्राच्यविद्यासम्मेलनम् (AII India Oriental Conference) | 18-20 मई, 2018 |
| 5. | डॉ. बी. उमा महेश्वरी | संयोजिका | भारतीयदर्शनेषु सैद्धान्तिपक्षाः<br>(अखिलभारतीयदर्शनसङ्गोष्ठी) | 05-07 फरवरी, 2019 |
| 6. | प्रो. महेन्द्र दवे | संयोजकः | अखिलभारतीय-साहित्यसङ्गोष्ठी | 19-20 सितम्बर, 2019 |
| 7. | प्रो. देवेन्द्रनाथ पाण्डेयः | मुख्यसंयोजकः | अन्ताराष्ट्रियसम्मेलनम्<br>(भाष्यपरम्परा ज्ञानप्रवाहश्च) | 11-13 फरवरी, 2020 |
| | डॉ. दीपेश विनोद कतिरा | संयोजकः | | |
| | डॉ. जानकीशरण आचार्यश्च | संयोजकः | | |

1. **संस्कृतकवि-सम्मेलनम्-** विश्वविद्यालये संस्कृतवाङ्मये शिवतत्त्वम्, अखिलभारतीयप्राच्यविद्यासम्मेलनम्, अखिलभारतीय-साहित्यसङ्गोष्ठी, अन्ताराष्ट्रियसम्मेलनम् (भाष्यपरम्परा ज्ञानप्रवाहश्च) इति कार्यक्रमेषु संस्कृतकवि-सम्मेलनम् अनुष्ठितम्।
2. **अन्ताराष्ट्रिययोगदिवसः संस्कृतसप्ताहोत्सवश्च-** प्रतिवर्षं समायोजिते अन्ताराष्ट्रिययोगदिवसे संयोजकरूपेण डॉ.जयेश-मुङ्गरामहोदयः, श्रावणीपूर्णिमायां प्रतिवर्षम् आयोजिते संस्कृतसप्ताहोत्सवे संयोजनकार्यं प्राध्यापकाः कुर्वन्ति।
3. **सेवाकाले प्रशिक्षणप्राप्तवतां नामानि-**

| क्रम | प्राध्यापक- | कार्यक्रम-नाम | स्थानम् | समयः | प्रायोजक/ |
|---|---|---|---|---|---|

| सं | नामानि | | | | आयोजक संस्थानाम |
|---|---|---|---|---|---|
| 1. | डॉ. अमृतलाल भोगायता | षोडशं विश्व-संस्कृत-सम्मेलनम् | बैंकॉक (थाइलैंड) | 28/06/2015 तः 02/07/2015 | शिल्पकॉर्न-विश्वविद्यालय, बैंकॉक (थाइलैंड) |
| 2 | प्रो. महेन्द्रकुमार अ. दवे | 27th Appreciation Course in Parliamentary Processes and Procedures | Parliamentary Library Building, Loksabha, Delhi | 02/05/2016 to 06/05/2020 | लोक-सभा-सचिवालयः |
| 3. | प्रो. विनोद कुमार झा | राष्ट्रिया संस्कृतसङ्गणनशोधविकासकार्यशाला | राष्ट्रिय-संस्कृत-संस्थानम् गङ्गानाथ झा- परिसरः, प्रयागः | 19/02/2017 तः 25/02/2017 | राष्ट्रिय-संस्कृत-संस्थानम् |
| 4 | डॉ. दीपेश कतिरा | Joint Seminar | Tehran (I.R. Iran) | 1-2 Decembe, 2018 | Institute for HCS, Tehran & SVCC, Embassy of India, Tehran. |

1. **विश्वविद्यालयस्य सङ्कायैः समायोजिता कार्यशाला-**

| क्रम सं. | प्राध्यापक-नामानि | पदम् | सङ्कायः | कार्यशाला-विषयः | समयः |
|---|---|---|---|---|---|
| 1. | डॉ. नरेन्द्र कुमार पण्ड्या | संयोजकः | साहित्य-सङ्कायः | अलङ्कारनिर्णयः | 26-30 अगस्त, 2019 |
| 2. | डॉ. पङ्कज कुमार रावलः | मुख्यसंयोजकः | पुराण-सङ्कायः | श्रीमद्भागवतमहापुराणं तदागमस्तत्स्वाध्यायश्च | 20-23 नबम्वर, 2019 |
| 3. | प्रो. विनोद कुमार झा<br>डॉ. दीपेश विनोद कतिरा | मुख्यसंयोजकः<br>संयोजकः | व्याकरण-सङ्कायः | बहुव्रीहिसमासनिर्णयः | 03-07 दिसम्बर, 2019 |
| 4. | डॉ. शत्रुघ्न पाणिग्राही | मुख्यसंयोजकः | वेद-सङ्कायः | निरुक्तस्य प्रथमद्वितीयाध्यायौ | 03-07 दिसम्बर, 2019 |
| 5. | डॉ. बी. उमा महेश्वरी | संयोजिका | दर्शन-सङ्कायः | दर्शनेषु पारिभाषिकपदानां परिचयः | 23-27 दिसम्बर, 2019 |
| 6. | डॉ. रमेश चन्द्र शुक्लः<br>डॉ. नित्यानन्द ओझा | मुख्यसंयोजकः<br>सह-संयोजकः | ज्योतिष-विभागः | गोलपरिभाषा | 21-25 जनवरी, 2020 |

1. **अनुस्थापन-कार्यक्रमे पुनश्चर्या-कार्यक्रमे च भागं ग्रहीतवतां प्राध्यापकानां नामानि-**

| क्रम सं. | अध्यापक-नामानि | दिनाङ्कः | विश्वविद्यालय-नाम | कार्यक्रम-नाम |
|---|---|---|---|---|
| 1. | डॉ. जानकीशरण आचार्य | 11/02/2018 – 03/03/2018 | दिल्ली-विश्वविद्यालय, दिल्ली | पुनश्चर्या- |

| | | | | |
|---|---|---|---|---|
| 2. | डॉ. जयेशकुमार डी. मुंगरा | 07/03/2018 – 27/03/2018 | गुवाहाटी-विश्वविद्यालय | कार्यक्रमः |
| 3. | डॉ. डायालाल मालदेभाई मोकरिया | 01/06/2015 – 21/06/2015 | गुजरात-विश्वविद्यालय, अहमदाबाद | |
| 4. | डॉ. रमेशचन्द्र बाबुलाल शुक्ल | 01/06/2015 – 21/06/2015 | गुजरात-विश्वविद्यालय, अहमदाबाद | |
| 5. | डॉ. ललितकुमार पटेल | 01/06/2015 – 21/06/2015 | गुजरात-विश्वविद्यालय, अहमदाबाद | |
| 6. | डॉ. पङ्कज रावल | 01/06/2015 – 21/06/2015 | गुजरात-विश्वविद्यालय, अहमदाबाद | |
| 7. | डॉ. शत्रुघ्नपाणिग्राही | 01/06/2015 – 21/06/2015 | गुजरात-विश्वविद्यालय, अहमदाबाद | |
| 8. | डॉ. जानकीशरण आचार्यः | 21/11/2017 – 19/12/2017 | दिल्ली-विश्वविद्यालय, दिल्ली | अनुस्थापन-कार्यक्रमः |
| 9. | डॉ. बी. उमा महेश्वरी | 20/11/2017 – 18/12/2017 | जवाहरलालनेहुरु-टेक्नोलोजिकल यूनिवर्सिटी, हैदराबाद | |
| 10. | डॉ. जयेशकुमार डी. मुंगरा | 20/11/2017 – 18/12/2017 | जवाहरलालनेहुरु-टेक्नोलोजिकल यूनिवर्सिटी, हैदराबाद | |
| 11. | डॉ. दीपेश विनोद कतिरा | 20/11/2017 – 18/12/2017 | जवाहरलालनेहुरु-टेक्नोलोजिकल यूनिवर्सिटी, हैदराबाद | |
| 12. | डॉ. डायालाल मालदेभाई मोकरिया | 04/11/2019 – 17/11/2019 | गुजरात-विश्वविद्यालय, अहमदाबाद | पुनश्चर्या-कार्यक्रमः |
| 13. | डॉ. पङ्कज रावल | 28/09/2020 – 11/10/2020 | गुजरात-विश्वविद्यालय, अहमदाबाद | |
| 14. | डॉ. दीपेश विनोद कतिरा | 08/01/2018 – 28/01/2018 | सौराष्ट्रविश्वविद्यालय, राजकोट | |
| 15. | डॉ. बी. उमा महेश्वरी | 16/02/2018 – 08/03/2018 | इलाहाबाद-विश्वविद्यालय | |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

***2.4.10 Specify the names of faculty imparting indepth shastra knowledge/ Avadhana/ shastrartha to the students and encouraging them to take various shastra exams conducted by different organisations in addition to regular teaching.***

**नित्याध्यापनातिरिक्तत्वेन च्छात्राणां कृते विविधसंस्थाभिः सञ्चालितासु शास्त्रार्थपरीक्षासु स्पर्धासु च भागं ग्रहीतुं शास्त्रार्थेषु अवधानकलायां विशेषप्रशिक्षणं प्रददताम् अध्यापकानां विषये विवरणं प्रयच्छत।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालये आयोजितेषु नित्याध्यापनातिरिक्तेषु विभिन्न-कार्यक्रमेषु/स्पर्धासुअत्रत्यानां प्राध्यापकानां योगदानम्। यथा-

1. **विविधासु स्पर्धासु भागग्रहीतॄन् छात्रान् सज्जीकर्तुं प्राध्यापकानां योगदानम्-**

| कार्यक्रम-नाम | भागग्रहीतारः | मार्गनिर्देशनम् | योगदानम् |
|---|---|---|---|
| आन्ध्र-प्रदेशे तिरुपतिस्थस्य **राष्ट्रिय-संस्कृत-विद्यापीठस्य** अखिलभारतीय-संस्कृतच्छात्र-प्रातिभसमारोहः, गुजरात-राज्यस्य **गुजरात-राज्य-स्तरीय-स्पर्धा**,<br><br>अखिलभारतीय-संस्कृतशास्त्र-प्रतियोगिता अगरतला, त्रिपुरा | विश्वविद्यालय-स्य छात्राः | दूरभाषमाध्यमेन, वाट्स-एप-माध्यमेन, अन्यसंसाधनमाध्यमेन।<br><br>कक्षीयेतरकाले अपठितस्य ग्रन्थस्य/ ग्रन्थांशस्य मासपर्यन्तं ततोऽधिकं कालपर्यन्तं पाठनम्। | प्रो. विनोदकुमार झा,<br><br>प्रो. अर्चना-दूबे, डॉ. अमृतलाल भोगायता, डॉ. जानकीशरण आचार्यः |

1. **शास्त्रीयस्पर्धा-**

| क्रम सं | छात्र-नाम | कार्यक्रम-नाम | स्थानम् | समयः | आयोजक-संस्थानाम | योगदानम् |
|---|---|---|---|---|---|---|
| 1. | जिगर एम. भट्टः | अखिलभारतीय-शास्त्रार्थ-प्रशिक्षणवर्गः | राष्ट्रिय-संस्कृत-संस्थानम् (मानित विश्वविद्यालयः) एकलव्य-परिसरः, अगरतला, त्रिपुरा | 02-18 मार्च, 2016 | राष्ट्रिय-संस्कृत-संस्थानम् (मानित विश्वविद्यालयः) | डॉ. अमृतलाल-भोगायता |

1. **वाग्वर्धिनी-सभा-**

| कार्यक्रम-नाम | उद्देश्यम् | भागग्रहवन्तः | विषयः | योगदानम् |
|---|---|---|---|---|
| वाग्वर्धिनी-सभा | प्रतिभाविकासः | सर्वेऽपि छात्राः छात्र्यश्च | स्व-स्व-शास्त्रीय-विषयः | प्रो. विनोदकुमार झा, डॉ, शत्रुघ्न-पाणिग्राही,डॉ, रमेशचन्द्र-शुक्लः डॉ. उमा-महेश्वरी, डॉ. जानकीशरण-आचार्यः |

1. **संस्कृत-सप्ताहोत्सवः-** छात्राणां प्रतिभास्फोरणाय श्रीसोमनाथसंस्कृतविश्वविद्यालये श्रावणपूर्णिमावसरे संस्कृतसप्ताहमायोजयति। आसप्ताहं स्तोत्रकण्ठपाठ-स्पर्धा, वक्तृत्व-स्पर्धा, स्फूर्ति-स्पर्धा, समस्यापूर्ति-स्पर्धा, रङ्गवल्ली-स्पर्धा, निबन्धलेखन-स्पर्धा, कथाकथन-स्पर्धा, समूहगान-स्पर्धा च चलन्ति। छात्राणाम् उत्साहवर्द्धनाय पुरस्काराः प्रदीयन्ते। संस्कृतसप्ताहोऽयं विश्वविद्यालयच्छात्रैः सह क्षेत्रेऽस्मिन् माध्यमिक-उच्चतरमाध्यमिकस्तरे पठितवतां समेषां संस्कृतच्छात्राणां कृतेऽपि आयोज्यते। विद्यालयच्छात्राः अपि सोत्साहं तत्र भागं गृह्णन्ति। तेषां कृतेऽपि उपर्युक्ताः स्पर्धाः भवन्ति विजेतॄणां कृते पुरस्कार-व्यवस्था च।

**२०२०तमे वर्षे आयोजितस्य संस्कृतसप्ताहोत्सवस्य वैशिष्ट्यम्-**

| कार्यक्रम-विवरणम् | उद्देश्यम् | वैशिष्ट्यम् | लाभान्विताः | योगदानम् |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| संस्कृतसप्ताहोत्सवः<br><br>(ऑनलाईन)<br><br>31-7-2020तः 6-8-2020<br><br>उद्घाटनसत्रस्य मुख्यवक्ता-पद्मश्री चमूकृष्णशास्त्री<br><br>(संस्कृतसम्वर्धन-प्रतिष्ठानस्य न्यासी) | संस्कृत-सप्ताहोत्सवस्य प्रचारः | संस्कृतसप्ताहोत्सवस्य प्रचारः त्रिविधाभियानेन जातः।<br><br>1. विडियो-अभियानम्-संकृतानुरागिभिः **संस्कृतं मम गौवरम्** इति लघुचलच्चित्रेण सामाजिकजनसञ्चार-माध्यमेन (सोशल मीडिया) प्रसारः प्रचारश्च कृतौ।<br><br>2. संस्कृतसूक्ति-अभियानम्-आमुखपटले (फेसबुक) एवं ट्वीटरमाध्यमेन संस्कृतसाहित्यस्य प्रसिद्धसूक्तिषु प्रतिदिनं १० सूक्तीनां प्रचारः जातः। वर्तमानपत्रे लेख-अभियानम्-आसप्ताहं **वर्तमानसमये संस्कृतस्य प्रासङ्गिकता** इति विषयमादाय वृत्तपत्रेषु **प्रासङ्गिकता**इति विषयमादाय वृत्तपत्रेषु संस्कृत-विषयक-विभिन्नानां सप्तलेखानां प्रकाशनं जातम्। । | अस्य कार्यक्रमस्य आमुखपटले (फेसबुक) जीवन्तप्रसारणं (लाईव) जातम् । अनेन सप्तशतम् (७००) जनाः लाभान्विताः जाताः । आहत्य न्यूनातिन्यूनम् 25000 संस्कृतानुरागिणः सामाजिकाश्च प्राप्तसन्देशाः प्रेरिताः जागरुकाः संस्कृतसाहित्यस्य पठनाय प्रोत्साहिताश्च। | डॉ. ललित पटेलः, डॉ, शत्रुघ्न पाणिग्राही,डॉ. पंकज रावलः, डॉ. जानकीशरण आचार्यः, डॉ. दीपेश कतिरा |

1. **युव-महोत्सवः-**

| **स्पर्धा-नाम** | **भागग्रहवन्तः** | **स्थानम्** | **आयोजकः** | **योगदानम्** |
|---|---|---|---|---|
| युव-महोत्सवः<br><br>(अत्र शैक्षणिकाः कार्यक्रमाः-एककसंस्कृतगीतम्, एकपात्राभिनयः, संस्कृतसुभाषितकण्ठपाठः, वादविवादस्पर्धा, स्फूर्तिस्पर्धा, साहित्यरचना, आशुभाषणं योगासनञ्च) | विश्वविद्यालयस्य तथा तत्सम्बद्ध-महाविद्यालयानां छात्राः छात्र्यश्च | विश्वविद्यालय-सम्बद्ध-महाविद्यालयः/विश्वविद्यालय-परिसरः | श्री-सोमनाथ-संस्कृत-विश्वविद्यालयः | डॉ महेन्द्र दवे, डॉ. जयेश मुंगरा, डॉ. डायालाल मोकरिया, डॉ. जानकीशरण आचार्यः, डॉ. दीपेश कतिरा, डॉ. रवीन्द्र काले |

1. **संस्कृतसम्भाषणशिविरम्-** अत्र विश्वविद्यालये प्रतिवर्षम् शास्त्रिप्रथमवर्षे लब्धप्रवेशछात्राणां कृते संस्कृतविश्वविद्यालयेनानेन संस्कृतसम्भाषणशिविरम् आयोज्यते। शिबिरमिदं जुलाईमासे आयोजितं भवति। तत्र शिबिरे डॉ. ललित पटेलः, डॉ. दीपेश विनोद कतिरा, श्री जिगर भट्टः, श्री मेहुल जोषी निपुणाः शिक्षकाः सेवां ददति।

2. **श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिताः अन्ये विशिष्टाः ऑनलाईन कार्यक्रमाः यत्र प्राध्यापकानां योगदानम विद्यते-**

| **क्रम सं** | **मुख्य-कार्यक्रमाः** | **सम्पन्न-कार्यक्रमाः** | **समयः** | **सहयोगः** | **आ सं** |
|---|---|---|---|---|---|
| 1. | कविसम्मेलनम् | काव्य-पाठः | ७-२-२०१६ , १८-५-२०१८, ५-२-२०१९, २०-९-२०१९ (आनलाईन) ३०-५-२०२०तमे वर्षे | डॉ. नरेन्द्रकुमार पण्ड्या | |
| 2. | कालिदासजयन्तीमुपलक्ष्य कालिदाससप्ताहः | कालिदास-प्रश्नोत्तरी, कालिदास-सूक्तिव्याख्यानम्, **रघुवंशम् (द्वितीयसर्गः) कथं पठेम** इति अन्तर्जालीया प्रमाणपत्रीय-योजना | १६-६-२०२० तः २२-६-२०२० | डॉ. ललित पटेलः, डॉ महेन्द्र दवे, श्री जिगर एम. भट्टः | श्री वि |
| 3. | श्रीमद्भागवतमाश्रित्य ऑनलाइन-व्याख्यानमाला | व्याख्यानानि | २०२०तमेवर्षे (नव दिनानि) | डॉ. नरेन्द्रकुमार पण्ड्या | |
| 4. | शॉर्ट-टर्म-ओनलाईन पाठ्यक्रमः | रामायण एवं व्यक्तित्व विकास | ०३ अगस्त, २०२०तः २१अक्टूबर, २०२० पर्यन्तम्। | प्रो. महेन्द्रदवे डॉ. जानकीशरण आचार्यः | |
| 5. | शॉर्ट-टर्म-ओनलाईन-पाठ्यक्रमः | संस्कृतवाक्याभ्यासः | १७ अक्टूबर २०२०-१२-०९ तः आरब्धः | डॉ॰ दीपेशविनोदकतिरा सुश्रीविदुषी बोल्ला | |
| 6. | शॉर्ट-टर्म-ओनलाईन-पाठ्यक्रमः | संस्कारों का मानव जीवन पर प्रभाव | १७ अक्टूबर २०२० तः आरब्धः | डॉ॰ पङ्कजरावलः डॉ॰ आशा माढकः | |

1. **यूजीसी नेट-जेआरएफ-स्लेट प्रशिक्षणशिबिरे प्राध्यापकानां योगदानम्-**

श्री सोमनाथ-संस्कृत-विश्वविद्यालये **KCG** इत्यस्य आर्थिक-सहयोगेन यूजीसी नेट/जेआरएफ/स्लेट/सेट प्रशिक्षणकेन्द्रस्य आयोजनम् 2015-2016 शैक्षिक-सत्रतः चलति। यत्र सर्वेऽपि अत्रत्याः प्राध्यापकाः नित्याध्यापनातिरिक्तसमयेअध्यापकत्वेन सहयोगं कुर्वन्ति। अत्र प्राध्यापकद्वयस्य योगदानम् आसीत्- प्रो. विनोद कुमार झा, डॉ. जानकीशरण आचार्यः।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

**2.5 Evaluation Process and Reforms**

***2.5.1 Average number of days from the date of last semester-end/ year-end examination till the declaration of results during the last five years***

### विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां सङ्ख्यायाः मध्यमानम् -

**Answer:** 33.2

2.5.1.1 Number of days from the date of last semester-end/ year-end examination till the declaration of results year-wise during the last five years.

विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 31 | 35 | 34 | 30 | 36 |

| File Description | Document |
|---|---|
| List of Programmes and date of last semester and date of declaration of results (Data Template) पाठ्यक्रमसूची, अन्तिमषाण्मासिक्याः दिनाङ्कः, परीक्षापरिणामघोषणदिनाङ्कश्च (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.5.2 Average percentage of student complaints/ grievances about evaluation against total number appeared in the examinations during the last five years.***

### विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्आम्/ अभियोगं वा कृतवतां छात्राणां मध्यमानस्य प्रतिशतता।

**Answer:** 7.04

2.5.2.1 Number of complaints/ grievances about evaluation year-wise during the last five years.

विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्आम्/ अभियोगं वा कृतवतां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 11 | 13 | 10 | 08 | 18 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |

| | |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.5.3 Average percentage of applications for revaluation leading to change in marks***

### पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां प्रतिशतं मध्यमानस्य मानं, यत्र अङ्कानां परिवर्तनं जातम्।

**Answer:** 50.75

2.5.3.1 Number of applications for revaluation leading to change in marks year-wise during the last five years

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या, यत्र अङ्कानां परिवर्तनं जातम्।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 07 | 02 | 04 | 05 | 13 |

2.5.3.2 Number of revaluation applications year-wise during the last five years.

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 11 | 13 | 10 | 08 | 18 |

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.5.4 Positive impact of reforms on the examination procedures and processes including IT integration and continuous internal assessment on the examination management system.***

### परीक्षाप्रबन्धनप्रणाल्याः परीक्षापद्धतेः सूचनाप्रविधेश्च निरन्तरम् आन्तरिकपरीक्षणस्य च अनुकूलः प्रभावः अनुभूयते।

**Answer:**

1. **परीक्षायाः पूर्वप्रक्रिया**

- परीक्षासमितिद्वारा परीक्षादिनाङ्कं निश्चेतुं गोष्ठी आयोज्यते यत्र परीक्षादिनाङ्कः तस्य आनुषङ्गिकनिर्णयाः निर्णीयन्ते । तद्यथा -
    - वर्तमानपत्रेषु परीक्षावार्ताः प्रसार्यन्ते। विद्यार्थिनां पक्षतः परीक्षायाः कृते आवेदनपत्राणि च स्वीक्रियन्ते ।
    - विविधसङ्कायाध्यक्षेभ्यः प्रत्येकं प्रश्नपत्राय प्रश्नपत्रद्वयं निर्मातुं परीक्षकनामानि स्वीकृत्य प्रश्नपत्राणां सज्जीकरणं विधीयते ।
    - परीक्षाविभागेन विषयानुगुणं प्रश्नपत्रसज्जीकरणाय कार्यालयादेशाः क्रियन्ते ।
    - समयपत्रकम् अन्तर्जालमाध्यमेन, पत्रमाध्यमेन च प्रसार्यते ।
    - आवेदनपत्रम् अन्तर्जालमाध्यमेन प्रपूर्य कक्षा-विभाग-विषयानुगुणं वर्गीकरणं क्रियते।
    - परीक्षाशुल्कं वित्तशाखायाम् अन्तर्जालमाध्यमेनैव स्वीक्रियते ।
    - छात्राणां खण्डप्रवेशपत्रम्, उपवेशनक्रमाङ्कादीनां विवरणिका सज्जीक्रियते ।
    - प्रत्येकं विषये आगतप्रश्नपत्र-प्रतिद्वयं “A”, “B” इति कूटाङ्कलेखनपुरस्सरं मान्यकुलपतिं प्रति सम्प्रेष्य एकस्य प्रश्नपत्रस्य चयनं विधीयते।

- चयनितानां प्रश्नपत्राणां तत्तद्विषयविशेषज्ञैः परीक्षणं (moderation) विधीयते।
- विषयानुगुणं प्रश्नपत्राणां टङ्कणं, पूर्वफलसंशोधनम्, आवश्यकतानुगुणं प्रतिलिपिं कृत्वा तत्तत्परीक्षाकेन्द्रेभ्यः प्रश्नपत्राणि, रिक्ताः उत्तरपुस्तिकाः, आवश्यकाश्च कर्गजाः प्रेष्यन्ते।

1. **परीक्षासमये प्रक्रिया**
   - परीक्षाकेन्द्रेषु आवश्यककर्गजसहितानि प्रश्नपत्राणि सम्प्रेष्यन्ते।
   - परीक्षाकेन्द्रसंयोजकस्य नियुक्तिः, परीक्षाकेन्द्रसञ्चालनस्य सामान्यनियमाः, परीक्षायाः मार्गदर्शिकाः च प्रेष्यते।
   - परीक्षायाः निरीक्षणाय परीक्षाकेन्द्रनिरीक्षकस्य नियुक्तिः क्रियते।
   - विश्वविद्यालयस्य सत्तामण्डलस्य सदस्यद्वारा परीक्षाकेन्द्राणां निरीक्षणं, ततः परीक्षाकेन्द्रविषये तेषां मन्तव्यं प्राप्तुं सूच्यते।
2. **मध्यस्थमूल्याङ्कनस्य प्रक्रिया**
   - परीक्षाकेन्द्रेभ्यः आगतानाम् उत्तरपुस्तिकानां दिवस-कक्षा-विषयानुगुणं वर्गीकरणं विधाय उत्तरपुस्तिकासु कूटाङ्कलेखनं विधीयते। इयं सर्वा अपि प्रक्रिया CCTV अन्तर्गतं भवति।
   - मूल्याङ्कनकर्तॄणां नामानि ततत्सङ्कायाध्यक्षेभ्यः स्वीक्रियन्ते। ततः मूल्याङ्कनकर्तॄन् विश्वविद्यालयपरिसरे समाहूय मध्यस्थमूल्याङ्कनपद्धत्या मूल्याङ्कनं कार्यते।
   - प्रत्येकं विषयानुगुणं चतुर्णां मूल्याङ्कनकर्तॄणां नियुक्तिं विधाय उत्तरपुस्तिकानां मूल्याङ्कनं विधीयते। मूल्याङ्कनकेन्द्रे एव मूल्याङ्कित-उत्तरपुस्तिकानां मध्यस्थ-मूल्याङ्कनम् अपि विधीयते।
3. **परीक्षापरिणामस्य प्रक्रिया**
   - उत्तरपुस्तिकासु लिखितस्य कूटाङ्कस्य आधारेण अङ्कानां लेखनं सङ्गणकमाध्यमेन क्रियते।
   - सङ्गणके प्रविष्टानाम् अङ्कानां संशोधनम् उत्तरपुस्ताभिः सह क्रियते।
   - परीक्षापरिणामः सङ्गणकमाध्यमेन सज्जीक्रियते।
   - परीक्षापरिणामः विश्वविद्यालयस्य अन्तर्जालमाध्यमेन उद्घोष्यते।
   - परीक्षापरिणामस्य सूचना वैद्युतकपत्रमाध्यमेन (email) महाविद्यालयेभ्यः प्रेष्यते।

1. **परीक्षापद्धतौ पारदर्शिता**
   - परीक्षायाः कृते आवेदनपत्राणि महाविद्यालयानां कृते वैद्युतकपत्रमाध्यमेन प्रेष्यन्ते, तथा च परीक्षाशुल्कम् अन्तर्जालमाध्यमेन पूरयितुं सौविध्यं प्रदीयते, येन समयस्य कर्गजाणां च रक्षणं भवति।
   - प्रत्येकं प्रश्नपत्रस्य भिन्न-भिन्न-प्राश्निकमाध्यमेन प्रतिद्वयं क्रियते। ततः कूटाङ्कमाध्यमेन, यथा प्राश्निकस्य नाम उद्घाटितं न स्यात् तथा एकस्य प्रश्नपत्रस्य चयनं विधीयते।
   - प्रश्नपत्राणां गोपनीयतां रक्षयितुं प्रश्नपत्राणाम् उपरि विश्वविद्यालयस्य विशेषचिह्नयुतः कर्गजः स्थाप्यते।
   - परीक्षायां प्रश्नपत्राणां बन्धस्य उद्घाटनं छात्राणाम् उपस्थितौ क्रियते, अपि च प्रत्येकं प्रश्नपत्रबन्धस्य उपरि छात्रद्वयस्य हस्ताक्षरमपि स्वीक्रियते, येन परीक्षाप्रश्नपत्रस्य बन्धः सुरक्षितः अस्ति इति निश्चेतुं शक्यते।
   - परीक्षायाः गोपनीयतां रक्षयितुम् उत्तरपुस्तिकानाम् उपरि कूटाङ्क-पद्धतेः (Barcode System) उपयोगः क्रियते। समग्रमूल्याङ्कनप्रक्रियायां विद्यार्थिनः परिचयः गुप्तः भवेत्, एतत् सुनिश्चितं क्रियते।
   - विश्वविद्यालये ERP परीक्षाप्रणाल्याः परिपालनं क्रियते येन समग्रपरीक्षातन्त्रस्य नियन्त्रणं केन्द्रीयकृतं भवति तथा च विद्यार्थिनां गोपनीयता संरक्षिता भवति।
   - आन्तरिक-अङ्कानां प्रविष्टिः ERP प्रणाल्या महाविद्यालयद्वारा क्रियते, येन समय-कर्गजादीनां रक्षणं भवति।
   - परीक्षापरिणामः त्रिंशद्दिनेषु विश्वविद्यालयस्य अन्तर्जाले प्रकाश्यते। येन छात्राः स्वयमेव यत्र कुत्रापि स्थित्वा परीक्षापरिणामं द्रष्टुं शक्नुवन्ति।
   - विद्यार्थिनां हिताय अन्तिमसत्रीयविद्यार्थिनां कृते पूरकपरीक्षायाः आयोजनं क्रियते।
   - ये छात्राः पुनः मूल्याङ्कनं कारयितुम् इच्छन्ति, तेषां कृते पुनः मूल्याङ्कनस्य, पुनः परीक्षणस्य च अवसरः दीयते। यदि पुनः मूल्याङ्कने अङ्कानां वृद्धिः भवति तर्हि पुनःमूल्याङ्कनस्य शुल्कस्य छात्राणां कृते प्रत्यर्प्यते।
   - विद्यार्थिभ्यः तेषां चित्रसहितम् अङ्कतालिका (Mark sheet) प्रदीयते।
   - विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या सञ्चालितानां कार्यक्रमाणां परीक्षापद्धतौ विश्वविद्यालय-अनुदान-आयोगस्य निर्देशानुसारं SGPA/सञ्चितश्रेण्यङ्कसाधारणमानम् (CGPA) पद्धत्यानुगुणम् अङ्कतालिका प्रदीयते।
2. **प्रवेशस्य तथा परीक्षाप्रणाल्याः यान्त्रिकीकरणम्**

- पञ्जीकरणकार्यं महाविद्यालयद्वारा प्राप्तेन उपयोक्तृणां कूटाङ्कमाध्यमेन क्रियते। ततः आवश्यकप्रपत्राणां समीक्षणं विधाय विद्यार्थिभ्यः पञ्जीकरणसंख्या प्रदीयते।
- पञ्जीकरणसम्बद्धं सर्वविधं कार्यम् उपक्रमसंसाधनयोजनाप्रणाल्या (Enterprise Resource Planning) क्रियते।
- परीक्षायै विद्यार्थिनां प्रवेशपत्रम्, पञ्जीकरणसंख्या इत्यादिकार्यं तत्तन्महाविद्यालयाः अन्तर्जालमाध्यमेन कर्तुं शक्नुवन्ति।
- विद्यार्थिनां प्रवेशपत्राणि विश्वविद्यालयस्य अन्तर्जालेऽपि स्थाप्यन्ते, येन छात्राः अपि कूटाङ्कलेखनपुरस्सरं प्रवेशपत्रं प्राप्नुन्ति।
- यान्त्रिकीकरणप्रक्रियया एव विद्यार्थिनां विविधप्रकारकाणि प्रपत्राणि सिद्धानि भवन्ति।
- विद्यार्थिनां कृते विविधकार्यक्रमाणाम्, आवेदनपत्राणां च शुल्कः अन्तर्जालमाध्यमेन स्वीक्रियते।
- परीक्षापरिणामः अपि ERP प्रणाल्या सिद्धं कृत्वा यान्त्रिकप्रणाल्या अन्तर्जाले प्रकाश्यते।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |

***2.5.5 Status of automation of Examination division along with approved Examination Manual-***

### परीक्षाविभागस्य यान्त्रिकीकरणेन सह अङ्गीकृतायाः परीक्षामार्गदर्शिकायाः स्थितिः -

**Answer:** B. Only student registration, Hall ticket issue & Result Process (आ. केवलं छात्राणां पञ्जीकरण-परीक्षा-प्रवेशपत्रं फलितांशप्रक्रिया च।)

| File Description | Document |
|---|---|
| Current Manual of examination automation system परीक्षा-यान्त्रिकीकरण-प्रणाल्याः अधुनातनी दर्शिका | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Annual reports of examination including the present status of automation (Data Template) अधुनातन्याः यान्त्रिकीकरणस्थित्या सहितं परीक्षायाः वार्षिकं वृत्तम् (दत्तांशप्रारूपम्) | View Document |

***2.5.6 Use of Sanskrit as a medium for Question Paper setting and Answering in Examination.***

### विश्वविद्यालयः परीक्षाप्रश्नपत्राणां निर्माणे उत्तरलेखने च संस्कृतमाध्यममनुसरति।

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृताध्ययनस्य विशिष्टः विश्वविद्यालयः अस्ति इति हेतोः अत्र शैक्षणिकव्यवहारः संस्कृतेन भवति। प्राशासनिककार्येषु अपि संस्कृतस्य समावेशः वर्तते। शास्त्री, आचार्यः, तत्त्वाचार्यः, विद्यावारिधिः इति उपाध्यर्थं पठन्तः छात्राः परीक्षायाम् उत्तरलेखनं संस्कृतमाध्यमेन कुर्वन्ति।

1. अस्मिन् विश्वविद्यालये सञ्चाल्यमानानां पाठ्यक्रमाणां निर्माणम्, अन्तर्जाले आरोपणं च संस्कृतेन विहितमस्ति।
2. शास्त्रिस्तरे प्रतिसत्रं सप्त पत्राणि भवन्ति। तत्र भाषापत्राणि विहाय अन्येषां परीक्षाप्रश्नपत्राणां निर्माणं छात्रैश्च उत्तरलेखनं संस्कृतेन भवति। यद्यपि शास्त्रिप्रथमसत्रे एव छात्राणां कृते उत्तरलेखने विश्वविद्यालयेन संस्कृतम्/ गुजराती/हिन्दी इति विकल्पः दीयते, यतो हि कतिपयच्छात्राः शास्त्रिप्रथमसत्रे संस्कृतेतरक्षेत्रात् अपि प्रविशन्ति, तथापि ते छात्राः सत्यपि विकल्पे परीक्षायां संस्कृतमाध्यमेन उत्तरलेखनं कुर्वन्ति। आङ्ग्लम्, सङ्गणकम्, भाषापत्रम् (हिन्दी/गुजराती) इति प्रश्नपत्रत्रयस्य निर्माणं तत्तद्भाषानुगुणं भवति, तदतिरिच्य इतरप्रश्नपत्राणां निर्माणं संस्कृतमाध्यमेन एव भवति, छात्राः परीक्षायाम् उत्तरलेखनमपि संस्कृतमाध्यमेन कुर्वन्ति। अनिवार्यप्रश्नपत्ररूपेण “पर्यावरणम्” इति प्रश्नपत्रं सम्मिलितम् अस्ति, यस्य प्रश्नपत्रनिर्माणं संस्कृतभाषया भवति। छात्राः

सामान्यविद्यालयतः आगच्छन्ति, अतः तेषां कृते परीक्षायाम् उत्तरलेखने भाषास्वातन्त्र्यसत्येऽपि ते उद्यमेन संस्कृतमनुसरन्ति।

3. आचार्यस्तरे प्रतिसत्रं पञ्च प्रश्नपत्राणि भवन्ति, तेषां समेषां प्रश्नपत्राणां निर्माणम् उत्तरपुस्तिकासु उत्तरलेखनं च संस्कृतेनैव भवति।
4. प्रश्नपत्रेषु छात्राणां कृते सामान्याः निर्देशाः अपि संस्कृतमाध्यमेन प्रदीयन्ते।
5. विश्वविद्यालयपरिसरे सञ्चाल्यमाने "तत्त्वाचार्यः" इति पाठ्यक्रमे अपि प्रश्नप्रत्राणां निर्माणं तत्त्वाचार्यच्छात्रैः तेषां प्रश्नपत्राणाम् उत्तरलेखनं च संस्कृतमाध्यमेन क्रियते। तत्त्वाचार्यकार्यक्रमे पठन्तः छात्राः स्वीयं लघुशोधप्रबन्धलेखनम् अपि सम्पूर्णतया संस्कृतेन एवं कुर्वन्ति।
6. विद्यावारिधिकार्यक्रमे संशोधकाः छात्राः स्वीयस्य शोधकार्यस्य लेखनं संस्कृतमाध्यमेन कुर्वन्ति। तेषां शोधस्य मूल्याङ्कनं ये परीक्षकाः कुर्वन्ति, तेऽपि संस्कृतमाध्यमेन शोधमूल्याङ्कनं कुर्वन्ति। इत्थं शोधपाठ्यक्रमद्वयेऽपि शोधच्छात्राः संस्कृतमाध्यमेन स्वकीयशोधकार्यं प्रस्तुवन्ति।
7. तत्त्वाचार्यः विद्यावारिधिः च इति पाठ्यक्रमद्वयस्य प्रवेशपरीक्षायां प्रश्नपत्रं संस्कृतमाध्यमेन भवति।
8. अनेन विश्वविद्यालयेन PGDCA इति सङ्गणकशास्त्रविषयकः कश्चन कार्यक्रमः सञ्चाल्यते, तत्रापि एकस्य प्रश्नपत्रस्य निर्माणं उत्तरलेखनं च संस्कृतमाध्यमेन भवति।
9. शास्त्रिस्तरे तथा च आचार्यस्तरे प्रतिसत्रं त्रिंशत् अङ्कानां कृते आन्तरिकी परीक्षा भवति। यत्र आन्तरिकमूल्याङ्कनाय लिखितपरीक्षा भवति। अस्यां परीक्षायामपि प्रश्नपत्रस्य निर्माणं संस्कृतमाध्यमेन भवति, छात्राः उत्तरलेखनमपि संस्कृतमाध्यमेन कुर्वन्ति।
10. आन्तरिकपरीक्षायां प्रतिसत्रं प्रत्येकस्मिन् पत्रे चत्वारि स्वाध्यायकार्याणि छात्रेभ्यः प्रदीयन्ते। यत्र तत्तच्छास्त्रस्य परिचयः, विषयानुगुणाः प्रश्नाः, अतिलघूत्तरात्मकाः प्रश्नाः च समाविष्टाः भवन्ति। छात्राः एतेषां स्वाध्यायकार्याणां लेखनमपि संस्कृतेन कुर्वन्ति।
11. अस्मिन् विश्वविद्यालये सम्पूर्णस्य अध्ययन-अध्यापनस्य, शैक्षणिकभवने औपचारिक-अनौपचारिकवार्तालापस्य च माध्यमम् अपि संस्कृतभाषा अस्ति।

इत्थम् अयं श्रीसोमनाथसंस्कृतविश्वविद्यालयः परीक्षाप्रश्नपत्राणां निर्माणे उत्तरलेखने, छात्राणां स्वाध्यायकार्ये च संस्कृतमाध्यममनुसरति।

| File Description | Document |
|---|---|
| Upload a few answer papers of some programs written in Sanskrit. (संस्कृतमाध्यमेन लिखितोत्तराणां केषाञ्चित् पाठ्यक्रमाणां कानिचित् उत्तरपत्राणि।) | View Document |

**2.6 Student Performance and Learning Outcomes**

***2.6.1 Programme outcomes, Programme specific outcomes and course outcomes for all Programmes offered by the institution are stated and displayed on website and communicated to teachers and students.***

**संस्थाद्वारा परिचालितानां सर्वेषां पाठ्यक्रमाणां परिणामाः, पाठ्यक्रमाणां विशिष्टपरिणामाः,पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने निर्दिश्यन्ते, प्रदर्श्यन्ते च, छात्राणां शिक्षकाणां च कृते प्रेष्यन्ते।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः विश्वविद्यालये सञ्चाल्यमानानां सर्वेषां कार्यक्रमाणां परिणामविषये, कार्यक्रमाणां विशिष्टपरिणामविषये, पाठ्यक्रमस्य परिणामविषये च जागरुकः अस्ति। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विभिन्नैः विभागैः सञ्चालिताः विभिन्नाः पाठ्यक्रमाः तेषां परिणामैः युक्ताः वर्तन्ते। पाठ्यपत्राणां परिणामाः पाठ्यक्रमाणाम् आधारेण निर्धारिताः भवन्ति।

अस्मिन् विश्वविद्यालये सञ्चाल्यमानानां सर्वेषां कार्यक्रमाणां परिणामाः राष्ट्रिय-अध्यापक-शिक्षा-परिषत् (NCTE), विश्वविद्यालय-अनुदान-आयोगः (UGC), गुजरात-सर्वकारः इत्यादिसंस्थानां मार्गदर्शनानुसारं नियमानुगुणं च निर्धार्यन्ते। एते कार्यक्रमपरिणामाः, कार्यक्रमविशिष्टपरिणामाः, पाठ्यक्रमपरिणामाः च वैश्विकस्तरीयाः भवेयुः अथ च नियोक्तृणाम् अभियाचनानुसारं भवेयुः एतद्विषये श्रीसोमनाथसंस्कृतविश्वविद्यालयः अधोलिखितां प्रक्रियाम् अनुसरति

1. विश्वविद्यालयस्य अभ्यासक्रमसमितिद्वारा कार्यठ्यक्रमनिर्माणसमये तत्तत्कार्यक्रमस्य परिणामविषये, विशिष्टपरिणामविषये, पाठ्यक्रमपरिणामविषये च विशदं चिन्तनं क्रियते। सामान्यतया पाठ्यक्रमस्य परिणामः तत्तत्कार्यक्रमस्य परिणामस्य तथा च तत्तत्कार्यक्रमविशिष्टस्य परिणामस्य आधारेण निश्चीयते। अतः कार्यक्रमपरिणामस्य निर्माणानन्तरं कार्यक्रमविशिष्ट-परिणामः, पाठ्यक्रम-परिणामः च निर्धार्यते।
2. एतेषु कार्यक्रमेषु प्रत्येकं कार्यक्रमस्य उद्देश्यानि, विषयाङ्गानि, अन्वित्याधारेण विभाजनम्, पाठ्यपुस्तकस्य नाम, सन्दर्भपुस्तकानां नामानि, व्याख्यानस्य रूपरेखा, मूल्याङ्कनविधिः इत्यादिविषयाणां समावेशः भवति। प्रत्येकं सङ्कायस्य प्राध्यापकाः, विषयविशेषज्ञाः च स्वकीयविषयसम्बद्धस्य कार्यक्रमस्य स्वरूपं निर्माय अभ्यासक्रमसमितौ प्रस्तुवन्ति, अभ्यासक्रमसमितेः सदस्याः तत्तद्विषयाणां विशेषज्ञाः भवन्ति। ते एतेषां सर्वेषां परिणामानां विषये चिन्तनं कुर्वन्ति।
3. अभ्यासक्रमसमितिद्वारा यथासमयम् उपविश्य कार्यक्रमपरिणामेषु नावीन्यं सम्पाद्यते। ततः परं कार्यक्रमाणां परिणामाः, कार्यक्रमाणां विशिष्टपरिणामाः, पाठ्यक्रमाणां च परिणामाः विश्वविद्यालयस्य तत्तत्सङ्कायेषु प्रस्तूयन्ते, तत्र एतेषाम् अनुमोदनानन्तरं विश्वविद्यालयस्य विद्वत्परिषदि, कार्यकारिणीपरिषदि च प्रस्तुत्य अनुमतिः स्वीक्रियते। ततः प्राप्तायाम् अनुमत्यां सत्याम् इमे परिणामाः विश्वविद्यालयस्य जालपुटे, अध्यापकेषु, विद्यार्थिषु च प्रदर्शनपुरस्सरं सम्प्रेष्यन्ते।
4. प्रत्येकं पाठ्यक्रमः पुनः अन्वितिक्रमेण विभाजितं भवति। शास्त्रिस्तरे एकस्मिन् पाठ्यक्रमे तिस्रः अन्वितयः, आचार्यस्तरे च चतस्रः अन्वितयः भवन्ति। एतेन प्रत्येकमपि कार्यक्रमस्य पाठ्यक्रमस्य च यत् लक्ष्यम् अस्ति, तस्य सम्प्रेषणं छात्रेषु यथार्थतया भवति।
5. परीक्षायामपि प्रश्नपत्रस्य निर्माणम् अन्वित्याधारेण क्रियते, येन विश्वविद्यालयः इदं सुनिश्चितं कर्तुं शक्नोति यत् छात्राः कार्यक्रमस्य पूर्वनिर्धारितपरिणामस्य प्राप्तिं कुर्युः।
6. यद्यपि प्रश्नपत्रे केषुचित् प्रश्नेषु विकल्पः दीयते तथापि विश्वविद्यालयेन निर्धारितः तत्तद्विषयस्य परिणामाः तथैव पूर्वनिर्धारिताः भवन्ति।
7. प्रत्येकं सत्रस्य अन्ते प्रतिपत्रम् आन्तरिकी परीक्षा भवति, अस्यां परीक्षायां विश्वविद्यालये परिचालितानां सर्वेषां कार्यक्रमाणां कार्यक्रमाणां विशिष्टानां पाठ्यक्रमाणां च परिणामाः पूर्वनिर्धरितमानदण्डानुसारं पूरिताः भवेयुः एतदर्थं श्रीसोमनाथसंस्कृतविश्वविद्यालयः सततं प्रयासरतो भूत्वा विभिन्नान् शैक्षिकप्रकल्पान् आयोजयति।

**कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमापरिणामानां च सम्प्रेषणकार्यतन्त्रस्य विवरणम्**

1. कार्यक्रमेषु तत्परिणामेषु च कालानुगुणं नावीन्यं सम्पादनार्थम् अभ्यासक्रमसमितिसदस्याः सङ्कायप्राध्यापकैः प्रस्तुतस्य कार्यक्रम-परिणामस्य अवलोकनं विधाय कार्यक्रम-परिणामम् अनुमन्यते। ततः अयं कार्यक्रम-परिणामः विश्वविद्यालयस्य विद्वत्परिषदि (Academic Council), कार्यकारिणीपरिषदि (Executive Council) च अनुमोदनार्थं प्रस्तुतः क्रियते। ततः अनुमोदनानन्तरं कार्यक्रम-परिणामः सर्वेषां प्राध्यापकानां कृते, विश्वविद्यालयसंलग्नमहाविद्यालयानां कृते च प्रेष्यते। यस्य आधारेण सर्वत्र अध्यापनं भवति।
2. एतेषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमपरिणामानां च उद्योजनं विश्वविद्यालयस्य अन्तर्जालेऽपि क्रियते। ततः छात्राः, अध्यापकाः, लाभग्राहिणः च एतान् परिणामान् ज्ञातुं शक्नुवन्ति।
3. नूतनसत्रस्य आरम्भे विश्वविद्यालये प्रचालितानां कार्यक्रमाणां परिचयात्मिका एका गोष्ठी आयोज्यते यत्र सर्वेऽपि छात्राः, अध्यापकाः च भागं गृह्णन्ति। अस्यां गोष्ठ्यां शास्त्री, आचार्य, तत्त्वाचार्य, पदविकाकार्यः इत्यादीनां कार्यक्रमाणां कार्यक्रमविशिष्टानां च परिचयः प्रदीयते। अपि च अत्रैव अमीषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां च विषयेऽपि छात्राः अध्यापकाश्च सूच्यन्ते।
4. कार्यक्रमपरिणामविषये तत्तत्सङ्कायस्य अध्यक्षाः गोष्ठ्यां स्वसङ्कायान्तर्गतान् अध्यापकान् एतद्विषये बोधयन्ति।
5. ततः परं तत्तत्सङ्कायस्य प्राध्यापकैः अस्य कार्यक्रमस्य उद्देश्यानि, विषयाङ्गानि परिणामाः च छात्राणां कृते कक्ष्यासु नूतनसत्रारम्भे बोध्यन्ते।
6. अस्य विश्वविद्यालयस्य आन्तरिकगुणवत्ताऽऽश्वासनकेन्द्रमपि एतेषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमापरिणामानां च विषये चर्चां करोति।
7. इमे कार्यक्रमाणां परिणामाः, कार्यक्रमाणां विशिष्टपरिणामाः, पाठ्यक्रमाणां परिणामाः च विश्वविद्यालयस्य परीक्षाविभागेन अपि अन्तर्जालमाध्यमेन सर्वेषां लाभग्राहिणां कृते सम्प्रेष्यन्ते।

इत्थं कार्यक्रमस्य स्वरूपं, तस्य निर्माणं, मूल्याङ्कनप्रक्रिया, स्वाध्यायकार्यं, आन्तरिकपरीक्षा इत्यादिविषयाणां विश्वविद्यालयेन सम्प्रेषणं क्रियते।

| File Description | Document |
|---|---|
| Upload POs, PSOs, COs for all courses सर्वेषां पाठ्यक्रमाणां परिणामाः पाठ्यक्रमाणां विशिष्टपरिणामाः, पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने उपारोपणीयाः। | View Document |
| Upload a description of Mechanism of Communication सम्प्रेषणकार्यतन्त्रस्य विवरणम् उपारोपणीयम्। | View Document |
| Provide the URL जालस्थानसन्धानं निर्दिशन्तु | View Document |

***2.6.2 Attainment of Programme outcomes, Programme specific outcomes and course outcomes are evaluated by the institution***

### एतेषां सर्वेषां पाठ्यक्रमपरिणामानां, पाठ्यक्रमविशिष्टपरिणामानां, पाठ्यपत्रपरिणामानां निष्पत्तीनां च मूल्याङ्कनं संस्था करोति।

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयः सर्वेषां कार्यक्रमपरिणामानां, कार्यक्रमविशिष्टपरिणामानां, पाठ्यक्रमपरिणामानां च निष्पत्तीनां मूल्याङ्कनं करोति। तदर्थं विश्वविद्यालये निष्पत्तिमापनस्य विश्वसनीया मापनपद्धतिः वर्तते। विश्वविद्यालयस्य संस्थागतसंस्कृतिः शैक्षणिकक्षेत्रेषु छात्राणां सर्वोत्तमप्रदर्शनार्थं निरन्तरं प्रयासरता वर्तते।
2. अस्य विश्वविद्यालयस्य सर्वेऽपि कार्यक्रमाः, विशिष्टाश्च कार्यक्रमाः "पूर्णता गौरवाय" इति विश्वविद्यालयस्य ध्येयवाक्यम् अभिमुखीकृत्य छात्राणां समग्रविकासार्थं निर्धारिताः सन्ति। अतः विद्यार्थिनां दैनन्दिनव्यवहारेण, विभिन्नप्रतियोगितासु प्रदर्शनमाध्यमेन, परीक्षायां प्राप्ताङ्कमाध्यमेन च एतेषां परिणामानां निष्पत्तीनां च मापनं विश्वविद्यालयेन क्रियते।
3. एतेषां कार्यक्रमाणां परिणामस्य आधारेण सत्रान्तपरीक्षायाः अनन्तरं विद्यार्थिनां कृते विश्वविद्यालयेन उपाधिः प्रदीयते। एतस्याः परीक्षायाः आधारेण एतत् सुनिश्चितं क्रियते यत् विभिन्नकार्यक्रमाणां, कार्यक्रमविशिष्टानां, पाठ्यक्रमपत्राणां च परिणामाः छात्रैः कियता परिमाणेन प्राप्ताः सन्ति। परीक्षायाः एतन्महत्त्वाधारेण विश्वविद्यालये एका समीचीना परीक्षाप्रक्रिया अस्ति। यत्र विश्वसनीया परीक्षापद्धतिः, विश्वसनीया मूल्याङ्कनप्रणाली, यथासमयं परीक्षापरिणामस्य उद्घोषणा इत्यादिकम् अस्याः उद्देश्यानि सन्ति। अयं विश्वविद्यालयः एतानि उद्देश्यानि पूरयितुं सर्वविधां व्यवस्थां करोति।
4. प्रत्येकं वर्षे सततमूल्याङ्कनमाध्यमेन सङ्कायगोष्ठीमाध्यमेन च कार्यक्रमाणां मूल्याङ्कनं विधीयते।
5. कार्यक्रमविशिष्टस्य परिणामस्य मूल्याङ्कनं प्रत्येकस्मिन् सत्रे क्रियते। तथैव पाठ्यक्रमस्य मूल्याङ्कनमपि प्रत्येकं सत्रस्य अन्ते क्रियते।
6. पाठ्यपत्रस्य परिणामनिष्पत्तेः मूल्याङ्कनं सततरूपेण आन्तरिकमूल्याङ्कनमाध्यमेन तत्तद्विभागस्य अध्यापकाः छात्राणां कुर्वन्ति।
7. कार्यक्रमस्य विशिष्टपरिणामनिष्पत्तेः मूल्याङ्कनं तत्तद्विभागस्य अध्यक्षाः कुर्वन्ति। तथा च कार्यक्रमाणां परिणामनिष्पत्तेः मूल्याङ्कनं कुलपतिः, विद्वत्परिषदः सदस्याः, कार्यकारिणीपरिषदः सदस्याः च कुर्वन्ति।

**परिणामस्य निष्पत्तेः प्रतिफलम्** –

1. शैक्षिकवर्षं २०१५ आरभ्य अस्य विश्वविद्यालयस्य विंशत्यधिकाः छात्राः विश्वविद्यालय-अनुदान-आयोगस्य राष्ट्रियपात्रतापरीक्षां, कनिष्ठ-शोधाध्येतृवृत्तिं, राज्यपात्रतापरीक्षां च उत्तीर्णवन्तः। तत्र त्रयः छात्राः कनिष्ठ-शोध-अध्येतृवृत्तिं (Junior research Fellowship), द्वे छात्रे राष्ट्रिय-जनजातीय-शोधवृत्तिं (National Tribal Fellowship), त्रयः छात्राः गुजरातसर्वकारस्य शोधवृत्तिं (ScHeme Of Developing High quality research) प्राप्तवन्तः।
2. अस्य विश्वविद्यालयस्य बहवः छात्राः केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रायोजितायां राज्यस्तरीय-शास्त्रीयस्पर्धायां, विभिन्नसंस्थाभिः आयोजितासु प्रतियोगितासु भागं भाषण-शलाका-काव्यरचना-स्फूर्तिस्पर्धादिषु स्वर्णादिपुरस्कारैः सभाजिताः भवन्ति।

**परिणामस्य निष्पत्तेः मापनार्थं छात्राणां सततरूपेण आन्तरिकमूल्याङ्कनम्** –

1. सर्वेषां परिणामानां मूल्याङ्कनं कर्तुं विश्वविद्यालयः छात्राणां सततरूपेण आन्तरिकं मूल्याङ्कनं करोति। प्रत्येकं पाठ्यक्रमस्य आन्तरिकमूल्याङ्कने विश्वविद्यायलेन सम्पूर्णरूपेण पारदर्शिता परिपाल्यते। यत्र उपस्थितेः आधारेण, प्रदत्तस्वाध्यायकार्यस्य आधारेण, लिखितपरीक्षायाः आधारेण च अङ्काः प्रदीयन्ते।
2. कार्यक्रमस्य परिणामनिष्पत्तेः मूल्याङ्कनाय प्रतिपुष्टिप्रणाली विद्यते, यत्र विश्वविद्यालयः संरचित-प्रतिपुष्टिप्रणाल्या छात्रेभ्यः, अध्यापकेभ्यः, वृत्तिदातृभ्यः, पूर्वच्छात्रेभ्यः, अभिभावकेभ्यश्च प्रतिपुष्टिं स्वीकृत्य समीक्षां करोति। प्रतिपुष्टिं प्राप्य छात्राणां स्वस्थमानसिकतानिर्माणम्, सेवा-त्याग-राष्ट्रभावनायाः निर्माणम्, विविधप्रान्तेभ्यः आगतानां छात्राणां भाषाकौशलनिर्माणम् – एतदर्थम् अयं विश्वविद्यालयः सततरूपेण प्रयासरतोऽस्ति।
3. छात्राणां शैक्षिक-सांस्कृतिक-क्रीडादिक्षेत्रेषु विविधस्पर्धामाध्यमेन मूल्याङ्कनं विधीयते। यथा युवमहोत्सवे, संस्कृतसप्ताहोत्सवे च सुन्दरं चित्राङ्कनम्, श्लोकगायनम्, छन्दोरचना, प्राचीनशैल्याः आधारेण शास्त्रार्थः इत्यादिविषयेषु सततरूपेण मूल्याङ्कनं क्रियते।
4. छात्रस्य कार्यक्रमस्य, कार्यक्रमविशिष्टस्य, पाठ्यपत्रस्य च परिणामस्य मूल्याङ्कनं आन्तरिकपरीक्षायां प्राप्तैः अङ्कैः, सत्रान्तपरीक्षायां प्राप्तैः अङ्कैः, वाक्यार्थपरिषदि छात्रस्य प्रदर्शनेन, सम्मेलनेषु, सङ्गोष्ठीषु, स्वाध्यायकार्येषु, क्षेत्रीयकार्येषु च छात्रस्य प्रतिभागिताधारेण क्रियते।
5. एतेषां परिणामानां प्राप्तौ बाधकतत्त्वानि अभिज्ञाय विश्वविद्यालयेन तेषां निराकरणार्थं विभिन्नाः शैक्षणिकाः उपक्रमाः आयोज्यन्ते। तद्यथा मन्दाधिगन्तॄणां छात्राणां कृते अतिरिक्ताः वर्गाः, वैयक्तिकं मार्गदर्शनम्, पूरकपरीक्षायाः अवसरः इत्यादिकम्। अग्रसराधिगन्तारः छात्राः कार्यक्रमस्य परिणामाधारेण अभिज्ञायन्ते, ततः तेषां संवर्धनगतिविधीनां माध्यमेन सम्पोषणं क्रियते येन एते छात्राः योग्याः नागरिकाः भवेयुः।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |

***2.6.3 Average pass percentage of students***

### छात्राणाम् उत्तीर्णताप्रतिशततायाः मध्यमानम्

**Answer:** 81.4

2.6.3.1 Total number of final year students who passed the university examinations

विश्वविद्यालयस्य परीक्षासु उत्तीर्णानाम् अन्तिमवर्षीयाणां छात्राणां सङ्ख्या

Answer: 70

2.6.3.2 Total number of final year students who appeared for the examinations

अन्तिमवर्षपरीक्षासु सम्मिलितानां छात्राणां योगः

Answer: 86

| File Description | Document |
|---|---|
| Upload list of Programmes and number of students passed and appeared in the final year examination (Data Template) पाठ्यक्रमसूची, परीक्षायाम् उत्तीर्णानां छात्राणां सङ्ख्या, आन्तिमवर्षपरीक्षायां सम्मिलितानां छात्राणां योगः च उपारोपणीयाः(दत्तांशप्रारूपम्) | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

*2.6.4 The Institution has mechanism to evaluate the performance of students through the vakyartha/ shastrartha-Sabhas, Shalaka-Pareeksha, Shastra-Pareeksha (Oral), Shastra-spardha, Writing Sanskrit-Slokas/ Padya/ Poetry etc.*

**संस्था वाक्यार्थ/शास्त्रार्थसभा-शलाकापरीक्षा-शास्त्रपरीक्षा(मौखिकं)-शास्त्रस्पर्धा-संस्कृतश्लोक-पद्य-काव्यादिभिः छात्राणां प्रस्तुतेः मूल्याङ्कनार्थं किमपि कार्यतन्त्रमनुसरति।**

**Answer:**

श्री-सोमनाथ-संस्कृत-विश्वविद्यालये छात्राणां प्रदर्शनस्य मूल्यांकनाय विविधाः पद्धतयः उपयुज्यन्ते। यथा वाक्यार्थ-सभा, शलाकापरीक्षा, शास्त्रपरीक्षा, कक्षायां सततं मूल्याङ्कनम्, आन्तरिकं मूल्याङ्कनम्, शास्त्रस्पर्धा, संस्कृतश्लोक-पद्य-काव्यरचना, वाग्वर्धिनीपरिषदि छात्राणां विषयप्रस्तुतिः इत्यादिभिः पद्धतिभिः छात्राणां प्रस्तुतेः मूल्याङ्कनार्थं कार्यतन्त्रमनुसरति।

1. श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः छात्राणां संस्कृतभाषया वक्तृत्वकलायाः प्रदर्शनस्य मूल्यांकनाय, संस्कृतभाषया प्रस्तुतिकलायाः प्रदर्शनस्य मूल्यांकनाय, छात्राणाम् आत्मविश्वासस्य मूल्यांकनं कर्तुं, छात्राणाम् प्रतिभाप्रदर्शनस्य मूल्यांकनं कर्तुं वाग्वर्धिनी-सभाम् आयोजयति। यत्र सर्वेऽपि छात्राः छात्र्यश्च स्वकीयं शास्त्रीयं वक्तव्यं प्रस्तुवन्ति। अत्र सभासञ्चालनादिकस्य दायित्वमपि छात्राः एव सम्भालयन्ति, येन छात्रेषु नेतृत्वगुणं विकसितं भवति। अत्र परिषदि मूल्यांकनपद्धतेः भाषा-शुद्धिः, विषय-वस्तु विषय-प्रस्तुतिः चेत्यादीनि मूलभूतानि तत्त्वानि सन्ति ।
2. शलाकापरीक्षायां छात्राणां प्रदर्शनस्य मूल्याङ्कनं स्तरत्रयमाध्यमेन भवति यत्र छात्रस्य कण्ठीकरणसामर्थ्यम्, कण्ठस्थीकृतस्य पाठस्य धारणसामर्थ्यम्, पङ्क्तेः विशेषः अर्थावबोधश्च इतिरूपेण मूल्याङ्कनं विधीयते। एतदेव भाषण-छन्दोरचनादिक्षेत्रेषु अपि तत्तन्नियमानुगुणं मूल्याङ्कनं क्रियते।
3. इतः परं छात्राणां प्रदर्शनस्य मूल्यांकनाय अत्र विश्वविद्यालये प्रतिवर्षं श्रावणीपूर्णिमायां संस्कृत-सप्ताहोत्सवे विविधाभिः स्पर्धाभिः छात्राणां विविधक्षेत्रेषु सुषुप्तावस्थायां स्थितप्रतिभाः जाग्रति। आभिः स्पर्धाभिः विश्वविद्यालयस्यास्य छात्राणां क्षमताप्रदर्शनस्य मूल्यांकनं निम्नलिखितरूपेण भवति।

| क्रम सं. | स्पर्धानाम | छात्राणां क्षमताप्रदर्शनस्य मूल्यांकनम् |
|---|---|---|
| 1. | स्तोत्रकण्ठपाठ-स्पर्धा | कण्ठस्थीकरणस्य |
| 1. | समूहगान-स्पर्धा | सहभावस्य समूहे गानाभ्यासस्य च |
| 1. | वक्तृत्व-स्पर्धा | निर्भयतायाः वक्तृत्व-कलायाश्च |
| 1. | स्फूर्ति-समस्यापूर्ति-निबन्धलेखन-स्पर्धाः | झटिति कार्यसम्पादनस्य, चिन्तनशक्तेः, समस्यायामपि निर्भीकतागुणस्य, |
| 1. | कथाकथन-स्पर्धा | विषयोपस्थानस्य, कल्पनाशक्तेः |
| 1. | रङ्गवल्ली-स्पर्धय | चित्रणकलायाः प्रदर्शनक्षमतायाश्च |

1. संस्कृतसप्ताहोऽयं विश्वविद्यालयच्छात्रैः सह क्षेत्रेऽस्मिन् विद्यालयेषु पठितानां समेषां संस्कृतच्छात्राणां कृते आयोज्यते। तेषां कृतेऽपि उपर्युक्ताः स्पर्धाः भवन्ति विजेतृणां कृते पुरस्कार-व्यवस्था च।
2. छात्राः यथासमयं विविधासु शैक्षणिक-शास्त्रीय-स्पर्धासु भागग्रहणाय आन्ध्र-प्रदेशस्य तिरुपतिस्थं राष्ट्रीय-संस्कृत-विद्यापीठं गच्छन्ति पदकानि च प्राप्नुवन्ति। अस्य संस्कृतविश्वविद्यालयस्य छात्राः छात्र्यश्च प्रतिवर्षं गुजरात-राज्य-स्तरीय-स्पर्धासु प्रतिवर्षं भागं गृह्णन्ति विजेतारश्च भवन्ति। अनन्तरं गुजरात-राज्य-स्तरीय-शास्त्रीय-स्पर्धासु नियमानुसारं चिताः विजेतारश्च अखिलभारतीयशास्त्रीयपस्पर्धायां भागं ग्रहीतुं त्रिपुराराज्यस्थिताम् अगरतलां प्रति गच्छन्ति विजेतारश्च भवन्ति। अतः आसु स्पर्धासु भागग्रहणद्वारा छात्राणां शास्त्रीयज्ञानस्य, आशुस्पर्धासु (क्विज) भागग्रहणद्वारा छात्राणां प्रत्युत्पन्नमतेः क्षमतायाः मूल्यांकनं भवति।
3. प्रतिवर्षं युवमहोत्सवे विश्वविद्यालयस्य तथा च तत्सम्बद्धमहाविद्यालयानां छात्राः छात्र्यश्च शैक्षिक-चित्र-सांस्कृतिक-क्रीडादिस्पर्धासु भागं गृह्णन्ति। अन्ययुवमहोत्सव इव अस्मिन्नपि युवमहोत्सवे रङ्गवल्ली, एककसंस्कृतगीतम्,

एककशास्त्रीयगानम्, एककशास्त्रीयवादनम्, एककशास्त्रीयनृत्यम्, सङ्घनृत्यम्, एकपात्राभिनयः, संस्कृतसुभाषितकण्ठपाठः, वादविवादस्पर्धा, स्फूर्तिस्पर्धा, साहित्यरचना, आशुभाषणम्, आशुचित्रणम्, व्यङ्गचित्रम्, योगासनम्, मल्लयुद्धम्, धावनम्, कबड्डी, दीर्घकूर्दनम्, उच्चकूर्दनम्, चतुरङ्गम्, क्षेपणम्, हस्तकन्दुकम्, बैडमिन्टनादिस्पर्धाः आयोजिताः आसन्। आसु स्पर्धासु सर्वेऽपि स्पर्धकाः स्वकौशलं प्रदर्श्य प्रथमादिस्थानं प्राप्नुवन्ति। अस्य युवमहोत्सवस्य उद्घाटनसत्रायोजनद्वारा उद्घाटनं तथा समापनसत्रायोजनद्वारा समापनं भवति। उद्घाटनसमापनसत्रयोः विशिष्टाः अतिथयः आहूयन्ते। विजेतॄणां कृते प्रमाणपत्राणां पदकानाञ्च व्यवस्था क्रियते। सर्वोत्कृष्टस्य शिक्षणसंस्थानस्य कृते विजयवैजयन्त्याः तथा उपविजेतुः शिक्षणसंस्थानस्य कृते उपविजयवैजयन्त्याः व्यवस्था अस्ति। अस्मिन् **स्फुरणम्** इत्याख्ये त्रयोदशे युवमहोत्सवे आयोजितासु स्पर्धासु सर्वाधिकान् 122 अङ्कान् सम्प्राप्य श्री सोमनाथ-संस्कृत-विश्वविद्यालयः विजयवैजयन्तीं तथा श्रीभागवतविद्यापीठन्याससञ्चालितः शिक्षाशास्त्रिमहाविद्यालयः 84 अङ्कान् समवाप्य उपविजयवैजयन्तीं लब्धवान्। किञ्च 42 अङ्कैः सह अहमदाबादस्थः श्रीवरतन्तुसंस्कृतमहाविद्यालयः तृतीयस्थानेन समलङ्कृतः। उपर्युक्तस्पर्धासु भागग्रहणेन तत्तत्स्पर्धासम्बन्धिक्षमताप्रदर्शनस्य मूल्याकनं भवति।

4. अत्र विश्वविद्यालये प्रतिपत्रं शतस्य अङ्कानां परीक्षा भवति। तत्र सप्ततेः अङ्कानां लिखितपरीक्षा तथा त्रिंशतः अङ्कानाम् आन्तरिकी परीक्षा भवति। आन्तरिक्यां परीक्षायाम् उपयुज्यमाना व्यवस्था-

| **क्रम सं.** | **प्रश्न-प्रकारः** | **मूल्यांकनम्** |
|---|---|---|
| 1. | **लिखित-परीक्षा**<br><br>(बहुविकल्पात्मकः प्रश्नः, प्रश्नद्वयं निबन्धात्मकः/व्याख्यानात्मकः/ टिप्पण्यात्मकः) | सूक्ष्मदृष्टेः, विवरणात्मकस्य ज्ञानस्य |
| 2. | **स्वाध्यायकार्यम्**<br><br>परिचयात्मक (ग्रन्थः/लेखकः), प्रश्नद्वयं निबन्धात्मकः/व्याख्यानात्मकः/ टिप्पण्यात्मकः, अतिलघूत्तरात्मकः | परिचयलेखनशैल्याः, विवरणात्मकस्य ज्ञानस्य, प्रश्ननिर्माणस्य |
| 3. | उपस्थितिः | सहभागितायाः मूल्याङ्कनम् |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document |

**2.7 Student Satisfaction Survey**

***2.7.1 Online student satisfaction survey regarding teaching learning process.***

**अध्यापन-अधिगमयोः प्रक्रियाविषये अधितन्त्रि छात्रसन्तुष्टेः सर्वेक्षणम्।**

**Answer:** 3.65

**3.Research, Innovations and Extension**

**3.1 Promotion of Research and Facilities**

***3.1.1 The institution has a well defined policy for promotion of research and Research Committee to monitor and address issues related to research and the same is uploaded on the institutional website. (Yes /No)***

**संस्थायाम् अनुसन्धानस्य प्रोन्नत्यै सुचारुनिर्दिष्टा योजना अस्ति। अनुसन्धानस्य समस्यानां निराकरणाय, अनुसन्धानस्य प्रगतेः संवीक्षणाय अनुसन्धानसमितिः अस्ति। तत्सर्वं संस्थायाः जालस्थाने स्पष्टतया उपारोपितम्।**

***(आम् /न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Minutes of the the Research Committee/ Academic Council/ Governing Council/ Syndicate/ Board of Management related to research promotion policy adoption | View Document |
| Institutional data in prescribed format | View Document |
| Any additional information | View Document |
| URL of Policy document on promotion of research uploaded on website | View Document |

***3.1.2 The institution provides seed money for in-depth Shastric training/ inter-disciplinary training to its teachers for research during the last five years***

**विगतपञ्चवर्षेषु संस्था अध्यापकेभ्यः अनुसन्धानाय तलस्पर्शिशास्त्रप्रशिक्षणाय अन्तःशास्त्रीयप्रशिक्षणाय च मूलनिधिं ददाति।**

**Answer:** 0

3.1.2.1 The amount of seed money provided by institution to its faculty year-wise during the last five years (INR in lakhs)

संस्थया विगतपञ्चवर्षेषु अध्यापकेभ्यः प्रदत्तस्य मूलनिधेः वार्षिकसङ्ख्या (लक्षशः)।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 00 | 00 | 00 |

| File Description | Document |
|---|---|
| Minutes of the relevant bodies of the University (विश्वविद्यालयस्य योग्यनिकायस्य कार्यवृत्तम्) | View Document |
| List of teachers receiving grant and details of grant received (Data Template) (प्राप्तानुदानविवरणेन सह अनुदानं प्राप्तवताम् अध्यापकानां सूची। (दत्तांशप्रारूपम्) | View Document |
| Budget and expenditure statements signed by the Finance Officer indicating seed money provided and utilized (विश्वविद्यालयस्य वित्ताधिकारिणा हस्ताक्षरितं मूलनिधेः प्राप्तराशेः व्ययीकृतराशेश्च सूचकम् आयव्ययपत्रकं व्ययपत्रकं च। ) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.1.3 Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and any other research fellowships in the University enrolled during the last five years.***

**विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां*(JRF)* वरिष्ठशोधच्छात्राणां *(SRF)* शोधोत्तरानुसन्धातृणाम् *(PDF)* अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां सङ्ख्या-**

**Answer:** 7

3.1.3.1 The Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and other research fellows in the university enrolled year-wise during the last five years

विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां(JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातॄणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातॄणां वर्षक्रमेण सङ्ख्या-

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 03 | 00 | 00 | 00 |

| File Description | Document |
|---|---|
| List of research fellows and their fellowship details (Data Template) (अनुसन्धातॄणां सूची, छात्रवृत्तिविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| Any additional information( अतिरिक्ताः सूचनाः) | View Document |

***3.1.4 University has the following facilities***

***1. Central Instrumentation Centre/ Language Laboratory ComputerLab/ ICT Lab***

***2. Museum***

***3. Studios/ Recording Studio for Audio-Video/ e-P.G.Pathashala Facilities***

***4. Research/ Statistical Databases***

***5. Manuscript Resource Centre (MRC)***

***6. Manuscript Conservation Centre(MCC)***

***7. Yoga Training Centre***

***8. Yoga Therapy Centre with modern equipments***

***9. Observatory/ Yajnashala***

***10. Psychology Laboratory***

**विश्वविद्यालये अधोलिखितानि सौविध्यानि सन्ति-**

***1. केन्द्रीयम् उपकरणकेन्द्रम्/ भाषाप्रयोगशाला/ सङ्गणकप्रयोगशाला/ सूचना-सम्प्रेषण -प्रविधिप्रयोगशाला***

***2. पुरातत्त्वसङ्ग्रहालयः***

***3. दृश्य-श्रव्य-सामग्रीनिर्माणाय चित्राङ्कनशालायाः ध्वन्यङ्कनशालायाः ई.पी.जी पाठशालायाः वा सौविध्यानि***

***4. अनुसन्धानम्/ सांख्यकीयो दत्तांशनिधिः***

***5. पाण्डुलिपिसंसाधनकेन्द्रम्***

***6. पाण्डुलिपिसंरक्षणकेन्द्रम्***

***7. योगप्रशिक्षणकेन्द्रम्***

***8. आधुनिकयन्त्रसहितं योग-उपचारकेन्द्रम्***

*9.* **वेधशाला/ यज्ञशाला**

*10.* **मनोविज्ञानप्रयोगशाला**

**Answer:** A. Any six facilities exist (अ. उपर्युक्तेषु कानिचित् षट्सौविध्यानि सन्ति)

| File Description | Document |
|---|---|
| Upload the list of facilities provided by the university and their year of establishment (Data Template)(विश्वविद्यालयेन दत्तानां सौविध्यानां सूची, स्थापनायाः वर्षञ्च। (दत्तांशप्रारूपम्)) | View Document |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Paste link of videos and geotagged photographs (भूचित्रसंवलितानां दृश्यसामग्रीचित्राणां सन्धानम्।) | View Document |

***3.1.5 Percentage of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency***

**विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य *(SAP)* प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., आय.सी.एस्.एस्.आर्., आय्.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः, शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां प्रतिशतता।**

**Answer:** 0

3.1.5.1 Number of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency

विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., ऐ.सी.एस्.एस्.आर्., ऐ.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन वा अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां सङ्ख्या।

Answer: 00
3.1.5.2 Number of departments offering academic programme

शैक्षिकपाठ्यक्रमान् सञ्चाल्यमानानां विभागानां सङ्ख्या

Answer: 00

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| e-version of departmental recognition letters or other award letters (विभागीय-अनुदान-अनुमतिपत्राणां वैद्युतभागः अथवा अन्यानुमतिपत्राणि) | View Document |

***3.1.6 Does the university has the following –***

***1. Scheme for preparation of critical edition of unpublished manuscripts for research projects and research degrees***

***2. Sanskrit as the compulsory medium of writing thesis/ dissertation/ Project Report etc.***

***3. Provision for the translation of Sanskrit/Shastric texts as part of formal research degree?***

*4. Incentive to write Sanskrit-Teeka-s/ commentaries on Sanskrit texts*

*5. Scheme for production of Study materials in Sanskrit*

**विश्वविद्यालये अधोलिखितांशाः सन्ति –**

***1.* अनुसन्धानपरियोजनानां शोधोपाधीनां च कृते अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनयोजना**

***2.* शोधप्रबन्ध/ लघुशोधप्रबन्ध/ परियोजनाप्रतिवेदनेषु अनिवार्यमाध्यमत्वेन संस्कृतम्**

***3.* औपचारिक-अनुसन्धान-उपाध्यङ्गतया संस्कृतग्रन्थानां शास्त्रीयग्रन्थानां वाऽनुवादाय प्रोत्साहनम्**

***4.* औपचारिक-अनुसन्धान-उपाध्यङ्गतया गृहीतस्य संस्कृतग्रन्थस्य टीका/व्याख्यालेखनार्थं प्रोत्साहनम्**

***5.* संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणाय योजना**

**Answer:**

1. अवश्यमेवानुसन्धानस्य प्रोन्नत्यै विश्वविद्यालयस्य गुणात्मकशोधकार्य-प्रवृत्तेः शोधनीत्यनुसारं (Research Policy) सुचारुयोजनायाः प्रकाशे नियमाः निबद्धाः सन्ति येषां नियमानां निर्मितिर्जाता २०१० तमे वर्षे सर्वप्रथमम् । अनुसन्धानस्य च प्रगतेः संवीक्षणाय एका शोधसमित्यपि श्रीसोमनाथसंस्कृतविश्वविद्यालयेन संरचिताऽस्ति यस्याः निर्धारितकार्यकालो भवति एकवर्षस्य कृते । काले-काले तेषां नियमानां न केवलं संवीक्षणमेव विधीयते समितिसदस्यैः प्रत्युत आवश्यकतानुसारं तेषु क्वाचित्कं परिवर्तनं परिवर्धनञ्चापि विश्वविद्यालय-अनुदान-आयोगस्य २००९-२०१३-२०१६-२०१८-२०२० प्रविध्यनुसारं भवतः । एतेषां सर्वेषां नियमानामन्तर्जालनिवेशनम् अपि अस्ति ।
2. श्रीसोमनाथसंस्कृतविश्वविद्यालये हस्तलिखितग्रन्थानां कृते आलोचनात्मक-सम्पादनाय २०१२ तमे वर्षे चत्वारिंशतः दिवसानाम् एका कार्यशाला अनुष्ठिता आसीत्, तथैव अस्य विश्वविद्यालयस्य तत्त्वाचार्य-पाठ्यक्रमे शोधप्रविधि-पाठसमीक्षयोः अध्यापनं विधीयते येन अत्रत्याः छात्राः मातृकायाः समीक्षात्मकालोचनात्मकसम्पादने प्रावीण्यं भजेयुः । तदतिरिच्य, केषाञ्चित् विहितानां गुणात्मक-शोधप्रबन्धानां श्रीसोमनाथसंस्कृतविश्वविद्यालय-प्रकाशन-समिति-द्वारा निर्णयानुसारम्, शोधप्रबन्धानां बाह्य-समीक्षक-प्रतिवेदनाधारेण मानदेयपुरःसरं प्रकाशनं प्रायशः प्रतिवर्षं प्रायोज्यते । यदनुसारं डॉ. जानकीशरण-आचार्यद्वारा सम्पादितायाः कैवल्यदीपिकायाः प्रकाशनं जातमस्ति । तथैव १९ संस्थाभिः सह विहितेन शैक्षिकाभिबन्ध (MoU) माध्यमेन अग्रे प्रकाशनकार्यविधानाय तत्कार्यं विश्वविद्यालयीययोजनासु अन्यतमम् अस्ति । अस्याम् एव योजनायां मातृकाणां समालोचनात्मक-सम्पादनाय एकस्य विभागस्य स्थापनायाः योजना अस्ति । विश्वविद्यालद्वारा गुजरातीगद्यग्रन्थानां संस्कृतानुवादकार्यक्रमः अपि विहितः वर्तते । तस्यां योजनायां जयसोमनाथः, केसरीसिंहः, खुदीरामबोझः, चन्द्रशेखर-आझादः, स्वामिश्रद्धानन्दः इत्यादिग्रन्थानां संस्कृतानुवादः कृतः । तेभ्यः अनुवादकेभ्यः मानदेयपुरःसरं सम्माननमपि दत्तम् । तदतिरिच्य विश्वविद्यालयीयशोधकार्यसम्पादनाय प्रविष्टशोधच्छात्राणां कृते ६० कालांशानां Ph.D. Course Work पाठ्यक्रमानुरोधि कार्यं सैद्धान्तिकरूपेण (व्याख्यानमाध्यमेन) प्रायोगिक-गृहकार्य-माध्यमेन च कार्यते, यत्र पाठसम्पादनविधौ घटकतत्त्वैः सह पाठ-समीक्षा, पाठसमालोचनसमस्या तयोर्निराकरणोपायसम्बद्धाः विषयाः भवन्ति । तेभ्यः छात्रेभ्यो दत्तगृहकार्याणां सम्बद्धशिक्षकैः परीक्षणम् अपि विधीयते । तत्पश्चात् एव पञ्जीकरणं तेषां संभवति । अस्मिन्नेव क्रमे एतद् अपि अस्ति सूचनीयं यत् शोधविषयेषु समालोचनात्मक-समीक्षात्मक-विषयाः प्राधान्येन भवन्ति । तदनुरूपमेवैका शोधज्योतिरिति वार्षिकी पत्रिका प्रकाश्यते ।
3. अस्य विश्वविद्यालयस्य संस्थापनायाः उद्देश्येषु अन्यतमम् उद्देश्यम् अस्ति लोके संस्कृतभाषायाः प्रचारः । एतत्सर्वं मतम् अवधार्य एव प्रवर्तते श्रीसोमनाथसंस्कृतविश्वविद्यालयः स्वकीय-अभियानकर्मणि । अतः तदर्थं स्नातकानुस्नातक-कक्षयोः संस्कृतमाध्यमेनैव अध्ययनाध्यापनं विश्वविद्यालये प्रचलद् वर्तते । अग्रे तत्त्वाचार्यकक्षायाः, विद्यावारिधेः (Ph.D.) च शोधकर्मणि **लघुशोधप्रबन्ध-महाशोधप्रबन्धलेखने (Dissertation / Thesis)** संस्कृतभाषा एव आश्रीयते अनिवार्यरूपेण । तद्योग्यतायाः विवृद्ध्यर्थं वाग्वर्धिनीसभायाः योजना आसत्रं विधीयते । सहज-संस्कृतभाषा व्यवहारेऽपि स्याद् इति धियाऽन्येऽपि प्रायोगिककक्षाः साधनरूपेण आश्रीयन्ते-यथा छात्रालये अपि संस्कृतभाषायाः व्यवहारनियमपालनम्, छात्राध्यापक-संवादः संस्कृतेन, संस्कृतसप्ताहोत्सवयोजना, संस्कृत-स्पर्धा, युवमहोत्सवे काव्यपाठयोजनाऽतिरिक्त-संस्कृत-सम्भाषणकक्षाप्रचालनमिति च ।

4. अन्यभाषासाहित्यानां संस्कृतेऽनुवादप्रोत्साहनमपि विभिन्नस्तरीयं विश्वविद्यालयप्रशासनेन विधीयमानं वर्तते । अनूदितग्रन्थ-प्रकाशनम्, संशोधनग्रन्थानां, तल्लेखकानां कृते अद्य पर्यन्तं विश्वविद्यालयेन निर्धारित-धनराशिः मानदेयरूपेण निश्चितोऽस्ति यस्य फलश्रुतिरूपेण ६७ ग्रन्थाः विश्वविद्यालयेन प्रकाशिताः सन्ति । छात्राणां प्रोत्साहनमप्यस्मिन् विषये विश्वविद्यालयीयप्रशासनेनाध्यापकैश्च विधीयते- यत्फलश्रुतिरपि अद्य छात्रैः विहित-श्लोकरचनारूपेण दृष्टिपथमायाति ।
5. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन विद्वद्भिरिष्टीकालेखनप्रवृत्तिप्रवर्धनमपि विधीयते, यदनुसारं "काव्यप्रकाशाचमनम्" (भागद्वयम्) डॉ. ललितपटेलमहोदयस्य प्रकाशनं विश्वविद्यालयेन स्वकीयप्रकाशननीत्यालोके कृतमस्ति ।

तथैव विश्वविद्यालयीयाध्यापकैश्च कैश्चित् अध्ययनसामग्री उपस्थापिता वर्तते । संस्कृतसंभाषणपाठ्यक्रमहेतवेऽपि सुभाषित-संग्रहः, जगतीप्रकारकाणाम् अभिनववृत्तानां जगतीविंशतिकाख्यः ग्रन्थः संस्कृतसंभाषणोपयोगीनि पुस्तकानि च विश्वविद्यालयीयाध्यापकैः प्रणीतानि संपादितानि च सन्ति येषां प्रकाशनं संशोधनग्रन्थमालासिरिज़मध्ये कृतमस्ति । अनेन प्रकारेण विश्वविद्यालयोऽयं सततम् अस्मिन् क्षेत्रे अग्रे सरन् अस्ति ।

1. संशोधनकार्याणां ग्रन्थप्रकाशनानाञ्च प्रभावोऽयं भवति यद् नूतनशैल्याः संस्कृतभाषायां रचितग्रन्थाध्ययनैः संस्कृतमधीयानाः छात्राः प्रभाविताः प्रेरिताश्च सन्तः सरल-मानक-संस्कृतशब्दकोशाधारेण रचितानामेषां ग्रन्थानां सरलतयाऽध्ययनं विधाय संस्कृत-लेखन-संशोधनकर्मसु प्रवृत्ताः भवन्ति । अनेन माध्यमेन सरलसंस्कृतभाषायां गूढातिगूढानपि शास्त्रीयग्रन्थान् समाजं प्रति प्रापयितुं विश्वविद्यालयः प्रभवति । यथा- 'दशरूपकप्रभा' डॉ. सुरेशव्यासद्वारा रचितः ग्रन्थः श्रद्धया छात्रैः अधीयते । एवमेव विश्वविद्यालयस्य वेद-वेदाङ्गसङ्कायाध्यक्षमहोदयेन प्रो.देवेन्द्रनाथ पाण्डेयवर्येण, साहित्यविभागस्याध्यापकेन डॉ. ललितकुमार पटेलवर्येण च मिलित्वा शोधच्छात्राणाम् अध्यनाय शोधप्रविधिप्रवेश इति पुस्तकमपि विश्वविद्यालयद्वारा प्रकाशितमस्ति, यस्याध्ययनेन शोधच्छात्राः स्वशोधज्ञानवृद्धिं स्वशोधदृष्टिं च वर्धयन्तः सन्ति ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

**3.2 Resource Mobilization for Research**

***3.2.1 Grants for research projects sponsored by the non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, chairs in the institution during the last five years (INR in Lakhs)***

### संस्थायां गतपञ्चवर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तमनुदानं पीठानि च *(लक्षशः)*

**Answer:** 0

3.2.1.1 Total Grants for research projects sponsored by the non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, Chairs in the institution year-wise during the last five years (INR in Lakhs) -

संस्थायां गतपञ्चवर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तानाम् अनुदानानां वार्षिकयोगः (लक्षशः)-

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 00 | 00 | 00 |

| File Description | Document |
|---|---|

| | |
|---|---|
| List of project and grant detail परियोजनासूची, अनुदानविवरणञ्च। (दत्तांशप्रारूपानुगुणं सांस्थानिकदत्तांशः) | View Document |
| e-copies of the grant award letters for research projects sponsored by non-government(असर्वकारीयसंस्थाभिः प्रायोजितायाः शोधयोजनायाः कृते अनुदानप्राप्तिपत्रस्य वैद्युतप्रतिलिपयः।) | View Document |

***3.2.2 Grants for research projects sponsored by the government sources like UGC, Rashtriya Sanskrit Sansthan, IGNCA, NMM, Sanskrit Academies, ICPR, DST, ICHR etc. during the last five years (INR in Lakhs)***

### विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोग-राष्ट्रियसंस्कृतसंस्थान-इन्दिरागाँधीराष्ट्रियकलाकेन्द्र-राष्ट्रियपाण्डुलिपिमिशन्-संस्कृताकादमी- भारतीयदार्शनिकानुसन्धानपरिषद्-भारतीयेतिहासानुसन्धानपरिषदादिभि*: सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तमनुदानम्। (लक्षशः)*

**Answer:** 0

3.2.2.1 Total Grants for research projects sponsored by the government sources year-wise during the last five years (INR in Lakhs)

विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तानामनुदानानां वार्षिकयोगः। (लक्षशः)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 00 | 00 | 00 |

| File Description | Document |
|---|---|
| List of project and grant details (Data Template) (परियोजनासूची, अनुदानविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| e-copies of the grant award letters for research projects sponsored by government(शासकीयसंस्थाभिः प्रायोजितायाः शोधयोजनायाः कृते अनुदानप्राप्तिपत्रस्य वैद्युतप्रतिलिपयः।) | View Document |

***3.2.3 Number of research projects per teacher funded by government and non-government agencies during the last five years***

### विगतपञ्चवर्षेषु सर्वकारीयाभिः असर्वकारीयाभिश्च संस्थाभिः प्रत्येकम् अध्यापकाय आर्थिकसाहाय्येन प्रदत्तशोधयोजनाः।

**Answer:** 0

3.2.3.1 Number of research projects funded by government and non-government agencies year-wise during the last five years

विगतपञ्चवर्षेषु सर्वकारीयाभिः असर्वकारीयाभिश्च संस्थाभिः प्रत्येकम् अध्यापकाय आर्थिकसाहाय्येन प्रदत्तशोधयोजनानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|

00 00 00 00 00

| File Description | Document |
|---|---|
| Supporting document from Funding Agency(अनुदानप्रदातृसंस्थाभिः प्राप्ताः सहायकाभिलेखाः।) | View Document |
| List of research projects and funding details (Data Template)(परियोजनासूची, अनुदानप्रदातृसंस्थाविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |

***3.2.4 University provide funds out of its internal resources for the promotion of research. Provide details***

### आन्तरिकस्रोतोभ्यः प्राप्तं धनराशिं किं विश्वविद्यालयः अनुसन्धानस्य प्रोन्नयनाय परिकल्पयति ? विवरणं देयम्।

**Answer:**

अत्र सन्नद्ध-शोध-नीत्यनुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयः अध्यापकानां छात्राणां च शास्त्रज्ञानवर्धनाय शोधप्रवृत्तिसंवर्धनाय च प्रतिवर्षं बहुविधाः कार्यशालाः शास्त्रपुनश्चर्याश्च आयोजयति । तदर्थं विश्वविद्यालयस्य अन्ये चाध्यापकाः प्रोत्साहनधनराशिमपि लभन्ते । अतः विश्वविद्यालयीयाः अध्यापकाः स्वप्रस्तावितयोजनानुसारं धनमवाप्य कार्यक्रमान् सम्पादयन्ति । अतः सम्पूर्णपञ्चसु वर्षेषु आहत्य ७१८४७६ रूप्यकाणि अध्यापकाः अलभन्त ।एतादृक्-कार्यक्रमान् आश्रित्य विश्वविद्यालयीयसङ्कायगताः अध्यापकाः विषयचिन्तनम्, तस्य सुप्रभावं तत्र शोधात्मिकां प्रवत्तिञ्चोद्दिश्य छात्राणां लाभाय, सामाजिकं प्रभावञ्च विश्लिष्य कार्यक्रमान् निर्धारयन्ति । अस्मिन् सन्दर्भे शोधसमितिरपि स्वकीयां रचनात्मिकां भूमिकां सम्पादयन्ती मार्गनिर्देशनं करोति । तत्र शास्त्रपुनश्चर्यान्तर्गतैः व्याख्यानैः छात्रेषु शोधकार्यं प्रति प्रवृत्तिः व्याख्यानप्रकाशेन छात्रेषु संप्रेष्यते । अत एतत् शैक्षणिकं कार्यं शोध-बीज-स्थापनरूपं भवति । तदनुसारमेव व्याख्यानाय संस्कृतविदुषां सूची प्रशासनस्य संस्तुत्यै निर्मीयते । सम्पूर्णगुर्जरप्रान्तः अस्य कार्यक्रमस्य क्षेत्रं भवति । अत एव तदर्थं कार्यक्रमानुष्ठानाय केन्द्राणि निर्धार्यन्ते यत्र न्यूनातिन्यूनं दिवसत्रयस्य कार्यक्रमो भवति । एतस्यान्यतमो लाभो भवति यत् क्रमिकरूपेण संस्कृत-शास्त्राध्ययनाध्यापने नूतनचेतनायाः शैल्याश्च अध्यापकेषु सञ्चारो भवति, यन्माध्यमेन संस्कृतशास्त्रस्य दुरूहफक्किकानां स्फुटीकरणे सौविध्यमुपजायते तथा च निर्धारितविशेषविषयस्याध्यापनमाध्यमेन छात्राणामभिरुचिरुपजायते, विशेषविषयाध्ययनत्वात् एतदर्थं विश्वविद्यालयपक्षतःपुस्तक-संगणकादि-आधुनिक-तकनीकीसाधनमपि कार्यक्रमानुष्ठानसौविध्याय उपलभ्यते । अत्रोपयुक्तव्याख्यानानां यन्त्रसाहाय्येन सङ्ग्रहो भवति येषां कालान्तरे प्रकाशनयोजनाऽपि विश्वविद्यालयेन निर्मीयते विश्वविद्यालयस्य शोधाभिमुख-प्रकाशनाभियाने । अनेनैतत् सिद्ध्यति यत् शोधनीत्यालोके विश्वविद्यालयोऽयं शोधाभिमुख-प्रकाशनम् अन्यं कार्यं च कर्तुं सदा सन्नद्धो वर्तते ।

श्रीसोमनाथसंस्कृतविश्वविद्यालस्य शोधसम्बद्धं प्रकाशनम् अस्य शोधनीत्यनुसारम्, ग्रन्थप्रकाशननीतिनियमानुसारञ्च "पूर्णतागौरवाय" इति ध्येयवाक्यालोके संस्कृत-लोकप्रचारोद्देशेन भवति । तेषामेव ग्रन्थानां शोधग्रन्थानाञ्च विश्वविद्यालयेन प्रकाशनाय चयनं भवति, येन विश्वविद्यालयस्य गरिम्णः रक्षणं भवेत् । अतः अस्मिन्नेव सन्दर्भे श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ६७ पुस्तकानि प्रकाशितानि जातानि सन्ति, येषां पुस्तकानां प्रकाशनाय विश्वविद्यालयः शोधप्रकाशन-अंशतः पञ्चसु वर्षेषुएकोनपञ्चाशदुत्तरपञ्चसप्तत्यधिक-त्रिसप्तत्यधिकत्रिशतं (४९,७५,३७३) रूप्यकाणि व्ययीकृतानि सन्ति पञ्चवर्षेषु यस्य लेखापरीक्षणप्रमाणपत्रमत्र सन्नद्धमस्ति ।

एतदतिरिच्य पुस्तकालयेन शोधप्रवृत्त्यर्थं त्रयोविंशत्युत्तराष्टात्रिंशदधिकाष्टाविंशत्यधिकत्रिशतं (23,38,328.00)रूप्यकाणि व्ययीकृतानि पञ्चसु वर्षेषु यस्य लेखापरीक्षितप्रमाणपत्रं (Audited Certificate) अत्र योजितमस्ति प्रेक्षणाय ।

प्रतिवर्षं विधीयमानस्य आय-व्ययविवरणमत्र साङ्ख्यिकीचित्रमाध्यमेन प्रस्तुतमस्ति ।

**Publication Expenditure**

| Sl. | Particulars of Publication | Years | Expenditure |
|---|---|---|---|

| | | | |
|---|---|---|---|
| 1 | Publicationhead | 2015-16 | 554183.00 |
| 2 | Publication head | 2016-17 | 471478.00 |
| 3 | Publication head | 2017-18 | 809261.00 |
| 4 | Publication head | 2018-19 | 1498829.00 |
| 5 | Publication head | 2019-20 | 1641622.00 |
| | | **5 Years total Expenditure** | **4975373.00** |

- **Average annual expenditure for purchase of books and journals during the last five years (INR**

| **Year of expenditure** | **Expenditure on the purchase of journals in (INR in lakhs)** | **Expenditure on the purchase of books in (INR in lakhs)** | **Expenditure on subscription to e-journals and other e-resources (INR in lakhs)** |
|---|---|---|---|
| 2015-2016 | 16580 | 18967 | 0 |
| 2016-2017 | 14699 | 479778 | 0 |
| 2017-2018 | 8760 | 345382.5 | 20000 |
| 2018-2019 | 21114 | 695781 | 7480 |
| 2019-2020 | 38335 | 671452 | 00 |
| Total | **99488** | **2211360.5** | **27480** |
| | | **Total** | **2338328** |

| **Sr. No.** | **Name of the teacher getting seed money** | **Research/Programme Title** | **The amount of seed money** | **Year of receiving grant** |
|---|---|---|---|---|
| 1 | Dr.SatrughnaPanigrahi | निरुक्तस्य सप्तमाध्यायस्याध्ययनम् | 38671 | 2015-16 |
| 2 | Dr.Vinodkumar Jha | परमलघुमञ्जुषायाः अध्ययनम् | 21913 | 2015-16 |
| 3 | Dr.Narenrakumar L. Pandya | मम्मटकृतकाव्यप्रकाशस्य अनुसन्धानात्मकमध्ययनम् | 18171 | 2015-16 |

| | | | | |
|---|---|---|---|---|
| 4 | Dr.Narenrakumar L. Pandya | काव्यप्रकाशस्य ७ तः १० उल्लासं यावत् अध्ययनम् | 35159 | 2016-17 |
| 5 | Dr.SatrughnaPanigrahi | ऋग्वेदभाष्यभूमिकायाः अध्ययनम् | 44680 | 2017-18 |
| 6 | Dr.Vinodkumar Jha | धातूद्देश्यकाः प्रत्ययाः | 26701 | 2017-18 |
| 7 | Dr.PankajS.Raval | पुराणेतिहासधर्मशास्त्रानुसन्धानम् | 42099 | 2017-18 |
| 8 | Dr.Vinodkumar Jha | लघुशब्देन्दुशेखरस्य संज्ञाप्रकरणम् | 13159 | 2018-19 |
| 9 | Dr.PankajS.Raval | वाल्मीकिरामायणम् | 34786 | 2018-19 |
| 10 | Dr. MahendrakumarDabey | नाट्यशास्त्रम् | 31786 | 2018-19 |
| 11 | Dr.Ramesh Chandra Shuklaji | बृहत्पाराशरहोराशास्त्रस्याध्ययनम् | 98308 | 2018-19 |
| 12 | Dr.SatrughnaPanigrahi | निरुक्तस्य प्रथमाध्यायस्याध्ययनम् | 70029 | 2019-20 |
| 13 | Dr.RameshChandraShuklaji | गोलपरिभाषा | 71183 | 2019-20 |
| 14 | Dr.B.UmaMaheshvari | दर्शनेषु पारिभाषिकपदानां परिचयः | 35960 | 2019-20 |
| 15 | Dr.PankajS.Raval | श्रीमद्भागवतमहापुराणं तदागमस्तत्स्वाध्ययश्च | 32754 | 2019-20 |
| 16 | Dr.Narenrakumar L. Pandya | अलङ्कारनिर्णयः | 43395 | 2019-20 |
| 17 | Dr.Vinodkumar Jha | बहुव्रीहिसमासः | 59722 | 2019-20 |
| | Total | | 718476 | |

| Other Upload Files | |
|---|---|
| 1 | View Document |
| 2 | View Document |
| 3 | View Document |

**3.3 Innovation Ecosystem**

***3.3.1 Institution has created an eco-system for innovations including Incubation centre/ Research Labs/ Manuscript repositories/ subject based networks/ teaching learning centers (TLC)/ MOOCS studio/ NRC and other initiatives for creation and transfer of knowledge***

## सम्बद्धसंस्थाद्वारा एका पारिस्थितिकी विरचिता यत्र अभिनवस्य ज्ञानस्य सर्जनार्थं सम्प्रेषणार्थं च अभिनवज्ञाननिष्पत्तिकेन्द्राणि/ अनुसन्धानप्रयोगशालाः/ पाण्डुलिपिसंरक्षणकेन्द्राणि तथा अन्ये उपायाः उपलभ्यन्ते।

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन पाण्डुलिपिसंरक्षणस्य कार्यमपि प्रारब्धम् अस्ति।विश्वविद्यालयस्य ग्रन्थालये ३३मातृकाः सन्ति ।एताः मातृकाः विश्वविद्यालयस्य ग्रन्थालये सङ्गृहीताः सुरक्षिताश्च सन्ति । संशोधनाय एताः मातृकाः उपयोगिन्यः भवन्ति ।विश्वविद्यालयस्य ग्रन्थालये विविधानि-विरलपुस्तकानि सन्ति तथा दातृभिः प्रदत्ताः मातृकाः अपि सन्ति ।विरलपुस्तकेषु ग्रन्थालये २०१५तमे वर्षे प्राप्तानि २२पुस्तकानि सन्ति । १६ मुद्रितानि तथा दुर्लभानि-पुस्तकानि अपि ग्रन्थालये सन्ति । एताः पाण्डुलिपयः विरलाः ग्रन्थाश्च संशोधनं कर्तुं छात्रान् अध्यापकान् च प्रेरयन्ति । विश्वविद्यालयग्रन्थालये विविधानां संस्थानां पाण्डुलिपिसूचिः (Catalogue)तथा च विवरणात्मकग्रन्थसूचिः (Catalogue of Cataloguers)वर्तते। ततः पाण्डुलिपिग्रन्थानां परिचयः संशोधकेभ्यः शोधार्थिभ्यश्च लभ्यते ।

2. विश्वविद्यालयसंलग्ने गान्धिनगरस्थ-आर्षसंशोधनकेन्द्रेऽपि पाण्डुलिपयः वर्तन्ते । तस्य केन्द्रस्य निदेशकाः वर्तन्ते विद्वांसः प.पू.डॉ. श्रुतिप्रकाशस्वामिनः । तेषां मार्गदर्शनेन चत्वारः शोधार्थिनः पाण्डुलिपिग्रन्थान् स्वीकृत्य विद्यावारिधिं (Ph.D.)कृतवन्तः एवं च द्वौ शोधार्थिनौ कार्यरतौ स्तः । तैः कृतं संशोधनम् अन्येषां-गवेषकाणां कृते प्रेरणारूपं मार्गदर्शनरूपं च विद्यते । तेषु उदाहरणरूपेण डॉ. जानकीशरण आचार्यः कृष्णविरचितस्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनं च कृत्वा विद्यावारिधिं प्राप्तवान् । तस्यामेव संस्थायाम् आधुनिकभाष्यकाराः प.पू.डॉ. भद्रेशस्वामिनः अपि वर्तन्ते, तेषां मार्गदर्शनेऽपि द्वौ (०२) शोधार्थिनौ विद्यावारिधिपदवीं लब्धवन्तौ एवं च ०२ शोधार्थिनौ कार्यरतौ स्तः ।
3. विश्वविद्यालयसंलग्नः सारङ्गपुरस्थ-स्वामिनारायणमहाविद्यालये P.G.Diploma in Sanskrit, Gujarati & Hindu Studies एवं च Graduate Diploma in Sanskrit, Gujarati & Hindu Studies इति पाठ्यक्रमद्वये आप्रवासी-भारतीयाः (NRI)छात्राःअपिपठन्ति । अनेन पाठ्यक्रमद्वयेन ते भारतीयसंस्कृतिं संस्कृतभाषां ज्ञात्वा विदेशे विश्वविद्यालयस्य शोधकार्यं प्रसारयन्ति इति फलश्रुतिः ।
4. श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे संस्कृतशिक्षणप्रशिक्षणप्रबन्धः अपि वर्तते । तत्र पदविकापाठ्यक्रमरूपेण संस्कृतसम्भाषणस्य प्रशिक्षणं प्राप्य युवानः संस्कृतसम्भाषणशिक्षकत्वेन समाजे कार्यं कुर्वन्ति । विश्वविद्यालयस्य अनुमतिं लब्ध्वा अयमेव पाठ्यक्रमः कर्णावतीस्थ-एकलव्यसंस्कृत-अकादमीद्वाराऽपि प्रचाल्यते प्रतिवर्षम् । तत्र डॉ. मिहिर उपाध्यायः अस्य पाठ्यक्रमस्य संयोजनं विधाय सफलतया बहूनां प्रशिक्षकाणां निर्माणम् कृतवान् ।
5. विश्वविद्यालये दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला (Audio-Video Recording Studio)अस्ति ।अनेन केन्द्रमाध्यमेन विविधानां विदुषां व्याख्यानानां संग्रहणं भवति । विविधानां प्रकल्पानां पाठ्यक्रमाणाञ्च दृश्यश्रव्यसामग्रीनिर्माणं क्रियमाणं वर्तते । तस्य अङ्गतया विश्वविद्यालयद्वारा शास्त्रपरिचयप्रकल्परूपेण प्रतिशास्त्रं ३६ व्याख्यानानाम् आयोजनं कृतम् । तत्र आहत्य वेद-पुराण-व्याकरण-दर्शन-ज्योतिषविषयाणां ३६ व्याख्यानानां दृश्यश्रव्यमाध्यमेन सामग्रीनिर्माणं कृत्वा सामाजिकमाध्यमेन तेषां व्याख्यानानां प्रकाशनं दिनाङ्क – ११/१२/२०२० दिने विश्वविद्यालयस्य यूट्यूबचेनलमध्ये लोकार्पणं कृतम् । अनेन प्रकारेण विश्वविद्यालयः संस्कृत-भाषा-साहित्ययोः समाजे प्रचारं करोति । क्रियमाणं च वर्तते ।

| क्रमः | विषयः | शीर्षकम् | व्याख्यातुः नाम |
|---|---|---|---|
| १ | **साहित्यम्** | अलङ्कारशास्त्रस्य नामकरणम्, उद्भवः विकासश्च | डॉ. ललितः पटेलः |
| | | रससूत्रविमर्शः | डॉ. नरेन्द्रकुमारः पण्ड्या |
| | | काव्यस्य विभावना | डॉ. महेन्द्रकुमारः दवे |
| | | साहित्यसिद्धान्तानां परिचयः | प्रो. अर्चनाकुमारी दुबे |
| | | दृश्यश्रव्यकाव्यानां सङ्क्षिप्तः परिचयः | डॉ. डी. एम. मोकरीया |
| | | काव्यस्योत्कर्षकाः अपकर्षकाः च धर्माः | श्री जिगरः भट्टः |
| २ | **व्याकरणम्** **Click here** | समासः समासभेदाश्च | प्रो. विनोदकुमारः झा |
| | | प्रकृतिप्रत्ययविभागः | डॉ. दीपेशः कतिरा |
| | | प्रत्ययः | डॉ. दीपेशः कतिरा |
| | | विभक्त्यर्थविमर्शः | प्रो. विनोदकुमारः झा |
| | | व्याकरणशास्त्रस्य परिचयः | डॉ. तनुजा अजोतिकर् |
| | | सन्धिः | डॉ. तनुजा अजोतिकर् |
| ३ | **सर्वदर्शनम्** **Click here** | दर्शनशास्त्राणां परिचयः | डॉ. बी. उमामहेश्वरी |
| | | न्यायवैशेषिकयोः परिचयः | डॉ. बी. उमामहेश्वरी |
| | | मीमांसाशास्त्रस्य परिचयः | डॉ. बी. उमामहेश्वरी |
| | | साङ्ख्यशास्त्रस्य परिचयः | डॉ. जानकीशरण-आचार्यः |
| | | योगशास्त्रस्य परिचयः | डॉ. जानकीशरणः आचार्यः |
| | | वेदान्तशास्त्रस्य परिचयः | डॉ. जानकीशरण-आचार्यः |
| ४ | **वेदः** **Click here** | किं नाम आरण्यकम् ? | श्री विपुल-जादवः |
| | | उपनिषद्भागस्य परिचयः | श्री विपुल-जादवः |
| | | ब्राह्मणभागस्य परिचयः | डॉ. शत्रुघ्न-पाणिग्राही |
| | | संहिताभागस्य परिचयः | डॉ. शत्रुघ्न-पाणिग्राही |
| | | वेदपरिचयः तद्वैशिष्ट्यं च | प्रो. देवेन्द्रनाथ-पाण्डेयः |
| | | | |

| | | | |
|---|---|---|---|
| | | लौकिकवैदिकसंस्कृतयोः भेदः | प्रो. देवेन्द्रनाथ-पाण्डेयः |
| ५ | **पुराणेतिहासः** **Click here** | श्रीमद्भागवतपुराणस्य परिचयः | डॉ. पङ्कजकुमार-रावलः |
| | | पुराणवाङ्मयस्य परिचयः | डॉ. पङ्कजकुमार-रावलः |
| | | वाल्मिकेः तत्कृतेः च परिचयः | डॉ. पङ्कजकुमार-रावलः |
| | | वेदव्यासः तत्कृतेः च परिचयः | डॉ. पङ्कजकुमार-रावलः |
| | | पुराणं पञ्चलक्षणं दशलक्षणं च | श्रीमती आशाबेन माढकः |
| | | अष्टादशपुराणानां परिचयः प्रतिपाद्यविषयश्च | श्रीमती आशाबेन माढकः |
| ६ | **ज्योतिषम्** **Click here** | सिद्धान्तस्कन्धस्य परिचयः | डॉ. रमेशचन्द्रः शुक्ला |
| | | ज्योतिषशास्त्रस्य परिचयः पञ्चाङ्गस्वरूपं च | कु. अपूर्वा अग्रवालः |
| | | होरास्कन्धस्य परिचयः | कु. अपूर्वा अग्रवालः |
| | | प्राकृतिक-आपदायाः शकुनस्य च स्वरूपम् | श्रीनित्यानन्दः ओझा |
| | | हस्तरेखायाः रमलशास्त्रस्य च स्वरूपम् | श्री नित्यानन्दः ओझा |
| | | वास्तुशास्त्रस्य परिचयः | डॉ. रमेशचन्द्रः शुक्ला |

| File Description | Document |
|---|---|
| Any additional information | View Document |

***3.3.2 Number of awards won by institution/teachers for innovation during the last five years***

### विगतेषु पञ्चसु वर्षेषु संस्थया अध्यापकैः नवाचारविषये प्राप्तानां पुरस्काराणां/ सम्मानानां सङ्ख्या।

**Answer:** 2

3.3.2.1 Total number of awards for innovation won by institution/teachers year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु संस्थया/ अध्यापकैः नवाचारविषये प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकसमष्टिसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 02 | 00 | 00 |

| File Description | Document |
|---|---|
| List of innovation and award details (Data Template)( नवाचारविषयसूची, पुरस्कारविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| e- copies of award letters (पुरस्कारपत्राणां वैद्युतप्रतिलिपयः।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.3.3 Number of mentoring provided to other newly established Institutes during the last five years***

### विगतपञ्चवर्षेषु अन्येषाम् अभिनवानां सद्यः स्थापितानां संस्थानां समारम्भाय प्रदत्तानां मार्गदर्शनानां सङ्ख्या -

**Answer:** 5

3.3.3.1 Total number of mentoring provided to other newly established Institutes year-wise during the last five years.

विगतपञ्चवर्षेषु अन्येषाम् अभिनवानां सद्यः स्थापितानां संस्थानां समारम्भाय प्रदत्तस्य मार्गदर्शनस्य वार्षिकसङ्ख्या –

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 02 | 00 | 02 | 01 | 00 |

| File Description | Document |
|---|---|
| Upload letter from the University (mentor) /Mentee for the academic /infrastructure etc.(परिसरे समारम्भाय विश्वविद्यालयात् प्राप्तमनुमतिपत्रम् उपारोपयतु। ) | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |

**3.4 Research Publications and Awards**

***3.4.1 The institution has a stated Code of Ethics to check malpractices and plagiarism in Research***

***(Yes /No)***

**अनुसन्धानविषये कृतिचौर्यं कदाचारं निरोद्धुं काचित् निर्णीता नीतिसंहिता संस्थायाम् अस्ति**

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Institutional data as per Data Template (सांस्थानिकदत्तांशः।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| URL to be provided by the Institution (संस्थया जालस्थानसन्धानं दातव्यम्) | View Document |

***3.4.2 The institution provides incentives to teachers who receive state, national and international recognition/ awards***

***(Yes /No)***

**ये अध्यापकाः राज्यस्तरीयां/ राष्ट्रियाम्/ अन्ताराष्ट्रियां मान्यतां/ पुरस्कृतिं प्राप्नुवन्ति, संस्था तान् प्रोत्साहयति।**

***(प्रोत्साहयति/ न प्रोत्साहयति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| List of Awardees and Award details (Data Template)( पुरस्कृतानां सूची पुरस्कारविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| e- copies of the letters of awards(पुरस्कारपत्राणां वैद्युतप्रतिलिपयः।) | View Document |
| Any additional information(अतिरिक्ताः सूचनाः) | View Document |

***3.4.3 Number of Patents acquired/Creative writing / or critical Shastric writing composed in Sanskrit / copyright generated / hitherto unknown manuscripts brought to light through publication and awarded by State and National bodies during the last five years***

**विगतपञ्चवर्षेषु प्राप्तानां स्वत्त्वाधिकाराणां/ सर्जनात्मकलेखानाम्/ अथवा संस्कृतभाषया लिखिता विमर्शात्मकशास्त्रीयलेखानाम्/ उत्पादितप्रतिलिपीनां/ अप्रकाशितमातृकाणां/ प्राकाश्यमानीतानां मातृकाणां कृते राज्य/राष्ट्रीयनिकायैः सम्मानितपुरस्काराणाम् सङ्ख्या।**

**Answer:** 29

3.4.3.1 Total number of the above awards - year-wise during the last five years

विगतपञ्चवर्षेषु प्राप्तपुरस्काराणां संवत्सरशः सङ्ख्या -

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 7 | 05 | 6 | 7 | 04 |

| File Description | Document |
|---|---|
| List of the year of the publications of the patents etc.( पुरस्कारवर्षसहिता स्वत्त्वाधिकाराणां सूची।) | View Document |
| Institutional data as per Data Template (सांस्थानिकदत्तांशः।) | View Document |
| Any additional information(अतिरिक्ताः सूचनाः) | View Document |

***3.4.4 Number of Ph.D.s awarded per teacher during the last five years***

**विगतपञ्चवर्षेषु प्रत्येकम् अध्यापकस्य निर्देशने विद्यावारिध्युपाधिभाजां शोधच्छात्राणां सङ्ख्या।**

**Answer:** 0.58

3.4.4.1 How many Ph.D's are awarded year-wise during the last 5 years -

विगतपञ्चवर्षेषु कतिभिः छात्रैः विद्यावारिध्युपाधयः प्राप्ताः? (संवत्सरक्रमेण) -

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 04 | 10 | 15 | 20 |

3.4.4.2 Number of teachers recognized as guides year-wise during the last five years -

विगतपञ्चवर्षेषु मार्गदर्शकत्वेन मानितानाम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 17 | 15 | 16 | 09 | 34 |

| File Description | Document |
|---|---|
| List of PhD scholars and their details like name of the guide , title of thesis, year of award etc (Data Template)( शोधच्छात्राणां विवरणात्मिका सूची। (दत्तांशप्रारूपम्)) | View Document |
| Any additional information(अतिरिक्ताः सूचनाः) | View Document |

| | |
|---|---|
| URL to the research page on HEI web site(जालस्थाने शोधपुटस्य सन्धानम्।) | View Document |

***3.4.5 Number of research papers per teacher in the Journals notified on UGC website/ recognised peer reviewed journals/ reputed journals published by Sanskrit/ General Universities/ Departments/ Research Institutes and notified journals by the Rashtriya Samskrit Sansthan in its website and Conference Proceedings.***

**विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु, संस्कृतविश्वविद्यालयैः तद्विभागैः प्रकाशितासु शोधपत्रिकासु राष्ट्रियसंस्कृतसंस्थानस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु सम्मेलनकार्यवृत्तेषु वा प्रत्येकम् अध्यापकस्य प्रकाशितशोधपत्राणां सङ्ख्या।**

**Answer:** 4.2

3.4.5.1 Number of research papers in the Journals notified on UGC website year-wise during the last five years

विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु प्रकाशितशोधपत्राणां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 15 | 15 | 14 | 10 | 14 |

| File Description | Document |
|---|---|
| List of research papers by title, author, department, name and year of publication (Data Template) (शीर्षकादिविवरणसहिता शोधपत्रसूची (दत्तांशप्रारूपम्)) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.4.6 Number of books edited and chapters in edited volumes/ books published, monographs in Sanskrit and other languages, original creative writing in Sanskrit, Sanskrit Shastras etc. (excluding awarded works), per teacher during the last five years***

**विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ प्रकाशितशोधपत्राणां/ संस्कृते एवं संस्कृतशास्त्रेषु सर्जनात्मकलेखानां सङ्ख्या। *(पुरस्कारप्राप्तग्रन्थान् विहाय)***

**Answer:** 4.88

3.4.6.1 Total number of books and chapters in edited volumes / books published, and papers in national/international conference-proceedings monographs, creative writing year-wise during the last five years -

विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ राष्ट्रिय-अन्ताराष्ट्रिय-सङ्गोष्ठीकार्यवृत्तिषु प्रकाशितशोधपत्राणां/ सर्जनात्मकलेखानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 17 | 09 | 15 | 27 | 11 |

| File Description | Document |
|---|---|
| List books and chapters in edited volumes / books | View Document |

| | |
|---|---|
| published (Data Template) (पुस्तकानां सम्पादितभागेषु प्रकाशिताध्यायानां सूची (दत्तांशप्रारूपम्)) | |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.4.7 Does the university publish any research journal(s)***

***If yes, indicate the year of starting the research journal, composition of the editorial board, editorial policies and state whether it is listed in any international database. Provide the ISSN No.***

**किं विश्वविद्यालयः शोधपत्रिकाः प्रकाशयति ? यद्येवम्, तर्हि शोधपत्रिकाणां प्रारम्भवर्षम्, सङ्घटिता सम्पादकसमितिः, सम्पादननियमाः, अपि च यत्र एताः क्वचित् अन्ताराष्ट्रियदत्तांशेषु सूचीकृता इति संसूचनीयम्। आइ. एस्. एस्. एन् सङ्ख्या देया।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकां अन्ताराष्ट्रियस्तरीयां 'शोध-ज्योतिः' इति प्रवरसमीक्षित-शोधपत्रिकां प्रतिवर्षं प्रकाशयति यस्याः प्रथमोऽङ्कः जनवरी-दिसम्बर-२०१९ वर्षे प्रकाशितो जातोऽस्ति । अस्यां शोधपत्रिकायां बहुशास्त्रविषयक-शोधलेखाः यथा वेद-साहित्य-ज्योतिष-दर्शन-धर्मशास्त्र-योगविषयक-शोधलेखाः भवन्ति ।

अस्याः शोधपत्रिकायाः प्रकाशनाय कार्यकारिण्याः परिषदः संस्तुतेः अनन्तरं शोधनियमाः रचिताः सन्ति, यदनुसारं शोध-पत्रिकेयं संस्कृत-हिन्दी-आङ्ग्ल-गुजरातीभाषासु शोधलेखाः विद्वद्भ्यः आमन्त्रिताः क्रियन्ते । अस्याः शोधपत्रिकायाः गुणवत्तां परिरक्षितुं ये आमन्त्रिताः लेखाः सङ्कलिताः भवन्ति, तेषां स्तरसमीक्षणाय विषयनिष्णातानां पार्श्वे ते लेखाः प्रेष्यन्ते । शोधलेखानाम् अदर्शितलेखकनामपूर्वकं निष्णातानां पार्श्वे प्रेषणात् पूर्वं प्रकाशनप्रक्रियानुसारं प्रधान-सम्पादकमहोदयस्यानुमतिं प्राप्य सम्पादक-मण्डलस्य उपवेशनं विधीयते यत्रेमे लेखाः प्रवरसमीक्षितशोधार्थं प्रस्तूयन्ते । अस्याः शोधज्योतिषः पत्रिकायाः पदेन प्रधानसम्पादकः भवति विश्वविद्यालयस्य कुलपतिः । प्रधानसम्पादक-सम्पादकमण्डलयोः अनुमोदनानन्तरं विषयनिष्णातानां पार्श्वे शोधलेखानां भाषा-विषय-प्रतिपादनशैलीनां गुणवत्तासमीक्षणाय प्रेष्यन्ते । विश्वविद्यालयनियमानुसारं प्रवरमूल्याङ्कनार्थं द्वयोः विषय-विशेषज्ञयोः पार्श्वे लेखाः प्रेष्यन्ते । विषयनिष्णातयोः प्रतिवेदनाधारेण शोधलेखानां प्रकाशनाय व्यवस्था विधीयते । तत्र विश्वविद्यालयस्य ध्येयवाक्यानुसारं विश्वविद्यालयस्य अन्यतमोद्देश्यञ्च लक्ष्यीकृत्य अस्यां शोधपत्रिकायां क्रमशः भारतीयभाषाणाम् आद्यताद्दृष्ट्या आदौ संस्कृतभाषायाः, ततः हिन्दीभाषायाः, ततः गुजरातीभाषायाः ततश्च आङ्ग्लभाषायाः लेखाः मुद्राप्यन्ते ।

अस्याः शोधपत्रिकायाः अन्तिमभागे शोधलेखानां प्रकाशननियमाः प्रकाशिताः भवन्ति येन लेखकाः अस्याः शोधपत्रिकायाः प्रकाशनमर्यादाविषये परिचिताः भवन्तः शोधलेखान् उपयुक्तरीत्या निर्माय सम्पादकाय ते प्रेषयेयुः । अस्याः पत्रिकायाः ISSN सङ्ख्या 2350-0700 वर्तते । अस्याः शोधपत्रिकायाः उद्देश्यानि सन्ति- शास्त्रनिहितगूढतत्त्वानां संशोधनं, संस्कृत-भाषा-साहित्यगतानां तत्त्वानाम् आधुनिक-समाज-लाभाय समीक्षा, तुलनात्मकाध्ययनप्रवृत्तेः उत्पादनं, संस्कृतछात्रेषु शोध-प्रविध्यनुसारं शोधलेखनप्रेरणा, संस्कृतवाङ्मयस्य विज्ञानतत्त्वानां शोधपत्रप्रकाशनमाध्यमेन प्रकाशनं च ।

अस्याः वार्षिक-शोधपत्रिकायाः गुणवत्तारक्षणाय समये समये परामर्शक-मण्डलसदस्यैः सह विचारविमर्शो विधीयते । शोधज्योतिषः मुद्रण-टङ्कण-व्याकरणशुद्धिविषये सतर्कता विधीयते तथा च बाह्यान्तरिकस्वरूपचिन्तनमपि विधिवत् क्रियते ।

उपर्युक्तविवेचनानुसारं शोध-पत्रिकेयं संस्कृतवाङ्मयस्य गूढतत्त्वान्वेषणप्रधाना व्यवस्थतरूपेण प्रकाश्यमाना, श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य आन्तरिकगुणवत्ता-परिवर्धनप्रधाना विश्वविद्यालयस्य गुणात्मकशोधप्रवृत्ति-प्रकाशिका वर्तते, यत्रापौरुषेय-वैदिकवाङ्मयान्तर्गतानां मन्त्रब्राह्मणारण्यकोपनिषदाम् आधिभौतिक-आधिदैविक-आध्यात्मिकतत्त्वैः सम्बद्धानि विदुषां शोधपत्राणि, धर्मशास्त्रगतविषयाणां तत्त्वसम्बद्धानि लोकाय विशेष-उपयोगीनि शोधपत्राणि, भारतीय-दर्शनानां जीवनप्रबन्धनसम्बद्धतत्त्वान्याश्रित्य विद्वद्भिः प्रणीतानि अत्यन्तोपयोगीनि शोधपत्राणि, संस्कृतसाहित्यस्य सर्वेषां घटकतत्त्वानां यथा काव्यस्वरूपशाब्दबोधरसालंकारकाव्यदोषादिविषयसम्बद्धानि संस्कृतमनीषिभिः परिशीलितानि शोधपत्राणि, योगदर्शनस्य भौतिकजीवनेन सहाध्यात्मिकविषयसम्बद्धानि शोधपत्राणि, तथैव वेदाङ्गेषु व्याकरण-ज्योतिष-निरुक्तादीनां विशेष-प्रवृत्तिमनुसृत्य रचितानि शोधपत्राणि, संस्कृत-वाङ्मयीयविषयाणामाधुनिकविषयैः सह संङ्गति-प्रकाशनमुख्यानि च शोधपत्राणि प्रकाशितानि जायन्ते । शोधस्य समीक्षात्मक-तुलनात्मक-तथ्यान्वेषणप्रविधिमनुसृत्य लिखितानां शोधपत्राणामत्र प्रकाशनेन शोधार्थिनां,

शोधपत्रलेखकानाञ्च महान् उपकारो जायते । एतेषां शोधपत्राणामध्ययनेन नूतनाः शोधकार्यकर्तुं प्रवृत्ताः युवानः शोधपत्रलेखनशैल्या सह लघुशोध-प्रबन्ध शोधप्रबन्धलेखनेन च सुपरिचिताः संभवन्ति । अनेन प्रकारेणेयं विश्वविद्यालतस्य गवेषणाप्रवृत्तिसंवाहिका शोधपत्रिकाऽत्यन्तमेव महत्त्वपूर्णाऽस्तीति विदुषां सहजप्रतिक्रियाभिरवगम्यते ।

**शोध-ज्योतिषि शोधपत्रप्रकाशननियमाः**

1. शोध-ज्योतिषि प्रकाशनाय प्राप्तानां शोधलेखानां पुनरीक्षित-सन्दर्भितमूल्याङ्कनं (Peer Reviewed) कारयित्वैव प्रकाशनं भवति । अतः विद्वांसः शोधलेखकाः निवेद्यन्ते यत् उपर्युक्त-मूल्याङ्कनस्तरीयान् एव शोधलेखान् प्रकाशनाय प्रेषयेयुः । शोधप्रविधिमानकरहिताः शोधलेखाः अत्र प्रकाशनार्हाः न संभविष्यन्ति ।
2. शोधपत्रम् अप्रकाशितं मौलिकञ्च भवेत् । कस्यचिदन्यस्य विदुषः ग्रन्थस्य बौद्धिक-सम्पदो वा अनुहरणं विधाय शोधलेखं लिखित्वा अत्र पत्रिकायां प्रकाशनाय प्रेषणम् अपराधश्रेण्यां गणयिष्यते तथा च लेखक-प्रतिभाहननमपि ।
3. शोधलेखे लेखकस्य सुसंगतः निष्कर्षः प्रमाणतुलारूढः शास्त्र-परम्परापुष्टश्च भवेत् ।
4. शोधलेखः न्यूनातिन्यूनः सहस्रद्वय/सहस्रत्रय-शब्दात्मकः अपेक्षितः ।
5. शोधलेख-लेखकस्य कथनस्य निष्कर्षस्य वा प्रमाणपुष्टै न्यूनातिन्यूनाः पञ्चदशा(१५)धिकसन्दर्भाः दातव्याः भविष्यन्ति तथा च शोधलेखान्ते प्रयुक्तानां स्तरीयसन्दर्भग्रन्थानां सूची व्यवस्थितरूपेण दातव्या, यत्र स्पष्टरूपेण लेखक-सम्पादक-सम्पादनवर्ष-प्रकाशनसंस्थानाञ्च पूर्णोल्लेखः स्यात् ।
6. विद्वांसो लेखकाः निवेद्यन्ते यत्ते स्व-लेखस्य समुचितरीत्या टङ्कणं शोधनं च कृत्वैव प्रकाशनाय प्रेषयेयुः येन शोधलेखस्य विशुद्धं स्वरूपं प्रकाशितं संभवेत् ।
7. शोधलेखटङ्कणमानकम्- देवनागरीलिपिहेतवे – `Arial Unicode MS' font size 11, तथा रोमनलिपिहेतवे - `Times New Roman' font size 12, तस्मिन् A-4 size मध्ये टङ्कणमपेक्षितमस्ति । टङ्कणान्ते शोधनं विधाय ई-मेल-माध्यमेन शोधपत्रं प्रेषणीयम् । ई-मेल सङ्केतोऽस्ति – shodhjyoti@gmail.com
8. शोधलेखस्य समीक्षणार्थं प्रेषणाय शोधलेखस्य प्रपत्रात्मिका (Hard copy) प्रतिलिपिरपि प्रेषणीयाऽस्ति ।
9. शोधलेखस्यारम्भे लेखकस्य नामोल्लेखः, पदस्योल्लेखः, पत्राचारसङ्केतः, दूरभाषक्रमाङ्कः, ई-मेलसङ्केतश्चावश्यमेव लेखनीयः ।
10. शोधलेखे टिप्पण्याः लेखनाय ग्रन्थसूच्याश्च लेखनाय सामान्यतः APA शैली अनुसरणीया ।
11. शोधलेखस्य प्रकाशनविषये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य निर्णयः अन्तिमो भविष्यति । शोधलेखप्रेषणाय पत्राचारसङ्केतः - सम्पादकः –शोधज्योतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, राजेन्द्र-भुवन-मार्गः, वेरावलम्-362266, जिल्ला - गीर-सोमनाथः, गुजरातम्, ई-मेल- shodhjyoti@gmail.com

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**3.5 Consultancy**

***3.5.1 Institution has a policy on consultancy including revenue sharing between the institution and the individual***

***(Yes /No)***

**व्यक्तिसंस्थयोः मध्ये परामर्शाद् प्राप्तस्य आयस्य संविभागार्थं काचिद् योजना संस्थया कल्पिता**

***( आम् / नो )***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload soft copy of the Consultancy Policy (परामर्शकनीतेः वैद्युतप्रतिलिपिः उपारोपणीया) | View Document |
| Upload minutes of the Governing Council/ | View Document |

| | |
|---|---|
| Syndicate/Board of Management related to consultancy policy(कार्यपरिषदः/ कस्यापि निकायस्य परामर्शकनीतिसम्बद्धकार्यवृत्तम् उपारोपयतु।) | |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Paste URL of the consultancy policy document (परामर्शकनीतिसम्बद्धाभिलेखस्य सन्धानम्) | View Document |

***3.5.2 Revenue generated from consultancy during the last five years (INR in Lakhs)***

### विगतपञ्चवर्षावधौ संस्थया परामर्शद्वारा अवाप्तो राशिः *(लक्षशः)*

**Answer:** 51000

3.5.2.1 Total amount generated from consultancy year-wise during the last five years (INR in lakhs)

विगतपञ्चवर्षावधौ संस्थया परामर्शद्वारा अवाप्तो राशिः संवत्सरक्रमेण (लक्षशः)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 00 | 00 | 51000 |

| File Description | Document |
|---|---|
| List of consultants and revenue generated by them (Data Template)(परामर्शकानां सूची तैरर्जितधनराशेश्च विवरणम् (दत्तांशप्रारूपम्)) | View Document |
| Audited statements of accounts indicating the revenue generated through consultancy (परामर्शमाध्यमेन अर्जितधनराशिसूचकम् अङ्केक्षणविवरणम्) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**3.6 Extension Activities**

***3.6.1 Extension activities in the neighborhood community in terms of impact and sensitising students to social issues and holistic development during the last five years***

### विगतपञ्चवर्षेषु छात्रेषु सामाजिकविषये संवेदनशीलताविकासाय, तेषां समग्रविकासाय च प्रातिवेशिकसमुदाये अनुष्ठिताः विस्तारगतिविधयः -

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा राष्ट्रियसेवायोजनायाः (N.S.S.) अन्वितित्रयं (3 Units) प्रचलति । प्रतिवर्षं जनपदसमाहर्तुः (जिलाकलेक्टर) कार्यालयेन सह मिलित्वा विश्वयोगदिवसनिमित्तीकृत्य जनपदस्तरीयः कार्यक्रमः विहितः । तत्र सहस्राधिकजनाः संलग्नाः भवन्ति । तदतिरिच्य वृक्षारोपणम्, महिलासशक्तीकरणम् (गुजरातराज्य-महिला-आयोग-सहयोगेन), स्वच्छताभियानम्, वीथीनाटकम्, विश्वसिंहदिवसः, महानुभावानां जन्मजयन्ती इत्यादयः बहवः कार्यक्रमाः विश्वविद्यालयेन अनुष्ठियन्ते । एभिः कार्यक्रमैः स्वास्थ्यविषये जनाः मार्गदर्शनं प्राप्तवन्तः । पर्यावरणविषये ते जागरूकाः अभवन् तथा च प्रकृत्या सह जनानां भावात्मिका दृष्टिः संजाताः । विश्वविद्यालयेन सह जनानां सहजः आत्मीयश्च सम्बन्धः जातः । एवं विश्वविद्यालयः सामाजिकचेतनायाः केन्द्रम् अपि भवति ।
2. श्रीवरतन्तुसंस्कृतमहाविद्यालय-सोलाद्वारा राष्ट्रियसेवायोजनायां तथा च श्रीबाबडेश्वरसंस्कृतमहाविद्यालय-पोरबन्दरद्वारा उपर्युक्ताः कार्यक्रमाः अभवन् । तैः कार्यक्रमैः तत्रत्याः तत्तत्समीपवर्तिक्षेत्रस्थाः जनाः लाभान्विताः जाताः । महिलासुरक्षा, महिलाविधिज्ञानम्, जलसञ्चयः, व्यसनमुक्तिः, स्वच्छता, समरसता, सार्वजनिकस्थानसुरक्षा, वाहननियमाः, इत्यादिविषयककार्यक्रमैः जनेषु जागृतिः ज्ञानं च अभवत् । एवं

केन्द्रद्वयेऽपि सामाजिकचेतनासञ्चारः जातः । राष्ट्रियसेवायोजनाद्वारा ये कार्यक्रमाः विहिताः, ते सामाजिकविविधवर्गजनैः सह मिलित्वा सम्पन्नाः ।

विश्वविद्यालयस्य राष्ट्रियसेवायोजनायाः अङ्गतया विगतपञ्चवर्षेषु छात्रेषु सामाजिकविषये संवेदनशीलता-विकासाय तेषां समग्रविकासाय च प्रातिवेशिकसमुदाये अनुष्ठिताः विस्तारगतिविधयः अत्र प्रस्तूयन्ते । तत्र संलग्नप्रतिभागिसङ्ख्या इत्थं वर्तते -

**२०१५-१६**

| **क्रमः** | **अनुष्ठिताः कार्यक्रमाः** | **प्रतिभागिनः** |
|---|---|---|
| १. | विश्वयोगदिवसः जिलास्तरीयकार्यक्रमः | २००० |
| २. | वृक्षारोपणकार्यक्रमः | २०० |
| ३. | महिला-सशक्तिकरणम् | २१० |
| ४. | स्वच्छताभियानान्तर्गतं वीथिनाटकम् | २०० |
| ५. | स्वच्छताभियानान्तर्गता शोभायात्रा,स्वच्छताकार्यं च । | २०० |
| ६. | मतदातृ-जागृत्यर्थम् अभियानकार्यक्रमः | २०० |
| ७. | प्रजासत्ताकपर्वोत्सवः गिरसोमनाथजिल्लाकार्यक्रमः | २०० |
| ८. | शिबिरम्- (राष्ट्रियसेवायोजनायाः) | २२ |

**२०१६-१७**

| **क्रमः** | **अनुष्ठिताः कार्यक्रमाः** | **प्रतिभागिनः** |
|---|---|---|
| १. | विश्वयोगदिवसः | २००० |
| २. | ६७ तमे वनमहोत्सवप्रसङ्गे ११११ वृक्षाणां रोपणम् | १७० |
| ३. | विश्वसिंहदिवसम् उपलक्ष्य शोभायात्रा | १७० |
| ४. | "स्वतन्त्रता-७०, स्मरन्तु बलिदानम्" इति कार्यक्रमसन्दर्भे विविधाः स्पर्धाः समायोजिताः तिरंगायात्रा स्वच्छताभियानम् च | ४६३ |
| ५. | स्वच्छता-सामाजिकसमरसतासप्ताहकार्यक्रमे वीथिनाटकम्, व्याख्यानम्, स्वच्छताकार्यकर्तॄणां सन्माननम्, विविधाः स्पर्धाः शोभायात्रा च समायोजिता | १९३ |
| ६. | स्वामिविवेकानन्दजन्मजयन्ती-अवसरे क्रीडामहोत्सवः | २०० |
| ७. | राष्ट्रियमतदातृदिवसः | २०० |
| ८. | केन्सर इत्याख्यस्य रोगविषये जागृत्यर्थं व्याख्यानम् | १६५ |
| ९. | ग्रामे राष्ट्रियसेवायोजनायाः विशिष्टशिबिरम् | २० |

**२०१७-१८**

| **क्रमः** | **अनुष्ठिताः कार्यक्रमाः** | **प्रतिभागिनः** |
|---|---|---|

| | | |
|---|---|---|
| १. | विश्वयोगदिवसः | १२०० |
| २. | वनमहोत्सवान्तगर्तं वृक्षारोपणम् | २०० |
| ३. | विश्वसिंहदिवसप्रसङ्गे शोभायात्रा | १६० |
| ४. | स्वतन्त्रतादिवसः | १२० |
| ५. | माननीय-प्रधानमन्त्रिणा सह video वार्तालापः | १८० |
| ६. | स्वच्छताभियानम् | १५० |
| ७. | भारतीयतटरक्षकसमूहेन सह मेलनं वार्तालापश्च | २६ |
| ८. | राष्ट्रियमतदातृदिवसप्रसङ्गे वीथिनाटकं शपथग्रहणं च । | १९० |
| ९. | प्रजासत्ताकदिवसस्य उपलक्ष्ये ध्वजवन्दनकार्यक्रमः | १६० |
| १०. | राष्ट्रियसेवायोजनायाः शिबिरम् | १५ |

**२०१८-१९**

| **क्रमः** | **अनुष्ठिताः कार्यक्रमाः** | **प्रतिभागिनः** |
|---|---|---|
| १. | विश्वयोगदिवसः (जिलास्तरीयः कार्यक्रमः) | ११४८ |
| २. | वृक्षारोपणम् | १६० |
| ३. | विश्वसिंहदिवसे नगरे शोभायात्रा | १५० |
| ४. | स्वतन्त्रतादिवसप्रसङ्गे ध्वजवन्दनकार्यक्रमः | १५० |
| ५. | थेलेसेमिया-परीक्षणस्य कार्यक्रमः | १६० |
| ६. | महात्मनः गान्धिनः १५० तमस्य जन्मजयन्ती-अवसरे शोभायात्रा, स्वच्छताभियानम्, सर्वधर्मप्रार्थना, भजनकार्यक्रमः च | प्रत्येकं कार्यक्रमे उपद्विशतं छात्राः भागं गृहीतवन्तः । |
| ७. | राष्ट्रिय- ऐक्यदिवसावसरे व्याख्यानम्, सरदारप्रतिमा-स्थापनकार्यक्रमः च | २२० |
| ८. | राष्ट्रियमतदातृदिवसे शोभायात्रा | १६० |
| ९. | माननीयप्रधानमन्त्रिणा परीक्षा-मार्गदर्शनम् | २०० |
| १०. | प्रजासत्ताकदिवसः | १८० |
| ११. | EVM यन्त्रस्य प्रदर्शनम्, तत्सम्बद्धमार्गदर्शनं च | १६० |
| १२. | राष्ट्रियसेवायोजनाशिबिरम् | २५/ अन्ये ग्रामजनाः छात्राः च |

**२०१९-२०**

| **क्रमः** | **अनुष्ठिताः कार्यक्रमाः** | **प्रतिभागिनः** |
|---|---|---|
| | | |

| | | |
|---|---|---|
| १. | विश्वयोगदिवसः | १४३२ |
| २. | जलसञ्चयविषयकं व्याख्यानम् | २०० |
| ३ | डॉ. जयेश वघासिया महोदयस्य व्यसनमुक्तिविषये व्याख्यानम् | २०० |
| ४. | वृक्षारोपणम् | ३० |
| ५. | स्वच्छताभियानम् | ५० |
| ६. | विश्वसिंहदिवसम् उपलक्ष्य शोभायात्रा | १०० |
| ७. | शिक्षकदिनम् अनुलक्ष्य स्वामि-अध्यात्मानन्दसरस्वतीपादानां व्याख्यानम् | १८० |
| ८. | थेलेसेमीयाशिबिरे छात्राणां, जनानां च परीक्षणम् | १२० |
| ९. | गान्धिजन्मजयन्त्यवसरे 'Fit India Programme' - कार्यक्रमः | २०० |
| १०. | इन्डियन रेडक्रोस सोसायटी द्वारा Social And Emergency Response Volunteer Programme Mock Drill | २५० |
| ११. | स्वच्छतापक्षान्तर्गताः विविधाः कार्यक्रमाः, यथा व्याख्यानम्, वृक्षारोपणम्, चित्रस्पर्धा, 'वेस्ट में से बेस्ट' इति स्पर्धा | बहवः छात्राः भागं गृहीतवन्तः |
| १२. | द्विचक्रिकया शोभायात्रा | ३० |
| १३. | प्रजासत्ताकदिवसकार्यक्रमः | २०० |

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information(अतिरिक्तासूचनानां सन्धानम्।) | View Document |

***3.6.2 Number of awards and recognition received for extension activities from Government /recognised bodies during the last five years***

### विस्तारगतिविधीनां कृते सर्वकारात्/मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्ताः पुरस्काराः/ सम्मानानि

**Answer:** 2

3.6.2.1 Total number of awards and recognition received for extension activities from Government/ recognised bodies year-wise during the last five years

विस्तारगतिविधीनां कृते सर्वकारात्/ मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकयोगः।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 01 | 00 | 01 | 00 |

| File Description | Document |
|---|---|
| Number of awards for extension activities in last 5 year (Data Template)(• विगतपञ्चवर्षेषु पुरस्कारं प्राप्तवतां विस्तारकार्यक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्)) | View Document |
| e-copy of the award letters(पुरस्कारपत्राणां वैद्युतप्रतिलिपिः।) | View Document |
| | |

| | |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.6.3 Number of extension and outreach Programmes conducted in collaboration with industry, community and Non- Government Organisations through NSS/ Swaccha Bharata Abhiyana/ NCC/ Red cross/ YRC etc., during the last five years***

**विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च सङ्ख्या।**

**Answer:** 66

3.6.3.1 Number of extension and outreach Programmes conducted in collaboration with industry, community and Non-Government Organisations through NSS/Swaccha Bharata Abhiyana/NCC/Red cross/YRC etc., year-wise during the last five years

विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च वार्षिकी सङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 14 | 14 | 12 | 15 | 11 |

| File Description | Document |
|---|---|
| Reports of the event organized (आयोजितकार्यक्रमस्य प्रतिवेदनम्) | View Document |
| Number of extension and outreach Programmes conducted with industry, community etc for the last five years (Data Template)( विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः / राष्ट्रियबालचर | View Document |

***3.6.4 Average percentage of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras /Yoga camps/ etc. during the last five years.***

**विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः मध्यमानस्य प्रतिशतता।**

**Answer:** 87.57

3.6.4.1 Total number of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras/ Yoga camps/ etc. year-wise during the last five years.

विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|

137 152 149 145 165

| File Description | Document |
|---|---|
| Report of the event (कार्यक्रमस्य प्रतिवेदनम्) | View Document |
| Details of students participating in extension activities with Govt. or NGO etc (Data Template) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.6.5 The University gives attention to make Sanskrit and Shastra learning popular in the surrounding areas by offering evening courses. Provide details***

**विश्वविद्यालयः प्रतिवेशिक्षेत्रेषु संस्कृतस्य शास्त्राणाञ्च लोकप्रियतासम्पादनाय सान्ध्यपाठ्यक्रमान् निर्वर्तयति? यद्येवम्, तर्हि विवरणं देयम्।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः अन्या अपि संस्थाः संस्कृतं प्रति प्रेरयति तदर्थञ्च साहाय्यमाचरति। एतदर्थं प्रायशः प्रतिवर्षंविश्वविद्यालयस्य प्राध्यापकाः शिक्षणसंस्थानेषु भ्रमणं विधायन केवलं विश्वविद्यालयीयपाठ्यक्रमाणां वैशिष्ट्यमाख्यान्ति, विश्वविद्यालये प्रवेशार्थञ्च यूनः प्रेरयन्ति, प्रत्युत संस्कृतस्य भारतीयसंस्कृति-संस्कार-राष्ट्रभक्तीनां कृते सहजः भावः स्थायिभावम् अवाप्नुयात् तदर्थंयुवसुउत्साहं समुद्भावयन्ति। एतदर्थं गुर्जरप्रदेशीय-संस्कृतभारत्याः संस्कृतप्रचारप्रसार-कार्यक्रमैः सह सामञ्जस्यं विधाय कालेकाले संस्कृतशिबिराणाम् आयोजनामाध्यमेनास्य विश्वविद्यालयस्य पूर्णता गौरवाय इति ध्येयवाक्यं स्मारयन्तः जनान् संस्कृत-सम्भाषणं प्रति प्रेरयन्ति च।शास्त्राध्यापनं सरलमानकसंस्कृतद्वारा यथा क्रियते तथैव अत्रापि संस्कृताध्यापनं लोकभावानुकूलं सरलं च भवति। अस्य आयोजनस्य कृते विश्वविद्यालयेनैकासंस्कृतसम्भाषणसमितिः संरच्यते प्रतिवर्षम्, यस्याः समितेः निर्धारिताः कार्यक्रमा आवर्षं चलन्ति। तदतिरिच्य वेरावलनागरिकाणाङ्कृतेऽपि संस्कृतसम्भाषणव्यवस्था विश्वविद्यालयेन विधीयते।विश्वविद्यालयः पारम्परिककक्षाभिः सह तदितिरिक्ते काले संस्कृत-संभाषणपठ्यक्रमकक्षां चालयति, यत्र सामान्यजनोऽपि प्रवेशं गृह्णाति। अनेन प्रकारेण श्रीसोमनाथसंस्कृतविश्वविद्यालयः न केवलं स्वकीयान् कार्यालयीयान् कर्मचारिणः एव प्रत्युत ग्रामवास्तव्यान् नागरिकान् अन्यानपि सामाजिकान् संस्कृतभाषासाहित्यं प्रति जागरितान् करोति, येनास्माकं समाजः संस्कारितः राष्ट्रभावनाभरितश्च स्यात्। तदर्थं कृताः केचन विशिष्टाः कार्यक्रमाः -

1. **स्वर्णिमगुजरातसंस्कृतमहाकुम्भः**= श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतभारत्याः सहयोगेन सम्पूर्णगुजरातस्य एकलक्षजनानां संस्कृतसम्भाषणयोजनायाः प्रारम्भः स्वर्णिमगुजरातमहोत्सवप्रसङ्गे कृतः । अत्र सर्वैः सह विश्वविद्यालयीय-सदस्यानां गुजरातप्रदेशस्य संस्कृतविदुषां, प्रजानां, प्रशासकानाञ्च सौहार्देन, सहयोगेन च अयं कार्यक्रमः सम्पन्नः । तत्र लक्षाधिकजनाः संस्कृतसम्भाषणं पठितवन्तः । अस्य कार्यक्रमस्य समारोपसमारोहे स्वर्णिमगुजरातराष्ट्रियसंस्कृतमहाकुम्भस्य सन्दर्भे गुजरातराज्यस्य तत्कालीनमुख्यमन्त्रिणः**मान.श्रीनरेन्द्रभाई मोदीमहोदयस्य** मार्गदर्शनं प्राप्तम् । तत्र समापनसमारोहस्य अङ्गतया केचन विशिष्टाः कार्यक्रमाः अपि विहिताः तद्यथा- भासस्य १३ नाटकानां मञ्चनम्, संस्कृतस्पर्धाः, विविधाः संस्कृत-संस्कृतिप्रदर्शिन्यः, युद्धकलाप्रदर्शनं, अभिवादनसमारोहः, पारितोषिकवितरणं, शोभायात्रा इत्यादयः ।
2. **संस्कृतसम्भाषणशिबिराभियानम्**= श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा वेरावल-प्रभास-पाटणे, तत्समीपस्थेषु च क्षेत्रेषु ५४ संस्कृतसम्भाषणशिबिराभियानस्य आयोजनं कृतम् । तेषु ५४ शिबिरेषु सहस्राधिकाः जनाः संस्कृतसम्भाषणं पठितवन्तः ।अभियानस्य अस्य समारोपसमारोहः जूनागढमार्गस्थिते श्रीस्वामिनारायणमन्दिरस्य सभागृहे समायोजितः । तत्र उपसहस्रं संस्कृतमधीतवन्तः शिबिरार्थिनः अस्य क्षेत्रस्य नैके गणमान्याः जनाः च उपस्थितवन्तः । समारोहे अस्मिन् मुख्यातिथिरूपेण **प.पू. स्वामिसच्चिदानन्दमहोदयः**, **श्री सी. पी. पटेलमहोदयः (जनपदसमाहर्ता), श्री जसाभाई बारडमहोदयः (विधानसभासदस्यः), पूर्वकुलपतिः डॉ. पंकज एल. जानीमहोदयः** एवं च **कुलपतिः प्रो. वेम्पटिकुटुम्बशास्त्रिवर्यः** इमे सर्वे समुपस्थिताः आसन् ।
3. **संस्कृतसम्भाषणशिबिरान्वितं जनपदसम्मेलनम्**= संस्कृतभारत्याः सहयोगेन २०१५ तमे वर्षे सोमनाथमन्दिरपरिसरे संस्कृतजनपदसम्मेलनं विश्वविद्यालयेन कृतम्। तत्र सहस्राधिकाः जनाः भागं गृहीतवन्तः। जनपदसम्मेलनस्य अङ्गतया सम्पूर्णे जनपदे शिबिराभियानं कृतम्।फरवरीमासस्य षष्ठादेव दिनात् विशेषतया प्रशिक्षिताः श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः जनपदस्य प्रत्येकं तालुकाक्षेत्रम् अगच्छन् । तैः तत्र तत्र आयोजितेषु संस्कृतसम्भाषणशिबिरेषु अध्यापनं कृतम् । सम्मेलनं प्रति समागताः ते सहस्राधिकाः जनाः तत्तच्छिबिरेषु दशदिनानि यावत् संस्कृतसम्भाषणं पठितवन्तः। सम्मेलनेऽस्मिन् गुजरातराज्यस्य

**महामहिमराज्यपालमहोदयः डॉ. ओ. पी. कोहलीजी**आत्मानं समुपस्थाय अध्यक्षत्वेन मार्गदर्शनम् अकरोत्। संस्कृतभारत्याः अखिलभारतीयसङ्घठनमन्त्री श्रीमान् दिनेशकामतजी महोदयःस्वविचारान् प्रकटितवान्। विश्वविद्यालयस्य तत्कालीनाः कुलपतिः प्रो. वेम्पटिकुटुम्बशास्त्रिवर्यस्य प्रेरणया मार्गदर्शनेन च सम्मेलनमिदं साफल्यमगच्छत्। अनेन कार्यक्रमेण संस्कृतानुरागिणां जनानां संस्कृतसम्भाषणकौशलं विकसितम् । अत्र समागतानां विदुषां मार्गदर्शनेन प्रेरणया च इतोऽपि संस्कृतसम्भाषणकार्यं समाजं प्रति नेतुम् उत्साहं दृष्टिं च अवाप्तवन्तः वयम् ।

4. श्रीसोमाथसंस्कृतविश्वविद्यालयेन संस्कृतभारत्याः सहयोगेन २०१५ तमे वर्षे अगस्तमासस्य २३ तमे दिनाङ्के**गृहं गृहं प्रति संस्कृतम्** इति योजनां स्वीकृत्य गीरसोमनाथजनपदस्य षट्सु तालुकास्थलेषु गृहं गृहं गत्वा **वदतु संस्कृतम्** इति पुस्तकप्रदानपूर्वकं संस्कृतस्य प्रचारकार्यं कृतम् ।

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.6.6 Teachers participate in the live commentaries / lectures / discussion programmes on the print and electronic media. Provide details.***

**वार्त्तापत्रेषु वैद्युतिकगणमाध्यमेषु च प्रत्यक्षविवरणप्रदानाय/ धाराविवरणप्रसारणाय/ परिसंवादकार्यक्रमाय शिक्षका भागग्राहिणो भवन्ति, विवरणानि देयानि।**

**Answer:**

एतदेवावधेयमस्ति यत् संस्कृतभाषायाः  विकासाय, भारतीयसस्कृतेः संरक्षणाय, आधुनिकविज्ञानेन सह संस्कृतवाङ्मयस्य सम्बन्धसिद्धये, कर्तव्याकर्तव्यावबोधनाय, ज्ञानालोकप्रसाराय, मानवीयमूल्यबोधस्य सम्प्रतिष्ठायै, विशेषतः विश्वकल्याणाय एवञ्च संस्कृताध्ययनाध्यापनयोः प्रोत्साहनाय श्रीसोमनाथसंस्कृतविश्वविद्यालयः कार्यरतः अस्ति । अस्य विश्वविद्यालयस्य 'पूर्णतागौरवाय' इति ध्येयवाक्यं सार्थकं कर्त्तुं अस्य विश्वविद्यालयस्य अध्यापकाः कर्मचारिणश्च सर्वदा प्रयन्तशीलाः सन्ति । एतत् उपस्थाप्यते यत् काले काले दूरदर्शनसंस्थाभिः श्री सोमनाथसंस्कृतविश्वविद्यालयस्याध्यापकाः साक्षातकाराय आहूयन्ते । तथैव  विभिन्नेषुवार्तापत्रेषु वैद्युतिकरणमाध्यमेषु च प्रत्यक्षविवरणप्रदाने/धाराविवरणप्रसारणे/ परिसंवादकार्यक्रमे वा ये शिक्षकाः भागग्रहणं कृतवन्तः तेषां विवरणम् अधस्तात् प्रस्तुतमस्ति -

| नाम | कार्यक्रमस्य शीर्षकम् | सहयोगिसंस्थायाः नाम |
|---|---|---|
| डॉ.ललितकुमार पटेल | पत्राचारद्वारा संस्कृतशिक्षणम् | डॉ.बाबासाहेव आम्बेडकर मुक्तविश्वविद्यालय एवं संस्कृतभारती, गुजरात |
| डॉ.ललितकुमार पटेल | अलङ्काराणां परिचयः<br>युट्युबमाध्यमेन Online शिक्षणम् (८ व्याख्यानानि) | संस्कृतभारती<br>गुजरात |
| डॉ.ललितकुमार पटेल | संस्कृत-रसास्वादः संस्कृतव्याख्यानमाला | Ahmedabadsanskrit academy |

| नाम | कार्यक्रमस्य शीर्षकम् | सहयोगिसंस्थायाः नाम |
|---|---|---|
| डॉ.नरेन्द्रकुमार एल्. पण्ड्या | श्रीमद्भागवत महापुराण व्याख्यानमाला (१२ व्याख्यानानि) | श्रीसोमनाथसंस्कृत विश्वविद्यालयः, वेरावलम् |
| डॉ. शत्रुघ्न पाणिग्राही | अभियान<br><br>पत्रिका | अभियान पत्रिका<br><br>गुजरत |
| डॉ.पङ्कजकुमार एस्. रावल | valmikinuramayananebhasnuramayan darshan 2.srimadbhagavadgitamagurushishyaparampara | Ahmedabadsanskrit academy |
| डॉ.पङ्कजकुमार एस्. रावल | श्रीमद्भागवत कथा<br><br>Online TV chanelLakSha | श्रीसोमनाथट्रस्ट, सोमनाथ |
| डॉ. शत्रुघ्न पाणिग्राही | Epgpathashala | MHRD under its National Mission on Education through ICT (NME-ICT)<br><br>The UGC Development of e-content |
| डॉ. दीपेश कतिरा | Epgpathashala | MHRD under its National Mission on Education through ICT (NME-ICT)<br><br>The UGC Development of e-content |

| नाम | कार्यक्रमस्य शीर्षकम् | सहयोगिसंस्थायाः नाम |
|---|---|---|
| | | |
| प्रो.गोपबन्धु मिश्र | भातरीय संस्कृति एवं हमारी जीवनशैली (साक्षात्कारः) | श्रीसोमनाथसंस्कृत विश्वविद्यालयः, वेरावलम् |
| डॉ. दीपेश कतिरा | | Lesson 9 \|\| Samskrita Correspondence Course \|\| Pravesha Gujarati Medium |
| डॉ. जानकीशरण आचार्य | वेदान्तसारः (२७ व्याख्यानानि) | श्रीसोमनाथसंस्कृतविश्वविद्यालयः वेरावलम् |
| डॉ. ललितकुमार पटेल | संस्कृतसम्भाषणाभियानम् (साक्षात्कारः) | S9 News Gujarat |
| श्री विपुलः जादवः | संस्कृतपाठाः (कक्षा-१२) (१५ व्याख्यानानि) | यूट्यूब |
| श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृतसप्ताहोत्सवः | संस्कृतं मम गौरवम् विडिओ अभियानम् | श्रीसोमाथसंस्कृतविश्वविद्यालयस्य फेसबुकपेजमध्ये |

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**3.7 Collaboration**

***3.7.1 University's collaboration with other agencies impacted the visibility, identity and diversity of activities on campus? To what extent has the university benefitted academically and financially because of collaborations? The nature of the skill development Programmes introduced for students initiated by the University in collaboration with professional bodies.***

**विश्वविद्यालयस्य इतरसंस्थाभिः सह संयुक्तोपक्रमः परिसरस्य परिदृश्यं, परिचयं, विविधक्रियाकलापांश्च प्रभावयति? संयुक्तोपक्रमद्वारा विश्वविद्यालयः कियता परिमाणेन शैक्षिकदिशा आर्थिकदिशा च लाभान्वितो भवति? अन्यासां वृत्तिप्रदातृसंस्थानां सहयोगेन छात्राणां कौशलविकासाय विश्वविद्यालयेन समारब्धानां पाठ्यक्रमाणां विवरणम्।**

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन (१९) एकोनविंशति-संस्थाभिः सह शैक्षिक-अभिबन्धः (MoU)कृतः वर्तते।तस्य अङ्गतया फ्रेन्च इन्स्टीट्यूट ऑफ पॉण्डीचेरी इति संस्थायाः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'वैयाकरणसिद्धान्तभूषणम्' इत्यस्य ग्रन्थस्य प्रथमभागः प्रकाशितः।फ्रेन्च इन्स्टीट्यूट ऑफ पॉण्डीचेरी तथा च इकोले फ्रेन्चाईज इत्यनयोः संस्थयोः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'वैयाकरणसिद्धान्तभूषणम्' इत्यस्य ग्रन्थस्य द्वितीयभागः प्रकाशितः । हैडल्बर्गविश्वविद्यालयेन सह जातस्य शैक्षिकस्य अभिबन्धस्य अङ्गतया श्रीसोमनाथसंस्कृतविश्वविद्यालये २०१९ तमे वर्षे मार्चमासस्य ११ तः१४ दिनाङ्कं यावत् 'संस्कृतशिक्षणम् अङ्कीयमानविकी च' इत्यस्मिन् विषये विशिष्टा कार्यशाला समायोजिता। अस्यां कार्यशालायां दश छात्राः, चत्वारः प्राध्यापकाः, विश्वविद्यालयस्य ग्रन्थपालः सङ्गणक-अभियन्ता च भागमगृह्णन्। विश्वविद्यालयद्वारा २०२० तमे वर्षे

फरवरीमासस्य एकादशात् दिनाङ्कात् त्रयोदशदिनाङ्कं यावत् "भाष्यपरम्परा ज्ञानप्रवाहश्च" इत्यस्मिन् विषये अन्ताराष्ट्रियसङ्गोष्ठी समनुष्ठिता। तत्र हैडलबर्गविश्वविद्यालयस्य प्राध्यापकः डॉ. आनन्दमिश्रवर्यः वैदेशिकसंयोजकत्वेन कार्यमकरोत्।एतेषां शैक्षिकाभिबन्धानां कारणेन अन्ताराष्ट्रियसंस्कृतविद्वद्भिः सह कार्यं कृत्वा अध्यापकानां छात्राणां च संशोधनदृष्टौ विकासः जातः । विश्वस्य संस्कृतज्ञानपरम्परायाः विषयेवयंसुपरिचिताः अभवाम । तेषां व्याख्यानानि श्रुत्वा अध्यापकैः सह अस्माकं छात्राः अपि लाभान्विताः जाताः । एवं प्रकारेण ज्ञानवृद्धिः अभवत् ।

2. श्रीसोमनाथसंस्कृतविश्वविद्यालयः स्वकीय आन्तरिकगुणवत्तानिर्वहण-परिवर्धनसन्दर्भे, शोध-प्रवृत्ति-उपचय-सन्दर्भे शोधनीत्यालोके च १८-२०मईमासे २०१८ तमे वर्षे स्वकीय शैक्षणिकपरिसरे एकोनचत्त्वारिंशत्तमं सत्रम् अखिलभारतीयप्राच्यविद्यासम्मेलनं समायोजितवान्, यत्र सप्तशतं विद्वांसः पत्रवाचनं कृतवन्तः । सम्मेलनस्यास्योद्घाटकः गुजरातराज्यस्य पूर्वमुख्यमन्त्री श्रीमान् केशुभाई पटेलमहोदयः तथा उद्घाटनसत्रे गुर्जरप्रान्तस्य शिक्षामन्त्री श्रीमान् भूपेन्द्रसिंह चुडासमाजीमहोदयःसारस्वत-अतिथिरूपेणोपस्थितः । अस्मिन् त्रिदिवसात्मके अखिलभारतीयप्राच्यविद्यासम्मेलने पण्डितपरिषद्, कविसम्मेलनम्, सांस्कृतिककार्यक्रमाश्च आसन् अत्र '२१' एकविंशतिपत्रवाचनसम्भागा आसन् यत्र संस्कृतवाङ्मयेन सह एशियन, परशियन एवं इस्लामिक-अध्ययनसम्बद्ध-शोध-पत्राणां वाचनं जातमासीत् । अनेन कार्यक्रमेण परिसरस्थाः छात्राः अध्यापकाः लाभान्विताः । विदुषां सम्पर्केण तेषां शोधपत्रश्रवणेन च संशोधनदृष्टिः विकसिता ।
3. श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतभारत्याः सहयोगेन चतुर्दिनात्मकः आवासीयः संस्कृतभाषानैपुण्यवर्गःप्रवृत्तः।संस्कृताध्येतृच्छात्राणां कृते शास्त्राध्ययनेन समं संकृतभाषया निर्बाधतया शुद्धतया च सम्भाषणस्य अभ्यासः नितान्तम् आवश्यकः इति अस्मत्कुलपतेः अभिप्रायम् अनुसृत्य २०१९ तमे वर्षे नवेम्बरमासस्य २७ तमात् दिनाङ्कात् डिसेम्बरमासस्य ०१ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालये आवासीयः संस्कृतभाषानैपुण्यवर्गः समायोजितः। वर्गममुं सञ्चालयितुं संस्कृतभारत्याः कार्यकर्तारः तज्ज्ञत्वेन आहूताः आसन्। एभिः समं अस्मद्विश्वविद्यालयस्य प्राध्यापकैः सहवरीयांसः छात्राः अपि वर्गसंचालने साहाय्यं कृतवन्तः।अत्र प्रत्यक्षपाठनेन गणकार्यमाध्यमेन च क्रीडा-प्रतिभाप्रदर्शनादिभिश्च छात्राः संस्कृतेन व्यवहर्तुं प्रेरिताः। वर्गेऽस्मिन् विश्वविद्यालस्य ११६ छात्राः सहभागमवाप्य नित्यजीवने संस्कृतेन व्यवहारं कर्तुं प्रेरणां प्राप्तवन्तः। अनेन कार्यक्रमेण विश्वविद्यालये संस्कृतवातावरणं जातं तथा च परिसरे सर्वेऽपि छात्राः अध्यापकाः नित्यजीवने संस्कृतेन व्यवहारं कुर्वन्ति ।
4. गोपालकृष्ण-न्यासेन सह श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षिकाभिबन्धः (MoU)वर्तते । तेनाभिबन्धेन प्रतिवर्षं पदवीदानसमारम्भे एकस्य विदुषः १२, ००० रूप्यकाणां प्रदानपूर्वकं सम्माननं क्रियते । किञ्च व्याकरणविषये शास्त्री-आचार्यकक्षासु प्राप्तप्रथमक्रमाङ्कस्य छात्रस्य १०,००० रूप्यकाणां सम्माननं क्रियते । तदतिरिच्य व्याकरणविषयं स्वीकृत्य विद्यावारिधिं (Ph.D.) कृतवतां छात्राणां ६,५०० रूप्यकाणां पुरस्कारैः सम्माननं क्रियते । अनेन उपक्रमेण नैके विद्वांसः, प्राध्यापकाः, शोधच्छात्राः छात्राश्च प्रेरणां प्राप्य व्याकरणविषये गहनाध्ययनं विहितवन्तः । तस्य विवरणंसंलग्नपत्रे वर्तते ।
5. नवदेहलीस्थया विद्याभारत्या सह सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा वैदिकगणितशास्त्र (Vaidic Mathematics) विषये एका०५ दिवसीया कार्यशाला समायोजिता । तत्र विद्याभारत्याः विद्वांसः प्रशिक्षकाः समागत्य २६ अध्यापकानां प्रशिक्षणं कृतवन्तः । ते प्रशिक्षकाः विश्वविद्यालयस्य विविधेषु केन्द्रेषु वैदिकगणितं पाठितवन्तः । तस्य अङ्गतया वैदिकगणितविषये प्रमाणपत्रीयपाठ्यक्रमस्य तथा पदविकापाठ्यक्रमस्य पाठ्यक्रमनिर्माणं जातम् । तेन कारणेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे तथा च तत्संलग्नकेन्द्रेषु जनाः छात्राः च वैदिकगणितं पठितवन्तः । अनेन उपक्रमेण वैदिकगणितस्य प्रचारः प्रसारः च जातः । रुचिमन्तः जनाः छात्राः च लाभान्विताः जाताः ।
6. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य आन्तरिकगुणवत्तायाः आलोके संस्कृतवाङ्मये वास्तुविज्ञान-महाऽऽकरे, आधुनिक-अभियान्त्रिक्याः प्रवृत्तिस्वरूपतुलायां "संस्कृतवाङ्मये नगररचना" इति विषयमाश्रित्यश्रीसोमनाथसंस्कृतविश्वविद्यालय-सरदारपटेल-विश्वविद्यालय-संस्कृतभारती(गुर्जरप्रान्त) इत्येतेषां त्रयाणां संयुक्ततत्त्वावधाने एका राष्ट्रियसंगोष्ठीआयोजिता ।अत्र वास्तुविद्यया सहाधुनिकविज्ञानसम्बद्धाः सङ्कलिताः शोधलेखाः शोधप्रविध्यनुसारं तथ्यान्वेषणशैल्या(Fact finding Research Method) विद्वद्भिः प्रस्तुताः सन्ति । अनया सङ्गोष्ठ्या ग्रन्थप्रकाशनेन च संस्कृतविज्ञानक्षेत्रस्य वास्तुक्षेत्रस्य च विषये संशोधनदृष्टिः विकसिता तथा च संशोधनपद्धतेः ज्ञानमभवत् ।
7. श्रीसोमनाथसंस्कृतविश्वविद्यालयः एवं राष्ट्रियसंस्कृत-अनुसन्धान(NCERT)इत्यनयोः संयुक्तोपक्रमे २५/०२/२०१९ तः ०१/०३/२०१९ यावत् A Compendium of Ancient Indian Educational Thoughts in Sanskrit इति विषयमादाय पञ्चदिवसात्मिका राष्ट्रियकार्यशाला समायोजिता । अनया प्राचीनभारतीयशैक्षणिकसिद्धान्तानां प्रति विशिष्टा दृष्टिर्विकसिता ।

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***3.7.2 Number of functional MoUs with institutions of national, international importance, other universities, industries, corporate houses etc. during the last five years (only functional MoUs with ongoing activities to be considered)***

## राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिनीभिः संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैः च सह कृतानाम् आर्थिकानुबन्धानां सङ्ख्या (केवलं प्रवर्तमानगतिविधीनामेव आर्थिकानुबन्धसहयोगपत्राणि स्वीकरणीयानि)

**Answer:** 9

3.7.2.1 Number of functional MoUs with institutions of national, international importance, other universities, industries, corporate houses etc. year-wise during the last five years

विगतपञ्चवर्षेषु राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिनीभिः संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैः च सह कृतानाम् अधुना प्रवर्तमानानाम् आर्थिकानुबन्धानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 01 | 01 | 01 | 00 | 06 |

| File Description | Document |
|---|---|
| e-copies of the MoUs with institution/ industry/ corporate house(संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैः च हस्ताक्षरितानाम् आर्थिकानुबन्धपत्राणां वैद्युतप्रतिलिपयः।) | View Document |
| Details of functional MoUs with institutions of national, international importance, other universities etc. during the last five years (Data Template) (विगतपञ्चवर्षेषु राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिनीभिः संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैश्च सह संस्थया कृतानां प्रवर्तमानार्थिकानुबन्धपत्राणां विवरणम्। (दत्तांशप्रारूपानुगुणं सांस्थानिकदत्तांशः) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.7.3 Provide details of the Joint publication Programme of the University in collaboration with other Universities/institutes and well established publishing firms***

## विश्वविद्यालयस्य इतरविश्वविद्यालयैः/लब्धप्रतिष्ठप्रकाशनसंस्थाभिः सह संयुक्तप्रकाशनकार्यक्रमस्य विवरणं प्रदीयताम्

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन फ्रेन्च-इन्सिटट्यूट ओफ पोण्डिचेरी (French Institute of Pondicherry, Pondicherry) इति संस्थायाः सहयोगेन "वैयाकरणसिद्धान्तभूषणम्" इत्यस्य ग्रन्थस्य प्रथमभागः प्रकाशितः ।

फ्रेन्च-इन्सिटट्यूट ओफ पोण्डिचेरी (French Institute of Pondicherry, Pondicherry) तथा च इकोल फ्रेन्काइस दि' एक्सट्रीम ओरिएन्ट, पोण्डिचेरी (Ecole Francaise De'Extreme Orient, Pondicherry) इत्यनयोः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेन "वैयाकरणसिद्धान्तभूषणम्" इत्यस्य ग्रन्थस्य द्वितीयभागः प्रकाशितः । "वैयाकरणसिद्धान्तभूषणम्" इत्यस्य तृतीयभागः २०२० तमस्य डिसेम्बर् मासे प्रकाशितः भविष्यति तथा च चतुर्थः भागः २०२१ तमस्य वर्षस्य अप्रिलमासे प्रकाशितः भविष्यति इति उपर्युक्ताभ्यां संस्थभ्यां सह शैक्षणिकः अभिबन्धः (MoU) जातः वर्तते। अस्य ग्रन्थचतुष्टयस्य प्रकाशनसंस्था श्रीसोमनाथसंस्कृतविश्वविद्यालयः भविष्यति । तत्र सम्पादनव्ययः तयोः संस्थयोः तथा च प्रकाशनव्ययः विश्वविद्यालयस्य भविष्यति । सहयोगस्य अवधिः १०-१-२०१५ तः अप्रिल-२०२१ पर्यन्तं सम्पत्स्यते । तिसृणां संस्थानां सहयोगेन 'वैयाकरणसिद्धान्तभूषणम्" इत्यस्य ग्रन्थस्य तृतीयचतुर्थभागयोः प्रकाशनकार्यं प्रचलदस्ति, अतः तदपि शीघ्रमेव विदुषां समक्षं अवतारयिष्यते । इत्थं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ग्रन्थप्रकाशनक्षेत्रेऽपि स्वयोगदानं दत्तम् ।

2. श्रीसोमनाथसंस्कृतविश्वविद्यालयः, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् तथा च सन्तश्रीसन्ध्यागिरिबापुसंस्कृतवेदविद्यालयः इत्येतेषां संयुक्ततत्त्वावधाने राष्ट्रियवेदविद्याप्रतिष्ठानद्वाराऽङ्गीकृत-वित्तपोषणैकाऽखिलभारतीया वेदसङ्गोष्ठी कर्मकाण्डसंस्कारविज्ञानमाश्रित्य २०१७ तमस्य सितम्बरमासस्य ११-१३ दिनाङ्के समायोजिताऽसीत् । अस्यां सङ्गोष्ठयां ये वेदविज्ञानविषयाः शोधपत्रमाध्यमेन प्रस्थापिताः तेषां महत्त्वपूर्णानामुत्तमानां चितानां शोध-पत्राणां सङ्कलनरूपोऽयं ग्रन्थः कर्मकाण्डसंस्कारविज्ञानम् इति सन्तश्रीसन्ध्यागिरिबापुसंस्कृतवेदविद्यालयद्वारा प्रदत्तवित्तेन श्रीसोमनाथसंस्कृतविश्वविद्यालयतः प्रकाशतां गतः।
3. २०१८ तमस्य वर्षस्य मईमासस्य १८-१९-२० दिनाङ्केषु ४९ तमम् अखिलभारतीयप्राच्यविद्यासङ्गोष्ठी समायोजिता आसीत् श्रीसोमनाथसंस्कृतविश्वविद्यालयेन। तत्र भागं जिघृक्षूणां विदुषां शोधपत्रसारांशाः पुस्तकरूपेण 'प्रज्ञापीयूषम्' इति शीर्षकेण प्रकाशिताः। सम्पूर्णभारतदेशतः विद्वांसः समागत्य सङ्गोष्ठयामस्यां वैदिकसाहित्यम्, इरानीयनसाहित्यम्, इस्लामीसाहित्यम्, अरबिकपर्सियनसाहित्यम्, लौकिकसंस्कृतसाहित्यम्, पालिबौद्धसाहित्यम्, प्राकृतजैनसाहित्यम्, इतिहासपुराणतत्त्वभाषाविज्ञानादीन्याश्रित्य शोधपत्राणि प्रस्तुतवन्तः, तेषां शोधपत्राणां सारांशाः संग्रहरूपेण पुस्तकेऽस्मिन् व्यवस्थापिताः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन।
4. श्रीसोमनाथसंस्कृतविश्वविद्यालयः वेरावलम्, सरदारपटेलविश्वविद्यालयः वल्लभविद्यानगरम्, विद्वत्परिषत् संस्कृतभारती गुजरातम्, इत्येतासां संस्थानां संयुक्ततत्त्वावधानेन 'संस्कृतवाङ्मये नगररचना' इति विषयमधिकृत्य २०१९ तमे वर्षे मार्चमासस्य ६-७ दिनाङ्कयोः राष्ट्रियपरिसंवादस्य आयोजनं जातम् । विश्वविद्यालयेन तत्र पठितानां शोधपत्राणां सङ्कलनं कृत्वा ग्रन्थस्वरूपेण प्रकाशनं कृतम् ।

1. **शैक्षिक-अभिबन्धद्वारा प्रकाशिताः ग्रन्थाः**

| क्रमः | ग्रन्थस्य नाम | सहयोगिसंस्थायाः नाम | आर्थिकसाहाय्यस्य स्त्रोतांसि | सहयोगप्राप |
|---|---|---|---|---|
| १. | वैयाकरण-सिद्धान्त-भूषणम् (प्रथमभागः) | फ्रेन्च ईन्स्टिट्युट ओफ पोण्डिचेरी | फ्रेन्च ईन्स्टिट्युट ओफ पोण्डिचेरी तथा च श्री.सो.सं.युनि. वेरावलम् | १३-१-२०१५ |
| २. | कर्मकाण्डसंस्कारविज्ञानम् | महर्षिसान्दीपनि-राष्ट्रियवेदविद्या-प्रतिष्ठानम् तथा च संतश्री-सन्ध्यागिरिबापु-संस्कृत-वेदविद्यालयः | महर्षिसान्दीपनि-राष्ट्रियवेदविद्या-प्रतिष्ठानम् तथा च संतश्री-सन्ध्यागिरिबापु-संस्कृत-वेदविद्यालयः एवं च श्री.सो.सं.युनि. वेरावलम् | २०१७ |
| ३. | वैयाकरण-सिद्धान्त-भूषणम् (द्वितीयभागः) | इकोल फ्रेन्काइस दि' एक्सट्रीम ओरिएन्ट, पोण्डिचेरी | फ्रेन्च ईन्स्टिट्युट ओफ पोण्डिचेरी तथा च श्री.सो.सं.युनि. वेरावलम् | १२-६-२०१८ |

| क्रमः | ग्रन्थस्य नाम | सहयोगिसंस्थायाः नाम | आर्थिकसाहाय्यस्य स्त्रोतांसि | सहयोगप्राप् |
|---|---|---|---|---|
| ४. | प्रज्ञापीयूषम् | अखिलभारतीयप्राच्यविद्या-परिषद् | अखिलभारतीयप्राच्यविद्यापरिषद् एवं च श्री.सो.सं.युनि. वेरावलम् | २०१८ |
| ५. | संस्कृतवाङ्मये नगररचना | श्रीसोमनाथसंस्कृतविश्वविद्यालयः, सरदारपटेलविश्वविद्यालयः तथा च संस्कृतभारती गुजरातम् | श्रीसोमनाथसंस्कृतविश्वविद्यालयः तथा च सरदारपटेलविश्वविद्यालयः | २०२० |

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**4.Infrastructure and Learning Resources**

**4.1 Physical Facilities**

***4.1.1 The institution has adequate facilities for teaching- learning. viz., classrooms, laboratories, computing equipment, etc.***

### कक्ष्याप्रकोष्ठः, प्रयोगशाला, सङ्गणकयन्त्रादीनि शिक्षणाधिगमसम्बन्धीनि भौतिकसौविध्यानि संस्थायामुपलभ्यन्ते।

**Answer:**

1. ०१-०४-२००५ दिनाङ्के २५ “F” २००५ इति विधेयक-द्वारा (Act) स्थापिता इयं संस्था ७११५१ बर्ग-मीटर-परिमिते भूभागे प्रसृता अस्ति। शैक्षणिकभवनस्य बिल्ट-अप-क्षेत्रफलं भूतले (ground floor) २५६३ वर्ग-मीटर-परिमितम् अस्ति।
2. शैक्षणिकभवने ०३ क्रमाङ्कस्य प्रकोष्ठे “सायणाचार्य” नामधेयः अनुस्नातकविभागस्य अध्यक्षस्य कार्यालयः अस्ति। ०२ क्रमाङ्कस्य प्रकोष्ठे “श्रीशङ्कराचार्य” नामधेयः महाविद्यालयस्य प्राचार्यस्य कार्यालयः अस्ति। द्वयोः अपि प्रकोष्ठयोः सङ्गणकयन्त्रस्य, LAN माध्यमेन अन्तर्जालस्य च सुविधा अस्ति।
3. अस्मिन् शैक्षणिकभवने १८ वर्गखण्डाः सन्ति। तेषु वर्गखण्डेषु प्रमाणानुसारं विद्युद्-व्यजनादीनां सुविधा अस्ति।
4. खण्डेषु अध्यापक-कार्यालयेन सह ०५ वर्गखण्डाः अपि सन्ति। आचार्य-सहाचार्याणां कृते कार्यालयः तथा वर्गखण्डः व्यक्तिशः प्रदत्तः अस्ति। तेषु प्रत्येकं खण्डे सङ्गणकयन्त्रस्य तथा LAN माध्यमेन अन्तर्जालस्य सुविधा अपि अस्ति। तत्र व्याख्यानानि भवन्ति अतः छात्राणाम् उपवेशनव्यवस्था, हरितफलकं, सुधाखण्डादीनां च व्यवस्था अस्ति।
5. अवशिष्टेषु १३ वर्गखण्डेषु ०७ वर्गखण्डाः लघीयांसः सन्ति। तेषु उत्पीठिका, अध्यापकस्य छात्राणां च उपवेशनाय आसन्दाः, हरितफलकम्, सुधाखण्डाः च भवन्ति। तेषु खण्डेषु अपि अन्तर्जालस्य सुविधा Wi-Fi माध्यमेन प्रदत्ता अस्ति।
6. ०६ वर्गखण्डाः विशालाः सन्ति। तेषु सर्वेषु वर्गखण्डेषु प्रत्येकम् ४० छात्राणाम् उपवेशनव्यवस्था अस्ति। पञ्चसु वर्गखण्डेषु उद्बोधनपीठिका (podium), उत्पीठिका, आसन्दाः च सन्ति। एकः योगस्य प्रकोष्ठः अस्ति अतः तत्र उपवेशनाय आसनानां कटानां च व्यवस्था अस्ति। योगस्य प्रकोष्ठे पातञ्जलयोगसूत्राणां फलकानि स्थापितानि सन्ति। प्रत्येकं प्रकोष्ठे हरितफलकम्, Wi-Fi द्वारा अन्तर्जालस्य सुविधा च वर्तते। पञ्चसु वर्गखण्डेषु जङ्गम-प्रोजेक्टर-यन्त्रं तथा २३ क्रमाङ्कस्य प्रकोष्ठे स्थायि प्रोजेक्टर यन्त्रम् अस्ति।

7. विश्वविद्यालये सहायक-अध्यापकानां कृते १४ क्रमाङ्कस्य "वाल्मीकिः" तथा २८ क्रमाङ्कस्य "भारविः" इति नामधेयं कक्षद्वयमस्ति। द्वयोः अपि प्रकोष्ठयोः Wi-Fi सुविधा अस्ति। एतस्य महान् लाभः कोरोनाकाले अभवत् यत् शैक्षणिकं कार्यम् ओनलाइन प्रचलति अतः अनया सुविधया अध्यापकाः सरलतया व्याख्यानानि कुर्वन्ति।
8. २८ क्रमाङ्कस्य प्रकोष्ठे अध्यापकानां कृते एकं सङ्गणकयन्त्रं, प्रिन्टरयन्त्रम्, LAN माध्यमेन अन्तर्जालस्य सुविधा च अस्ति।
9. प्रथमे प्रकोष्ठे लिपिकस्य कार्यालये द्वे सङ्गणकयन्त्रे, द्वे प्रिन्टरयन्त्रे च स्तः। एकं स्केनर यन्त्रं तथा एकं प्रतिलिपियन्त्रम् (Photocopy machine) तस्मिन् कार्यालये अस्ति। छात्राः इतः प्रतिलिपिं कारयितुं शक्नुवन्ति।
10. विश्वविद्यालयस्य "त्रिवेणी" प्राशासनिकं भवनं शतवर्षेभ्यः पुरातनम् ऐतिहासिकं भवनं वर्तते। विश्वविद्यालयस्य परिसरे सर्वत्र CCTV केमेरा योजिताः सन्ति।
11. विश्वविद्यालयस्य परिसरस्थे "त्रिवेणी" प्राशासनिकभवने भूतले आधुनिकसंसाधनयुक्तः पुस्तकालयः अस्ति। तस्मिन् विविधविषयकानि २१००० पुस्तकानि सन्ति। ३३ हस्तप्रतयः, २००० संदर्भग्रन्थाः च सन्ति। पुस्तकालयः १०-३० तः ०६:१० पर्यन्तम् उद्घाटितः भवति।
12. अस्मिन् ग्रन्थालये छात्राणां कृते त्रयाणां सङ्गणकयन्त्राणाम् अन्तर्जालस्य (इण्टरनेट) च व्यवस्था अस्ति। छात्राः अत्र ग्रन्थानाम् अन्वेषणम् कर्तुं, विविधम् आवेदनपत्रं पूरयितुं शक्नुवन्ति।
13. दिव्याङ्गछात्राणां कृते शैक्षणिकभवने प्रवेशाय आरोहिण्याः (Ramp) व्यवस्था अस्ति।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्तसूचनानां सन्धानम् | View Document |
| Link for additional information अतिरिक्ताः सूचनाः | View Document |

***4.1.2 The institution has adequate facilities for***

***1. Seminar/ Conference Hall with infrastructural facilities***

***2. Auditorium for cultural activities***

***3. Laboratory for Functional Sanskrit***

***4. Yajnashala***

***5. Observatory***

***6. Language Laboratory***

***7. Psychology Laboratory***

***8. Meditation Centre***

***9. Sports, games (indoor, outdoor, gymnasium, etc)***

***10. Artifacts Museum Ancient Arts/ Objects' Museum***

***11. Heritage Museum***

***12. Manuscript Resource Centre (MRC)***

***13. Manuscript Conservation Centre(MCC)***

***14. Recording Studio/ e-P.G.Pathshala Facilities***

***15. Yoga Training and or Therapy Centre with modern equipments***

***16. Liasion with Bharat Vani Portal***

*17. Sanskrit-Science/ Agama Exhibition Facilities*

**संस्थायाम् अधोनिर्दिष्टानि सौविध्यानि पर्याप्तानि सन्ति।**

*1.* **मूलसौविध्ययुतं सङ्गोष्ठीभवनम्**

*2.* **सांस्कृतिकादिकार्यक्रमाणां कृते सभागृहम्**

*3.* **प्रायोगिकसंस्कृतप्रकोष्ठः।**

*4.* **यज्ञशाला।**

*5.* **वेधशाला।**

*6.* **भाषाप्रयोगशाला।**

*7.* **मनोविज्ञान-प्रयोगशाला।**

*8.* **ध्यानकेन्द्रम्।**

*9.* **क्रीडासौविध्यानि *(*अन्तर्द्वार-बहिर्द्वार-देहदार्ढ्यादिकम्*)***

*10.* **कलाकृतिसङ्ग्रहालयः। *(*प्राचीनकलानां*/* वस्तूनां सङ्ग्रहालयः*)***

*11.* **प्राचीनशिल्पकलासङ्ग्रहालयः**

*12.* **पाण्डुलिपिसंसाधनकेन्द्रम् *(*एम्.आर्.सि.*)***

*13.* **पाण्डुलिपिसंरक्षणकेन्द्रम् *(*एम्.सि.सि.*)***

*14.* **ध्वनिमुद्रणालयः*/* इ-पी.जी-पाठशालासुविधाः।**

*15.* **योगशिक्षणकेन्द्रम्*/* आधुनिकोपकरणयुक्तं योगचिकित्साकेन्द्रञ्च।**

*16.* **भारतवाणीपोर्टल् इत्यनेन सहयोगः।**

*17.* **संस्कृतविज्ञान-आगमप्रदर्शनसुविधाः।**

**Answer:**

1. विश्वविद्यालस्य "प्रभासज्योतिः" शैक्षणिकभवने १६ क्रमाङ्कस्य प्रकोष्ठे "शौनक" नामधेयः सभाखण्डः अस्ति। एषः सभाखण्डः २२६५.०५ स्क्वेर-फ़ीट-परिमितः अस्ति। एतस्मिन् सभाखण्डे २०० (द्विशतं) जनानाम् उपवेशनव्यवस्था अस्ति। प्रतिदिनम् अस्मिन् सभाखण्डे प्रार्थना भवति अतः भारतीयसंस्कृतेः अनुरूपम् अत्र सरस्वत्याः प्रतिमा अपि स्थापिता अस्ति।
2. अस्मिन् सभाखण्डे श्रवणदर्शनकार्यक्रमार्थं स्थायि प्रोजेक्टरयन्त्रं तथा Wi-Fi सुविधा अस्ति। उपविष्टानां सभ्यानां सुखेन श्रवणाय ध्वनियन्त्रस्य अपि व्यवस्था अत्र विद्यते।
3. सभाखण्डे महानुभावानाम् उपवेशनाय मञ्चः अस्ति। तेषाम् उद्बोधनाय उद्बोधनपीठिका (Podium) अस्ति। मञ्चस्य सम्मुखे एव घटी स्थापिता अस्ति। विविधासु सभासु दीपप्रज्वालनाय सामग्र्याः व्यवस्था अस्ति।
4. शैक्षणिकभवने १५ क्रमाङ्कस्य प्रकोष्ठे "पतञ्जलि" नामधेयः गोष्ठीकक्षः अस्ति। एतस्मिन् कक्षे अध्यापकानां विविधसन्दर्भेषु गोष्ठ्यः भवन्ति अतः तेषाम् उपवेशनाय २० आसन्दाः सन्ति तथा बृहत्यौ उत्पीठिके स्तः। अत्रापि आवश्यकतानुसारं जङ्गम-प्रोजेक्टर-यन्त्रस्य व्यवस्था अस्ति। अस्मिन् गोष्ठीकक्षे Wi-Fi व्यवस्था अपि अस्ति।
5. "त्रिवेणी" प्राशासनिकभवने "सुधर्मा" नामधेयः अत्याधुनिकः गोष्ठीकक्षः अस्ति। अस्मिन् कुलपतिना कुलसचिवेन वा सह प्रसङ्गानुसारं गोष्ठ्यः भवन्ति अतः ५१ जनानाम् उपवेशनव्यवस्था अस्ति। चर्चायां भागं ग्रहीतुं १९ ध्वनिवर्धकयन्त्राणां तथा एकस्य जङ्गम-ध्वनिवर्धकयन्त्रस्य व्यवस्था अस्ति। विषयप्रस्तुत्यर्थं स्थायि-

प्रोजेक्टर-यन्त्रस्य तथा अन्तर्जालस्य सुविधा प्रदत्ता अस्ति। अयं कक्षः पूर्णतया वातानुकूलितः तथा आधुनिकप्रकाशव्यवस्थायुक्तः अस्ति।

6. विश्वविद्यालयस्य परिसरे शैक्षणिकभवने प्राङ्गणे यत् रिक्तं स्थानं वर्तते तत्र आवश्यकतानुसारं मञ्चादिव्यवस्थां कृत्वा मुक्ताङ्गण/बद्धाङ्गणव्यवस्था (Open theater) कल्प्यते। योगदिवस-वार्षिकोत्सव-नवरात्रोत्सवादयः उत्सवाः एतस्मिन् प्राङ्गणे आयोज्यन्ते।
7. शैक्षणिकभवने १९ क्रमाङ्कस्य प्रकोष्ठे "आर्यभट्ट" नामधेया सङ्गणकशाला अस्ति। अत्र १५ सङ्गणकयन्त्राणि सन्ति। छात्राणां कृते सङ्गणकशिक्षणम् अनिवार्यम् अस्ति अतः अत्रापि अन्तर्जालस्य व्यवस्था वर्तते। अयं कक्षः वातानुकूलितः अस्ति।
8. प्राशासनिकभवनस्य भित्तिकाः शास्त्रप्रमाणैः सह "संस्कृते विज्ञानम्" इत्यस्य चित्रैः संस्कृतस्य अस्मितापरकैः सुभाषितैश्च सुशोभिताः सन्ति। शैक्षणिकभवने अपि सुभाषितानां फलकानि सुशोभितानि भवन्ति।
9. विश्वविद्यालयस्य परिसरे ९२.१६ वर्ग-मीटर-परिमिता "लक्ष्मीनारायण" नामधेया यज्ञशाला अस्ति। यज्ञार्थम् आवश्यकानि साधनानि विश्वविद्यालये सन्ति। यज्ञे उपयुज्यमानानि विविधानि पात्राणि, विविधाः सामग्र्यः, पूजाद्रव्याणि, प्रणिता-प्रोक्षणी-स्रुक्-स्रुवादिसाधनानि अपि उपलब्धानि सन्ति। विश्वविद्यालयस्य आचार्याणां मार्गदर्शने ऋषिकुमारैः दीक्षान्तसमारोहादिषु विविधेषु प्रसङ्गेषु यज्ञः सम्पाद्यते। तदतिरिच्य पदविका-कर्मकाण्डस्य प्रायोगिकः अभ्यासः अपि अस्यां यज्ञशालायां भवति।
10. विश्वविद्यालयस्य शैक्षणिकभवने ३१ क्रमाङ्कस्य प्रकोष्ठे योगस्य वर्गखण्डे योगप्रशिक्षणकेन्द्रम् अस्ति। अस्मिन् खण्डे एव ध्यानकेन्द्रम् अपि अस्ति अतः योगेन सह ध्यानस्य अपि अभ्यासः अत्र भवति। अत्र नागरिकाः जनाः तथा छात्राः मनसः शान्त्यै ध्यानं योगं च कुर्वन्ति।
11. विश्वविद्यालये कबड्डी-बॉलिबोल-क्रिकेट-खो-खो इत्यादिभ्यः क्रीडाभ्यः बहिः क्रीडाङ्गणम् आसीत्, तत्र सम्प्रति भवनानि निर्मीयन्ते। तेषु एव क्रीडाङ्गणेषु युवमहोत्सवस्य विविधाः स्पर्धाः आयोज्यन्ते स्म। सम्प्रति विश्वविद्यालये नूतनं क्रीडाङ्गणं निर्माणाधीनम् अस्ति।
12. केरम-चेस-टेबल-टेनीस इत्यादिभ्यः आभ्यन्तरक्रीडाभ्यः शैक्षणिकभवने आवश्यकं स्थानम् अस्ति। विविधक्रीडाभ्यः उत्तमानि उपकरणानि सन्ति यथा – बेडमिन्टन् C.C कोर्ट ०३ तथा तस्य साधनानि, मल्लयुद्धस्य कृते मल्टिपर्पज मैट्स तथा तस्य साधनानि, टेबल टेनिस ०१ तस्य साधनानि च, चेस सेट १२, केरम ०१, एतत् सर्वं क्रीडायै वर्तते।
13. शैक्षणिकभवनस्य १८ क्रमाङ्कस्य प्रकोष्ठे "सुश्रुत" नामधेया व्यायामशाला अस्ति। अस्यां व्यायामशालायां व्यायामस्य कृते आवश्यकानि २१ साधनानि सन्ति ।
14. ग्रन्थालये दातृभ्यः प्राप्ताः ३३ पाण्डुलिपयः सन्ति। तासां योग्यं संरक्षणं ग्रन्थालयेन क्रियते। एताः पाण्डुलिपयः छात्राणां कृते शोध-कार्याणां कृते उपयोगिन्यः सन्ति।
15. विश्वविद्यालयस्य प्राशासनिकभवने दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला (Audio video recording studio) अस्ति। अस्मिन् विडियोग्रहणाय आधुनिकानि यन्त्राणि सन्ति। ध्वनिग्राहकं यन्त्रं, चित्रग्राहकं यन्त्रं, दूरदर्शनयन्त्रम्, अन्तर्जालस्य व्यवस्था च वर्तते। आवश्यकतानुसारं प्रकाशं वर्धयितुम् अल्पं च कर्तुं विद्युद्व्यवस्था अस्ति। अस्मिन् अध्यापकाः शास्त्रपरिचयप्रकल्पादीनि व्याख्यानानि रेकोर्डिंग कुर्वन्ति। अत्र व्याख्यानस्य अनुभवं प्राप्य ई.पी.जी.पाठशालादिषु अपि व्याख्यानं कर्तुं सिद्धता प्राप्यते।
16. विश्वविद्यालयस्य सहयोगेन भारतवाण्या २४ पुस्तकानि विश्वविद्यालयस्य ग्रन्थालय-जालपुटे स्थापितानि सन्ति।

| File Description | Document |
|---|---|
| Videos and photographs (geotagged) स्थलनिर्देशनसहितानि चित्राणि/चित्राङ्कणम् | View Document |
| Any additional Information अतिरिक्ताः सूचनाः | View Document |

***4.1.3 The institution has adequate facilities like health centre, bank, ATM, post office, theatre, women centre, counseling centre and cultural activities centre etc.***

**संस्थायाम् आरोग्यकेन्द्रं, वित्तकोशः, स्वयंचालितधनदयन्त्रम्, पत्रालयः, रङ्गमण्डपः, महिलाकेन्द्रम्, परामर्शकेन्द्रम् सांस्कृतिककार्यक्रमकेन्द्रम् इत्यादीनि पर्याप्तरूपेण उपलभ्यन्ते।**

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने ३० क्रमाङ्कस्य प्रकोष्ठे प्राथमिकम् आरोग्यकेन्द्रम् अस्ति। अस्मिन् आरोग्यकेन्द्रे वैद्या निशा गोहिल छात्राणाम् अध्यापकानां कर्मचारिणं तत्परिवारजनानां च आरोग्यं परीक्षते। आरोग्यकेन्द्रे प्राथमिकोपचारस्य सुविधा उपलब्धा अस्ति। अस्मिन् प्रकोष्ठे स्नानागारेण सह शौचालयस्य अपि सुविधा अस्ति तथा एकः पर्यङ्कः, आसन्दाः, Dressing-table च अस्ति।
2. विश्वविद्यालयात् एक किलोमीटर अभ्यन्तरे वित्तकोषः अस्ति अतः समग्रविश्वविद्यालयस्य वित्तव्यवहारः तत्र भवति। छात्रवृत्तिः तथा अन्ये अपि विषयाः यदा आयान्ति तदा वित्तकोषस्य अधिकारिणः विश्वविद्यालयम् आगत्य योग्यं मार्गदर्शनं कुर्वन्ति।
3. पत्राचारविभागस्य कार्यालयः (Post Office) विश्वविद्यालयतः ०२ किलोमीटर अभ्यन्तरे अस्ति।
4. विश्वविद्यालयस्य शैक्षणिकभवनस्य सभाखण्डे "Film-club" अन्तर्गतं छात्राणां कृते चलच्चित्रं प्रदर्श्यते। चलच्चित्राणि भारतीयसंस्कृतेः अनुरूपाणि देशभक्तिसहितानि, पारिवारिकभावनायुक्तानि, कर्तव्यबोधकानि एव प्रदर्श्यन्ते येन छात्राणां मनोरञ्जनेन सह कर्तव्यनिष्ठायाः बोधः अपि भवति। छात्राणां कृते रेवा, 26/11, निल बटे सन्नाटा, धनक, तारें जमीं पर, बावर्ची, परमाणु, वीर सावरकर, मणिकर्णिका, दृश्यम्, ऊरी, केसरी, Super 30, I Am Kalam इत्यादीनि चलच्चित्राणि प्रदर्शितानि सन्ति।
5. विद्यार्थिनीनां प्रश्नानां निराकरणाय शैक्षणिकभवनस्य १७ क्रमाङ्कस्य “वेदव्यास” प्रकोष्ठे महिलाकेन्द्रम् अस्ति। अस्य केन्द्रस्य सञ्चालनाय एका समितिः अस्ति यस्याः समितेः अध्यक्षा प्रो.अर्चनाकुमारी दूबे अस्ति। कु. विदुषी बोल्ला, डॉ. बी. उमामहेश्वरी, कु. अपूर्वा अग्रवाल, कु. दृष्टि बारैया, श्वेताबेन जानी इत्येताः अस्याः समितेः सदस्याः सन्ति। अनया समितया छात्राणां प्रश्नानां समाधानं क्रियते।
6. विश्वविद्यालयस्य शैक्षणिकभवने २९ क्रमाङ्कस्य प्रकोष्ठे छात्राणां मार्गदर्शनकेन्द्रम् (Student counseling center) वर्तते। अत्र छात्राः स्वकीयां समस्यां निर्धारितस्य अध्यापकस्य पुरतः उपस्थापयन्ति तथा ते अध्यापकाः छात्राणां योग्यं मार्गदर्शनं कुर्वन्ति। तदतिरिच्य विश्वविद्यालय-अनुदान-आयोगस्य आलोके षष्ठक्रमाङ्कस्य प्रकोष्ठे छात्रसमस्यानिवारणप्रकोष्ठः (Students’ Grievance Redressal Cell) अपि अस्ति। यस्मिन् छात्राणां सर्वेषां प्रश्नानां निराकरणं भवति। अस्य संयोजकः प्रो. विनोदकुमारः झा अस्ति।
7. शैक्षणिकभवनस्य चतुर्थे प्रकोष्ठे सांस्कृतिकप्रवृत्तिकक्षः वर्तते। तत्र छात्राः एकपात्रियाभिनयम्, नृत्यम्, गरबा-नृत्यम्, नाटकम् इत्यादिप्रवृत्तीनाम् अभ्यासं कर्तुं शक्नुवन्ति। सांस्कृतिकसमितेः अध्यक्षः डॉ. पङ्कजकुमारः रावलः अस्ति। अन्ये ०५ सदस्याः अस्यां समितौ सन्ति। एते समये समये छात्राणां मार्गदर्शनं कुर्वन्ति तथा सांस्कृतिककार्यक्रमाणाम् आयोजनं कुर्वन्ति।
8. क्रीडाक्षेत्रे अपि छात्राणां विकासाय शारीरिकाध्यापकस्य व्यवस्था अस्ति। शारीरिकाध्यापकस्य डॉ. जयेशकुमार-मुंगरा-महोदयस्य मार्गदर्शनेन छात्राः राज्यस्तरीय-राष्ट्रस्तरीय-स्पर्धासु भागं गृह्णन्ति तथा पुरस्कृताः अपि भवन्ति। शारीरिकः अध्यापकः राष्ट्रिय-सेवा-योजनायाः अन्तर्गतं वृक्षारोपणं कारयति तथा जल-पर्यावरण-संरक्षणादिविषये मार्गदर्शनम् अपि करोति।
9. छात्राणां बौद्धिकविकासाय विश्वविद्यालयेन “मेधा” इति भित्तिपत्रिकायाः सम्पादनं क्रियते। अस्याः पत्रिकायाः समितेः अध्यक्षयोः प्रो.अर्चनाकुमारी दूबे डॉ. नरेन्द्रकुमार-पण्ड्या इत्यनयोः मार्गदर्शनेन छात्राः स्वप्रतिभानुसारं लेखम्, पद्यम्, गीतम्, समस्यापूर्तिम्, लिप्यन्तरणम्, प्रश्नोत्तराणि चेत्यादिकं विलिख्य, वर्णलेखनीभिः सुशोभितं कृत्वा विश्वविद्यालयस्य सूचनाफलके स्थापयन्ति। छात्रप्रतिनिधिरूपेण ऋषभः देरासरी तथा अभिलाषः महापात्रः कार्यम् अकुरुताम्।

| File Description | Document |
|---|---|
| Any additional information | View Document |

***4.1.4 Percentage of classrooms and seminar halls with ICT - enabled facilities such as smart class, LMS (Learning Management System), etc. (preceeding academic year data)***

**सूचनासंप्रेषणप्रविध*f*-स्फूर्तकक्ष्या-अधिगमप्रबन्धप्रणालीप्रभृतिभिः उपोद्बलितकक्ष्याणां, सङ्गोष्ठीकक्ष्याणां च प्रतिशतता। *(गताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 14.29

4.1.4.1 Number of classrooms and seminar halls with ICT facilities

उपोद्बलितकक्ष्याणां, सङ्गोष्ठीकक्ष्याणां च सङ्ख्या।

Answer: 03
4.1.4.2 Total number of classrooms and seminar halls

कक्ष्याणां सङ्गोष्ठीकक्ष्याणां सङ्ख्या

Answer: 21

| File Description | Document |
|---|---|
| Number of classrooms and seminar halls with ICT enabled facilities (Data Template) • सूचनासंप्रेषणप्रविध्या स्फूर्तकक्ष्या-अधिगमप्रबन्धप्रणालीप्रभृतिभिः उपोद्बलितकक्ष्याणां, सङ्गोष्ठीकक्ष्याणां च सङ्ख्या (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information, (Hyper linked video)• अतिरिक्तसूचनानां सन्धानम् (परिसन्धितचलनचित्राणि) | View Document |

***4.1.5 Average percentage of expenditure, excluding salary for infrastructure augmentation during the last five years (INR in Lakhs)***

**विगतेषु पञ्चसु वर्षेषु वेतनाद् ऋते मूलभूतसौविध्यसंवर्धनाय कृतस्य व्ययस्य प्रतिशततायाः साधरणमानम् *(लक्षशः)***

**Answer:** 16.61

4.1.5.1 Expenditure for infrastructure augmentation, excluding salary year-wise during the last five years (INR in lakhs)

विगतेषु पञ्चसु वर्षेषु वेतनाद् ऋते मूलभूतसौविध्यसंवर्धनाय कृतः व्ययः वार्षिकक्रमेण। (लक्षशः)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 44.2 | 6.4 | 13.6 | 202.3 | 202.1 |

| File Description | Document |
|---|---|
| Upload Details of budget allocation, excluding salary during the last five years | View Document |
| Upload audited utilization statements आयव्ययलेख-धनोपयोगपत्राणि | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

**4.2 Library as a Learning Resource**

***4.2.1 Library is automated using Integrated Library Management System (ILMS)***

**ग्रन्थालयः पूर्णरूपेण स्वयंप्रवृत्तः यत्र समन्वितग्रन्थालय-प्रबन्धनप्रणाली उपयुज्यते।**

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे शारदाभवनम् इति नामाख्यः ग्रन्थालयः वर्तते। अस्मिन् ग्रन्थालये SOUL (Version 2.0) तन्त्रम् (Software) अस्ति। तस्योपयोगः ग्रन्थालयस्य यान्त्रिकीकरणाय भवति। इदं तन्त्रम् २०१३ तमे वर्षे (Inflibnet) कर्णावतीतः क्रीतमस्ति तदर्थं च प्रतिवर्षं १२५००/- रूप्यकात्मकः व्ययः क्रियते। अस्य SOUL तन्त्रस्य कृते एकम् Server २१२०००/- रुप्यकैः क्रीतमस्ति। सम्प्रति ग्रन्थानां सूचीकरणम् (Data Entry) अद्यतनतमम् अस्ति।
2. SOUL Software मध्ये सूचीकृतग्रन्थानाम् अन्वेषणं परिसरे अन्तर्जालमाध्यमेन (Web opac) Intranet द्वारा कर्तुं शक्यते।
3. ग्रन्थालये सम्प्रति एकम् Overhead scanner यन्त्रम्, एकम् Barcode reader यन्त्रम्, पञ्च सङ्गणकयन्त्राणि, एकं जङ्गमसङ्गणकयन्त्रम् (Laptop), एकं प्रतिलिपियन्त्रम् (Photocopy machine), द्वे Printer यन्त्रे, इत्येतानि यन्त्राणि सन्ति। अत्र छात्राणां कृते अपेक्षानुसारं प्रतिलिपिप्राप्तये सुविधा अस्ति।
4. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन Inflibnet इत्यनेन सह MoU कृतम् अस्ति। तन्माध्यमेन विश्वविद्यालयस्य विद्यावारिधेः शोधप्रबन्धाः शोधगङ्गायां उपारोप्यन्ते (Upload क्रियन्ते)। अद्यावधि २९ शोधप्रबन्धाः तत्र उपारोपिताः सन्ति। https://shodhganga.inflibnet.ac.in/handle/10603/287916 इति सङ्केते विश्वविद्यालयस्य उपारोपिताः शोधप्रबन्धाः वर्तन्ते।
5. अस्यैव अन्तर्गतं Inflibnet तथा मानवसंसाधनविकासमन्त्रालयद्वारा Urkund नामकं तन्त्रं प्रदत्तम् अस्ति। तेन साहित्यिकं चौर्य्यं (Plagiarism) परीक्ष्य शोधप्रबन्धस्य प्रामाणिकता परीक्ष्यते।
6. ग्रन्थालये छात्राणां कृते त्रयाणां सङ्गणकयन्त्राणां व्यवस्था अस्ति। अत्र अन्तर्जालव्यवस्था अस्ति अतः छात्राः विविधानि उपयोगीनि आवेदनपत्राणि पूरयितुं शक्नुवन्ति तथा विविधग्रन्थानाम् उपयोगितन्त्राणां च अन्वेषणं कृत्वा अध्ययनाय आवश्यकसामग्रीः प्राप्नुवन्ति। अत्र 'Earn While You Learn' इति योजनान्तर्गतं छात्रैः ग्रन्थानां सूचीकरणम् (Data Entry) कृत्वा वित्तोपार्जनं कर्तुं सुविधा अस्ति। अत्र छात्राः टङ्कणस्य अभ्यासं कृत्वा स्वशोधप्रबन्धानां स्वयमेव टङ्कणं कुर्वन्ति येन तेषां टङ्कणाय वित्तव्ययः न भवति।
7. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ग्रन्थालयस्य जालपुटे (Website) https://sites.google.com/view/sssulibrary/digital-resources/sanskrit-websites-gateways-blogs इति सङ्केते ग्रन्थपालद्वारा संस्कृतस्य ५९ E-Resources स्थापितानि सन्ति येषाम् उपयोगः सर्वैः कर्तुं शक्यते।
8. D-Space इत्यस्य उपयोगः पूर्वम् आन्तरिकसन्दर्भेषु भवति स्म किन्तु अधुना Inflibnet इत्यस्य D-Space स्वीकृतम् अस्ति। तस्य सङ्केतः Jyotih.inflibnet.ac.in अस्ति। अत्र विश्वविद्यालयस्य विविधानां पत्राणां, परीक्षासम्बद्धानां पत्राणां, प्रश्नपत्राणाम्, अभ्यासक्रमाणां, शोधपत्रिकायाः, वार्तापत्रिकायाः, पुस्तकानाम्, इत्यादीनाम् अन्येषामपि प्राप्तिः सुलभा वर्तते।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***4.2.2 Collection of rare books, manuscripts, special reports or any other knowledge resource for library enrichment***

### ग्रन्थालयसंवर्धनार्थं विरलपुस्तकानां, पाण्डुलिपीनां, विशिष्टप्रतिवेदनानाम्, अन्यान्यशैक्षिकसंसाधनानां च संग्रहः।

**Answer:**

1. विश्वविद्यालयस्य ग्रन्थालये विविधानि विरलपुस्तकानि दातृभिः प्रदत्ताः मातृकाश्च सन्ति। विरलपुस्तकेषु ग्रन्थालये २०१५ तम-वर्षे प्राप्तानां पुस्तकानां विवरणम् -

(1) शुक्लयजुर्वेदः, द्वौ भागौ, सम्पादकः Dr. Albrecht Webber, Berlin, 1855, पृ.1198

(2) शुक्लयजुर्वेदः, तृतीयः भागः, The Shrauta Sutra of Katyayana with Extracts from the commentaries of Karka and Yajnikdeva, Berlin,1859 पृष्ठानि-1192 Dr.Albrecht Webber

(3) वराहमिहिरकृत-पञ्चसिद्धान्तिका, आङ्गलानुवादसहिता, श्रीकृपालुदत्त-सुधाकरद्विवेदी।

(4) श्रीमदथर्ववेदसंहिता-अथर्वाङ्गिरसः, संशोधकौ- Rothen, Whitlneyen, Berlin, 1856, पृ.458

(5) एतरेयब्राह्मणम्, श्रीमत्सायणाचार्यविरचितभाष्यसमेतम्, सम्पादकौ-काशिनाथशास्त्री-हरिनारायणः आप्टे।1896 पृष्ठानि-542 तः970

(6) निर्णयसिन्धुः, पृष्ठाः-470, वि.सं.1886

(7) त्रिपुण्ड्रविजयडिण्डिमः, 1914

(8) A Comparision of the Pooranic Siddhantic & Copernician Systems of the World by Soobajee Bapoo-Bhopal, 1836 P. 129

(9) पुरुषोत्तमभासः, अमदावाद, वि.सं.1867, पृ.194

(10) अमरकोशः, सटीकः, त्रिभागाः, शक-सं.1771 पृ.300

(11) गायत्रीसहस्रनाम, पृष्ठानि-18x2

(12) गायत्रीहृदयम्- पृ.17x2

(13) गायत्रीपञ्जरस्तोत्रम्- पृ.10x2

(14) गायत्रीस्तवराजः, पृ.6x2

(15) गायत्रीकवचम्, पृ.4x2

(16) विष्णुसहस्रनाम, वि.सं.1804

(17) ऋषितर्पणम्, 1861

(18) श्रीशङ्करपादपद्मभृङ्ग, 1903

(19) श्रीमद्भावमिश्रप्रणीत-भावप्रकाशः, 1905, पृ.750

(20) वैद्यामृतम् पण्डित-केशवप्रसाद-दूबे, आग्रा, 1867, पृ.76

(21) वैद्यामृतम्, मुम्बई, 1869, पृ.-62

(22) पथ्यापथ्यम्, पण्डित-केशवप्रसाद-दूबे, आग्रा, 1867, पृ.56

एतेषु केषाञ्चित् ग्रन्थानां प्रकाशकविषये, सम्पादकविषये अज्ञातमस्ति। यावदुपलब्धं तदत्र प्रस्तुतमस्ति ।

1. श्रीसोमनाथसंस्कृतविश्वविद्यालये संशोधनं कर्तुं पाण्डुलिपेः उपलब्धये सुविधा अस्ति। विश्वविद्यालयस्य ग्रन्थालयस्थानां मातृकाणां विवरणमधः प्रस्तूयते

(1) यन्त्रचिन्तामणिः, पृष्ठानि-115, वर्षम्-शक सं. - 1734

(2) कुण्डप्रदीपः, पृष्ठाः-25x2, वर्षम्- वि.सं.1923

(3) मदनमोहनज्योतिः, पृष्ठानि-39x2

(4) कालाग्निः, पृष्ठानि-7x2, वर्षम्-वि.सं.1925

(5) कालीमन्त्रः, पृष्ठानि-प्रायः20

(6) बृहज्जातकेन्द्र, पृष्ठानि-60x2, वर्षम्-वि.सं.1845

(7) लीलावतीपाटी, पृष्ठानि-96x2, वर्षम्-वि.सं.1923

(8) अथवृष्टिगर्भः, पृष्ठानि-5x2

(9) त्रिपुरसुन्दरीपूजनम्, पृष्ठानि-55x2, वर्षम्-वि.सं.1854

(10) भगवद्गीता, पृष्ठानि-97x2, वर्षम्-वि.सं.1855

(11) अर्जुनगीता, पृष्ठानि-5x2

(12) ब्रह्मविदोपनिषत्, पृष्ठानि-15x1

(13) पितृसंहिता, पृष्ठानि-6x2, वर्षम्-वि.सं.1854

(14) विष्णुसहस्रनाम, पृष्ठानि-16x2

(15) गायत्रीपूजनम्, पृष्ठानि-34x2, वर्षम्-वि.सं.1929

(16) गायत्रीकल्पः, पृष्ठानि-5x2, वर्षम्-वि.सं.1925

(17) गायत्रीसहस्रनाम, पृष्ठानि-14x2, वर्षम्-वि.सं.1925

(18) त्रिकालसन्ध्या, पृष्ठानि-9x2

(19) गायत्रीपटलम्, पृष्ठानि-3x2

(20) अयोध्याकाण्ड, तुलसीकृत, पृष्ठानि-150x2, वि.सं.1893, श.सं.1757

(21) वाजसनेयी संहिता पूर्वार्धः, पृष्ठानि-346x2, वि.सं.1904

(22) वाजसनेयी संहिता उत्तरार्धः, पृष्ठानि-146x2, वि.सं.1904

(23) निर्णयसिद्धान्तः, पृष्ठानि-25x2, वि.सं.1924

(24) मनुस्मृतिः, पृष्ठानि-76x2

(25) वाजसनेयी संहिता अनुक्रमणिका, पृष्ठानि-36x2, वि.सं.1929

(26) वाजसनेयी संहिता पूर्वार्धः, पृष्ठानि-244x2, वि.सं.1929 अस्याः 1 तः 25 पृष्ठानि लुप्तानि सन्ति ।

(27) शरभमन्त्रः, पृष्ठानि-27x2, वि.सं.1835

(28) शरभेश्वरहृदयम्, पृष्ठानि-4x2, वि.सं.1899

(29) शरभाष्टकम्, पृष्ठानि-5x2, वि.सं.1944

(30) शरभपटलम्, पृष्ठानि-15x2, वि.सं.1944

(31) शरभकवचम्, पृष्ठानि-13x2, वि.सं.1944

(32) शरभसहस्रनाम, पृष्ठानि-17x2, वि.सं.1944

(33) शरभमालामन्त्रः, पृष्ठानि-15x2, वि.सं.1944

1. कानिचन मुद्रितानि दुर्लभानि पुस्तकानि च ग्रन्थालये सन्ति । तेषां विवरणम्-

(1) Philosophy of Zoroastrianism and Comparative Study of Religion Vol.1 by Faredun Dadachanji comparison covers Gita. 1941

(2) महत्सङ्गाः, शारदापीठम्

(3) पञ्चमहायज्ञाः

(4) निरालम्बोपनिषत्, वि.सं.1958

(5) गायत्रीमन्त्रभाष्यम्, वि.सं.1972

(6) प्रवचनसार - पञ्चाग्नि-वैश्वानर विद्या, कर्ता - श्रीमत्परमहंस परिब्राजकाचार्य श्रोत्रियब्रह्मनिष्ठ श्री १०८ स्वामी त्रिवेणीपुरीजी महाराज के प्रवचन, संकलन श्रीमती राजेश्वरी आनन्द संपादक अन्नपूर्णा भदोरिया

(7) ब्रह्मसूत्रशाङ्करभाष्यम् (अध्याय २ - पाद १) स्मृतिपादः संपादिका - डो. पुनिता नागरजी देसाई Pages 164. Ahmedabad

(8) ब्रह्मसूत्रशाङ्करभाष्यम्, संपादिका - डो. पुनिता नागरजी देसाई, p.820. Ahmedabad

(9) गौडपादकारिका -माण्डुक्योपनिषत्संवलिता - संपादिका डो.सुहास धर्मेन्द्रसिंह झाला, Pages 222, Ahmedabad

(10) आयुर्वेद अने आधुनिक रसायन (धातुवर्ग-सचित्र) कर्ता मूळचंद रतनजी एन्जिनियर, 1930

(11) १०८ उपनिषद् (सरल हिन्दी भावार्थ सहित) संपादक वेदमूर्ति तपोनिष्ठ पं. श्रीराम शर्मा आचार्य तथा माता भगवती देवी शर्मा, हरिद्वार, 1999

(12) बृहदारण्यक- सम्बन्धभाष्य-वार्तिक सुरेश्वराचार्य विरचित, १०८ श्री स्वामी महेशानन्द गिरिजी व्याख्याकार एवं भाषांतरकार, वाराणसी, 1999

(13) कैवल्योपनिषद्-प.पू. स्वामिनी तन्मयानंदजी सरस्वती, मुंबई, 2002

(14) कैवल्योपनिषद् - कैवल्योपनिषत् - दीपिकाख्यख्यासमलंकृता, वलसाड. 2008

(15) मोहमुद्गरस्तोत्रम्, पुनिता नागरजी देसाई, 1999

(16) Mimamasa-Paribhasa of Krsna Yajvan, Translated and Annotated by Swami Madhavananda, Culcutta.

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

*4.2.3 Does the Institution/ Library have the following:*

*1. Back Volumes of Rare Sanskrit Journals/Indological Journals/ Journals Related to Sanskrit Studies like Indian Historical Quarterly (IHQ)/ Annals of Bhandarkar Oriental Research Institute (ABORI)/ Brahmavidya/Sarasvati-sushama etc*

*2. Sanskrit magazines and Sanskrit Periodicals*

*3. e-journals*

*4. e-books*

*5. e-dictionaries of Sanskrit*

*6. Sanskrit Databases*

*7. Bharatavani Portal*

*8. CD's/DVD's/other e-materials for the study of Vedas*

*9. Electronic Display Board*

*10. Internet/ Wifi Facility*

*11. Search Facility*

*12. Reprographic facility*

**ग्रन्थालये अधोदर्शितानि कियन्ति सन्ति ?**

*1.* **संस्कृतपत्रिकाणां/ भारतीयविद्यापत्रिकाणां प्राचीनसम्पुटानि/ संस्कृतविद्यासम्बद्धपत्रिकाः यथा – भारतीयेतिहासत्रैमासिकी/ भण्डारकरप्राच्यविद्यापत्रिका/ ब्रह्मविद्या/ सारस्वतीसुषमाप्रभृतयः**

*2.* **संस्कृतपत्रिकाः नियतकालिकसंस्कृतपत्रिकाश्च**

*3.* **वैद्युतपत्रिकाः**

*4.* **वैद्युतग्रन्थाः**

*5.* **वैद्युताः संस्कृतभाषाकोषाः**

*6.* **वैद्युतदत्तांशनिधिः**

*7.* **भारतवाणीसंसाधनानि**

*8.* **वेदग्रन्थानां पाठनाय ध्वनिमुद्रिकाः सान्द्रमुद्रिकाः अन्याश्च**

*9.* **वैद्युतं प्रदर्शनफलकम्**

*10.* **अन्तर्जाल/निस्तन्त्रिजालसौविध्यम्**

*11.* **सङ्गणकीयगवेषणसौविध्यम्**

*12.* **छायाप्रतिसौविध्यम्**

**Answer:** A. Any 4 of the above (अ. उपरि निर्दिष्टेषु यानि कानिचित् चत्वारि)

| File Description | Document |
|---|---|
| Details of subscriptions like e-journals, e-ShodhSindhu, Shodhganga Membership etc (Data Template)• वैद्युतपत्रिकाः, वैद्युतशोधसिन्धुः, शोधगङ्गासदस्यता, वैद्युतग्रन्थाः इत्यादीनां धनांशदानस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information | View Document |

***4.2.4 Average annual expenditure for purchase of books and journals during the last five years (INR in Lakhs)***

**पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य वार्षिकं मध्यमानम्।** *(लक्षशः)*

**Answer:** 4.68

4.2.4.1 Annual expenditure for purchase of books and journals year-wise during the last five years (INR in lakhs)

पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य वार्षिकव्ययः (लक्षशः)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 7.1 | 7.24 | 3.74 | 4.945 | 0.355 |

| File Description | Document |
|---|---|
| Details of annual expenditure for purchase of books and journals during the last five years (Data Template) पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Audited statements of accounts अङ्केक्षणविवरणम् | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***4.2.5 Availability of remote access to e-resources of the library***

***(Yes /No)***

**ग्रन्थालयस्य वैद्युतसंसाधनानां सुदूरसन्धानम् अस्ति वा *?***

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Details of remote access to e-resources of the library (Data Template) ग्रन्थालयस्य वैद्युतसंसाधनानां दूरतः सन्धानस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः। | View Document |
| Provide a link of the data uploaded in the institutions website संस्थायाः जालस्थानाम् उपारोपितस्य दत्तांशस्य सन्धानं प्रयच्छतु। | View Document |

***4.2.6 Percentage per day usage of library by teachers and students (preceeding academic year data)***

**अध्यापकैः छात्रैश्च प्रतिदिनं ग्रन्थालयोपयोगस्य प्रतिशतता *(गताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 25.96

4.2.6.1 Number of teachers and students using library per day over last one year

गतवर्षे प्रतिदिनं ग्रन्थालयोपयोगं कृतवताम् अध्यापकानां छात्राणाञ्च सङ्ख्या।

Answer: 54

| File Description | Document |
|---|---|

| | |
|---|---|
| Details of library usage by teachers and students • अध्यापकैः छात्रैश्च प्रतिदिनं ग्रन्थालयोपयोगस्य विवरणम्। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide a link of the data uploaded in the institutions website संस्थायाः जालस्थाने उपारोपितस्य दत्तांशस्य सन्धानं प्रयच्छतु। | View Document |

*4.2.7 E-content is developed by teachers :*

*1. For e-PG-Pathashala*

*2. For CEC (Under Graduate)*

*3. For SWAYAM*

*4. For other MOOCs platform*

*5. For NPTEL/ NMEICT/ any other Government initiative*

*6. For institutional LMS*

*7. E-books Uploded on Website*

**अध्यापकैः विकासिताः वैद्युतीयपाठ्यांशाः-**

*1.* **ई-पीजी-पाठशालायाः कृते**

*2.* **शैक्षिक-सम्प्रेषण-सङ्घटनस्य कृते** *(स्नातकस्तरे)*

*3.* **'स्वयम्' - कृते**

*4.* **'मूक्स' - कृते**

*5.* **एन्-पी-टि-ई एल्/ एन् एम्-ई-ऐ-सी-टी/ अन्येषां सर्वकारीयोपक्रमाणां कृते**

*6.* **सांस्थानिक्याः ग्रन्थालयप्रबन्धनप्रणाल्याः कृते**

*7.* **सङ्ख्याद्वारा प्रवर्धितानां विविधपरियोजनानां कृते** *(***नामोल्लेखः करणीयः***)*

**Answer:** B. Any 4 of the above (आ. उपरि निर्दिष्टेषु कानिचित् चत्वारि)

| File Description | Document |
|---|---|
| Details of e-content developed by teachers for e-PG-Pathshala, CEC (UG) (Data Template) एन्-पी-टि-ई एल्/एन् एम्-ई-ऐ-सी-टी इत्यादीनां कृते अध्यापकैः विकासितानां वैद्युतीयपाठ्यांशानां विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Give links or upload document of e-content developed विकासितानां वैद्युतपाठ्यांशानां सन्धानम् | View Document |

**4.3 IT Infrastructure**

***4.3.1 Institution frequently updates its IT facilities including Wi-Fi, Email and Internet Facilities are given to Faculty and Students with Institutional ID's***

**संस्था निस्तन्त्रि-अणुसङ्केत-अन्तर्जालसमेतानां सूचनाप्रविधिसौविध्यानां पौनःपुन्येन संवर्धनं करोति सांस्थिकीः परिचायिकीः प्राप्तवद्भ्यः छात्रेभ्यः अध्यापकेभ्यश्च वैद्युतपत्राङ्कान्, अन्तर्जालसौविध्यानि च संस्था ददाति।** ***wi – fi*** **सहितं सूचनाप्राविधिकसौविध्यानाम् अद्यतनीकरणस्य दिनाङ्कं स्वरूपञ्च विवृणोतु।**

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालये शैक्षणिकभवने सर्वेषु खण्डेषु अन्तर्जालस्य तथा निस्तन्त्रि-अणुसङ्केतस्य (Wi-Fi) सुविधा वर्तते। तस्य कूटाङ्कः (Password) सर्वेभ्यः अध्यापकेभ्यः छात्रेभ्यश्च प्रदत्तः अस्ति।
2. विश्वविद्यालये कार्यरतानाम् अध्यापकानां कर्मचारिणां पठतां छात्राणां च कृते संस्थाकीयानि (Institutional Email Id) प्रदत्तानि सन्ति।
3. विश्वविद्यालये सङ्गणकयन्त्रेषु १५ सङ्गणकयन्त्राणि आधुनिकानि (All in one) सन्ति। i3 Processor युतानि ४७ सङ्गणकयन्त्राणि सन्ति। विविधविभागेषु आवश्यकतानुसारं ०९ जङ्गमसङ्गणकानां (Laptop) सुविधा प्रदत्ता सन्ति। तेषु माननीय-कुलपतिकार्यालये, माननीयकुलपतिनिवासे, कुलसचिवकार्यालये, आचार्यकार्यालये, अध्यक्षकार्यालये, सङ्गणकविधिविभागे, परीक्षाविभागे, भवननिर्माणविभागे, ग्रन्थालये च एकम् एकं जङ्गमसङ्गणकं प्रदत्तम् अस्ति।
4. विश्वविद्यालयस्य ग्रन्थालये परीक्षाविभागे संशोधनविभागे च ०३ बारकोड-रीडर यन्त्राणि सन्ति। अनेन ग्रन्थालये पुस्तकानाम् आदानप्रदाने सौकर्यं भवति। परीक्षाविभागे अस्य माध्यमेन छात्राणां गोपनीयता सुरक्षिता भवति तथा प्राप्ताङ्कानां डेटा-एण्ट्री करणे परिणामस्य च उद्घोषणे शीघ्रता स्पष्टता सरलता च भवति। संशोधनविभागे विविधानाम् आवेदनपत्राणां परीक्षणाय अस्य यन्त्रस्य उपयोगः क्रियते।
5. विश्वविद्यालये सम्प्रति सर्वेषु विभागेषु आवश्यकतानुसारं २७ प्रिन्टर यन्त्राणां सुविधा वर्तते।
6. विश्वविद्यालयस्य अध्यापकेभ्यः कर्मचारिभ्यश्च विविधसूचनासंरक्षणाय २० Pen Drive प्रदत्तानि सन्ति । सर्वं सङ्ग्रहितुं १० बाह्य-हार्डडिस्क उपलब्धानि सन्ति।
7. विविधकार्यक्रमाणां चित्रग्रहणाय DSLR चित्रग्राहकम् (Camera) यन्त्रं वर्तते। विशिष्टव्याख्यानग्रहणाय दृश्यश्रव्यग्राहकयन्त्रस्य अपि सुविधा अस्ति।
8. विश्वविद्यालये ओप्टिकल फाइबर माध्यमेन 300 MBPS गतेः अन्तर्जालस्य सुविधा अस्ति।
9. विश्वविद्यालये ओनलाइन अध्ययन-अध्यापनाय माइक्रोसोफ्ट टीम्स तथा वेबेक्स तन्त्रस्य सुविधा अस्ति। माइक्रोसोफ्ट-टीम्स माध्यमेन वर्गशः ओनलाइन अध्यापनं क्रियते तथा वेबेक्स-माध्यमेन विविधाः ओनलाइन प्रमाणपत्रीयाः अल्पकालीनाः योजनाः प्रचाल्यन्ते यथा “रघुवंशं कथं पठेम” “रामायण एवं व्यक्तित्व विकास” इत्यादयः। तदतिरिच्य विविधविभागानां गोष्ठी अपि वेबेक्समाध्यमेन एवं गुगलमीट माध्यमेन भवति ।
10. विश्वविद्यालयस्य सर्वेषु सङ्गणकयन्त्रेषु तन्त्रविषाणोः (Virus इत्यस्मात्) सुरक्षायै QUICK HEAL तन्त्रस्य License Version अस्ति येन सङ्गणके स्थिताः सूचनाः सुरक्षिताः भवन्ति।
11. विश्वविद्यालये FIRE WALL तन्त्रं वर्तते यस्य कारणेन अनधिकृतः जनः सङ्गणकेषु कार्यं कर्तुं न शक्नोति।
12. विश्वविद्यालयस्य सङ्गणकेषु विद्युतः आपूर्तये ५४ UPS यन्त्राणां सुविधा अस्ति।
13. विश्वविद्यालये सम्प्रति ०४ LCD प्रोजेक्टर यन्त्राणि सन्ति। तेषु एकं यन्त्रं विश्वविद्यालयस्य सभाखण्डे, एकं शास्त्रितृतीयवर्षस्य वर्गखण्डे, एकं “सुधर्मा” गोष्ठीप्रकोष्ठे स्थापितम् अस्ति। एकं यन्त्रं चलितम् (Movable) अस्ति।
14. विश्वविद्यालये शैक्षणिकभवने सङ्गणकयन्त्रगृहे १५ सङ्गणकयन्त्राणि सन्ति। छात्राणाम् अभ्यासक्रमे अनिवार्यरूपेण सङ्गणकस्य ज्ञानं प्रदीयते। ग्रन्थालये त्रीणि सङ्गणकयन्त्राणि छात्राणाम् उपयोगाय सन्ति।
15. ग्रन्थालयस्य यान्त्रिकीकरणाय SOUL इति ग्रन्थालय-व्यवस्थापन-पद्धतेः उपयोगः क्रियते।
16. ग्रन्थालयस्य ग्रन्थानाम् अन्वेषणाय Web OPAC तन्त्रस्य व्यवस्था अस्ति। तेन अस्मिन् परिसरे अन्तर्जालस्य माध्यमेन ग्रन्थालयस्य ग्रन्थानाम् अन्वेषणं कर्तुं शक्यते।
17. ग्रन्थालये हस्तलिपेः पुस्तकानां च स्केन-करणाय ADF(A3) स्केनरयन्त्रम् अस्ति। तदतिरिच्य परीक्षाविभागे योजनाविभागे प्रशासनविभागे वित्तविभागे च A4 स्केनरयन्त्राणां सुविधा अस्ति।
18. विश्वविद्यालये संस्थाकीय-कोषाय (INSTITUTIONAL REPOSITARY) D-SPAC तन्त्रस्य उपयोगः क्रियते।
19. विश्वविद्यालये ५ प्रतिलिपियन्त्राणि (Photocopy-Machine) सन्ति। ग्रन्थालये, परीक्षाविभागे, शैक्षणिकभवने, प्रशासनविभागे, महेकमविभागे च प्रतिलिपियन्त्राणि उपलब्धानि सन्ति। तत्र ग्रन्थालयस्य प्रतिलिपियन्त्रेण छात्राणां कृते प्रतिलिपेः सुविधा अस्ति।
20. विश्वविद्यालयस्य प्राशासनिकभवने, शैक्षणिकभवने, चन्द्रमौलिच्छात्रावासे (पुरुषच्छात्रावासे) तथा परिसरे CCTV सुरक्षा वर्तते। तदर्थं ५ DVR यन्त्राणि तथा ३ दूरदर्शनयन्त्राणि (TV) स्थापितानि सन्ति।

21. माननीयकुलपतेः निवासस्थाने सङ्गणकयन्त्रम्, प्रिण्टरयन्त्रम्, अन्तर्जाल-सुविधा (Wi-Fi) च अस्ति। माननीयकुलपतिकार्यालये लीझलाइन तथा ब्रोड-बेण्ड माध्यमेन अन्तर्जालसेवा उपलब्धा अस्ति। अपि लीझलाइन तथा ब्रोड-बेण्ड द्वारा अन्तर्जालसुविधा अस्ति।
22. विश्वविद्यालये PGDCA कक्षायाः परीक्षा MCQ आधारिता ओनलाइन माध्यमेन स्वीक्रियते। अस्याः परीक्षायाः तन्त्रम् (Software) विश्वविद्यालयेन निर्मितम् अस्ति।
23. परीक्षाविभागे सर्वविधः सङ्ग्रहः यथा पञ्जीकरणं (Enrolment), परिणामस्य अङ्कानां सूचीकरणं (Data Entry) VPS माध्यमेन क्रियते। सङ्गणकविधिविभागे अपि VPS माध्यमेन विश्वविद्यालयस्य जालपुटस्य सञ्चालनं भवति तस्य उपतन्त्रम् (SERVER) LINUX आधारितम् अस्ति।
24. परीक्षाविभागे प्रश्नपत्राणां शीघ्रतया प्रतिलिपिं कर्तुम् अत्याधुनिकं डुप्लो यन्त्रम् अस्ति।
25. माननीयकुलपति-कुलसचिवयोः कृते जङ्गमदूरभाषयन्त्रं तथा टेब्लेट प्रदत्तम् अस्ति। द्वयोः कार्यालये फेक्स यन्त्रस्य व्यवस्था वर्तते।
26. विश्वविद्यालये विविधविभागानाम् आन्तरिक-दूरभाष-व्यवहाराय EPBX व्यवस्था वर्तते, तेन सर्वेषु विभागेषु दूरभाषव्यवहारः सरलतया भवति।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***4.3.2 Student - Computer ratio (preceding academic year data)***

**छात्र-गणकयन्त्रानुपातः *(गताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 10.33

4.3.2.1 Total number of computers in the campus for academic purpose

पठनप्रक्रियार्थं विश्वविद्यालयपरिसरेषु वर्त्तमानानां गणकयन्त्राणां सङ्ख्या

Answer: 18

| File Description | Document |
|---|---|
| Student – computer ratio अतिरिक्ताः सूचनाः | View Document |
| Geotagged photo | View Document |
| any additional information अतिरिक्ताः सूचनाः | View Document |

***4.3.3 Available bandwidth of internet connection in the Institution (Leased line)***

**संस्थायाम् उपलब्धस्य अन्तर्जालस्य *(साक्षाद्दीर्घकालिकस्य)* वेगसामर्थ्योपलब्धिः- *(परिक्रीतसम्पर्कः)***

**Answer:** C. 250 MBPS - 500 MBPS (इ. 250 एम्बीपीएस्- 500 एम्बीपीएस)

| File Description | Document |
|---|---|
| Details of available bandwidth of internet connection in the Institution • संस्थायाम् उपलब्धस्य अन्तर्जालस्य (साक्षाद्दीर्घकालिकस्य) वेगसामर्थ्योपलब्धिविवरणम् | View Document |

***4.3.4 Media centre, Recording facility, Lecture Capturing System (LCS), Facilities for e-content development, and uploading the corpus (database) of sanskrit texts on the website***

**जनसम्प्रेषणकेन्द्रम्, अभिलेखनसौविध्यम्, व्याख्यानलेखाङ्कनप्रणाली (व्या-ले-प्र), वैद्युतपाठ्यांशविकासनसौविध्यञ्च जालस्थाने उपारोपितानां संस्कृतग्रन्थानां सन्धानम्।**

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालये प्राशासनिकभवने माननीयकुलपतिकार्यालयसमीपे संशोधनाधिकारिणः कार्यालये जनसम्प्रेषण-केन्द्रम् अस्ति। इतः विश्वविद्यालयस्य सर्वविधः वृत्तान्तः दूरदर्शनस्य माध्यमेन समाचारेषु प्रकटितः भवति तथा विविधेषु वर्तमानपत्रेषु तथा इ-वर्तमानपत्रेषु प्रकाशनाय प्रेष्यते। विविधेभ्यः कार्यक्रमेभ्यः पूर्वं मिडिया-कर्मचारिणाम् उपवेशनम् अत्रस्थे सभाभवने भवति तथा पूर्ववृत्तान्तः समाचारेषु प्रकटितः भवति। कार्यक्रमेषु अपि मिडियाकर्मिणः आगत्य वृत्तान्तं स्वीकृत्य स्वाधिकृतमाध्यमेन प्रसारयन्ति।
2. अस्मिन् विश्वविद्यालये प्राशासनिकभवने आधुनिकयन्त्रैः सह सुसज्जा दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला (Audio video recording studio) अस्ति। अस्मिन् विडियो ग्रहणाय आधुनिकं केमेरा-यन्त्रम् अस्ति। रेकोर्डिंग-कृतस्य दर्शनाय दूरदर्शन-यन्त्रं तथा श्रवणाय ध्वनिवर्धकम् अपि अस्ति। विडियो-एडिटिंग कर्तुं संशोधनं च कर्तुं तन्त्रस्य उपयोगः भवति। पृष्ठभागस्य दृश्यं (Background) यथावश्यकं परिवर्तयितुं हरित-जवनिकायाः व्यवस्था अस्ति। अत्र अध्यापकाः लेखनेन सह विडियो कर्तुं शक्नुयुः तदर्थं श्वेतफलकस्य तथा लेखन्याः व्यवस्था अस्ति। अध्यापकाः अत्र व्याख्यानानि कृत्वा तदभ्यासेन ई.पी.जी. पाठशालादिषु व्याख्यानानि कर्तुं सिद्धाः भवन्ति।
3. विश्वविद्यालये सर्वेषां विषयाणां परिचयार्थं व्याख्यानमालायाः आयोजनम् अस्यां दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशालायां क्रियते। विविधविषयाणां वैविध्यपूर्णानि व्याख्यानानि E-CONTENT रूपेण छात्राणां कृते उपलब्धानि क्रियन्ते। विविधकार्याणां कृते VIDEO गोष्ठी अपि अत्र भवति।
4. विश्वविद्यालये विविधानां कार्यक्रमाणां चित्राणां तथा भाषणानां सङ्ग्रहं कर्तुम् आधुनिकं चलचित्रग्राहकं यन्त्रम् अस्ति। तेन महानुभावानां भाषणानि, विदुषां विविधानि व्याख्यानानि च गृहीत्वा संरक्ष्यन्ते। विश्वविद्यालये आवर्षं विविधविषयाणां कार्यशालाः भवन्ति, तासां व्याख्यानानि अपि अनेन यन्त्रमाध्यमेन गृह्यन्ते। किञ्च शास्त्रव्याख्यान्मालासु विद्वद्भिः कृतानि व्याख्यानानि गृह्यन्ते।
5. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटे ज्योतिः संस्थासम्बद्ध ज्ञानकोष (Jyotih Institutional Repository) अस्ति । अत्र विश्वविद्यालयेन प्रकाशितानि प्रकाश्यमानानि सर्वाणि पुस्तकानि, शोधपत्रिका 'शोधज्योतिः', विश्वविद्यालयस्य मुखपत्रं 'सोमज्योतिः', विद्यार्थिनां भित्तिपत्रिका 'मेधा', अध्यापकानां संशोधनात्मकाः लेखाः, विविधेषु अवसरेषु विदुषाम् अभिभाषणानि, विद्यार्थिनां कृते विविधाः अभ्यासक्रमाः प्रश्नपत्राणि च, प्राध्यापकनां विविधाः शैक्षणिकसंस्तुतयः इत्यादि सामग्रीजातं भूयिष्ठम् उपलब्धं भविष्यति ।
6. सोमनाथसंस्कृतविश्वविद्यालयस्य You tube channel उपरि विविधविषयकाणि व्याख्यानानि उपारोपितानि सन्ति। श्रीमद्भागवतमहापुराणस्य द्वादश व्याख्यानानि अत्र उपारोपितानि सन्ति। विश्वविद्यालयेन "रामायण एवं व्यक्तित्व विकास" तथा "रघुवंशम् (द्वितीयसर्गः) कथं पठेम" इति द्वयोः अल्पकालीनयोः प्रमाणपत्रीययोजनयोः आयोजनं कृतमासीत्। तयोः व्याख्यानानि अपि अत्र उपारोपितानि सन्ति। विश्वविद्यालयस्य शास्त्रिप्रथमवर्षस्य साहित्यविषये रघुवंशं पाठ्यते अतः रघुवंशस्य व्याख्यानानि छात्राणां कृते अतीव उपयुक्तानि सन्ति। रामायणेन कथं व्यक्तित्वविकासो भवति इति विषये प्रख्यातानां विदुषां व्याख्यानानि जातानि, तानि अत्र उपारोपितानि सन्ति।
7. श्रीयोमनाथसंस्कृतविश्वविद्यालये नवप्रविष्टच्छात्राणां मार्गदर्शनाय तथा अन्येषां जिज्ञासूनां ज्ञानाय विश्वविद्यालयेन शास्त्रपरिचयप्रकल्पः समनुष्ठितः। एतदन्तर्गतं वेद-व्याकरण-साहित्य-पुराण-दर्शन-ज्योतिषविषयाणां परिचयार्थम् "वैदिकसाहित्यस्य परिचयः" "संहिताभागस्य परिचयः" "काव्यस्य आत्मतत्त्वम्" "काव्यभेदाः" "काव्यलक्षणविमर्शः" इत्यादीनि व्याख्यानानि अत्रत्यैः अध्यापकैः निर्मितानि। एतानि व्याख्यानानि अपि विश्वविद्यालयस्य You tube channel उपरि उपारोपितानि सन्ति। तस्य सङ्केतः अयम् अस्ति –

https://www.youtube.com/channel/UCR8DTC4zPKYKWZgYd26E6dg/featured

| File Description | Document |
| --- | --- |
| Facilities for e-content development such as Media Centre, Recording facility, LCS जनसम्प्रेषणकेन्द्रम्, अभिलेखनसौविध्यम्, व्याख्यानलेखाङ्कनप्रणाली (व्य-ले-प्र) वैद्युत-पाठ्यांशविकासनसौविध्यानि (दत्तांशप्रारूपम्) | View Document |

| | |
|---|---|
| Links of photographs छायाचित्राणां सन्धानम् | View Document |

**4.4 Maintenance of Campus Infrastructure**

***4.4.1 Average expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component, as a percentage during the last five years***

### पञ्चवर्षेषु वेतनाद् ऋते भौतिकसौविध्यानां शैक्षिकप्रोद्वलनसौविध्यानां च अनुरक्षणाय कृतस्य व्ययस्य प्रतिशतता-

**Answer:** 2.47

4.4.1.1 Expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component year-wise during the last five years (INR in lakhs)

विगतपञ्चवर्षेषु वेतनाद् ऋते भौतिकसौविध्यानां शैक्षिकप्रोद्वलनसौविध्यानां च अनुरक्षणाय कृतः वार्षिकव्ययः (लक्षशः रूप्यकेषु)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 13.32 | 11.26 | 12.23 | 16.62 | 24.9 |

| File Description | Document |
|---|---|
| Details about assigned budget and expenditure on physical facilities and academic facilities (Data Templates) • भौतिक-शैक्षिकसौविध्यानाम् अनुरक्षणाय प्रदत्तः धनराशिः, कृतः व्ययश्च | View Document |
| Audited statements of accounts • अङ्केक्षणविवरणम् | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***4.4.2 Established systems and procedures for maintaining and utilizing physical, academic and support facilities - laboratory, library, sports complex, computers, classrooms etc., exists.***

### प्रयोगशाला-ग्रन्थालय-क्रीडाङ्गण-सङ्गणकयन्त्र-पठनकक्ष्या-प्रभृतीनां भौतिक-शैक्षणिक-सहायकसौविध्ययुतानां परिरक्षणार्थं समुपयोगार्थं च संस्थायां सुनिश्चिता प्रणाली कार्यपद्धतिश्च विद्यते।

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालये विविधसाधनानां संरक्षणाय समुपयोगाय च यद्वार्षिकानुदानं प्राप्यते तस्माद्व्यवस्था भवति। आवर्षं सर्वकारात् प्राप्तानुदानादावश्यकतानुसारं सङ्ग्रहविभागे भवननिर्माणविभागे च सञ्चिकायां कुलसचिवः वित्ताधिकारी च स्वस्य टिप्पणीं लिखित्वा माननीयकुलपतिसम्मुखं प्रस्तावं स्थापयतः। माननीयकुलपतेः आदेशानुसारं कार्यं क्रियते।
2. विविधसाधनानां भवनानां च संरक्षणाय समुपयोगाय च कार्यं निर्धारितपत्रानुसारं भवति। उदाहरणम् – भवनेषु किमपि करणीयं तर्हि अभियन्ता निर्मितपत्रे लिखित्वा प्रस्तोतव्यम्, तत् पत्रमग्रे कुलसचिवं प्रति गच्छति, ततः यदि कुलसचिवस्य व्ययमर्यादायां तत् कार्यं भवितुं शक्नोति तर्हि अनुमत्या तत्तत् कार्यं क्रियते। व्ययमर्यादायामधिकायां सत्यां माननीयकुलपतेः आदेशानुसारं तत् कार्यं सम्पाद्यते।
3. विद्युद्यन्त्राणां काष्ठकार्याणां प्लम्बिंगकार्याणां च कृते तत्तत्कर्मणि कुशलानां नियुक्तिः क्रियते, तैः विद्युदादिसमीकरणं क्रियते।
4. विश्वविद्यालयपरिसरे सर्वत्र वर्तमानानां CCTV साधनानां नियमनाय वार्षिकानुबन्धः (AMC) कृतो वर्तते।
5. विश्वविद्यालयपरिसरे वर्तमानानां सङ्गणकयन्त्राणां, विविधतन्त्राणाम् (Software), प्रिन्टर-स्केनर आदि-यन्त्राणाम्, अन्तर्जालीय-सहतन्त्राणामुपकरणानां च नियमनाय वार्षिकानुबन्धः (AMC) कृतो वर्तते।
6. परीक्षाविभागे प्रश्नपत्राणां शीघ्रतया प्रतिलिपिकरणाय Duplo यन्त्रस्य नियमनाय, छात्राणां सूचनासङ्ग्रहाय INFINITY तन्त्रस्य नियमनाय च वार्षिकानुबन्धः (AMC) कृतो वर्तते।

7. प्राशासनिकभवने शैक्षणिकभवने छात्रावासे माननीयकुलपतिनिवासे च जलशुद्धिकरणयन्त्रस्य (RO) नियमनाय वार्षिकानुबन्धः (AMC) कृतो वर्तते।
8. परिसरस्य प्रतिलिपियन्त्राणां (Photocopy machine) नियमनाय वार्षिकानुबन्धः (AMC) कृतो वर्तते। एतेषाम् उपयोगः विभागानुसारं भवति। ग्रन्थालयस्य प्रतिलिपियन्त्रेण छात्राणां कृते प्रतिलिपेः सुविधाऽस्ति।
9. शैक्षणिकभवनस्य सभाखण्डस्योपयोगः विश्वविद्यालयस्य विविधकार्यक्रमार्थं भवत्येव, सर्वकारीयकार्यक्रमार्थम् अपि उपयोगः भवति। तदर्थमुपयोक्तुमिच्छुकाः संस्थाः कुलसचिवस्यानुमत्या सभाखण्डस्योपयोगं कुर्वन्ति।
10. विश्वविद्यालय-क्रीडाङ्गणस्योपयोगाय अपि नियमास्सन्ति। क्रीडाङ्गणमुपयोक्तुमिच्छुकाः बहिःस्थाः संस्थाः कुलसचिवस्यानुमत्या क्रीडाङ्गणस्योपयोगं कुर्वन्ति।
11. विश्वविद्यालयस्य परिसरे उद्यानपालनाय हरितीकरणाय च योग्य-उद्यानपालकस्य नियुक्तिः कृता वर्तते।
12. विश्वविद्यालये अध्ययनरतानां छात्राणां कृते निःशुल्कं छात्रालयस्य व्यवस्थाऽस्ति। गृहपतेः निरीक्षणे बालकानां, गृहमात्रोः निरीक्षणे बालिकानां चावासस्य पृथक् सुरक्षिता व्यवस्थाऽस्ति। छात्रालयस्य सुचारु संचालनाय समितयः नियमाश्च सन्ति। CCTV द्वारा छात्रालयस्य सुरक्षाव्यवस्थाऽस्ति।
13. छात्रालये प्रवेशकाले नियमानुसारमारक्षितछात्रः १०००/-, अनारक्षितछात्रः २०००/- डिपोजिट् पूरयति। छात्रावासस्य वस्तुनः यदि क्षतिः क्रियते तर्हि सः दण्डनीयः भवति। यदि कश्चित् छात्रः दण्डस्य शुल्कं पूरयितुं न शक्नोति तर्हि तस्य डिपोजिट्तः शुल्कं स्वीक्रियते।
14. ग्रन्थालयस्य पुस्तकानां क्रयणाय निर्धारितप्रक्रिया अस्ति। पुस्तकानां क्रयणप्रक्रियायां छात्राणां महत्त्वपूर्णं योगदानमस्ति। यस्य ग्रन्थस्यावश्यकता भवति तस्य नाम प्रकाशनं सम्पादकनामादि विलिख्य ग्रन्थालये प्रदीयते। कुलपतेः सूचनानुसारमावश्यकग्रन्थानां क्रयणं भवति।
15. ग्रन्थालये पुस्तकप्राप्तये नियमाः - माननीयकुलपतये १० पुस्तकानि ९० दिनानां कृते, अधिकारिभ्यः ०५ पुस्तकानि ३० दिनानां कृते, अध्यक्षाय आचार्याय सङ्कायाध्यक्षेभ्यः अध्यापकेभ्यः च २० पुस्तकानि ९० दिनानां कृते, स्नातक-अनुस्नातकछात्रेभ्यः०४ पुस्तकानि १५ दिनानां कृते, पदवीकाछात्रेभ्यः पुस्तकद्वयम् १५ दिनानां कृते, तत्त्वाचार्यच्छात्रेभ्यः०५ पुस्तकानि १५ दिनानां कृते, विद्यावारिधिशोधच्छात्रेभ्यः १० पुस्तकानि ३० दिनानां कृते, एवं नियमानुसारं पुस्तकानां प्राप्तिः भवति। निर्धारितदिनेभ्यः अतिक्रान्ते एकस्मिन् दिवसे एकं रूप्यकमिति दण्डस्य नियमोऽस्ति।
16. ग्रन्थालयस्य ग्रन्थाणां क्षतिः भवति तर्हि तस्य ग्रन्थस्य क्षतिपूर्तिः क्षतिकारेण करणीया भवति। यदि सः ग्रन्थः तस्मिन् काले उपलब्धः नास्ति तर्हि तस्य ग्रन्थस्य मूल्यात् त्रिगुणितः दण्डराशिः क्षतिकर्त्रा देयः भवति।
17. शैक्षणिकभवने अष्टादशे प्रकोष्ठे आधुनिकसाधनयुक्ता व्यायामशालाऽस्ति। विश्वविद्यालयस्य छात्राः सर्वकर्मचारिणः एव अस्याः उपयोगं कर्तुं शक्नुवन्ति। व्यायामशालायां व्यायामानुकूलां पादरक्षां धृत्वा प्रवेशः करणीयः। विविधसाधनानामुपयोगः योग्यपद्धत्या करणीयः। यदि साधनानां क्षतिः भवति तर्हि क्षतिकर्ता दण्डनीयः भवति। व्यायामशालायां व्यायामाय पुरुषाणां कृते प्रातः ०६ तः ०८ वादनं यावत्, महिलानां कृते सायं ०६ तः ०८ वादनं यावत् समयः निर्धारितः अस्ति।
18. विश्वविद्यालयस्य क्रीडासंसाधनप्रकोष्ठस्य क्रीडासाधनानामुपयोगाय नियमाः सन्ति। छात्राः शारीरिकाध्यापकस्यानुमत्या आवश्यकतानुसारं विविधसाधनानि अधिकाधिकं ३० दिनानां कृते उपयुञ्जते। अनन्तरं साधनानां परीक्षणं कृत्वा छात्राः पुनः तेषामुपयोगं कर्तुं शक्नुवन्ति। यदि साधनानां क्षतिः भवति तर्हि क्षतिकर्ता दण्डनीयः भवति।
19. विश्वविद्यालये अग्निशामककोषाणां व्यवस्था अस्ति। एतेषाम् उपयोगाय छात्राणामध्यापकानां कर्मचारिणां च प्रशिक्षणं भवति। अग्निशामककोषाणां प्रतिवर्षं पुनःपूरणं भवति। अग्निशामककोषाणां पुनःपुरणाय निविदाप्रक्रिया भवति।
20. वेरावलस्य सर्वकारीय-चिकित्सालयस्य Covid19 विभागस्य कृते विश्वविद्यालयात् चन्द्रमौलिच्छात्रावासतः ३४ पर्यङ्काणां सुविधा प्रदत्ता अस्ति।

| File Description | Document |
|---|---|
| additional information अतिरिक्ताः सूचनाः | View Document |

**5.Student Support and Progression**

**5.1 Student Support**

***5.1.1 Average percentage of students benefited by scholarships/ freeships provided by the Government/ UGC/ Rashtriya Samskrit Sansthan/ any other body during the last five years.***

**विगतपञ्चवर्षेषु सर्वकारद्वारा/ वि.अ.आ द्वारा/ राष्ट्रियसंस्कृतसंस्थानद्वारा/ अन्यसंस्थाद्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां प्रतिशततायाः मध्यमानम्।**

**Answer:** 30.64

5.1.1.1 Number of students benefited by scholarships and freeships provided by the Government year-wise during the last five years

विगतपञ्चवर्षेषु सर्वकारद्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 44 | 23 | 98 | 95 | 05 |

| File Description | Document |
|---|---|
| upload self attested letter with the list of students sanctioned scholarship | View Document |
| Upload any additional information | View Document |
| Details of students benefited by scholarships and freeships provided by the Government during the last five years | View Document |

***5.1.2 Average percentage of students benefited by scholarships, freeships, etc. provided by the institution besides government schemes during the last five years.***

**विगतपञ्चवर्षेषु सर्वकारीययोजनातिरिक्तं संस्थया प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिश्च लाभान्वितानां छात्राणां प्रतिशततायाः मध्यमानम्।**

**Answer:** 84.31

5.1.2.1 Total number of students benefited by scholarships, freeships, etc provided by the institution besides government schemes year-wise during the last five years

विगतपञ्चवर्षेषु सर्वकारीययोजनातिरिक्तं संस्थानेन प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिः लाभान्वितानां छात्राणां वार्षिकयोगः।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 163 | 149 | 150 | 139 | 120 |

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Details of students benefited by scholarships and freeships besides government schemes in last 5 years (विगतपञ्चवर्षेषु सर्वकारीययोजनातिरिक्तं संस्थानेन प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिश्च लाभान्वितानां छात्राणां सङ्ख्या।) | View Document |

***5.1.3 Number of capability enhancement and development schemes***

*1. Guidance for competitive examinations*

*2. Career counselling*

*3. Softskill development*

*4. Remedial coaching*

*5. Language lab*

*6. Bridge courses*

*7. Yoga and Meditation*

*8. Personal counselling*

*9. Training for deciphering ancient manuscripts*

*10. Training on Composing Sanskrit Creative poetry and Dramaturgy*

*11. Shastra Vakyartha Training*

*12. Proof Reading for Devanagari Texts*

*13. Spoken Sanskrit Classes*

*14. Foreign Language Study and Training*

*15. Training on Vedic Recitation with correct Intonation*

*16. Training on Karma-Kanda*

*17. Fine Arts, Performing Arts and Theatre*

सामर्थ्यसंवर्धनाय तद्विकासाय च सञ्चालितानां योजनानां सङ्ख्या

*1.* स्पर्धात्मकपरीक्षाणां कृते मार्गदर्शनम्

*2.* वृत्तिपरामर्शः

*3.* सूक्ष्मकौशलविकासः

*4.* उपचारात्मकम् अनुशिक्षणम्

*5.* भाषाप्रयोगशाला

*6.* सेतुपाठ्यक्रमाः

*7.* योगः ध्यानं च

*8.* वैयक्तिकपरामर्शः

*9.* प्राचीन-पाण्डुलिपि-पठनप्रशिक्षणम्

*10.* काव्यलेखन-नाट्यप्रशिक्षणम्

*11.* शास्त्रार्थ/वाक्यार्थ-प्रशिक्षणम्

*12.* देवनागरी-मुद्राक्षरशोधनप्रशिक्षणम्

*13.* संस्कृतसम्भाषणप्रशिक्षणम्

*14.* **वैदेशिकभाषाध्ययनम्**

*15.* **वेदानां सस्वरपाठप्रशिक्षणम्**

*16.* **कर्मकाण्डप्रशिक्षणम्**

*17.* **ललितकला प्रदर्शनकला अभिनयकला वा**

**Answer:** A. 10 or more of the above (अ. उपर्युक्तेषु यानि कानिचिद् दश अथवा ततोऽप्यधिकम्)

| File Description | Document |
|---|---|
| Details of capability enhancement and development schemes (सामर्थ्यसंवर्धनाय तद्विकासाय च संचालितानां योजनानां विवरणम्।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Link to Institutional website (• संस्थायाः अन्तर्जालपुटस्य सन्धानाम्।) | View Document |

***5.1.4 Average percentage of students benefited by guidance for competitive examinations and career counselling offered by the institution during the last five years.***

**विगतपञ्चवर्षेषु संस्थया प्रदत्तेन स्पर्धात्मकपरीक्षामार्गदर्शनेन, वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां प्रतिशततायाः मध्यमानम्।**

**Answer:** 26.3

5.1.4.1 Number of students benefited by guidance for competitive examinations and career counselling offered by the institution year-wise during the last five years

विगतपञ्चवर्षेषु संस्थया प्रदत्तेन स्पर्धात्मकपरीक्षामार्गदर्शनेन, वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 71 | 28 | 00 | 64 | 69 |

| File Description | Document |
|---|---|
| Details of students benefited by guidance for competitive examinations and career counselling during the last five years | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |

***5.1.5 The institution has a transparent mechanism for timely redressal of student grievances including sexual harassment and ragging cases.***

***(Yes/ No)***

**लैङ्गिकोत्पीडनस्य आधर्षणस्य च झटिति दूरीकरणाय संस्थायां पारदर्शकतन्त्राणि सन्ति।**

***(सन्ति/ न सन्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः।) | View Document |
| Minutes of the meetings of student redressal committee, prevention of sexual harassment committee and Anti Ragging committee (छात्रपरिदेवनादूरीकरणसमितेः, लैङ्गिकोत्पीडनस्य दूरीकरणसमितेः, आधर्षणविरोधिसमितेश्च कार्यवृत्तानि।) | View Document |
| Details of student grievances including sexual harassment and ragging cases (लैङ्गिकोत्पीडन-आधर्षणविषये छात्रपरिदेवनस्य विवरणम्) | View Document |

***5.1.6 The University organises Inter-University Talent Festival, Vakyartha, Shastrartha, Salakapareeksha, Sanskrit elocution contest, Inter-Sanskrit-university Youth festival, Inter College Youth festival, Sanskrit Poets' Meet, special coaching or training in creative writing, Sanskrit-Poetry writing/ DTP, Copy editing, Proof reading, Cultural tourism, Hospitality, Purana pravachana, lalita-kala etc.***

**अन्तर्विश्वविद्यालयप्रातिभसमारोहं, वाक्यार्थसभां, शास्त्रार्थसभां, शलाकापरीक्षां, संस्कृतभाषणस्पर्धां, शास्त्रसभाम्, अन्तस्संस्कृत-विश्वविद्यालय-युवसमारोहम्, अन्तर्महाविद्यालय-युवसमारोहं, संस्कृत-कविसमवायादि-कार्यक्रमान् आयोजयति। विश्वविद्यालयः सर्जनात्मकलेखनस्य, संस्कृतकाव्यलेखनस्य, सङ्गणक-विज्ञान-विषयक-पुस्तकप्रकाशनस्य, प्रतिलिपिसम्पादनस्य, प्रेक्ष्यवाचनस्य *(Proof Reading)*, सांस्कृतिकपर्यटनस्य, आतिथ्य-निर्वहणस्य, पुराण-प्रवचनस्य, ललितकलानाम् अन्येषां च विषयाणां विशिष्टम् अनुशिक्षणं/ प्रशिक्षणं च प्रददाति।**

**Answer:**

**1.** श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः २०१४ वर्षात् प्रारम्भोऽभवत् । विश्वविद्यालयस्य अध्यापकद्वयं अस्याः परिषदः सञ्चालयति । अस्यां परिषदि प्रतिमासं प्राध्यापकाः शास्त्रीयव्याख्यानानि प्रस्तुवन्ति । २०१५ तमे वर्षे १४ अध्यापकाः,२०१६तमे वर्षे १९ अध्यापकाः, २०१७ तमे वर्षे १५ अध्यापकाः , २०१८ तमे वर्षे १९ अध्यापकाः, २०१९ तमे वर्षे १७ अध्यापकाः व्याख्यानानि प्रस्तुतवन्तः । २०२० तमे वर्षे वाक्यार्थपरिषदः वार्षिकायोजनानुसारं २२ प्राध्यापकानां व्याख्यानानि भविष्यन्ति । अनया परिषदा प्राध्यापकानां, छात्राणां शास्त्रशास्त्राणां ज्ञानं भवति । अद्यावधि त्रिषु वर्षेषु प्रस्तुतानां विषयाणां सङ्ग्रहः **वाक्यार्थज्योति इति नाम्नः ग्रन्थस्य त्रयः भागाः** विश्वविद्यालयेन प्रकाशिताः सन्ति ।

**2.** श्रीसोमनाथसंस्कृतविश्विद्यालयस्य छात्रेण जिगरभट्टेन २०१६ वर्षस्य दिसम्बरमासस्य २८ तः ३१ दिनाङ्केषुनवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन एकलव्यपरिसरे अगरतलायां आयोज्यमानायाम् अखिलभारतीयशास्त्रीयस्पर्धायां शास्त्रीयस्फूर्तिस्पर्धायां भागः गृहीतः । तत्र चतुर्दशराज्येभ्यः अष्टाविंशतिः प्रतिभागिनः आसन् । समपूर्णदेशे द्वितीयं स्थानं अधिगतम् । अनया पारम्परिकपद्धत्या शास्त्राध्ययनप्रोत्साहनार्थं प्रेरणा प्राप्यते । सामान्यज्ञानं शास्त्रज्ञानञ्च दृढं भवति ।

**3.** षडुत्तरद्विसहस्रतमे वर्षे शैक्षिककार्यमारब्धवानयं विश्वविद्यालयः अद्यावधि त्रयोदशान् युवमहोत्सवान् आयोजितवान् । महोत्सवेऽस्मिन् विश्वविद्यालयेन सम्बद्धानां पञ्चत्रिंशत्-संस्कृतमहाविद्यालयानां छात्राः भागं गृह्णन्ति । तत्र पञ्चचत्वारिंशत् शैक्षिक-सांस्कृतिक-क्रीडास्पर्धाः भवन्ति । विजयवैजयन्तीदानेन च सोत्साहं निर्वर्त्यते। पञ्चवर्षाणां वृत्तान्तः यथा – २०१५- १६ वर्षादारभ्य २०१९-२० वर्ष पर्यन्तं ३५ महाविद्यालयानां २५४६ छात्रैः भागः गृहीतः । शैक्षणिकपरिसरस्य छात्रैः ८४ स्वर्णपदकानि, ३३ रजतपदकानि , २० कांस्यपदकानि च प्राप्तानि । एतेषु पञ्चवर्षेषु चतुर्वारं विजयवैजयन्ती प्राप्ता । अनेन यूनां शारीरिकमानसिकशैक्षणिकयात्रायां छात्राः अग्रेसराः भवन्ति ।

**4.** श्रीसोमनाथसंस्कृतविश्वविद्यालयेन कालिदासजयन्तीमुपलक्ष्य १६-६-२०२० तः २२-६-२०२० दिनाङ्कपर्यन्तं**ONLINE**कालिदाससप्ताहः आचरितः । कार्यक्रमे कालिदासप्रश्नोत्तरी, कालिदाससूक्तिव्याख्यानं स्पर्धाः अभवन् ।

**5.** श्रीसोमनाथसंस्कृतविश्वविद्यालये श्रावणपूर्णिमावसरे भारतसर्वकारनिर्देशालोके प्रतिवर्षं संस्कृतसप्ताहमायोजयति । तत्र स्तोत्रकण्ठपाठ-कथाकथन- समस्यापूर्ति- रङ्गवल्ली-समूहगान-वक्तृत्वादीनां विभिन्नानां स्पर्धानाम् आयोजनं भवति । स्पर्धासु विश्वविद्यालयीयच्छात्राः, माध्यमिक-उच्चतरमाध्यमिकस्तरे पठन्तः छात्राः अपि सोत्साहं भागं गृह्णन्ति । तेषु

विजेतारः प्रमाणपत्र-पदक-संस्कृतपुस्तकादिभिः पुरस्क्रियन्ते ।२०१५ तमे वर्षे २५५ छात्राः , २०१६ -१५० छात्राः , २०१७ - १०० छात्राः, २०१८ - २०० छात्राः , २०१९ - १५० छात्राः भागं गृहीतवन्तः । अनेन छात्राणां सर्वाङ्गीणविकासो तथा कौशलचतुष्टयं वर्धते । २०२० तमेवर्षे संस्कृतसप्ताहोत्सवस्य Online माध्यमेन ३१-७-२०२० तः ६-७-२०२० दिनाङ्कपर्यन्तम् आयोजनं जातम् । उद्घाटनसत्रे मुख्यवक्तृरूपेण संस्कृतसम्वर्धन- प्रतिष्ठानस्य न्यासी पद्मश्री चमूकृष्णशास्त्रीवर्यः उपस्थितः आसीत् । अस्य कार्यक्रमस्य आमुखपटले (Facebook) जीवन्तप्रसारणं (Live) जातम् । सप्तशतम् जनाः कार्यक्रमेण लाभान्विताः जाताः । संस्कृतसप्ताहोत्सवस्य प्रचारः त्रिविधाभियानेन जातः । यथा-**विडियो-अभियानम्, संस्कृतसूक्ति-अभियानम्, वर्तमानपत्रे लेख-अभियानम्, इति** । विडियो अभियानं संकृतानुरागिभिः संस्कृतं मम गौवरम् इति लघुचलच्चित्रेण सामाजिकजनसञ्चारमाध्यमेन (सोशिअल मीडिया) प्रसारः प्रचारश्च कृतः । एतदभियानं संवीक्ष्य संस्कृतानुरागिणः सामाजिकाश्च प्रेरिताः अभवन् । एतेन प्रकारेण अन्यूनं २५००० जनान् प्रति संस्कृदिनस्य सन्देशः गतः । सूक्ति-अभियाने आमुखपटले एवं ट्वीटरमाध्यमेन संस्कृतसाहित्यस्य प्रसिद्धसूक्तिषु प्रतिदिनं १० सूक्तीनां प्रचारः जातः । आसप्ताहं वर्तमानसमये संस्कृतस्य प्रासङ्गिता इति विषयमादाय वृत्तपत्रेषु संस्कृत-विषयकविभिन्नानां सप्तलेखानां प्रकाशनं जातम् । एतेन लेखाभियानेन संस्कृतं प्रति जनाः जागरूकाः प्रेरिताश्च जाताः ।

6. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन संस्कृतकविसम्मेलनानि आयोजितानि सन्ति । तत्र विगतपञ्चवर्षस्य वृत्तं यथा ७-२-२०१६, १८-५-२०१८, ५-२-२०१९, २०-९-२०१९ दिनाङ्केषु आयोजितसम्मेलनेषु विभिन्नराज्येभ्यः संस्कृतकवयः स्वरचितकाव्यकाव्यानि प्रस्तोतुं समागतवन्तः । ३०-५-२०२० तमे वर्षे Online अभिनवकविसम्मेलनमायोजितम् । कविभिः वर्तमानकालसन्दर्भे काव्यप्रस्तुतिः कृता । अनेन छात्रेषु कवित्वशक्तिः काव्यरचनाकौशलञ्च वर्धते । छात्राः स्वकवितां मेधासोमज्योतिपत्रिकायां प्रकाशयन्ति । सभायां प्रस्तूय अन्यान् अपि प्रेरयन्ति ।

7. श्रीसेमनाथसंस्कृतविश्ववद्यालयस्य पुराणसङ्कायेन २०-११-२०१९ तः २३-११-२०१९ पर्यन्तं पुराणपुनश्चर्याकार्यशाला जाता । २०२० तमस्य वर्षस्य मेईमासस्य ९ तः २० दिनाङ्कं यावत् प्रि.नरेन्द्रकुमारपण्ड्यामहोदयेन श्रीमद्भागवतमाश्रित्य आमुखपटले (Facebook) Online व्याख्यानमालायां द्वादश व्याख्यानानि प्रस्तुतानि । २०२० तमे वर्षे **रघुवंशं (द्वितीयसर्गः) कथं पठेम, रामायणे व्यक्तित्वविकासः, संस्कृतवाक्याभ्यासः, षोडशसंस्कारेषु मानवजीवनमूल्यानि,** इत्यादीनां अल्पकालीनां पाठ्यक्रमाणां आरम्भो जातः । एतैरुपक्रमैः सम्पूर्णदेशस्य नैके छात्राः लाभान्तविताः अभवन् । भारतीयसंस्कृतेः संस्काराणाञ्च ज्ञानं जातम् । संस्कृतभाषाशुद्धिः, व्याकरणज्ञानं, व्यक्त्वविकासस्य ज्ञानञ्च जातम् ।

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**5.2 Student Progression**

*5.2.1 Average percentage of placement of outgoing students during the last five years*

## विगतपञ्चवर्षेषु प्राप्तोद्योगानाम् अन्तिमवर्षच्छात्राणां प्रतिशततायाः मध्यमानम्

**Answer:** 9.83

5.2.1.1 Number of outgoing students placed year-wise during the last five years

विगतपञ्चवर्षेषु प्राप्तोद्योगानां छात्राणां वार्षिकसङ्ख्या

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 11 | 05 | 06 | 06 | 03 |

| File Description | Document |
|---|---|
| | |

| | |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Self attested list of students placed (प्राप्तोद्योगानां छात्राणां स्वयं हस्ताक्षरिता सूची) | View Document |
| Details of student placement during the last five years (विगतपञ्चवर्षेषु प्राप्तोद्योगानां छात्राणां सङ्ख्या।) | View Document |

***5.2.2 Percentage of student progression to higher education (previous graduating batch) (preceeding academic year data)***

**उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां प्रतिशतता *(पूर्वतनं स्नातकवर्गम् आश्रित्य) (प्रगताध्ययनवर्षस्य दत्तांशः)*।**

**Answer:** 41.27

5.2.2.1 Number of outgoing students progressing to higher education

उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां सङ्ख्या

Answer: 26

| File Description | Document |
|---|---|
| Upload supporting data for student/alumni (छात्राणां/ पूर्वच्छात्रसङ्घस्य सहायकदत्तांशः।) | View Document |
| Details of student progression to higher education (उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां विवरणम्।) | View Document |

***5.2.3 Average percentage of students qualifying in state/ national/ international level examinations during the last five years. (eg: NET/ SLET/ TOEFL/ Civil Services/ State government examinations)***

**विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्रस्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां मध्यमानस्य प्रतिशतता *(उदा.नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)***

**Answer:** 36.96

5.2.3.1 Number of students qualifying in state/ national/ international level examinations (eg: NET/SLET/TOEFL/ Civil services/State government examinations) year-wise during the last five years

विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्- टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 18 | 08 | 02 | 04 | 00 |

5.2.3.2 Number of students appearing in state/ national/ international level examinations (eg: NET/SLET/GRE/TOEFL/ Civil Services/State government examinations) year-wise during the last five years

विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु भागं गृहीतवतां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 18 | 28 | 04 | 64 | 69 |

| File Description | Document |
|---|---|
| Upload supporting data for the same (तेषां सहायकदत्तांशाः।) | View Document |
| Number of students qualifying in state/ national/ international level examinations during the last five years (विगतपञ्चवर्षेषु राज्य/ राष्ट्र/ अन्ताराष्ट्र-स्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां सङ्ख्या।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |

***5.2.4 Details of the programme for the exchange/participation of students at national/international level for academic and cultural activities with other institutions.***

**विश्वविद्यालयान्तरेण अन्यया संस्थया सह वा राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु शैक्षिकसांस्कृतिकगतिविधीनां कृते छात्राणां विनिमयाय सञ्चालितस्य कार्यक्रमस्य विवरणम्।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्विविद्यालयस्य छात्राणां सर्वाङ्गीणविकासो भवेत् तदर्थं विश्वविद्यालयः विविधासु राष्ट्रियशैक्षणिकसांस्कृतिकगतिविधौ छात्रान् प्रेषयन्ति प्रेरयन्ति च ।

1. श्रीसोमनाथसंस्कृतविश्विविद्यालस्य छात्रः जिगरभट्टः २०१६ तमे वर्षे मार्चमासस्य २ तः १८ दिनाङ्कपर्यन्तं राष्ट्रियसंस्कृतसंस्थानेन अगरतलायामायोजिते अखिलभारतीय-शास्त्रार्थप्रशिक्षणवर्गे भागः गृहीतवान् । अस्य प्रशिक्षणवर्गस्य कृते आयोजितायां प्रवेशपरीक्षायां श्रीसोमनाथसंस्कृतविश्विविद्यालस्य छात्रः जिगरभट्टः उत्तीर्णः जातः । उत्तीर्णेषु छात्रेषु प्रत्येकं शास्त्रस्य दश छात्राः आसन् । सः प्रशिक्षणान्ते साहित्यशास्त्रे (काव्यप्रकाशे) लिखितपरीक्षां वाक्परीक्षाञ्च प्रथमश्रेण्यां समुत्तीर्य साफल्यम् अवाप्नोत् । छात्रोऽयं विश्वविद्यालयानां छात्राणां कृते उत्प्रेरकः आदर्शभूतश्च अभवत् । अनेन प्रशिक्षणवर्गेण तस्य कौशलानां विकासः, काव्यशास्त्रज्ञानविकासश्च जातः । शास्त्रदृष्टिः अपि वर्धिता ।

2. श्रीसोमनाथसंस्कृतविश्विविद्यालस्य छात्राः २०१६ वर्षस्य दिसम्बरमासस्य २८ तः ३१ दिनाङ्केषु नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन आयोजितायाम् अखिलभारतीयशास्त्रीयस्पर्धायां भागं गृहीतवन्तः । शास्त्रीयस्फूर्तिस्पर्धायां ५२ छात्राः प्रतिस्पर्धिनः आसन् । तत्र श्रीसोमनाथसंस्कृतविश्वविद्यालस्य छात्रः जिगरभट्टः द्वितीयं स्थानं लब्धवान् । अनया स्पर्धया छात्रस्य बौद्धिकतार्किकक्षमता वर्द्धिता । तथा प्रतियोगितायां परीक्षायां लाभोऽपि अभवत् । श्रीसमानाथसंस्कृतविश्वविद्यालयस्य त्रयः छात्राः १९-१-२०२० तः २१-१-२०२० दिनाङ्कपर्यन्तं राष्ट्रियसंस्कृतसंस्थानेन त्रिपुराराज्यस्य अगरतलास्थ-एकलव्यपरिसरे अखिलभारतीयशास्त्रीयस्पर्धायां ज्योतिषभाषणे भागं गृहीतवन्तः । अस्यां स्पर्धायां विभिन्नप्रान्तेभ्यः ३५ संस्थायाः विंशतिः प्रतिस्पर्धिनः भागं गृहीतवन्तः। तेषु श्रीसोमनाथसंस्कृतविश्वविद्यालस्य आचार्यप्रथमवर्षस्य छात्रो मयूररावलः ज्योतिषभाषणस्पर्धायां द्वितीयं स्थानं प्राप्तवान् । अनया स्पर्धया ज्योतिषविषयकं ज्ञानं प्राप्तम् । तस्य संशोधनदृष्टेः विकासः संस्कृतवाक्कौशलवृद्धिश्च अभवत् । अनेन ज्योतिषविभागस्य छात्राणां सङ्ख्याऽपि वर्धिता ।

**3.** २०१७ – तमे वर्षे जूनमासस्य २२ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य प्रयागराजे (इलाहाबादे) परिसरे अनौपचारिकसंस्कृतशिक्षणवर्गस्य आयोजितपरीक्षायाम् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अखिलः राज्यगुरुः, हार्दिकः भट्टः, जिगरः भट्टश्चेति त्रयः छात्राः उत्तीर्णाः । ते तत्र प्रशिक्षणं प्राप्य संस्कृतमाध्यमेन पाठयितुं शक्नुवन्ति। तथा विश्वविद्यालयस्थान् अन्यान् अपि छात्रान् संस्कृतसम्भाषणार्थं प्रेरितवन्तः । अनेन प्रकारेण विश्वविद्यालये संस्कृमयवातावरणनिर्माणे ते सहायभूताः अभवन् ।

**4.**श्रीसोमनाथसंस्कतविश्वविद्यालयस्य सप्त (७) छात्राः तिरुपतिस्थ- राष्ट्रियसंस्कृतविद्यापीठेन २०१८-१९ तमे वर्षे ३१-१-२०१८ तः ०३-२-२०१८ आयोजिते प्रातिभसमारोहे भागं गृहीतवन्तः । सम्पूर्णे देशे अरुणप्रकाशौ स्फूर्तिस्पर्धायां द्वितीयस्थानं प्राप्तवन्तौ । अरुण-पाण्डेयः समस्यापूर्तौ तृतीयं स्थानं प्राप्तवान् । जोषी प्रफुल्लेन एकपात्राभिनये तृतीयं स्थानं लब्धम्।

विश्वविद्यालयस्य नव (९) छात्राः २०१९-२० तमे वर्षे २८-१-२०२० तः ३१-१-२०२० पर्यन्तं राष्ट्रियसंस्कृतविद्यापीठे समायोजिते प्रातिभसमारोहे भागं अगृह्णन् । ३४ संस्थाः आसन् । तत्र सम्पूर्णभारते पुराणेतिहासभाषणस्पर्धायां निकुञ्जेन तृतीयं स्थानं प्राप्तम् । रसप्रश्नस्पर्धायां त्रयस्त्रिंशत् संस्थाः आसन् । तत्र अस्मदीयानां छात्राणां पञ्चमं स्थानं समागतम् । अनेन छात्राणां प्रतिभाप्रस्फोटनं जातम् । विदुषां शास्त्रीयभाषणं श्रुत्वा विशेषं ज्ञानं प्राप्तम् । अन्याभ्यः संस्थाभ्यः समागतैः छात्रैः सह मिलित्वा दृष्टिविस्तारो वर्धितः।

**5.** १८-५-२०१८ तः२८-५-२०१८ तमे वर्षे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मीरल व्यास देवांशी भीण्डे इति द्वे छात्रे प्रगतप्रशिक्षणवर्गं नागपुरं अगच्छताम् । तत्र ७६ छात्राः भागं गृहीतवन्तः । प्रशिक्षिते छात्रे संस्कृतस्य पाठनं प्रचारं प्रसारञ्च कृतवत्यौ । संस्कृतं प्रति जनाः जागरुकाः भवेयुः तदर्थमपि छात्राः यतन्ते । ते सामाजे संस्कृतसम्भाषणवर्गं, बालकेन्द्रञ्च चालितवत्यौ ।

**6.** श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रयः छात्राः धाराप्रवाहेण संस्कृतसम्भाषणार्थं नवदेहलीस्थासंस्कृतभारतीद्वारा आयोजितायां संवादशालायां २०१९-२०तमे वर्षे भागं अगृह्णन् । ते छात्राः आत्मविश्वासेन संस्कृतसम्भाषणेन वार्तालापं कर्तुं शक्नुवन्ति । तान् दृष्ट्वा अन्यछात्राः प्रेरिताः भवन्ति ।

7.विश्वविद्यालयस्थाः योगवर्गीयाः छात्राः नैकासु राष्ट्रियस्पर्धासु भागं गृहीत्वा धवलं यशः सम्पादयन्ति। २०१९-२० तमे वर्षे २६-१२-२० तः २८-१२-२० पर्यन्तं अलीगढ (जटारि) नगरे योगस्पोर्ट् डेव्वलोपमेन्ट एसोशिएसन इंडिया **(Yoga Sports Development Association)** इत्यनेन आयोजितेन द्वितीयराष्ट्रिययोगस्पोर्ट्स गेम्स इति प्रतियोगितायां ३४ चतुस्त्रिंशत् प्रतिभागिनः आसन् । तेषु श्रीसोमनाथसंस्ककृतविश्वविद्यालयस्य हर्षल बी. त्रिवेदी नाम्ना छात्रेण तृतीयं स्थानम् अधिगतम् । अनया प्रतियोगितया छात्रस्य शारीरिकविकासः अभवत् । तेन अन्यछात्राः प्रेरिताः ।

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**5.3 Student Participation and Activities**

***5.3.1 Number of awards/ medals for outstanding performance in sports/ cultural activities at State/ national/ international level (award for a team event should be counted as one) during the last five years.***

**विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्ट-योग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां सङ्ख्या। *(गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)***

**Answer:** 14

5.3.1.1 Number of awards/medals for outstanding performance in sports/cultural activities at State/ national/ international level (award for a team event should be counted as one) year-wise during the last five years

विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्टयोग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां वार्षिकसङ्ख्या। (गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 06 | 04 | 00 | 03 | 01 |

| File Description | Document |
|---|---|
| e-copies of award letters and certificates (अनुमतिपत्राणां | View Document |

| | |
|---|---|
| प्रमाणपत्राणां च वैद्युतप्रतिलिपिः।) | |
| Details of awards/medals for outstanding performance in sports/cultural activities at national/international level during the last five year | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |

***5.3.2 Presence of an active Student council/ Chatra-parishat/ Chatra-mandal and representation of students on academic and administrative bodies/committees of the institution.***

**संस्थायाः प्राशासनिकशैक्षिकसमितिषु छात्राणां प्रतिनिधित्वं तथा सक्रियायाः छात्रपरिषदः विद्यमानता।**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालये प्राशासनिकशैक्षणिकसमितिषु छात्राणां सहभागिताऽस्ति । एतेषां विवरणं यथा-

**1.**विश्वविद्यालये प्रतिगुरुवासरं छात्राणां वाक्कौशल्यविवर्धनाय वाग्वर्धिनी सभा आयोज्यते। अमुष्याः सभायाः सञ्चालनं छात्राः स्वयमेव विदधति । प्रतिस्पर्धिषवः छात्राः स्वयमेव अधीतान् विषयान् आधृत्य रोचकं बाभाष्यन्ते । इयं सभा सम्यक्तया छात्रैः सञ्चालिता स्यात् तदर्थं शास्त्रिस्तरे एकः, आचार्यस्तरे च एकः एवं द्वौ कार्यदर्शिनौ नियोजितौ वर्तेते। तौ अस्याः सभायाः प्रतिगुरुवासरं सञ्चालनं कथं स्यात् , सञ्चालकश्च को भविता , सभाध्यक्षत्वेन क आचार्यः आहूतो भवेत् , इत्यादिकं कार्यं सम्पादयतः । एवञ्च प्रतिकक्षं छात्रद्वयी प्राध्यापकानां मार्गदशनेन कक्षाप्रातिनिध्यम् आवहति । छात्राः सभायाः संयोजनं कुर्वन्ति।

2.श्रीसोमनाथसंस्कृतविश्वविद्यालयः प्रतिवर्षं दीक्षान्तसमारोहं, युवमहोत्सवं, अन्ताराष्ट्रियपरिसंवादञ्च आयोजयति । विश्वविद्यालयस्य समुत्कर्षाय संस्कृते निहितानामद्वितीयज्ञानतत्त्वानां प्रकाशाय प्रतिशास्त्रं शास्त्रपुनश्चर्यां कार्याशालां राष्ट्रियपरिसंवादञ्च विश्वविद्यालयम् आयोजयति । विश्वविद्यालये छात्राणां व्यक्तित्वस्य विकासाय तेषां प्राशासनिककौशलस्य परिवर्धनाय, शैक्षणिकयोग्यतायाः सम्पादनाय कार्यक्रमादिसञ्चालनस्य च क्षमतालाभाय विविधाः समितयः निर्मिताः सन्ति । तद्यथा निवाससमितिः स्वागतसमितिः,पञ्जीकरणसमितिः, भोजनसमितिः सांस्कृतिकसमितिश्च तासु समितिषु छात्राः सहभागिनः भवन्ति ।

2.1.1. **निवाससमितिः**

निवाससमितौ विशिष्टातिथीनां तथा प्रतिभागिनां आवासव्यवस्थां गमनागमनस्य वाहनव्यवस्थामपि प्राध्यापकानां मार्गदर्शने छात्राः एव कुर्वन्ति ।

2.1.2 **.स्वागतसमितिः**

स्वागतसमितौ छात्राः आगतानाम् अतिथीनां भारतीयसंस्कृत्यानुसारं मन्त्रोच्चारपुरःसरं गन्धपुष्पैः स्वागतं कुर्वन्ति ।

2.1.3.**पञ्जीकरणसमितिः**

पञ्जीकरणसमितौ छात्राः आगतानां पञ्जीकृतप्रतिभागिनां वृत्तञ्ज्ञात्वा अध्ययनसामग्रीं (kit) सज्जीकृत्य वितरन्ति।

**2.1.4 भोजनसमितिः**

**समा**गतानाम् अतिथीनां कृते छात्राः भोजनव्यवस्थां कल्पयन्ति । भोजनसमितिस्थाः छात्राः आगतानाम् अतिथीनां भोजनं परिवेशयन्ति । कार्यक्रमे स्थले भोजनव्यवस्था सुचारुरूपेण भवेत् तदर्थं छात्राः यन्तते ।

**2.1.5 सांस्कृतिकसमितिः**

आयोजितेषु सांस्कृतिककार्यक्रमेषु छात्राः सोत्साहं कार्यं कुर्वन्ति । वार्षिकोत्सवः – नवरात्रोत्सवः गणेशपूजनं प्रतिवर्षं छात्रावासे छात्रैः सम्भूय एकाशददिवसात्मकम् श्रीगणेशोत्सवस्यानुष्ठम् क्रियते । छात्राः विद्याप्राप्त्यर्थं श्रीगणपत्यर्थवशीर्षम्, संकटनाशनस्तोत्रम्, गजानन स्तोत्रम् इत्यादिस्तोत्रैः भगवतः गणेशस्य आराधनां कुर्वन्ति । धार्मिकसंस्कृतिरक्षायै वसन्तपञ्चमी-गुरुपूर्णिमा इत्यादीनाम् उत्सवानाम् आयोजनं छात्राः कुर्वन्ति ।

**2.1.6.छात्रावाससमितिः**

विश्वविद्यालयेन छात्राणाम् छात्रावाससमितिः अपि एका निर्मिता वर्तते । सा समितिः छात्राणां प्रातः उत्थानम् आरभ्य रात्रौ शयनं यावत् सर्वाण्यपि कार्याणि पश्यति । प्रतिदिनं रात्रौ समित्या अनया प्रार्थनासभा कार्यते । अस्यां सभायां

प्रत्येकं छात्रस्य उपस्थितिः अनिवार्या भवति । अत्रैव प्रतिदिनं कार्यसमीक्षाः भाविकार्ययोजनादिविषयान् गृहपतिना सह छात्राः उपविश्य चिन्तयन्ति। छात्रैः स्वयमेव छात्रावासपरिसरस्य स्वच्छीकरणं क्रियते । तथा च अस्मिन् एव क्रमे अपरे प्रकल्पे छात्राः व्यसनमुक्तवातावरणं निर्मान्ति । छात्रावासस्य प्राङ्गणे छात्राः स्वयमेव वृक्षारोपणं कृत्वा तस्य संरक्षणाय सर्वदैव यत्नशीलाः भवन्ति । छात्राणां हितकाम्यया छात्रकल्याणछात्रसमस्यानिवारणसमिती वर्तते । कक्षां प्रति छात्राः अध्यनव्यवस्थायै **प्रतिनिधित्वम् (मोनिटर)** आचरन्ति । उत्तरदायित्त्वबोधेन सह कर्त्तव्यपरायणतां प्रति जागरूकाः भवन्ति । तथैव नेतृत्वक्षमतामपि अधिगच्छन्ति ।

3.श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे राष्ट्रियसेवायोजनाऽङ्गतया निम्नलिखिताः कार्यक्रमाः भवन्ति। एतेषां विवरणं यथा

**3.1 स्वच्छताकार्यक्रमः-**

विश्वविद्यालयस्य छात्रैः वेरावलस्थ-जनसमूहेन समं मिलित्वा स्वच्छतां प्रति जागरणाय एका समूहयात्राऽपि आयोजिता । अधिविश्वविद्यालयं प्रतिमासं अधितृतीयशनिवासरं साध्यपाकं छात्राः अधिपरिसरं स्वच्छतां समाचरन्ति । छात्रैः **“हरितं वेरावलं स्वच्छं वेरावलम्” “स्वच्छं भारतं स्वस्थं भारतम्”** इत्यादिवाक्यघटितसन्देशपट्टैः स्वच्छातायाः सन्देशः प्रदत्तः । समग्रविश्वविद्यालयस्य परिसरस्य छात्राः समये समये स्वच्छतां कुर्वन्ति । **“एकं पदं स्वच्छतां प्रति”** इति वाक्यमनुसृत्य छात्राः कर्गदरहितं (प्लास्टिकमुक्तं) परिसरकर्तुं कटिबद्धाः सन्ति ।

**3.2 प्रार्थनासभासमिति :-**

**अधिविश्वविद्यालयं विविधाः समितयः सन्ति । तासु समितिषु एका अन्यतमा एषा समितिः वर्तते । प्रार्थनासभायाः सम्पूर्णं सञ्चालनं समितिस्थाः छात्राः एव कुर्वन्ति। तस्यां उपवेशनव्यवस्था, समेषामुपस्थितिः, क्रार्यक्रमस्यसूचनाः, शब्दरूपाणां धातुरूपाणाञ्चावर्तनं,**

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***5.3.3 Average number of sports and cultural activities / competitions organised at the institution level per year.***

## प्रतिवर्षं संस्थया आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां / स्पर्धानां सङ्ख्यायाः मध्यमानम्

**Answer:** 0.8

5.3.3.1 Number of sports and cultural activities / competitions organised at the institution level year-wise during the last five years

विगतपञ्चवर्षेषु आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां वार्षिकसङ्ख्या

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 01 | 01 | 02 |

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Report of the event (for ex. Sanskrit Pratibha Samaroha, Koumudi Mohotsava etc..) (कार्यक्रमस्य प्रतिवेदनम्। (संस्कृतप्रातिभसमारोहः, कौमुदीमहोत्सवः इत्यादयः)) | View Document |
| Number of sports and cultural activities / competitions organised per year (प्रतिवर्षं संस्थया आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां सङ्ख्या) | View Document |

***5.3.4 The university involves and encourages its students to publish materials like catalogues, wall magazines, university magazine, and other materials. List the major publications/ materials brought out by the students during the last four academic sessions.***

**विश्वविद्यालयेन संग्रहसूचीनां, भित्तिपत्रिकाणां, विश्वविद्यालयपत्रिकाणां तदितरसामग्रीणां च प्रकाशनाय छात्राः समावेश्यन्ते प्रोत्साह्यन्ते च। विगतशैक्षिकवर्षचतुष्टये/अर्धसत्रचतुष्टये छात्रैः प्रकाशितानां प्रमुखप्रकाशनानां/ सामग्रीणां च सूची दीयताम्।**

**Answer:**

**1**. श्रीसोमनाथसंस्कतविश्विविद्यालयः स्वस्य प्रचारप्रसारार्थं परिचायिकां निर्माति । अत्र छात्राणामुपलब्धयः वर्णिताः भवन्ति । परिचायिकायाः प्रेरणया छात्राः विश्वविद्यालये प्रवेशं कुर्वन्ति ।
**2.** श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा छात्राणां बौद्धिकविकासाय एका संरचना कृता वर्तते । विश्वविद्यालयद्वारा छात्राणां ज्ञानं वर्धेत तदर्थं **"मेधा"** इति नाम्नी एका संस्कृतमेधापीठपत्रिका प्रकाश्यते । अत्र छात्रै: स्वलेखनं स्वकौशलञ्चप्रकाश्यते । छात्रा: स्वरचितकविता:, वार्ता:, हास्यकणिका: मेधापत्रिकायै समर्पयन्ति । पुनश्च अस्या: मेधाया: संस्कृतपीठपत्रिकाया: सम्पादनं सज्जीकरणञ्च छात्रै: एव क्रियते । छात्राणां कथाचिन्तनेषु, वार्तासङ्ग्रहेषु, श्लोकरचनायाञ्च उत्साहो वर्धते । अस्यां पत्रिकायां छात्राः स्वसर्जनात्मकप्रतिभायाः प्रदर्शनं संस्कृतभाषायाम् एव कुर्वन्ति । तथा अन्यान् छात्रान् प्रेरयन्ति ।

**3.** सोमज्योतिः इति त्रैमासिकी पत्रिका विश्वविद्यालयेन प्रकाश्यते । तत्र छात्रै: आवर्षं कियत् कौशलं विविधक्षेत्रेषु प्रतिपादितमस्ति, तस्य ज्ञानं प्रदीयते। अस्यां पत्रिकायां **छात्रप्रातिभवैभवम् (Student Corner)** वर्तते । अस्यां पत्रिकायां विद्यार्थिनः स्वस्य काव्यरचनाः प्रस्तुवन्ति । प्रकाशनात् प्राक् अस्याः परिष्करणं (प्रुफरीडिंग) छात्राः कुर्वन्ति । अनया पत्रिकया छात्राणां मौलिकप्रतिभा वर्धनं तथा च छात्रेभ्यः स्वरचनाप्रकाशनार्थम् अवसरः प्राप्यते । अनया प्रेरणया अन्ये छात्राः प्रेरिताः उत्साहिनश्च भवन्ति ।

**4.**श्रीसोमनाथसंस्कृतविश्वविद्यालयेऽस्मिन् प्राध्यापकाः प्रायोगिकज्ञानेन सह स्व-स्वविषयान् पाठयन्ति । प्राध्यापकाः रेखाचित्र-प्रदर्शिन्यादिमाध्यमेन छात्रेषु रुच्युत्पादनं कुर्वन्ति । ते छात्राः अधिकाधिकं ज्ञानं प्राप्नुवन्ति । छात्राः स्वयमेव रेखाचित्राणि निर्माय सज्जीकरणमपि कुर्वन्ति ।

1. **वेदविषयः**
   वेदविभागेऽस्मिन् रेखाचित्राणि )चार्ट ( बहूनि स्थापितानि । तान्यपिरेखाचित्राणि वेदच्छात्रैः स्वहस्तेन निर्मितानि सन्ति । चित्रेषु विषयाः सन्ति यथा -समासतो वैदिकसाहित्यस्येतिहासः याज्ञवल्क्यशिक्षानुसारं वेदाध्ययनविचारादयः यथा - याज्ञवल्क्यशिक्षायां स्वरविचारः ,पाश्चात्यभाष्यकाराणां परिचयः, प्राच्यवेदभाष्यकाराणां परिचयः ,वैदिकस्वरविचारः चेति विषयाः । अनेन माध्यमेन छात्रेषु ज्ञानवर्धनं शीघ्रं भवति । तथा छात्राः स्वरीत्या पठितुं शक्नुवन्ति । यदा विविधकार्यक्रमेषु अतिथयः आगच्छन्ति तदा छात्राः एव वैदिकसाहित्यस्य, यज्ञसामग्रीणां, स्वरविचारस्य साक्षात् परिचयं कारयन्ति । प्रदर्शिन्या जनाः वैदिकसाहित्यं प्रति प्रेरिताः भवन्ति ।

**4.2 पुराणेतिहासविषयः**

पुराणविभागेऽपि पुराणसम्बन्धि-रेखाचित्राणि निर्मितानि सन्ति । चित्रमाध्यमेन भगवतः चतुर्विंशत्यवताराणां नामानि, पुराणसङ्ख्यानां श्लोकसङ्ख्यानाञ्च वर्णनं, मोक्षप्राप्तुं सर्पसोपनक्रीडा (सापसिढी) इत्यादीनि रेखाचित्राणि स्वयमेव

छात्रैः निर्मितानि । एतत्सर्वं छात्राणां बौद्धिकविकासाय सहायभूतं भवति । रेखाचित्रैः सामाजिकाः छात्राः च पुराणसाहित्यं पठितुं प्रेरिताः भवन्ति । तथा च छात्राणां चित्रकौशलं स्वचिन्तनञ्च वर्धते ।

**4.3.सर्वदर्शनविभागः**
दर्शनविभागे छात्रैः हस्तलिखितानि षड्दर्शनस्य रेखाचित्राणि चित्रितानि । अनेन विश्वविद्यालये आगताः अतिथयः सामाजिकाश्च फलकानि दृष्ट्वा षड्दर्शनस्य सामान्यं परिचयं प्राप्नुवन्ति । दर्शनविभागे यमनियमाऽऽसनप्राणायामप्रत्याहार धारणाध्यानसमाधयोऽष्टावङ्गानि इति सूत्रानुसारं योग विषयकानि चित्राणि परिकल्पितानि सन्ति । अस्याः प्रदिर्शन्याः अन्यतमः उत्तमश्च लाभो वर्तते । यद् छात्राणां अक्षराणि सुस्पष्टानि सुन्दराणि च भवन्ति । तत्र दर्शनस्य रेखाचित्राणि छात्रैः एव निर्मितानि सन्ति । तैः रेखाचित्रैः छात्राः सामाजिकाश्च सामान्यं परिचयं प्राप्नुवन्ति ।

**5.1** श्रीसोमनाथसंस्कतविश्वविद्यालयः ७-१-२०१७ तः १०-१-२०१७ दिनाङ्कं यावत् गुजरातसर्वकारेण समायोजिते **वायब्रण्ट-गुजरात-ग्लोबल-समिट्** इत्याख्ये विश्वस्तरीये
कार्यक्रमे भागं गृहीतवान् । एवं प्रकारेण विश्वविद्यालयः १७-१-२०१९ तः २२-१-२०१९ दिनाङ्कपर्यन्तं आयोजिते **वायब्रण्ट-गुजरात-ग्लोबल-समिट्** इत्याख्ये कार्यक्रमे भागं गृहीत्वा तत्र विशिष्टा प्रशंसनीया सर्वाङ्गीणविकासप्रस्तोत्री ज्ञानविज्ञानकलासाहित्यप्रभृतिपुरस्कर्त्री प्रदर्शिनी प्राध्यापकमागर्दशनेन छात्रैः निर्मिता । चित्ताकर्षकप्रदर्शिन्याः निर्माणे छात्राणां । महत् महत् योगदानमस्ति ।

**5.2 .विश्वसंस्कृतसम्मेलनम्**

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन संस्कृतभारत्या नवदेहल्यां छत्तरपुरमन्दिरपरिसरे नवम्बरमासस्य २०१९ तमे वर्षे ९ तः १२ दिनाङ्कपर्यन्तं आयोजिते प्रथम- विश्वसंस्कृतसम्मेलने भागः गृहीतः । छात्रैः सम्मेलने संस्कृतस्य विशिष्टा ज्ञानप्रवर्धिनी प्रदर्शिनी निर्मिता । प्रदर्शिन्याः वर्णितविषयान् छात्राः दर्शकेभ्यः उद्बोधितवन्तः । संस्कृते निहितज्ञानविज्ञानं प्रति जनाः जागरूकाः अभवन् ।

**6**. विश्वविद्यालयस्य भवनेषु छात्रैः एव सङ्कलितानि भित्तौ सुभाषितानि स्थापितानि सन्ति । विश्वविद्यालयेऽस्मिन् सुभाषितानि , वेदादीनां विषयाणां महत्त्वपूर्णाः, ज्ञानप्रदाः, मन्त्राः, श्लोकाश्च प्रस्थापितास्सन्ति । एतेषु सुभाषितेषु महापुरूषाणां जीवनचरित्राणि, सन्मित्रलक्षणानि, परोपकारसूत्राणि, राष्ट्रैक्यसन्देशाः, धर्मसूत्राणि, गीतोपदेशाश्च इमे विषयाः वर्णिताः । एभिः अस्माकं जीवने नूतनाः विचाराः कर्तव्याकर्तव्ययोः ज्ञानं च प्राप्यत। सुभाषितानि सर्वेषां विषयाणां मूलतत्त्वानां दर्शनं कारयन्ति। एभिः श्लोकैः सुभाषितैश्च छात्राणां मार्गः प्रशस्तो भवति तथा सुभाषितोपदेशाः छात्राणां जीवने उपयोगिताः भवन्ति ।

| File Description | Document |
|---|---|
| Data Provide the list of Published Materials (प्रमुखप्रकाशनानां/सामग्रीणां च सूची प्रददत।) | View Document |

**5.4 Alumni Engagement**
***5.4.1 The Alumni Association/Chapters (registered and functional) contributes significantly to the development of the institution through financial and non financial means during the last five years***

**पूर्वच्छात्रसङ्घः *(पञ्जीकृतः कार्यं कुर्वन् च)* विगतपञ्चवर्षेषु आर्थिकयोगदानेन अन्यैः उपायैश्च संस्थायाः उन्नत्यर्थं सार्थकतया प्रयतमानः विद्यते।**

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन सह पूर्वच्छात्रसङ्घः सततं विचारविनिमय-माध्यमेनोभयोः शैक्षणिकव्यावहारिकव्यावसायिकहितं च साधयितुं प्रवर्तते । पूर्वच्छात्रसङ्घस्य एका समितिः निर्मिता वर्तते । १०-०७-२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वच्छात्राणां online सम्मेलनम् आयोजितम् ।

पूर्वच्छात्रसङ्घस्य नियमाः रचिताः सन्ति । अस्याः समितेः पञ्जीकरणस्य कार्यं प्रवर्तमानं वर्तते । छात्रैः पञ्जीकरणाय आवेदनपत्राणि प्रपूरितानि । अस्य आजीवनसदस्यता शुल्कं द्विशतमस्ति । सदस्येभ्यः निःशुल्कं परिचयपत्र सोमज्योतिः पत्रिका च दीयते । सदस्यानां कृते इतोऽपि सुविधाः प्रदीयन्ते । यथा- ग्रन्थालयस्योपयोगं कर्तुं शक्यते । विविधेषु कार्यक्रमेषु उत्सवेषु च यथा वार्षिकोत्सवः, नवरात्रोत्सवः, पदवीदानसमारोहः, इत्यादिषु आमन्त्र्यन्ते । तेषां भोजनादि व्यवस्थाः क्रियन्ते । श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वच्छात्राः आर्थिकसाहाय्यमपि कुर्वन्ति । पङ्कजरावलमहोदयेन छात्र निधौ २०००००/ राशिः प्रदत्तः । तथा जिगरभट्टेनापि १५०००/ (पञ्चदशसहस्ररूप्यकाणि) सहयोगराशिः प्रदत्तः । अस्य पूर्वच्छात्रसङ्घस्य सङ्घटनया सङ्घस्य च छात्राः विश्वविद्यालये विभिन्नविषयेषु अध्ययनशीलैः छात्रैः सह सखित्वभावेन सह स्वविचाराणां विनिमयं कुर्वन्ति तद्यथा यथा- प्राचीनपरम्परायां गुरुं प्रति आदरभावः,नमस्कारः, सन्मित्रैः सह मित्रता, पुस्तकान् प्रति आत्मीयता, वृक्षान् प्रति सद्भावः, वृक्षं वृक्षं प्रति जलसिञ्चनम्, द्वारपालं प्रति सद्व्यवहारः, अभाषम् अकरणम्, प्रातः जागरणम्, नित्यकर्म(सन्ध्यावन्दनादि)करणीयम्, छात्रावासस्य नियमानां पालनं कर्तव्यम्, अध्ययने कथं रुच्युत्पादनं भवेद्, प्राशासनिकभवने अधिकारिभिः समं कथं मेलनं कर्तव्यम्, आवेदनम् कथं करणीयम्, कथं लेखनीयम्, संस्कृतस्याधिकाधिकः प्रयोगः, संस्कृतसम्भाषणप्रक्रिया, अभिव्यक्तिकौशलम्, वाक्कौशलम्, स्पर्धायाम् अन्तर्भावः, आत्मचिन्तनम्, ऐक्यबोधः, सत्यस्य पालनम्, विविधेषु कार्यक्रमेषु सहभागिता, स्वच्छता विषये चिन्तनम्, पर्यावरणसुरक्षा, जलसंरक्षणम् , न्यूनतमेन साधनेन स्थातव्यम्, भोजने शुद्धता विषये ज्ञानम्, पुस्तकेषु अलेखनम्, गुरुकुलवत् समयपालनञ्च, एतादृशाः उत्तमाः प्रेरकाः विचाराः साम्प्रतं पठितेभ्यः छात्रेभ्यः ददति । पूर्वतनीयाः छात्राः सङ्घकार्यक्रममाध्यमेन स्वानुभवकथनपूर्वकं एतस्य विश्वविद्यालयस्य वैशिष्ट्यं प्रदर्श्य वर्तमानकालिकान् छात्रान् प्रेरयन्ति । पूर्वतनीयेन विश्वविद्यालयस्याध्ययनाध्यापनवैशिष्ट्येन इदानीन्तनीयायां परिस्थितौ छात्रैः कथम् अध्ययन-आयामाः ग्राह्या इति अध्ययनावश्यकतां समीक्ष्य क्रमिकरूपेण संस्कृतस्य विकासाय योजनाविषयेऽपि विचारयन्ति। यदा कदापितादृशी विश्वविद्यालयीयच्छात्रैः संस्कृतस्य विकासाय, छात्रव्यक्तित्वविकासाय, अध्ययनप्रवृत्तिप्रवर्धनाय काचिद्योजना च क्रियते । तदा ते पूर्वतनीयाच्छात्राः स्व-स्वपक्षतः योग्यतानुगुणं साहाय्यमाचरन्ति । विश्वविद्यालयेन सह सततसम्पर्केण प्राचीनाः छात्राः स्वानुभवविनिमयं विदधति ।

**2.**विश्वविद्यालयस्य पूर्वच्छात्रसङ्घे वर्तमानकालिकानां विश्वविद्यालयीच्छात्राणां सम्पर्क-सूत्रं चलभाषणयन्त्रसङ्ख्या(-Mobile No.) सर्वदैव तिष्ठति येन काले-काले विशेषोत्सवावसरे तेषां पूर्वच्छात्राणाम् आह्वाने सौविध्यमुपजायते येन महान् लाभो भवति । एषः सङ्घः राष्ट्रियैकतामाध्यमेन विश्वबन्धुतायाः सन्देशं प्रसारयितुमपि भारतीयसंस्कृतेः स्वरूपानुसारं महत्त्वमावहति । अनेन श्रीसोमनाथसंस्कृतविश्वविद्यालयीयच्छात्रसङ्घेन अन्यो लाभो भवति यत् तत्सङ्घीयच्छात्रैः सह विश्वविद्यालयस्य वर्तमानकालिकाश्च छात्राः शैक्षणिक-विषयाणामालोडनं तेषाञ्च राष्ट्रनिर्माणयोजनायाः भूमिकामपि चिन्तयन्तो दृश्यन्ते । पूर्वच्छात्रसङ्घसङ्घटनया अन्यश्च लाभो भवति यत् ते प्राक्तनच्छात्राः इदानीं स्वकीय-सर्वकार-सेवा-अनुभव-उपस्थापनमाध्यमेनतैरधिगतनूतनशैक्षणिकसूचनानुभवश्रावणमाध्यमेनैतत्कालिकान् विश्वविद्यालयीयाँश्छात्रान् उपकुर्वन्ति । अतः अनया प्रक्रियया सूचनानामादानप्रदानमाध्यमेन "संगच्छध्वम्" इत्यस्याः भावनायाः छात्रेषु स्वारस्यं तिष्ठति- यद् राष्ट्रहिताय भविष्यति ।

अनेन प्रकारेणैतद्वक्तुं शक्यते यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयीयः पूर्वच्छात्रसङ्घः छात्राणां व्यक्तित्वविकासाय, राष्ट्राभ्युन्नत्यै, समाजसमृद्ध्यै, आधुनिकज्ञान-विज्ञानविषयक-प्रवृत्तिप्रवर्धनाय चातिशयं महत्त्वमाधत्ते । अत्र पठिताः छात्राः गर्वम् अनुभवन्ति । अन्यान् छात्रान् विश्वविद्यालयप्रवेशार्थम् अपि प्रेरयन्ति ।

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***5.4.2 Alumni contribution during the last five years (Amount in Rupees)***

**विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घेन प्रदत्तम् वित्तीयं योगदानम्- *(रूप्यकेषु)***

**Answer:** C. Rs. 50,000/- to Rs. 75,000/- (इ. रू. 50,000/- तः रू. 75,000/- पर्यन्तम्)

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Alumni association audited statements (पूर्वछात्रसंङ्घस्य अंङ्केक्षितलेखापत्रम्।) | View Document |

*5.4.3 Number of Alumni Association/ Chapters meetings held during the last five years.*

### विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य उपवेशनानां सङ्ख्या-

**Answer:** 2

5.4.3.1 Number of Alumni Association/ Chapters meetings held year-wise during the last five years

विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य समावेशानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 01 | 00 | 00 | 01 | 00 |

| File Description | Document |
|---|---|
| Report of the event (कार्यक्रमस्य प्रतिवेदनम्) | View Document |
| Number of Alumni Association / Chapters meetings conducted during the last five years (विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य समावेशानां सङ्ख्या) | View Document |

**6.Governance, Leadership and Management**
**6.1 Institutional Vision and Leadership**
***6.1.1 The governance of the institution is reflective of an effective leadership in tune with the vision and mission of the University***

### विश्वविद्यालयस्य दूरदृष्टिध्येयानुसारेण प्रवर्तमानस्य कार्यदक्षस्य नेतृत्वस्य प्रतिफलनं संस्थायाः प्रशासने भवति।

**Answer:**

### अस्माकं सिद्धान्तः – "पूर्णता गौरवाय" ।

### 'पूर्णता गौरवाय' इति विश्वविद्यालयस्य ध्येयवाक्यं महाकवेः कालिदासस्य कृतेः मेघदूतात् स्वीकृतम्। वाक्यमेतत् पूर्णतां श्रेष्ठतां च प्राप्तुं प्रेरयति, विश्वविद्यालयस्य स्थापनायां कारणभूतम् आदर्शम्, उद्देश्यं च सुस्पष्टतया अभिव्यनक्ति।

Pūrṇatā Gauravāya

The motto of the University is chosen from Sanskrit poet Kālidāsa's famous work Meghadūtam. It explicitly focuses on the attainment of completeness and excellence. It also speaks of the vision and idealism for which the University is established.

### अस्माकं ध्येयम्-

सर्वाः संस्थाः गुणवत्तायां श्रेष्ठतायै स्पर्धन्ते। श्रीसोमनाथसंस्कृतविश्वविद्यालयः ततः भिन्नः नास्ति। वर्तमानस्य, भविष्यतः च अत्यधिकस्पर्धायुते जगति प्रतिष्ठाप्राप्तये विश्वविद्यालयः गुणवत्तामेव आश्रयते। गुणवत्ता काचित् यात्रा, न तु गन्तव्यस्थानं किञ्चित्।

(Excellence in quality is the need of any organization and Shree Somnath Sanskrit University is no exception. To survive in the competitive world of today and tomorrow, we focus on quality. Quality is a journey not the destination.)

**अस्माकं लक्ष्यम्** –

- संस्कृतभाषायाः साहित्यस्य च विस्तृता प्रगतिः अवबोधनं विकासश्च।
- (Widespread progress, growth & development of Sanskrit language & literature.)
- आधुनिकप्रवाहेण सह समन्वयं साधयित्वा वैदिकज्ञानस्य परम्परागतरूपशिक्षायाः च दार्ढ्यं प्रोत्साहनञ्च सम्पादनीयम्।
- (Strengthen and encourage Vedic knowledge, traditional learning keeping pace with modern trends.)
- योग्यनागरिकनिर्माणद्वारा राष्ट्रनिर्माणम्।
- (Nation building through *Yogya Nāgarika Nirmāṇa)*
- ज्ञानपरम्परायाः विकासः।
- (Developing Knowledge Community)
- प्रोद्योगिक्याः महत्तमः उपयोगः।
- (Optimum use of Technology)
- बालिकानां समाजस्य उपेक्षितवर्गानां च कृते सहजप्रवेशप्रबन्धः।
- (Easy access for girls and weaker section
- गुणवत्तायुक्तशिक्षाप्रदानेन संस्कृतशिक्षणस्य उत्तमोत्तमसौविध्यप्रधानपूर्वकं विश्वविद्यालयः उत्तमाजीविकायाः अवसरं किञ्च नूतनस्पर्धाह्वानस्य सम्मुखीकरणं तथा च उत्तमोत्तमसंशोधनकार्यं लक्ष्यीकरोति।
- (Through the medium of quality education, the University aims to generate employment opportunities to meet new challenges, to give importance to research work, providing facilities for the study of Sanskrit)
- व्यावसायिकशिक्षणपाठ्यक्रमाणां योजनं किञ्च आधुनिकविज्ञानेन सह तेषाम् अन्वयः।
- To introduce professional courses and to integrate them with modern Science

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयः एतयोः ध्येयलक्ष्ययोरनुसारं कर्यं संवहति। तयोर्निर्वहणार्थं बह्व्यः भविष्यद्योजनाः निर्णेतृनिकायाः अपि आयोज्यन्ते, तेषु सर्वत्र अध्यापकानां सहभागिता भवत्येव। सर्वासु समितिषु यथा- आधिकारिकपरिषदि, शैक्षणिकपरिषदि, वित्तसमित्याम्, आन्तरिक-गुणवत्ता-मूल्याङ्कन-कक्षायाम्, प्रकाशनसमित्याम्, शोधसमित्याम्, ग्रन्थालयसमित्याम्, छात्रावाससमित्याम्, परीक्षासमित्याम्, महिलासमित्याम्, सांस्कृतिकसमित्याम्, निर्माणसमित्याम्, क्रयसमित्याम्, वाक्यार्थपरिषदि, वाग्वर्धिनीपरिषदि, छात्रसमित्याम् सोमज्योतिस्सम्पादनसमित्याम्, चलचित्रप्रदर्शनसमित्याम्, वायब्रन्टगुजरातसमित्याम्, विश्वविद्यालयप्रचारसमित्याम्, मीडियाप्रचारसमित्याम्, संस्कृतसंवर्धनसमित्याम्, शिस्ततासमित्याम् इतोपि बह्वीषु समितिषु अध्यापकानां भागग्रहणं भवति। एतासां समितीनां सञ्चालनं सुचारुरूपेण विश्वविद्यालयद्वारा क्रियते।
2. अनयोः ध्येयलक्ष्ययोः घटकतत्वानि विषयानुसारं बहूनि सन्ति येषां प्रातिनिध्यं साङ्गं वैदिकसाहित्यम्, दर्शनशास्त्रम्, साहित्यशास्त्रम्, व्याकरणशास्त्रञ्च कल्प्यन्ते।
3. विश्वविद्यालयद्वारा छात्राणां व्यक्तित्वविकासाय वैदिकशिक्षणेन सह आधुनिकपरिकल्पैः यथा- व्यायामशाला, आधुनिकयन्त्रविधानव्यवस्था क्रीडाप्राङ्गणव्यवस्था आवासस्य भोजनस्य च व्यवस्था तथा च विशेषकक्षा अपि च U.G.C NET/JRF SLET इत्यादीनां प्रशिक्षणं, प्रतियोगितासामर्थ्यप्रदर्शनाय युवमहोत्सवः, संस्कृतसप्ताहोत्सवादिकार्यक्रमाः प्रतिवर्षं लक्ष्यप्राप्त्यै आयोज्यन्ते।
4. वैदिकशास्त्राणां साहित्य-व्याकरण-न्याय-वेदान्तादिशास्त्राणां परमं प्रयोजनं वास्तविकरूपेण योग्यनागरिकनिर्माणमेवास्ति। अन्तः सात्त्विकस्रोत इव सर्वान् मनुष्यान् संस्कारयन्ति शास्त्राणि। संस्कृतसंस्कारैः योग्यनागरिकस्य निर्माणं भवत्येव।
5. विश्वविद्यालयः शैक्षणिककार्यक्रमाणां सुचारुसञ्चालनाय नेतृत्वप्रदानाय च विश्वविद्यालयप्रशासनं राष्ट्रिय-अन्ताराष्ट्रिय-अखिलभारतीयादिसङ्गोष्ठीभिः, विविधकार्यशालाभिः, समये समये व्याख्यानमालाभिः, वाक्यार्थपरिषद्भिः, वाग्वर्धिनीसभाभिश्च शिक्षकान्, छात्रान्, कर्मचारिणः च भावात्मकलक्ष्यप्राप्तिहेतवे यथाशक्यं सौविध्यम् उपस्थापयति प्रेरयति च।
6. विश्वविद्यालयः एवंविधप्रवृत्तिभिः अग्रे प्रवर्तयन् संस्कारादिमानवमूल्यबोधेन, कर्मकाण्ड-ज्ञानकाण्डादिभिः स्वव्यक्तित्वविकासेन सह समाजे स्वाजीविकायाः पूर्तीकरणेऽपि प्राचीनार्वाचीनोभयविधया शरसद्दशान् युवच्छात्रान् प्रोत्साहयति, सर्वस्मिन् विश्वे स्वाऽस्तित्वस्थापनाय परिचयं प्रज्ञापयति।

7. प्रतिवर्षं नूतनतया प्रवेष्टृणां छात्राणाम् अपरिचितसंस्कृतज्ञानां संस्कृते प्रवृत्तिप्रवेशाय तेभ्यः सत्रारम्भे एव संस्कृतसम्भाषणादिकार्यक्रमाः प्रचाल्यन्ते, येन वैदिकीं संस्कृतिम् अधिगन्तुं ते क्षमाः भवेयुः। तथा च सङ्गणकाद्याधुनिकविज्ञानशास्त्राध्ययनेन संस्कृतसाहित्ये निहितयोः ज्ञानविज्ञानयोः तत्त्वान्वेषणे जिज्ञासवः भवेयुः।
8. सर्वेषां विदुषां ज्ञानफलप्राप्त्यर्थं विश्वविद्यालयद्वारा उत्तमशोधग्रन्थानां मूल्याङ्कनं विषयविशेषज्ञैः कारयित्वा प्रकाशनं क्रियते। स्वरचितकाव्यानि नूतनाविष्कृतज्ञानसम्पदं च प्रकाशनाय नियमानुसारं कार्यं कृत्वा लक्ष्यप्राप्त्यै निर्मीयन्ते।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.1.2 The institution practices decentralization and participative management***

### संस्था सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च अनुसरति।

**Answer:**

श्रीसोमनाथसंस्कृतविद्यालये मुख्यतया विभागद्वयं वर्तते शैक्षणिकं प्राशासनिकमिति। विभागद्वयस्यैवाधिकारी नियामकश्च भवति विश्वद्यालयस्य मान्यः कुलपतिः। मान्यः कुलपतिः समये समये शैक्षणिकाणां प्राशासनिकानां च प्रवृत्तीनां योजनाय सत्रारम्भात् पूर्वमेव तत्तद्विभागान् शैक्षणिकसंस्थायाम् अध्यक्षं तथा प्रशासनविधौ कुलसचिवं च सूचयति । एते विभागाध्यक्षाः स्वस्वशैक्षणिक-प्राशासनिकविभागेषु प्रवर्तमानकर्मणि भविष्यद्दृष्टियोजनाफलकं च संवीक्ष्य समये समये प्रवर्तयन्ति। शैक्षणिककार्यकलापान् संविधातुं कुलपतिना चिताः सङ्कायाध्यक्षाः समये समये सङ्गोष्ठीः, कार्यशालाः, परिसंवादाः, व्याख्यानमालाः, अभ्याससमितिद्वारा अभ्यासपरिवर्तनादिकं तेषां पर्यवेक्षणं च कारयन्ति।

1. प्राशासनिककार्यान्तर्गताः परीक्षासम्बद्धाः सर्वाः व्यवस्थाः यथा परीक्षाणां परिकल्पना, प्रश्नपत्रनिर्मातृणां सूची, मूल्याङ्कनकार्यम्, परीक्षापरिणामोद्घोषणादयः प्रधानप्रशासनाधिकारी कुलसचिवस्य पर्यवेक्षणे परीक्षानियमाधिकारी सम्पादयति।
2. शोधकार्यसम्पादनाय शोधसमित्याः निर्माणं विश्वविद्यालयेन कृतमस्ति। तत्र समित्या अध्यक्षः मान्यः कुलपतिर्भवति, विविधविभागानाम् आचार्याः अध्यापकाश्च सभ्याः भवन्ति। तत्र संशोधनाधिकारी सभ्यसचिवरूपेण कार्यं निर्वहति। आवश्यकतानुसारं सभ्यसचिवः अध्यक्षस्य अनुमत्या समितेः उपवेशनं कारयित्वा तत्र विचारणीयविषयान् संस्थाप्य सदस्यानाम् अनुमोदनञ्च सम्प्राप्य पुनः तेषां कार्यान्वयनं तत्तद्विभागैः सह साधयति। एवं प्रकारेण शोधसमितिः विश्वविद्यालयस्य लक्ष्यं प्रति अग्रेसरति।
3. ग्रन्थालयसम्बद्धविषयानां विचारणाय विश्वविद्यालयेन ग्रन्थालयसमितेः रचना कृतास्ति। अस्याः समित्याः अध्यक्षः मान्यः कुलपतिः भवति। तथा सभ्यसचिवः मुख्यग्रन्थपालः भवति। सभ्यरूपेण विविधसङ्कायाणाम् अध्यक्षाः एवं कार्यकारिपरिषदा अनुमोदिताधिकारिणः अध्यापकाश्च भवन्ति। ग्रन्थालये अपेक्षितपुस्तकानां वृत्तपत्राणां, त्रैमासिक-षाण्मासिकादिशोधपत्राणां ग्राहकत्वमत्र मान्यकुलपतेः समक्षे विचार्य सभ्यानामनुमोदनञ्च प्राप्य विश्वविद्यालयस्य ग्रन्थपालः स्वीकरोति। तथा च विभागेषु आवश्यकपुस्तकानां कोशग्रन्थानां च विवरणं तत्तद्विभागाचार्याध्यापकेभ्यः छात्रेभ्यश्च स्वीकृत्य क्रयणं क्रियते, येन शैक्षणिकं कार्यं सफलतया पूर्णतां प्रति गच्छेत्। एवं च संशोधनाय ज्ञानार्जनाय च अपेक्षितानां पुस्तकानां सन्दर्भग्रन्थानां कोशग्रन्थानामावश्यकता भवति तर्हि तत्सर्वं कार्यं ग्रन्थालयाध्यक्षस्य निरीक्षणे सम्भवति ।

सर्वासामपि समितीनां साफल्यसिद्ध्यर्थं 'धनमूलमिदं जगत्' इति प्रसिद्धवाक्यानुसारं धनमपेक्षितं भवति। सर्वत्रैव शोधग्रन्थानां प्रकाशनार्थं सङ्गोष्ठीनामायोजनार्थं, कार्यशाला-व्याख्यानमालादीनाम् आयोजनार्थं, विविधग्रन्थानां क्रयार्थं, प्रश्नपत्रनिर्माणार्थं, परीक्षासम्पादनार्थं, मूल्याङ्कनार्थं, धनस्य अपेक्षा विद्यते एव। धनस्य आवश्यकतापूर्त्यै वित्तसमित्याः रचना कृतास्ति। मान्यः कुलपतिः वित्तसमितेः आध्यक्षो भवति। सभ्यसचिवरूपेण वित्ताधिकारी कार्यं सम्पादयति। अस्यां

समित्यां विविधविश्वविद्यालयानाम् उत्तमशिक्षाविदः, वित्तप्रबन्धनविषये अनुभविनः प्राशासनिकक्षमताशालिनः च सभ्यरूपेण भवन्ति। आवश्यकतानुसारं वित्तसमित्याः उपवेशनं भवति। तत्र अनुमोदितविषयानां कार्यान्वयनं नियमानुसारेण विश्वविद्यालयस्य तत्तद्विभागद्वारा क्रियते।

लक्ष्यस्य पूर्तये सर्वविधापेक्षितशैक्षणिककार्याणां विमर्शाय अनुमोदनाय च विश्वविद्यालयद्वारा शैक्षणिकपरिषदः रचनापि कृतास्ति। एषा परिषद् विविधपाठ्यक्रमाणां व्यवस्थां नवीन-शोधक्षेत्रविमर्शनमित्येतादृशप्रसङ्गान् विमृशति। तथा च लक्ष्यपूर्तये अपेक्षितम् अनुमोदनं विदधाति। समित्यामस्यां मान्यः कुलपतिः अध्यक्षो भवति। कुलसचिवः सभ्यसचिवो भवति। विशिष्टविद्वांसः विभिन्नविश्वविद्यालयानाम् आचार्याः प्रधानाचार्याः सङ्कायाध्यक्षाश्च सभ्याः भवन्ति।

आन्तरिक-गुणवत्ता-मूल्याङ्कन-कक्षाद्वारा एतेषां सर्वविधक्रियाकलापानां मूल्याङ्कनं किञ्च निरन्तरविकासार्थं गुणवत्तानियन्त्रनं तत्संवर्धनञ्च विधातुं विश्वविद्यालयपक्षतः कार्यं क्रियते।

एवं प्रकारेण विश्वविद्यालये शैक्षणिक-प्राशासनिकानि कार्याणि संस्थायाः कार्यकलापाश्च सुष्ठु नियम्यन्ते सम्पाद्यन्ते च। शिक्षकैः प्रशासनिकैश्च तेषां साफल्यार्थं विशिष्टयोगदानं दत्त्वा ध्येयलक्ष्यं प्रति नीयते तथा संस्थायाः उन्नत्यै, गुणवत्तायाः प्रवर्धनाय च सततं समग्रतया प्रयतते। सर्वेषां समितीनां कार्यकारिपरिषद्वारा अनुमोदनानन्तरम् एव कार्यान्वयनं क्रियते।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.1.3 Sanskrit-Version of vision, mission statement of the university, the Act, Statute, MoA and Rules, Official notification/information, Regulations are available in institutional website.***

**विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां, विनियमानाञ्च संस्कृतरूपान्तरणम् उपलभ्यते।**

**Answer:**

1. **श्रीसोमनाथसंस्कृतविश्वविद्यालयः संस्कृतस्य संवर्धनाय सम्पूर्णपरिसरं संस्कृतमयं कर्तुं कटिबद्धो वर्तते।**
2. **प्राशासनिककार्यालये संस्कृतस्य प्रोत्साहनविधिः** –

विश्वविद्यालयेन प्राशासनिककार्यालये यथाशक्यं संस्कृतस्य प्रोत्साहनार्थं सञ्चिकाः संस्कृतमाध्यमेन सञ्चालनाय कानिचनसंस्कृतवाक्यानि गुर्जरभाषायाम् अनुवादं कृत्वा सूचिका निर्मीय प्रदत्तास्ति। तदनुसारं सञ्चिकासु मध्ये मध्ये संस्कृतस्य उल्लेखः क्रियते। विश्वविद्यालयस्य सिद्धान्त-ध्येय-लक्ष्यपत्राणि अपि संस्कृतेन संरच्य सर्वत्र परिसरे संलग्नानि सन्ति। तथा समये समये तेभ्यः संस्कृतसम्भाषणशिबिराण्यपि आयोज्यन्ते।

1. **शैक्षणिककार्यक्रमेषु संस्कृतस्य प्रयोगविवरणम्** –

यावच्छक्यं शैक्षणिककार्याणि संस्कृतमाध्यमेन व्यवह्रियन्ते। सर्वविधकार्यक्रमाः यथा- शास्त्राणां पाठनं संस्कृतमाध्यमेन कार्यते। छात्रेभ्यः सह सामान्यवार्तालापः संस्कृतमाध्यमेन क्रियते। सङ्गोष्ठीणां कार्यशालानां विशिष्टकार्यक्रमाणाञ्च सञ्चिकाः, प्रचारप्रसारपत्राणि, परिचायिका च संस्कृतमाध्यमेन संरच्यन्ते। विश्वविद्यालयस्य मुखपत्रमपि संस्कृतमाध्यमेन निर्मितमस्ति। विश्वविद्यालस्य विविधफलकानां नामानि, अधिकारिणाम्, अध्यापकाणां, कर्मचारिणां नाम-पदानि अपि सर्वत्र परिसरे संस्कृतमाध्यमेन संलग्नानि सन्ति।

- शास्त्रेषु प्रतिपादितविविधसुभाषितानां हिन्दीभाषानुवादसहितफलकानि संस्कृतमाध्यमेन स्थापितानि। वाग्वर्धिनीपरिषद्, वाक्यार्थपरिषद्, विभिन्नसङ्गोष्ठ्यः, विभिन्नस्पर्धाः संस्कृतमाधमेन सञ्चाल्यन्ते। सर्वविधकार्यक्रमाणां सत्रसञ्चालनमपि संस्कृतमाधमेन आचर्यते। स्पर्धानां सूचनाः, नियमाः, व्याख्यानमालाः, कार्यक्रमाणां अधिसूचनाः, सत्रसञ्चालनाय सूच्यः, आमन्त्रणपत्राणि सर्वाण्यपि संस्कृतमाध्यमेन विलिख्यन्ते तथा सम्बद्धविद्वद्भ्यः सम्प्रेष्यन्ते च।

शैक्षणिकस्वाध्यायकार्याणि, महाविद्यालयेभ्यः शिक्षणसम्बद्धव्यवहाराः संस्कृतमाध्यमेन व्यवह्रियन्ते। सोमज्योतित्रैमासिकपत्रिका संस्कृतमाध्यमेन सञ्चाल्यते। छात्रेभ्यः आन्तरिकसूचनाः, समयपत्राणि,अधिसूचनाश्च संस्कृतमाध्यमेन दीयन्ते।

शैक्षणिकगतिविधिषु सर्वत्रैव प्रायः शतप्रतिशतं संस्कृतस्य व्यवहारः क्रियते। तत्र कर्तव्यावकाशप्रत्रम्(D.L), सामान्यावकाशपत्रम्(C.L), इत्यत्रापि कृतमस्ति।

1. **फलम्** – बाह्यविभिन्नविश्वविद्यालयेभ्यः विविधविषयनिष्णातारः अतिथयः ये श्रीसोमनाथसंस्कृतविश्वविद्यालयं प्रति समागच्छन्ति तेभ्यः संस्कृतेन सह परिचयः भवति, संस्कृतसूक्तीनामध्ययनेन प्रशान्तचित्ताः भूत्वा आनन्दमनुभवन्ति। ततः स्वविश्वविद्यालयं गृहञ्च गत्वा संस्कृतसम्पोषणमपि समाजाय सम्प्रेषयन्ति।

विश्वविद्यालये देशस्य विविधप्रान्तेभ्यः छात्राः सततम् अध्ययनरताः भवन्ति। एवंविभिन्नप्रान्तेभ्यः च समागताः अध्यापकाः अध्यापनरताः भवन्ति। एतेषां सर्वेषामपि मातृभाषाः भिन्नाः, आचाराः भिन्नाः, व्यवहाराश्च भिन्नाः तथापि सर्वे वसुधैवकुटुम्बकमितिवद्वसन्ति। तत्कारणं केवलं संस्कृतमेव। सर्वे संस्कृतेन सम्भाषन्ते व्यवहरन्ते च।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Sanskrit-Version of vision, mission statement documents on the website(दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने उपलभ्यते) | View Document |
| Provide the weblink of the Sanskrit version of all documents(सर्वेषां प्रलेखानां संस्कृतरुपान्तरणस्य जालसन्धानं प्रयच्छतु) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**6.2 Strategy Development and Deployment**

***6.2.1 Perspective/Strategic plan and deployment documents are available in the institution***

### संस्थायां भविष्यद्योजनायाः/व्यूहात्मकयोजनायाः नियोजनप्रलेखा उपलभ्यन्ते क्रियान्वयनसम्बद्धानि प्रमाणानि वा उपलभ्यन्ते।

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सञ्चालनं सुचारुरूपेण भवेदित्येतदर्थम् अधिनियमानुसारं आधिकारिकपरिषद्, विद्वत्परिषद्, वित्तसमितिश्च विहिताः सन्ति। तथा च छात्रान् संलक्ष्य छात्रालयसमितिः, रैगिंगविरोधसमितिः इत्यनयोः संघटना कृताऽस्ति। किञ्च विभिन्नविभागानां सम्यक्सञ्चालनाय ग्रन्थालयसमितिः, प्रकाशनसमितिः, क्रयसमितिः, भवननिर्माणसमितिः, परीक्षासमितिः, समस्यानिवारणसमितिः, महिलाविषयक-समस्या-निवारणसमितिः(Women Redressal Grievance Committee) च रचितास्सन्ति यथा-

1. **कार्यकारिणीपरिषद्** –

विश्वविद्यालयस्याधिनियमः क्रमाङ्कः-२० इत्यनुसारं समितेः कालः वर्षत्रयं भवति।कार्यकारिणीपरिषदि आहत्य दशमहानुभावानां समावेशः भवति। तत्र विश्वविद्यालयस्य मान्यः कुलपतिः पदेन अध्यक्षो भवति। सभ्यसचिवरूपेण विश्वविद्यालयस्य कुलसचिवः भवति। अतिरिक्ताष्टसभ्यानां विवरणं यथा – १ शिक्षणविभागस्य सचिवः, गुजरातसर्वकारः।

१ गुजरातसर्वकारस्य शिक्षणविभागस्य उच्चशिक्षणाधिकारी।

२ संस्कृतस्य विषयनिष्णातारौ द्वौ विद्वांसौ (अध्यक्षेण मनोनितौ)।

२ संस्कृतविद्वांसौ/अधिकारिणौ (राज्यसर्वकारद्वारा मनोनितौ)।

१ सङ्कायाध्यक्षः, (अध्यक्षेण मनोनितः)।

- महाविद्यालयस्य प्रधानाचार्यः, (अध्यक्षेण मनोनितः)।

1. **कार्यकारिणीपरिषदः कार्यक्षेत्रम्** –

अस्यां समित्यां विश्वविद्यालयान्तर्गतसर्वविधनीतिविषयकनिर्णयाः समागच्छन्ति। सर्वकारेण सह सामञ्जस्यं च विधाय विश्वविद्यालयस्य सर्वविधकार्याणि क्रियन्ते। विभिन्नसमितिषु कृतनिर्णयानामुपरि विचार्य आवश्यकतानुसारं मूल्याङ्कनं कृत्वा महत्त्वपूर्णविषयास्सर्वे अनुमोद्यन्ते।

1. **विद्वत्परिषद्-**

विश्वविद्यालयस्याधिनियमक्रमाङ्कः-२२ इत्यनुसारं समितेः कालः वर्षत्रयं भवति। अस्यां परिषदि आहत्य २६ महानुभावानां समावेशः भवति। तत्र विश्वविद्यालयस्य मान्यः कुलपतिः पदेन अध्यक्षो भवति। साचिव्यं कुलसचिवः निर्वहति। अन्ये २५ सभ्यानां विवरणं अधोलिखितमस्ति –

१ गुजरातसर्वकारस्य शिक्षणविभागीय-सचिवः।

१ गुजरातसर्वकारस्य उच्चशिक्षणायुक्तः।

१ गुजरातसर्वकारस्य माध्यमिक-उच्चतरमाध्यमिकशिक्षणविभागायुक्तः।

१ गुजरातराज्यस्य राज्यशिक्षणसमितेः (Board) अध्यक्षः।

५ सदस्याः संस्कृतक्षेत्रे सुप्रसिद्धविद्वांसः, तत्रापि एका महिला, एकः अन्यराज्यतः प्रतिष्ठितविद्वान्, (राज्यसर्वकारद्वारा मनोनिताः)।

५ सदस्याः संस्कृते, वेद-वेदाङ्ग, दर्शन, पुराणशास्त्रेषु सुप्रतिष्ठितेषु विद्वत्सु राज्यसर्वकारद्वारा सूचितसुप्रतिष्ठितविद्वांसः, तत्रापि एका महिला, एकः अन्यराज्यतः प्रतिष्ठितसंस्कृतविद्वान्, (राज्यसर्वकारद्वारा मनोनिताः)।

२ मूर्धन्यविद्वांसौ (अध्यक्षेण मनोनितौ)।

४ सङ्कायाध्यक्षाः, (अध्यक्षेण मनोनितः)।

१ संलग्नमहाविद्यालयस्य प्रधानाचार्यः (अध्यक्षेण मनोनितः)।

१ संलग्नमहाविद्यालयस्य प्राध्यापकः (अध्यक्षेण मनोनितः)।

१ मान्यताप्राप्तसंस्थायाः प्राध्यापकः(अध्यक्षेन मनोनितः)।

१ संलग्नमहाविद्यालयस्य महिलाध्यापिका (अध्यक्षेण मनोनिता)।

१ निदेशकः, संशोधनम् (अध्यक्षेण मनोनितः)।

1. **विद्वत्परिषदः कार्यक्षेत्रम्** –

अस्यां समित्यां विश्वविद्यालयान्तर्गतसर्वविधशैक्षणिकनिर्णयाः स्वीक्रियन्ते; यथा विश्वविद्यालयस्य संलग्नमहाविद्यालयानाञ्च अध्यापनम्, परीक्षासम्बद्धसर्वविषयाणां तथा सामान्यनियमनकार्याणि सर्वाण्यपि अत्रैव चर्च्यन्ते। तत्तत्सङ्कायद्वारा संसूच्यमानविषयाः यथा अभ्यासक्रमाः, संस्थानां संयोजनाय संस्थामान्यताविषयः, सङ्काये विषयानां संयोजनम्, इतरसंस्थानां विविधपरीक्षाणां मान्यता, विद्यार्थिभ्यः शिष्यवृत्तिः, पदकानि, पदव्यः, मानदोपाधिः, प्रमाणपत्राणि, संशोधनसम्बद्धकार्याणि शैक्षणिकसम्बद्धनिर्णयाश्चेति ।

1. **सङ्कायाः -**

विश्वविद्यालयस्याधिनियमक्रमाङ्कः-२४ इत्यनुसारं सङ्कायस्य अध्यक्षः निर्धारित-नियम-भूमिकां निर्वहति। अस्य समयावधिः वर्षत्रयं भवति। विश्वविद्यालयस्य विविधसङ्कायानां विवरणं इत्थमस्ति –

- साहित्यसङ्कायः (वैदिकाभ्यासः, संस्कृतभाषा एवं संस्कृतसाहित्यम्)।
- वेद-वेदाङ्गसङ्कायः।
- दर्शनसङ्कायः (भारतीयतत्त्वज्ञानम्)।
- शिक्षकप्रशिक्षणसङ्कायः (शिक्षकप्रशिक्षणम्)।
- पुराणसङ्कायः।
- आधुनिकविज्ञानम् एवं प्राचीनशास्त्रसङ्कायः (धर्मशास्त्रम्, आयुर्वेदः, ज्योतिषशास्त्रम्, हस्तप्रतिशास्त्रम्, पुराणलेखशास्त्रम्, भौतिकशास्त्रम् एवं रसायनशास्त्रम्)।

1. **विश्वविद्यालयस्य सङ्कायानां कार्यक्षेत्रम्** –

विश्वविद्यालयस्य विविधसङ्कायेषु अभ्यासक्रमनिर्माणम्, तत्तत्सङ्कायस्य विषयप्रदानम्, संशोधने उन्नतिप्राप्त्यर्थं कार्याणि क्रियन्ते। ग्रन्थालये सङ्कायानुसारं पुस्तकानामुपलब्धिः, सङ्काये अभ्यासरतानां विद्यार्थिभ्यः शिष्यवृत्तिः, पदकानि, पदव्यः, प्रमाणपत्राणि, परीक्षासम्बद्धनियमानुसारम् अनुमोदनं विदधाति।

1. **वित्तसमितिः** –

श्रीसोमनाथसंस्कृतविश्वविद्यालयः २००५ अधिनियमक्रमाङ्कः-२७ इत्यनुसारं वित्तसमित्याः संरचना कृतास्ति। एतस्याः समयावधिः वर्षत्रयं भवति। वित्तसमित्याम् आहत्य अष्ट महानुभावानां समावेशः भवति। तत्र विश्वविद्यालयस्य मान्यः कुलपतिः पदेन अध्यक्षो भवति। सभ्यसचिवरूपेण वित्ताधिकारी भवति। अन्यसभ्यरूपेण विविधविश्वविद्यालयानां वित्तविषयकानुभाविनः महानुभावाः अपि समन्विताः भवन्ति। अनया समित्या वित्तसम्बद्धसमीक्षा क्रियते। आय-व्ययविवरणादिकम् अस्यां समित्यां सम्पाद्यते। तथैव पूर्वयोजनानुसारम् उचितरूपेण व्ययकरणाय निश्चयः क्रियते। विश्वविद्यालये समये समये वित्तस्य स्थितेः समीक्षा अपि क्रियतेऽनया समित्या।

1. **व्यूहात्मकयोजनाधारेण सफलतया सम्पादितकार्यविवरणम्- प्रकाशनकार्यम्**– श्रीसोमनाथसंस्कृतविश्वविद्यालयस्यान्तरिकरचनायां स्नातक-अनुस्नातकविभागौ, सप्तसङ्कायाश्च साहित्यादिविषयाणां समाविष्टाः सन्ति। यन्माध्यमेन संस्कृत-भाषा-साहित्ययोः अध्ययनाध्यापनेन सह तयोः प्रचारञ्च करोति।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अधिनियमक्रमः – ५७(XII) अनुसारं प्रकाशनसमित्याः संरचना शोधकार्यप्रकाशनसम्पादनाय विश्वविद्यालयेन कृतास्ति । तत्र सर्वासां समितीनां पदेन अध्यक्षः मान्यः कुलपतिर्भवति, विविधविषयाणाम् आचार्याः अध्यापकाश्च सभ्याः भवन्ति। संशोधनाधिकारी च सभ्यसचिवरूपेण कार्यं निर्वहति। आवश्यकतानुसारं सभ्यसचिवः समितेः उपवेशनं कारयति। तत्र विचारणीयविषयान् अध्यक्षस्य सम्मुखे संस्थाप्य सदस्यानाम् अनुमोदनञ्च सम्प्राप्य अध्यक्षस्य अनुमतिं स्वीकृत्य सभ्यसचिवः आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रदृष्ट्या मूल्याङ्कनं कारयित्वा पुनः तेषां कार्यान्वयनं तत्तद्विभागद्वारा साधयति। विश्वविद्यालयः आन्तरिकगुणवत्तोपचयनसन्दर्भे शोधप्रधानग्रन्थानां समये समये प्रकाशनं करोति, यदनुसारं २०१५ तः २०२० मार्च मासपर्यन्तं ३३ विविधप्रकारकशोधग्रन्थानां प्रकाशनं जातमस्ति तद्विवरणमित्थम्-

- श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमालायाम् – पञ्चविंशतिः ग्रन्थाः (२५),
- श्रीसोमनाथसंस्कृतविश्वविद्यालयशोधग्रन्थमालायाम् – त्रयः ग्रन्थाः (३),
- श्रीसोमनाथसंस्कृतविश्वविद्यालयशास्त्रग्रन्थमालायाम् – पञ्च ग्रन्थाः (५)।

विश्वविद्यालयस्य प्रकाशनसमित्या एतावत्पर्यन्तं ६७ शोधग्रन्थाः प्रकाशितमस्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Strategic Plan and deployment documents on the website(• व्यूहात्मकयोजनायाः नियोजनप्रलेखाः जालस्थाने उपलभ्यन्ते।) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.2.2 Organizational structure of the University including governing body, administrative setup, and functions of various bodies, service rules, procedures, recruitment, promotional policies as well as grievance redressal mechanism.***

**संस्थायां सर्वविधाः प्रबन्धनव्यवस्थासंरचनाः यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था, विविधनिकायानां कार्याणि, सेवानियमाः, प्रक्रियाः, नियुक्तयः, पदोन्नतिनियमाः, परिदेवनानिवारणकार्यप्रणाल्यश्च उपलभ्यन्ते।**

**Answer:**

श्रीसोमनाथसंस्कृतविद्यालयस्य सर्वविधाः प्रबन्धनव्यवस्थाः संरचनाः **गुजरातसर्वकारस्य नियमानुसारं तथा विश्वविद्यालयानुदानायोगस्यानुसारं** प्रचलन्ति। विश्वविद्यालये शैक्षणिकं प्राशासनिकमिति विभागद्वयस्यैवाधिकारी नियामकश्च भवति मान्यः कुलपतिः। तत्र विश्वविद्यालयाधिकाराः- कार्यकारिणीपरिषद्, विद्वत्परिषद्, विविधसङ्कायाः, वित्तविभागः, तथा नियमेषु प्रतिपादिताः सम्बद्धविभागाः परिगण्यन्ते। तत्रापि शैक्षणिकविभागे विद्वत्परिषदि विविधसङ्कायाः तथा अभ्यासक्रमनिर्माणसमितिः(BOS) अपि सम्मिलिताः भवन्ति। सङ्कायेषु स्नातकोत्तरविभागः, ततः विविधविभागानामध्याक्षाः, आचार्याः, सहाचार्याः, सहायकाचार्याः च समागच्छन्ति।

प्रशासनविभागे मान्यः कुलसचिवः, तस्य निरीक्षणे विविधविभागाः परिगण्यन्ते ते यथा – विश्वविद्यालयप्रशासनविभागः, वित्तविभागः, भवननिर्माणविभागः, प्रवेशः तथा परीक्षाविभागः, संशोधनविभागः, ग्रन्थालयविभागः, सङ्गनकविभागश्च।

- **कार्यकारिणीपरिषदः कार्यक्षेत्रम्** –

अस्यां समित्यां विश्वविद्यालयान्तर्गतसर्वविधनीतिविषयकनिर्णयाः समागच्छन्ति। सर्वकारेण सह सामञ्जस्यं च विधाय विश्वविद्यालयस्य सर्वविधकार्याणि क्रियन्ते। विभिन्नसमितिषु कृतनिर्णयानामुपरि विचार्य आवश्यकतानुसारं मूल्याङ्कनं कृत्वा महत्त्वपूर्णविषयास्सर्वे अनुमोद्यन्ते।

- **विद्वत्परिषदः कार्यक्षेत्रम्** –

अस्यां समित्यां विश्वविद्यालयान्तर्गतसर्वविधशैक्षणिकनिर्णयाः स्वीक्रियन्ते; यथा विश्वविद्यालयस्य संलग्नमहाविद्यालयानाञ्च अध्यापनम्, परीक्षासम्बद्धसर्वविषयाणां तथा सामान्यनियमनकार्याणि सर्वाण्यपि अत्रैव चर्च्यन्ते। तत्तत्सङ्कायद्वारा संसूच्यमानविषयाः यथा अभ्यासक्रमाः, संस्थानां संयोजनाय संस्थामान्यताविषयः, सङ्काये विषयानां संयोजनम्, इतरसंस्थानां विविधपरीक्षाणां मान्यता, विद्यार्थिभ्यः शिष्यवृत्तिः, पदकानि, पदव्यः, मानदोपाधिः, प्रमाणपत्राणि, संशोधनसम्बद्धकार्याणि शैक्षणिकसम्बद्धनिर्णयाश्चेति

- **विश्वविद्यालयस्य सङ्कायानां कार्यक्षेत्रम्** –

विश्वविद्यालयस्य विविधसङ्कायेषु अभ्यासक्रमनिर्माणम्, तत्तत्सङ्कायस्य विषयप्रदानम्, संशोधने उन्नतिप्राप्त्यर्थं कार्याणि क्रियन्ते। ग्रन्थालये सङ्कायानुसारं पुस्तकानामुपलब्धिः, सङ्काये अभ्यासरतानां विद्यार्थिभ्यः शिष्यवृत्तिः, पदकानि, पदव्यः, प्रमाणपत्राणि, परीक्षासम्बद्धनियमानुसारम् अनुमोदनं विदधाति।

- **विश्वविद्यालयप्रशासनविभागस्य कार्यक्षेत्रम्** – प्रशासनविभागस्याधिकारी मान्यः कुलसचिवः भवति। संस्थायाः सर्वविधव्यवस्थाः, विविधनिकायानां कार्याणां योजनाः, नियुक्तिप्रक्रियाः, कार्यकारिणीपरिषदः अनुमोदनेन सह गुजरातसर्वकारस्य एवं विश्वविद्यालयानुदानायोगस्य नियमानुसारञ्च समये समये कार्यं सम्पादनीयं भवति।
- **वित्तविभागस्य कार्यक्षेत्रम्** – वित्तविभागस्य मुख्यः वित्ताधिकारी भवति। अस्य कार्यनिर्वहणार्थं वित्तसमित्याः रचनापि कृतास्ति। विश्वविद्यालयस्य वित्तविभागः विश्वविद्यालये प्राप्यमानायव्ययविवरणस्य निरीक्षणं तथा

संरक्षणञ्च करोति। वित्तवर्षानुसारम् विश्वविद्यालये वित्तसमित्या आवर्षस्य परिकल्पितव्ययविवरणस्य आयोजनं कृत्वा कार्यकारिणीपरिषदि अनुमोदनञ्च सम्प्राप्य सर्वकारं प्रति प्रेष्यते। सर्वकारात् अनुमोदं प्राप्य प्रत्यागतस्य धनराशेः व्ययः वित्तविभागद्वारा राज्यसर्वकारस्य नियमानुसारं विश्वविद्यालयस्य कार्ययोजनानुगुणं धनव्ययस्य विवरणं लेखापरीक्षणद्वारा परीक्ष्य पुनः राज्यसर्वकारं प्रति प्रेष्यते। वित्तविषयकसर्वविधं कार्यमनेन वित्तविभागेनैव सम्पाद्यते।

- **भवननिर्माणविभागस्य कार्यक्षेत्रम्** – भवननिर्माणविभागस्य मुख्यः भवननिर्माणाधिकारी भवति। एतदर्थं भवननिर्मानसमितिरपि रचिता वर्तते। अस्याः समित्याः पर्यवेक्षणे राज्यसर्वकारस्य नियमानुसारं विश्वविद्यालये भवननिर्मानाय अनुमोदितानां भवनानां निर्माणं सम्पाद्यते।
- **प्रवेशः तथा परीक्षाविभागस्य कार्यक्षेत्रम्** – परीक्षाविभागस्य अधिकारी परीक्षानियामकः भवति। अयं कुलसचिवस्य मार्गनिर्देशने परीक्षासम्बद्धसर्वविषयाणां कार्यं परीक्षासमित्या सम्पादयति। छात्रप्रवेशादारभ्य पदवीदानपर्यन्तं सम्पूर्णं कार्यम् एतद्विभागद्वारा सम्पाद्यते। तत्र प्रवेशक्रमाङ्कः, सत्रानुसारं परीक्षाकार्यं, प्रश्नपत्रनिर्माणकार्यम्, मूल्याङ्कनकार्यं पुनः तेषां स्नातक-स्नातकोत्तर-तत्त्वाचार्य-शोधपदवीदानादिकार्यं सर्वं विविधसङ्कायानां विद्वत्परिषदः अनुमोदनेन सम्पाद्यते।
- **संशोधनविभागस्य कार्यक्षेत्रम्** – संशोधनविभागस्य मुख्यः अधिकारी संशोधनाधिकारी भवति। शोधसम्बद्धसर्वविधकार्यसम्पादनाय विश्वविद्यालयद्वारा संशोधनसमित्याः रचना कृतास्ति। विभागेनानेन तत्त्वाचार्यः तथा शोधविषयकाः कार्यकलापाः यथा षाण्मासिकं निरीक्षणं (RDC), शोधसारांशिकानां शोधप्रबन्धानाञ्च सङ्कलनं कृत्वा विषयविशेषज्ञैः संशोधयित्वा तेभ्यः शोधच्छात्रेभ्यः विद्यावारिधिपदव्यादयः सम्बद्धसङ्कायानाम् अनुमोदनेन सम्पादयति।
- **ग्रन्थालयविभागस्य कार्यक्षेत्रम्** – ग्रन्थालयस्य अधिकारी ग्रन्थपालः भवति। ग्रन्थालये अपेक्षितकार्याणां सम्पादनाय ग्रन्थालयसमितेः निर्माणं कृतमस्ति। अस्यां समित्यां ग्रन्थालये अपेक्षितनां विविधविषयानां सङ्कायानुसारं ग्रन्थानां सङ्ग्रहः, तथा दैनन्दिनपत्रिकानां, वारपत्रिकानां, मासपत्रिकानां, षाण्मासिक-वार्षिकपत्रिकाणाञ्च क्रयादिकं वित्तसमित्याः अनुमोदनेन क्रियते। ग्रन्थालये अध्यापकेभ्यः प्रशासनिककर्मचारिभ्यः विद्यार्थिभ्यश्च तत्तद्विषयानुसारमपेक्षितपुस्तकानां वितरणमपि विभागेनानेन नियमानुसारं क्रियते।

- महिलाविषयक-समस्या-निवारणसमितिः (Women Redressal Grievance Committee) छात्रसमस्यानिवारणसमितिः च रचितास्सन्ति।

| File Description | Document |
|---|---|
| Upload the document of functions of the University and policies. (विश्वविद्यालयस्य एवं तन्नियमानां च कार्यप्रणाल्याः प्रलेखाः उपारोपणीयाः।) | View Document |
| Upload document depicting the organizational structure including, governing body and administrative setup. (सर्वविधानां प्रबन्धनव्यवस्थासंरचनानां विवरणं प्रयच्छतु- यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था च।) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.2.3 Implementation of e-governance in areas of operation***

***1. Planning and Development***

***2. Administration***

***3. Finance and Accounts***

*4. Student Admission and Support*

*5. Examination*

**क्रियान्वयनक्षेत्रेषु वैद्युतप्रशासनस्य नियोजनम्**

*1.* **योजना, विकासश्च**

*2.* **प्रशासनम्**

*3.* **वित्तं, लेखाश्च**

*4.* **छात्राणां प्रवेशः, प्रोद्वलनं च**

*5.* **परीक्षा**

**Answer:** B. Any 4 of the above (आ. उपर्युक्तेषु केचन चत्वारः)

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Screen shots of user interfaces(प्रयोक्तुः अन्तःपृष्ठानां फलकचित्राणि) | View Document |
| ERP (Enterprise Resource Planning) Document(उपक्रमसंसाधनयोजनाप्रपत्राणि) | View Document |
| Details of implementation of e-governance in areas of operation Planning and Development, Administration etc (Data Template)(उपर्युक्तक्षेत्रेषु वैद्युतप्रशासनस्य क्रियान्वयनस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |

***6.2.4 Effectiveness of various bodies/ cells/ committees is evident through minutes of meetings and implementation of their resolutions.***

**विविधसमितीनां कार्यविवरणेभ्यः, निर्णयानां क्रियान्वयनात् च ज्ञायते यत् संस्थायाः विविधनिकायाः/विभागाः/ समितयः प्रभावितया फलोन्मुखतया च कार्यतत्पराः सन्ति इति।**

**Answer:**

श्रीसोमनाथसंस्कृतविद्यालये मुख्यतया विभागद्वयं वर्तते शैक्षणिकं प्राशासनिकमिति। विभागद्वयस्यैवाधिकारी नियामकश्च भवति विश्वद्यालयस्य मान्यः कुलपतिः। मान्यः कुलपतिः समये समये शैक्षणिकाणां प्राशासनिकानां च प्रवृत्तीनां योजनाय सत्रारम्भात् पूर्वमेव तत्तद्विभागान् शैक्षणिकसंस्थायाम् अध्यक्षं तथा प्रशासनविधौ कुलसचिवं च सूचयति । एते विभागाध्यक्षाः स्वस्वशैक्षणिक-प्राशासनिकविभागेषु प्रवर्तमानकर्मणि आन्तरिक-गुणवत्ता-आश्वासन-कक्षद्वारा रचितभविष्यद्दृष्टियोजनाफलकं संवीक्ष्य समये समये प्रवर्तयन्ति। शैक्षणिककार्यकलापान् संविधातुं कुलपतिना चिताः सङ्कायाध्यक्षाः समये समये सङ्गोष्ठीः, कार्यशालाः, परिसंवादाः, व्याख्यानमालाः च सम्पादयन्ति। अभ्याससमितिद्वारा अभ्यासपरिवर्तनादिकं तेषां पर्यवेक्षणमपि IQAC द्वारा समये समये सम्पादयन् लक्ष्य-ध्येययोः पूर्णतां साम्पादयन्तः फलोन्मुखाः भवन्ति।

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा सफलतया सम्पादितबहुविधकार्यक्रमेभ्यः अन्यतमस्य आधिकारिकपरिषदि विचार्य आन्तरिक-गुणवत्ता-आश्वसन-कक्षद्वारा अनुमोदनञ्च सम्प्राप्य समारब्धस्य“संस्कृतवाङ्मये शिवतत्त्वम्” इति अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः विवरणम् इत्थम्–

**“संस्कृतवाङ्मये शिवतत्त्वम्”** इति अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठी अष्टमवार्षिकपदवीदानसमारोहेण सहैव ७.२.२०१६ तमे दिनाङ्के महामहिमशालिना राज्यपालमहोदयेन श्री ओ.पी. कोहलीमहाभागेन त्रिदिवसात्मिकायाः अन्ताराष्ट्रियसङ्गोष्ठ्याः समुद्घाटनं कृतम्। ०७.०२.२०१६ तः ०९.०२.२०१६ दिनाङ्कं यावत् दिनत्रयव्यापिन्याम् अस्यां संस्कृतसंगोष्ठ्यां ५६

षड्पञ्चाशत् सत्राणि भिन्नभिन्नखण्डेषु समकाले एव सञ्चालितानि। तत्र सङ्गोष्ठ्यां विविधदेशेभ्यः विविधराज्येभ्यश्च बहवः मूर्धन्याः विद्वांसः समागता आसन्। आहत्य ४२९ प्रतिभागिनः सङ्गोष्ठ्यामस्याम् उपस्थाय स्वकीयं शोधपत्रं पठितवन्तः। विश्वविद्यालयस्य सर्वेऽपि अध्यापकाः तत्तत् संयोजनादिकार्येषु सर्वत्र सम्भूयापि स्वकीयं शोधपत्रं कार्यक्रमेऽस्मिन् प्रस्तुतवन्तः। सम्पूर्णसंस्कृतवाङ्मये दर्शने पुराणे साहित्ये ज्योतिषे व्याकरणे स्मृतिषु च प्रतिपादितशिवत्त्वस्य संशोधनम् अनया सङ्गोष्ठ्या सफलतया सम्पादिता।

अन्ताराष्ट्रियसङ्गोष्ठ्याः अन्तर्भागेनैव विविधसांस्कृतिककार्यक्रमाः अपि आयोजिताः आसन्। तत्रैव संस्कृतकविसम्मेलनकार्यक्रमः संस्कृतवैभवं प्रतिफलमाना अत्यन्तमेव भोभूषिता आसीत्। संस्कृतकविसम्मेलनकार्यक्रमः विश्वविद्यालयेन ७.०२.२०१६ दिनाङ्के संयोजितः आसीत्। कार्यक्रमेऽस्मिन् लब्धप्रतिष्ठिताः संस्कृतविद्वांसः कवयः स्वरचितकाव्यप्रस्तुत्या संस्कृतज्ञानां चित्तप्रसादनं रसास्वादञ्च कारितवन्तः।

सांस्कृतिककार्यक्रमेषु विशेषाकर्षणरूपेण सांस्कृतिककार्यक्रमः विश्वविद्यालयेन ८.०२.२०१६ तमे दिनाङ्के समायोजितः आसीत्। तत्र भावाश्रितानि रसपूरितानि नृत्यानि विशेषप्रयोगपूरकाणि नाटकानि च आसन्। पुनश्च गुर्जर-संकृतमिश्रभावाश्रितं यत् कार्यक्रमसञ्चालनम् अध्यापकाः अकुवन् तत्तु सर्वाधिकाद्भुतमेव । मान्याः कुलपितवर्याः अस्य कार्यक्रमस्य सफलतायै ये अध्यापकाः ये च छात्राः प्रयत्नं कृतवन्तः तान् पुरस्कारादिभिः आशीर्वचोभिश्च सम्मानितवन्तः।

एवं प्रकारेण श्रीसोमनाथसम्स्कृतविश्वविद्यालयद्वारा आयोजितान्ताराष्ट्रियसंस्कृतसम्मेलनकार्यक्रमः सर्वत्र देशे विदेशेषु च अत्यन्तमेव प्रशंसां सम्प्राप्य सफलतां गतः।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

**6.3 Faculty Empowerment Strategies**

***6.3.1 The institution has effective welfare measures for teaching and non-teaching staff.***

**संस्थया अध्यापकेभ्यः अध्यापकेतरकर्मचारिभ्यश्च प्रभाविसंक्षेमोपायाः अनुस्रियन्ते।**

**Answer:**

**श्रीसोमनाथसंस्कृतविश्वविद्यालयः पदाधिकारिभ्यः/अधिकारिभ्यः कर्मचारिभ्यश्च प्रभाविसङ्क्षेमोपायानां कार्यक्रमाणां निर्वर्तनं करोति यथा**–

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातराज्यसर्वकारस्य प्रकाशित-नियमानुसारं स्व-कर्मचारिभ्यः कल्याणप्रयोजनायाः प्रवर्तनां विधत्ते। तेषां कर्मचारिकल्याण-योजनायाः प्रारूपं कार्यकारिण्यां, शैक्षणिकपरिषदि, वित्तसमित्त्यां च उपस्थाप्यते संस्तुत्यै। तदनुसारमेव कर्मचारिभ्यः विविधाः लाभाः प्रदीयन्ते। एतेषु समित्युपवेशनेषूपस्थितसदस्येभ्यः विश्वविद्यालयः नियमानुसारं यात्राभरणादिकं (T.A, D.A) प्रयच्छति।

विश्वविद्यालयस्य पदाधिकारिभ्यः, अधिकारिभ्यः, कर्मचारिभ्यः च पदानुसारं प्राप्तव्यकल्याणलाभाः UGC तथा राज्यसर्वकारस्य नियमानुसारं विश्वविद्यालयेन प्रदीयन्ते। विश्वविद्यालयद्वारा शैक्षणिक-प्राशासनिककर्मचारिणां कृते प्रदीयमानाः कल्याणकारिलाभाः ते निम्नलिखिताः सन्ति।

1. **शैक्षणिककर्मचारिभ्यः दीयमानाः कल्याणकारिलाभाः** –

- विश्वविद्यालयस्य शैक्षणिककर्मचारिभ्यः Travel Allowance(T.A), Dearness Allowance(D.A), House Rent Allowance(H.R.A), Medical Allowance(M.A), Duty Leave(D.L) Study Leave(S.L), Maternity Leave(M.L), Paternity Leave(P.L) तथा च परीक्षासम्बद्धकार्येषु प्राशासनिककार्येषु च अनुष्ठितस्य अनुष्ठीयमानस्य च कर्मभ्यः कर्मचारिभ्यः विश्वविद्यालयः निर्धारितनियमानुसारं लाभं प्रयच्छति।

1. **प्राशासनिककर्मचारिभ्यः दीयमानाः कल्याणकारिलाभाः** –

- विश्वविद्यालयस्य प्राशासनिककर्मचारिभ्यः अपि T.A, D.A, H.R.A, M.A, तथा परीक्षासम्बद्धकार्येषु प्राशासनिककार्येषु च मान्यकुलपतिना अनुमतिं लब्ध्वा प्रदीयमानकार्यणां कृतेऽपि पुरस्कारः कल्याणकारिलाभाश्च प्रदीयन्ते।

उपर्युक्त कल्याणकारिलाभेभ्यः अपि अतिरिक्तलाभाः यथा General Provident Fund(G.P.F), Contributory Provident Fund(C.P.F), Earn Leave(E.L), Casual Leave(C.L), D.L, S.L, M.L, P.L, तथा चतुर्थवर्गकर्मचारिणां कृते प्रतिवर्षं राज्यसर्वकारानुसारं Bonus, Washing Allowance इत्यादि प्रदीयते।

1. **अधिकारिणः/कर्मचारिणः कृते देयाध्ययनावकाशः** –

विश्वविद्यालये अभियन्ते श्री मनीषभाई आर् पोपट् महोदयाय उच्चशिक्षणार्थं ०१/१०/२००९ तः ३०/०९/२०११ पर्यन्तं वर्षद्वयस्य कृते अध्ययनावकाशः सर्वकारस्य अनुमतिं लब्ध्वा विश्वविद्यालयो ददौ।

1. **आरोग्य-सेवालाभाः** –

श्रीसोमनाथसंस्कृतविद्यालयपरिसरे अध्ययनरतानां सरस्वतीसमुपासकानां छात्राणां स्वास्थ्यसंरक्षणार्थम् एवं च विश्वविद्यालये शैक्षणिककर्मसु प्रशासनादिकर्मसु संलग्नानां सर्वेषामपि कर्मचारिणां स्वास्थ्यपरिरक्षणाय कार्यकारिणीपरिषदा नियमक्रमांकः ५५.२२ इत्यनयोरालोके स्वीकृतनिर्णयानुसारं विश्वविद्यालयपरिसरे आरोग्यसेवायाः प्रारम्भः समारब्धो वर्तते। विश्वविद्यालयपरिसरे वैद्यसेवायाः शुभारम्भः सर्वकर्मचरिणां छात्राणामधिकारिणाञ्च समक्षे मान्यस्य कुलपतिवर्यस्य करकमलाभ्यामभवत्। तत्र सेवाप्रदानाय **डोक्टर निशाबहेन गोहिल** महोदयायाः नियुक्तिरपि कृता वर्तते । एषा महोदया समये समये छात्राणां शैक्षणिक – प्रशासनिककर्मचरिणां तथा तेषां कुटुम्बस्यापि स्वास्थ्यपरीक्षणं सुष्ठुरूपेण कुर्वती अस्ति। वैद्यस्य प्राथमिकपरीक्षार्थम् अपेक्षितानि औषधानि, Stretcher इत्यादीनि साधनानि सन्ति। छात्रेभ्यः ततोऽधिकमपेक्षिता सति विश्वविद्यालयः कमपि अध्यापकं गृहमातां गृहपतिं वा विधाय सम्बद्ध वैद्यसेवाऽपि कार्यते। Corona कालेऽपि सततं Sanitize सम्पूर्णे विश्वविद्यालये कृतमस्ति। स्थित्यनुसारम् वैद्यसेवायाः लाभः सर्वैः कर्मचारिभिः छात्रैश्च गृह्यते।

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रथम-द्वितीय-तृतीयवर्गस्य अधिकारिभिः अध्यापकैः कर्मचारिभिश्च **“वैश्विकमहामारी”** Covid-19 इत्यस्य सङ्क्रमणकष्टकाले विश्वविद्यालयस्य द्वाविंशतिः चतुर्थवर्गकर्मचारिभ्यः कल्याणार्थं कल्याणनिधिम् एकत्रीकृत्य प्रत्येकं कर्मचारिणः कृते भोजनसामग्री साहाय्यं कृतमस्ति।

**शैक्षणिक-प्राशासनिककर्मचारिणां National Pension System(NPS) विवरणम्-**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिक-प्रशासनिकाधिकारिणां कर्मचारिणां च कृते राज्यसर्वकारद्वारा तथा विश्वविद्यालयद्वारा विश्वविद्यालयस्य यतः स्थापना जाता तत आरभ्य **‘नूतनवर्धितनिवृत्तिवेतनप्रणाली’** इति योजना प्रवर्तिता। प्रथमस्तरतः द्वितीयस्तरीयकर्मचारिणां कृते एषा योजना आरब्धा। तदनु सर्वकर्मचारिणां कृते अनुशंसिता। योजनायामस्यां विश्वविद्यालयस्य समस्ताधिकारिणां कर्मचारिणां शैक्षणिक-शिक्षणेतराणां समावेशः कृतः वर्तते। एतद्योजनानुसारं प्रत्येकं कर्मचारिणः मूलवेतनं तदनुगुणञ्च दैनिकभरणं १०% कर्मचारिभ्यः दातव्यं भवति। एतद्योजनानुसारं यावद्धनं कर्मचारिणः कोशात् प्रदीयते तावदेवधनं राज्यसर्वकारसम्बन्धितसंस्थाद्वारा अपि समर्प्यते। सर्वस्याप्येतद्धनस्य विवरणं केन्द्रियसञ्चिकास्थापनसमितिमाध्यमेन नियामकश्री निवृत्तवेतनं भविष्यनिधेः कार्यालयः विवरणं स्थापयति। एतद्योजनानुसारं सम्प्रति गुजरातसर्वकारद्वारा मान्यसंस्था समस्तविवरणसंरक्षणमावहति। प्रत्येकं कर्मचारिणः भिन्नभिन्नक्रमाङ्कः प्रदत्तोऽस्ति। यस्मात् कर्मचारिणं भ्रमणभाषद्वारा कियद्धनमागतं कियत् शेषञ्च वर्तते इति सर्वं ज्ञायते। योजनायाः मुख्यहेतुः वित्तकोष इव सङ्गणके समस्त विवरणं स्थाप्यते। निध्यनुसारं कर्मचारी यदा निवृत्तो भवति तदा संरक्षित-धनस्य ६०% कर्मचारिणे प्रत्यर्प्यते। तथा ४०% वित्तं I.R.D.A. द्वारा L.I.C. मध्ये निवेशः क्रियते। तस्मादेव कर्मचारिणां निवृत्यनन्तरं निवृत्तिलाभः (pension) रूपेण प्रत्यर्पणीयम् इति प्रावधानं कृतं वर्तते।

**शैक्षणिक-प्राशासनिककर्मचारिणां गृहकोषपालस्य (पेशगी)विवरणम्-**

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा गृहकोषपालः(पेशगी) प्रावधानं कल्पितमस्ति। राज्यसर्वकारनियमानुसारम् अधिकारिणः वेतनानुसारं नूतनगृहक्रयणार्थं निर्माणार्थं वा कोषपालः दीयते। तत्र नियमानुसारं दानस्य प्रतिग्रहणस्य च व्यवस्थाऽस्ति।

विश्वविद्यालयस्य कुलपतेः परिसरे निवासव्यवस्था, चतुश्चक्रिकायाः सुविधाप्रकल्पितास्ति, विद्यार्थिभ्यः व्यायायमाशाला, क्रीडाङ्गनम्, विशालग्रन्थालयः, उचितनिवासभोजनव्यवस्था, शैक्षणिक-प्राशासनिककर्मचारिभ्यः शारीरिक-मानसिकशान्त्यर्थं व्यायामशाला-ग्रन्थालय-क्रीडाङ्गनानां सौविध्यं प्रकल्पितमस्ति। इतोपि विभिन्नप्रकाराः प्रकल्पाः यथा कुलसचिवस्य निवासभवनम्, अतिथिभवनम्, योगभवनम्, महिलाछात्रावसभवनानां निर्माणान्यपि विश्वविद्यालयस्य परिवारस्य कल्याणाय निर्मीयमाणानि सन्ति।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

***6.3.2 Average percentage of teachers provided with financial support to attend conferences / workshops and towards membership fee of professional bodies during the last five years***

### विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां सामान्या प्रतिशतता।

**Answer:** 8.58

6.3.2.1 Number of teachers provided with financial support to attend conferences/ workshops and towards membership fee of professional bodies year-wise during the last five years

विगतपञ्चवर्षेषु सङ्गोष्ठीषु/ कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 02 | 01 | 02 | 01 | 01 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Details of teachers provided with financial support to attend conferences, workshops etc. during the last five years (Data Template)(विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु, सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवता) | View Document |

***6.3.3 Average number of professional development / administrative training Programmes organized by the university for teaching and non teaching staff during the last five years.***

### विगतपञ्चवर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च विश्वविद्यालयेन समायोजिताः कार्यक्रमाः।

**Answer:** 5.8

6.3.3.1 Total number of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff year-wise during the last five years

विगतपञ्चवर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां वार्षिकयोगः।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 11 | 05 | 03 | 06 | 04 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Details of professional development / administrative training Programmes organized by the University for teaching and non teaching staff (Data Template)(शैक्षणिक-अशैक्षणिक-कर्मचारिणां व्यावसायिक-विकासार्थं / प्राशासनिक-प्रशिक्षणार्थं विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां विवरणम्। (दत्तांशप्रारूपम्)) | View Document |

***6.3.4 Average percentage of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes during the last five years***

**विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां मध्यमानस्य प्रतिशतता।**

**Answer:** 26.49

6.3.4.1 Total number of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes year-wise during the last five years

विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 02 | 06 | 02 | 07 |

| File Description | Document |
|---|---|
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centers). (मानवसंसाधनविकासकेन्द्रेभ्यः (विश्वविद्यालयानुदानायोगस्य शैक्षिककर्मचारिमहाविद्यालयेभ्यः अथवा तदन्यसदृशकेन्द्रेभ्यः) प्राप्तप्रमाणपत्राणि/ प्रतिवेदनानि।) | View Document |
| Details of teachers attending professional development Programmes during the last five years (Data Template) (विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासपाठ्यक्रमादि वृत्तिविकासपाठ्यक्रमेषु भागग्राहिणाम् अध्) | View Document |

***6.3.5 Institution has Performance Appraisal System for teaching and non-teaching staff***

**संस्थायां शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली वर्तते।**

**Answer:**

**विश्वविद्यालयस्य शैक्षणिक-प्राशासनिककर्मचारिणां कार्यनिष्पादनप्रणाली-**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिक-प्राशासनिककर्मचारिणां कार्यनिष्पादज्ञापनप्रणाल्याः विषये विश्वविद्यालयानुदानायोगस्य गुजरातसर्वकारस्य च सामान्यप्राशासनिकविभागस्य ४/३/२०१४ दिनाङ्कस्य नियमानुसारं KHL-१०२०१३-५६२२९४-K इति नियमानुसारं विश्वविद्यालयस्य कार्यकारिणीपरिषदः २९/०५/२०१५ दिनेङ्के कृत उपवेशनस्य नियमक्रमाङ्कः – ३४.०८ इत्यनुसारं विश्वविद्यालये कार्यरतानां शैक्षणिक-प्राशासनिककर्मचारिणां विभागशः प्रतिवर्षं वित्तवर्षस्य – (यथा – ०१/०४/२०१५ तः ३१/०३/२०१६ पर्यन्तं १५-१६ वर्षस्य विवरणम्) समये कार्यनिष्पादनप्रणाली तथा गोपनीयविवरणमपि प्रपूर्यते।

सर्वापि प्रक्रिया विश्वविद्यालय-अनुदान-आयोगस्य प्रमाणेन आन्तरिक-गुणवत्ता-आयोग-कक्षाद्वारा(I.Q.A.C) सम्पाद्यते। आन्तरिक-गुणवत्ता-आयोग-कक्षाद्वारा योग्याध्यापकानाम् आवेदनपत्राणि स्वीक्रियन्ते। तेषां सेवाप्रोन्नतियोजना(CAS) द्वारा परीक्षणं क्रियते। ततः अनुमोदनञ्च प्राप्य आन्तरिक-गुणवत्ता-आयोग-कक्षाद्वारा(I.Q.A.C) अनुमोदनमवाप्य विद्वत्परिषदि चर्चां कृत्वा ततश्चाप्यनुमोदनमधिगम्य कार्यकारिणीपरिषद्यपि सम्मतिं सम्प्राप्य योग्याध्यापकेभ्यः पदोन्नति-लाभः प्रदीयते।

**कार्यनिष्पादनप्रणाली तथा च गुजरातसर्वकारस्य अनुमत्या गोपनीयविवरणस्य सङ्कलनपद्धतिः निम्नलिखिता वर्तते-**

1. **शैक्षणिकविभागः -** विश्वविद्यालये शैक्षणिकविभागे कर्यरतानां सर्वेषामपि अध्यापकानां प्रतिवर्षं **'कार्यनिष्पादनप्रणाली'** गुजरातसर्वकारस्य सामान्यप्राशासनिकविभागस्य ०४/०३/२०१४ दिनाङ्कस्य नियमक्रमः. KHL– १०२०१३-५६२२९४-K इत्यनुसारं प्रपूर्यते।

विश्वविद्यालये चत्वारः विभागाः सन्ति, ते यथा-

Section I - Basic Information, (सामान्यसूचनाविभागः)

Section II - Self Appraisal, (आत्मप्रशस्तिः)

Section III - Appraisal, (प्रशस्तिः)

Section IV - Review (समीक्षा)

**निम्नरचितपद्धत्या शिक्षकाणां मूल्याङ्कनं क्रियते।**

**'कार्यनिष्पादनप्रणाली'**

**स्वमूल्याङ्कनम् - विभागाध्यक्षस्य संस्तावः - कुलपतेः संस्तावः**

1. **प्राशासनिकविभागः -** विश्वविद्यालये प्रशासनविभागे कर्यरतानां सर्वेषामपि कर्मचारिणां प्रतिवर्षं प्रथमवर्गस्य द्वितीयवर्गस्य च अधिकारिणां **'कार्यनिष्पादनप्रणाली'** गुजरातसर्वकारस्य सामान्यप्राशासनिकविभागस्य ०४/०३/२०१४ दिनाङ्कस्य नियमक्रमः. KHL– १०२०१३-५६२२९४-K इत्यनुसारं प्रपूर्यते।

Total 4 Section:

Section I- Basic Information, (सामान्यसूचनाविभागः)

Section II- Self Appraisal, (आत्मप्रशस्तिः)

Section III - Appraisal, (प्रशस्तिः)

Section IV- Review (समीक्षा)

**१-२ वर्गाधिकारिणां कृते अधोनिर्दिष्टविध्यनुसारं प्रतिवर्षं मूल्याङ्कनं क्रियते।**

**'कार्यनिष्पादनप्रणाली' -**

**स्वमूल्याङ्कनम् - कुलसचिवस्य संस्तावः - कुलपतेः संस्तावः**

**(३)तृतीयवर्गस्य कर्मचारिभ्यः अधोनिर्दिष्टविध्यनुसारं प्रतिवर्षं मूल्याङ्कनं क्रियते।**

**स्वमूल्याङ्कनम् - विभागाध्यक्षस्य संस्तावः - कुलसचिवस्य संस्तावः**

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

**6.4 Financial Management and Resource Mobilization**

***6.4.1 Institution conducts internal and external financial audits regularly***

**संस्था नियमितम् आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं करोति।**

**Answer:**

गुजरातसर्वकारस्य विधेयकस्यानुसारं २००५ तमे वर्षे विश्वविद्यालयस्य स्थापना बभूव । अस्य विधेयकस्य प्रकरणसङ्ख्या-५ इत्यस्य खण्डस्य सं०-३०(५) इत्यस्यालोके राज्यसर्वकारद्वारा विश्वविद्यालयस्य आयव्यययोः निरीक्षणार्थं लेखापरीक्षणस्य व्यवस्था कृताऽस्ति। यदनुसारं विश्वविद्यालयीयवित्तस्य वित्त-आय-व्यययोः आन्तरिक-बाह्य-लेखा-परीक्षणं सततरूपेण करणीयं भवति ।

1. **बाह्य-लेखापरीक्षणस्य विवरणम्-**

विश्वविद्यालयस्य वित्तसम्बद्धयोः आय-व्यययोः लेखापरीक्षणकार्यं राज्यसर्वकारस्य वित्तविभागान्तर्गतकार्यरतस्य स्थानीयकोशागार(Local-Fund)कार्यालयस्याधिकारे आयाति, यदनुसारं मण्डल-स्तरीय-सहायकनिरीक्षकद्वारा आय-व्यययोः शत-प्रतिशत(100%) लेख-परीक्षणं विधीयते ।

स्थानीय-कोशागारकार्यालयद्वारा प्रत्येकवर्षस्य नियमानुसारं लेखापरीक्षण-कालावधौ प्रत्येकं धनप्राप्तिपत्रस्य(Payment) लेखापरीक्षणं क्रियते। एतदतिरिच्य लेखापरीक्षणसमये यस्याः कस्याश्चिदपि सम्बद्धपञ्जिकाया अपेक्षिते सति निरीक्षणं क्रियते। तद्वदेव विश्वविद्यालयस्य वित्तसमितिद्वारा संस्तुतानां निर्णयाणां कार्यकारिणिपरिषदः अनुमोदितानञ्च निरीक्षणं तदाधारेण कृतकार्याणां लेखापरीक्षणं विधीयते। तदतिरिच्य राज्यसर्वकारद्वारा समये समये वित्तसम्बन्धीनि निर्गतपरिपत्राणि/प्रस्तावान् अपि मतौ अवधार्य अधिकारिणा कार्यं क्रियते। एतेषां सर्वेषां विषये निरीक्षणानन्तरं यद्यावश्यकं प्रतीयते तदा अन्य लेखापरीक्षणमपि संस्तोतुं शक्यते ।

विश्वविद्यालयस्य लेखापरीक्षणावधौ विश्वविद्यालयद्वारा लेखापरीक्षणाय, उपस्थापिते अंशे यदि कुत्रचित् अपेक्षितं भवति तर्हि तस्यांशस्य शीघ्रमेव पूर्तिः क्रियते। लेखापरीक्षणकार्यानन्तरं यदि लेखापरीक्षकद्वारा प्रदर्शितन्यूनतायाः समाधानम्/पूर्णता अपेक्षिता भवति तर्हि तत्समाधाय तस्योत्तरं स्थानीयकोशागारीयकार्यालयं प्रति प्रेष्यते।

स्थानीयकोशागारस्य-आय-व्यय-कार्यालयमाध्यमेन तस्य गान्धिनगरस्थ-वरिष्ठ-कार्यालयेन सह विश्वविद्यालयस्य मान्येन कुलपतिना कुलसचिवेन तथा च विश्वविद्यालयस्य सर्वैः सम्बद्धविभागप्रधानैः सह मिलित्वा लेखा-परीक्षक-निर्दिष्ट-न्यूनताविषये चर्चा क्रियते।

1. **आन्तरिकलेखापरीक्षणविवरणम् -**

विश्वविद्यालयस्य आय-व्यय-वित्तव्यवहारस्य आन्तरिकलेखापरीक्षणपद्धतौ वित्तसमित्यां प्रत्येकं विषयस्य सन्दर्भे विहितस्य निर्णयस्य कृते स्थानीयलेखापरीक्षकस्य (Charted Accountant) सेवाप्राप्तेः विधानमस्ति।

विश्वविद्यालयद्वारा नियुक्तेन Charted Accountant(C.A) लेखापरीक्षकद्वारा विश्वविद्यालयः आन्तरिकलेखापरीक्षणं कारयति। यदनुसारं तेन आधिकारिक-लेखापरीक्षकमाध्यमेन प्रत्येकं धनप्राप्तिपत्रस्य(All Bills) निरीक्षणं क्रियते। आय-व्यय-पञ्जिकायाः धनप्राप्तिपत्रस्य सामान्यधनपञ्जिकायाश्चाङ्कनं च तेन अधिकारिक-लेखापरीक्षकेण क्रियते। एतदतिरिच्य वित्त-लेखानिरीक्षणावधौ एव यस्याः कस्याश्चिदपि सम्बद्धपञ्जिकायाः अवलोकनमपि स करोति। तदनुसारमेव व्यय-पत्रकस्य तथा वित्तविवरणस्य निरीक्षणमपि स अधिकारी करोति। विश्वविद्यालयस्य वित्त-विवरणस्य(आय-व्यययोः) वित्त-लेखा-परीक्षणं विधाय वार्षिक-वित्तविवरण-योजना रच्यते।

विश्वविद्यालयेन प्रतिमासं व्ययविवरणं(Description of Expenditure) निर्माय तस्य प्रतिलिपिः उच्चशिक्षण-आयुक्त-कार्यालये प्रेष्यते। तद्विवरणं संस्तुत्यै वित्तसमित्यां प्रस्तूयते। तत्पश्चात् कार्यपरिषदि प्रस्तूयते। तत्र कार्यकारिणीपरिषदः अनुमोदनं विधीयते। संस्तुतलेखापरीक्षणप्रतिवेदनं तथा च धन-उपयोग-प्रमाणपत्रस्य प्रतिलिपिः उच्चशिक्षण-आयुक्त-कार्यालये गान्धीनगरे, ए.जी. कार्यालये-राजकोटे तथा च वित्त-आय-व्यय-निष्पादन-स्थानीय-कोशागारे (Local Fund Department) च प्रेषणीयो भवति ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

***6.4.2 Funds/ Grants received from non-government bodies, individuals, philanthropers during the last five years (not covered in Criterion III) (INR in Lakhs)***

### विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्राप्तम् आर्थिकं साहाय्यम् अनुदानं वा *(यदि तृतीयनिकषे न निर्दिष्टम्) (लक्षशः रूप्यकेषु)*

**Answer:** 54.42

6.4.2.1 Total Grants received from non-government bodies, individuals, philanthropers year-wise during the last five years (INR in Lakhs)

विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्रतिवर्षं प्राप्तस्य आर्थिकसाहाय्यानुदानस्य वार्षिकयोगः (लक्षशः रूप्यकेषु)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 13.32 | 8.57 | 10.69 | 3.65 | 18.19 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Details of Funds / Grants received from non-government bodies during the last five years (Data Template) | View Document |
| Annual statements of accounts(अङ्केक्षितस्य वार्षिकलेखापत्रस्य प्रतिकृतिः ) | View Document |

***6.4.3 Institutional strategies for mobilisation of funds and the optimal utilisation of resources***

**विविधसंसाधनानां सर्वाधिकसमुपयोगार्थं, वित्तराशिसङ्ग्रहार्थञ्च संस्थायाः व्यूहाः।**

**Answer:**

1. गुजरातराज्यसर्वकारद्वारा अनुदानितधनराश्याः विश्वविद्यालयस्य वित्तीयव्यवहारः चलति। विश्वविद्यालयद्वारा प्रतिवर्षं यः व्ययः भवति तस्यायोजनं भविष्यं परीक्ष्य विविधविभागेभ्यः स्वस्वयोजनानुसारं आवश्यकतापूर्तये धनराशेः पूर्तये भविष्यद्योजनाः समीक्ष्य अपेक्षितधनराशिः सूच्यते। आगतस्य धनव्ययस्य आकलनं विधाय आनुमानिकं पत्रकं विश्वविद्यालयस्य वित्तविभागेन सज्जीक्रियते। एतत् कल्पितधनव्ययपत्रकं विश्वविद्यालयस्य वित्तसमित्याः पुरतः उपस्थाप्यते। तस्याः संस्तुतिमाश्रित्य पुनः कार्यकारिणीपरिषदा अनुमोदनं क्रियते। ततः परं विश्वविद्यालयद्वारा राज्यसर्वकारं प्रति सम्प्रेष्यते। येनाधारेण राज्यसर्वकारः अनुदानस्यायोजनालोके धनं विश्वविद्यालयाय प्रददाति ।
2. सर्वकारपक्षतः विश्वविद्यालयाय हेत्वनुसारं अनुदानं प्रदीयते। विश्वविद्यालयस्य कृते भविष्यद्योजना अनुदानस्य महत्तमः विनियोगः भवेत् एतदर्थं कार्यकारिण्याः अनुमोदनपूर्वकं मान्यस्य कुलपतेः अनुमत्या सर्वकारस्य नियममनुश्रुत्य राज्यसर्वकारद्वारा नियुक्त मुख्यवित्ताधिकारिणा तस्यानुदानधनस्योपयोगः क्रियते। विश्वविद्यालयेनापि सर्वकारस्य नियमानुसारं प्रदत्तधनं तद्धेतून् लक्ष्यीकृत्य प्राप्तस्य अनुदानस्य विनियोगः क्रियते। प्राप्तात् अनुदानात् सञ्चितधन-व्ययः Capital Expenditure(C.E) तथा राजस्व-व्ययः(Revenue Expenditure) इति द्विविधप्रकारकव्ययस्य विनिमयः निष्पादनं नियमानुसारं क्रियते।

1. सञ्चितधन-व्ययः(C.E) - विश्वविद्यालयद्वारा सञ्चितव्यये (C.E) नूतनप्रकल्पानां समावेशः क्रियते। भवनानां निर्माणम्, तत्रापि योगभवनम्, अतिथिभवनम्, ग्रन्थालयभवनम्, कुमार-कुमारी-छात्रावासः, अतिथिभवनादीनाम् अत्र समावेशः भवति ।

1. राजस्व-व्ययः (R.E) विश्वविद्यालयद्वारा राजस्व-व्ययः (R.E) स्थापनविभागे (Establishment Department) कस्यचिन्नूतनस्य स्थानस्य पूर्तिः करणीया भवति, तस्य नियुक्तये विवरणं सर्वकारस्य नियतपत्रकानुसारं सर्वकाराय प्रदीयते। यदा सर्वकारपक्षात् अनुमतिः लभ्यते तदनु वित्तविनिमयायोजनं क्रियते।

विश्वविद्यालयस्य वित्तव्यवहारः सरलः भवेत् तदर्थं विश्वविद्यालयस्य कार्यकारिणीपरिषदः विनियमः -38 (अष्टत्रिशंत्) आधारेण अधिकारिभ्यः केचन अधिकाराः प्रदत्ताः सन्ति ।

1. श्रीसोमनाथसंस्कृतविश्वविद्यालये मुख्यवित्ताधिकारी राज्यसर्वकारपक्षात् प्रतिनियुक्तः भवति। राज्यसर्वकारद्वारा पारितस्य अनुदानस्य अनुसन्धानं कृत्वा वित्तव्ययो भवति। कृतस्य वित्तव्ययस्य विवरणं प्रतिमासं शिक्षणविभागे राज्यसर्वकाराय सम्प्रेष्यते। विश्वविद्यालयद्वारा प्रतिवर्षम् आन्तरिकं मूल्याङ्कनं च क्रियते। विश्वविद्यालयद्वारा नियुक्तस्य आधिकारिकलेखापरीक्षकस्य (C.A) साहाय्येन विश्वविद्यालयेन कृतस्य विनिमयस्य सूक्ष्मातिसूक्ष्मत्वेन मूल्याङ्कनं क्रियते। आन्तरिक-लेखापरीक्षणानन्तरं लेखापरीक्षणविवरणं च वित्तविनियोगप्रमाणपत्रञ्च निर्मीयते। लेखापरीक्षणविवरणं वित्तविनियोगप्रमाणपत्रं च राज्यसर्वकारस्य शिक्षणविभागाय कार्यालये सम्प्रेष्यते। तथा च मूल्याङ्कनाय ए.जी. कार्यालये राजकोटे प्रतिलिपिद्वयं सम्प्रेष्यते। लेखापरीक्षणसमये प्रतिपत्रं शतप्रतिशतं(१००%) लेखापरीक्षणं क्रियते। इत्थं वित्तसंलग्नानां प्रतिपत्रं व्यवहारः सूक्ष्मेक्षिकया क्रियते ।
2. विश्वविद्यालयद्वारा प्रतिमासं सर्वकारेण निश्चितस्य वस्तुसेवाकरः (GST) इत्यस्य व्ययपत्रकात् कर-धनमाद्रियते। तस्य कर्तितस्य व्ययस्य वस्तुसेवाकरः इत्यस्य पत्रकं तस्य करस्य सञ्चयन-पञ्जिका विधीयते। तथैव प्रतिमासं सर्वकारद्वारा निश्चितस्य मूलकरकर्तनं TDS इत्यस्य वित्तपत्रकात् कर्तनं कृत्वा तस्यापि समाना एव प्रक्रिया भवति करसञ्चयनस्य कृते। मूलकर्तनं TDS येषा कृते अपेक्षितं भवति तेषां सर्वेषाम् अपि त्रैमासिकं प्रत्यायनं समयानुसारं क्रियते। विश्वविद्यालयद्वारा प्रतिवर्षं करव्यवस्थापूरकपत्राणां सञ्चिकानां (Return File) विषये प्रतिवेदनं क्रियते । अनेन कारणेन विश्वविद्यालयः १२ AA इत्यस्य एवं ८०(G) इत्यस्य लाभं प्राप्तवान् वर्तते। अनेन करमुक्त्यै प्राप्तस्य व्यवस्थापनस्य कारणेन दातारः ८०(G) इति प्रमाणपत्रं प्राप्नुवन्ति ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**6.5 Internal Quality Assurance System**

***6.5.1 Internal Quality Assurance Cell (IQAC) has contributed significantly for institutionalizing the quality assurance strategies and processes***

**गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय आन्तरिकगुणवत्ताश्वासनकेन्द्रं विशेषतः योगदानं करोति।**

**Answer:**

1. आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रस्य आरम्भः २०१५-२०१६ वर्षात् जातो वर्तते। शैक्षणिकप्रसङ्गे अध्ययनाध्यापनप्रक्रियासमीक्षार्थम् एकमात्रकेन्द्रमस्ति आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रम्। शैक्षणिकप्रवृत्तीनां मूल्याङ्कनार्थम् अङ्कयोजनाय च औपचारिकरूपेण कार्यसम्पादने आन्तरिक-गुणवत्ताकेन्द्रं मुख्यभूमिकामावहति।
2. अस्याः निर्वहणम् एकः वरिष्ठः आचार्यः करोति। अस्यां समित्यां गुणवत्ता तथा च मूल्याङ्कनव्यूहरचना इति प्रक्रियाद्वयी समीक्ष्यते। समित्याऽनया विश्वविद्यालयस्य शैक्षणिकविकासाय प्राशासनिकपर्यवेक्षणाय च समये समये उपवेशनं मान्यस्य कुलपतेः अनुमत्या क्रियते। उपवेशने शैक्षणिकवर्षे करणीयकार्याणां मार्गदर्शिका निर्मीयते। तदनुसारं कार्यं विश्वविद्यालयेन क्रियते। विश्वविद्यालयस्य शैक्षणिक-प्राशासनिककार्यसम्पादनार्थम् आन्तरिक-गुणवत्ता-मूल्याङ्कन-केन्द्रद्वारा करणीयाः निर्धारितांशाः एवं सन्ति-

- शैक्षणिकपर्यवेक्षणे संस्थानामनेकप्रकारकगुणवत्तायुक्ताश्वासनपद्धतीनां विकासः करणीयः।
- आन्तरिक-गुणवत्ता-मूल्याङ्कन-कक्षाद्वारा एव NAAC इत्यस्य प्रामाण्यप्राप्त्यर्थम् आवेदनपत्रं प्रदातुं निश्चयः कृतो वर्तते विश्वविद्यालयेन।
- सर्वपदाधिकारिणाम् अभिप्रायान् गुणवत्तासम्बद्धान् विश्लिष्य नियमपरिवर्तनं कार्ययोजना-परिवर्तनञ्च विश्वविद्यालयेन तथा च गुणवत्तायाः सहयोगार्थं सङ्कलनानुसारं परिवर्त्यते।
- उत्कृष्टगुणवत्तायाः प्राप्तपरिणामानुसारं समये समये मानकानां नवीनीकरणं क्रियते। विविधपत्रसंस्थाभिः सह शैक्षणिकप्रवृत्त्यर्थं सम्पर्कः साध्यते।
- सर्वपदाधिकारिभ्यः प्राप्तप्रतिक्रियाविषये विचारं कृत्वा समये समये निर्धारितनियमेषु परिवर्तनविषये चिन्तनं क्रियते।
- अनेन माध्यमेन संस्था शिक्षण-संशोधन-प्रशासनेषु गुणवत्तायाः परिष्करणार्थम् अभिवृद्ध्यर्थं च सततं प्रयतते, सर्वविधसाहाय्यञ्च करोति।
- सर्वविधगुणवत्तायाः निर्वहणार्थं कार्यान्वयनायोजनायाः सहाय्यार्थम् अभ्यासक्रमविकासार्थं च अध्ययनाध्यापनमूल्याङ्कन-संशोधन-सहकारादि सर्वप्रकारकविभागेषु विस्तृतरूपेण प्रवृत्तयः करणीयाः।
- मार्गदर्शिकानुसारं शैक्षणिकसम्बन्धिलेखापरीक्षा क्रियते। एवं प्रकारेण आन्तरिक-गुणवत्ता-मूल्याङ्कन-कक्षाद्वारा विविधोपवेशनेषु निर्धारिताः विषयाः अधोनिर्दिष्टाः सन्ति-

1. **समित्या सम्प्राप्ताः सफलताः** –

- शैक्षणिकपर्यवेक्षणे संस्थानामनेकप्रकारकगुणवत्तायुक्ताश्वासनपद्धतीनां विकासः जायमानो वर्तते, एतत्सन्दर्भे विविधकार्यक्रमाः यथा संस्कृतसप्ताहोत्सवः, युवमहोत्सवः, राष्ट्रिय-अन्ताराष्ट्रियपरिसंवादाः, कार्यशालाः, अल्पावधिक-यान्त्रिक-पाठ्यक्रमाः(Short Term Courses), यान्त्रिक-सङ्गोष्ठ्यः(Webinars), विशिष्टव्याख्यानानि आयोज्यन्ते।
- आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रद्वारा NAAC इत्यस्य प्रामाण्यप्राप्त्यर्थम् अवेदनपत्रं प्रदातुं कृतनिश्चयानुसारं प्रवर्तमानास्ति।

- विश्वविद्यालयस्य शैक्षणिकाध्यापकानां (CAS) पदोन्नतिविषये यथासमयं विशेषज्ञानां परीक्षणम् एवं मूल्याङ्कनादिकं कृत्वा अभिलिखितम् आन्तरिकगुणवत्ता- आश्वासन-केन्द्रस्य अनुशंसाधारेण पदोन्नतिः क्रियते।
- अभ्यासक्रमाणां प्रामाणीकरणम् अभ्यासक्रमसमित्या कारितमस्ति।
- अपेक्षानुसारं प्रोजेक्ट इत्यादिनिर्माणाय शिक्षकाणां मार्गनिर्देशार्थं विशेषतया प्रोजेक्टमार्गदर्शिका सज्जिता वर्तते। मार्गदर्शिकामनुश्रुत्य केन्द्रिय-संस्कृत-विश्वविद्यालयः, नई देहली इत्यस्य अष्टादशीयोजनायाम् आवेदनानि विश्वविद्यालयस्य अध्यापकैः प्रेषितानि। किञ्च विश्वविद्यालयद्वारा अपि प्रोजेक्टकार्यसम्पादनाय अग्रिमकार्यसम्पादनाय प्रवृत्तिर्जायमाना वर्तते।
- संशोधनकार्याणां मूल्याङ्कनविवरणसूची अपि निर्मितास्ति; यस्मिन् शोधप्रबन्धस्य प्रकाशनं कृतमस्ति।
- शास्त्राणां तत्तद्विषयवस्तूनां सम्पूर्णज्ञानाय विश्वविद्यालये Smart Class इत्यस्य व्यवस्थापि प्रकोष्ठद्वये सङ्कल्पितमस्ति। अपेक्षितं निर्माणं क्रियमानमस्ति। तद्द्वारा दृश्य-श्रव्यमाध्यमेन ज्ञानं दृढीकर्तुं शक्नुवन्ति छात्राः।
- संस्कृतच्छात्राणां गद्य-पद्योभयस्य उच्चारणप्रसङ्गे छात्राणां सततमूल्याङ्कनं विधाय तेषां काले काले निवारणार्थं निरन्तरं विशेषरूपेण तत्तद्विषयाध्यापकैः छात्रावासे प्रतिदिनम् एकघण्टा यावत् छात्रेभ्यः तत्तद्विषयग्रन्थस्य उच्चारणसहितं मूलपाठप्रशिक्षणं प्रदीयते ।
- आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रं प्राध्यापकेभ्यः विविधकार्यक्रमेषु यथा अभिविन्यासकार्यक्रमः(O.P), पुनश्चर्याकार्यक्रमः(R.C), सङ्गोष्ठ्यः, कार्यशालाः, अल्पावधिकार्यक्रमादिषु समये समये भागग्रहणायापि प्रोत्साहयति।
- **श्रीसोमनाथसंस्कृतविद्यालयस्य आन्तरिक-गुणवत्ता- आश्वासन-केन्द्रद्वारा सफलतया सम्पादितकार्यक्रमद्वयस्य विवरणम् इत्थम्**—

1. **सेवाप्रोन्नतियोजना(Career Advancement Scheme)-** विश्वविद्यालयस्य पञ्च अध्यापकेभ्यः आन्तरिक-गुणवत्ता-आश्वासनकेन्द्रस्य संस्तुत्या मान्यकुलपतेः अनुमोदनञ्च प्राप्य सेवाप्रोन्नतिः प्रदत्तास्ति एवं सहाचार्यतः आचार्यपदं प्रति संस्तुतिः कृताऽस्ति। तथैव चतुर्णां नियमितसहायकाचार्याः तथा च संशोधनाधिकारिणा सहितं पञ्चकर्मचारिणां स्टेज्-१ तः स्टेज्-२ इति सेवाप्रोन्नतियोजनाद्वारा (CAS) पदोन्नत्यै आवेदनपत्राणि आन्तरिक-गुणवत्ता-आश्वासनकेन्द्रं (IQAC) प्रति प्राप्तान्यासन्। तेषां पदोन्नत्यै पञ्चसहायकाचार्याणां प्रकाशनानि, API इत्यस्य परिशोधनं मूल्याङ्कनं च कृत्वा अभिलेखानाम् उपयोगं च कृत्वा तद्विधानेन सर्वाणि पत्राणि यथानियमं प्राप्तान्यासन्। तेषां मूल्याङ्कनं कृत्वा विवरणमपि प्रस्तुतम्, आन्तरिकगुणवत्ता-आश्वासनकेन्द्रेन संस्तुतम् तथा च तेभ्यः पदोन्नतिः प्रदत्तापि। अन्येषां पदोन्नत्यै संस्तुतिः अपि कृतास्ति।
2. **काव्यलक्षणग्रन्थप्रकाशनम्** - श्रीमदाचार्येण नरकण्ठीशास्त्रिणा विरचितस्य 'काव्यलक्षणम्' इत्याख्यस्य लघुग्रन्थस्यातिमूल्यस्य सम्पादनं विश्वविद्यालयस्यास्य पूर्वकुलपतिना **आचार्य वेम्पटिकुटुम्बशास्त्रिमहोदयेन** कृतम्। नव्यन्याये श्रीमद्गङ्गेशोपाध्यायेन या परिष्कारसरणिः अवलम्बिता तामेव सरणिं पण्डितराजजगन्नाथोऽपि आह्लादकरे रसगङ्गाधरे समावेशयत्। इमामेव परिष्कारपद्धतिं समाश्रित्य **'काव्यलक्षणम्'** इत्यस्य रचयितारोऽपि काव्यलक्षणपरीक्षणं विधाय स्वाभिमतं प्रकाशयन्ति समालोचयन्ति च काव्यलक्षणानि तत्तदाचार्यप्रतिपादितानि अस्मिन्ग्रन्थे। मम्मटस्य **'तददोषौ शब्दार्थो सगुणावनलङ्कृतिः पुनः क्वापि'** इति प्रसिद्धं काव्यलक्षणम्, **'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'** इति पण्डितराजस्य काव्यलक्षणम्, एवमन्ये आचार्याः काव्यलक्षणत्वेन अलङ्काररीत्यादीनि अपि स्वीकुर्वन्ति। काव्यस्य निर्दुष्टं तटस्थञ्च लक्षणं किं भवितुमर्हतीति विचारक्रमे नानाशास्त्रालङ्कारग्रन्थाः प्रणीताः। तत्तदलङ्कारशास्त्रग्रन्थेषु उपस्थापितानि लक्षणानि समाधृत्य खण्डनमण्डनपुरःसरं नव्यन्यायसरण्यां प्रणीतं नीलकण्ठीरवस्य काव्यलक्षणं नितराम् उपकारकं भवति पाठकेभ्यः। तादृशविशिष्टग्रन्थः विश्वविद्यालयस्य प्रकाशनविभागद्वारा २०१६ मई मासे प्रकाशितश्च ।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां | View Document |

| सन्धानम्।) | |
|---|---|

***6.5.2 The institution reviews its teaching learning process, structures & methodologies of operations and learning outcomes at periodic intervals through IQAC set up as per norms***

## संस्था आन्तरिकगुणवत्ताश्वासनकेन्द्रद्वारा निर्धारितनियमानुरूपं नियतकालेषु अध्यापनाधिगमप्रक्रियायाः, तत्र उपयुज्यमानायाः पद्धतेः, अधिगमपरिणामस्य च समीक्षां करोति।

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालये आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रस्य आरम्भः २०१५-२०१६ वर्षात् जातो वर्तते। शैक्षणिकप्रसङ्गे अध्ययनाध्यापनकार्यकलापानां सर्वविधगुणवत्तायाः समीक्षार्थम् एतस्य रचना कृता। अस्याः समित्याः अध्यक्षपदेन मान्यः कुलपतिः भवति। विश्वविद्यालयस्य मूर्धन्यविद्वांसः सभ्याः भवन्ति। तत्र कुलसचिवः सभ्यसचिवः भवति। एतस्याः समित्याः आयोजनं मान्यस्य कुलपतेः अनुमत्या समये समये सभ्यसचिवेन आयोज्यते। अस्यां समित्यां कार्यायोजनायाः प्रणाली या वर्तते सा विश्वविद्यालयस्य ध्येयं लक्ष्यञ्च मतौ अवधार्य प्रवर्तते। विश्वविद्यालये प्रायोजिताः सङ्गोष्ठ्यः, परिसंवादाः, कार्यशालाः, व्याख्यानमालाश्च अध्यक्षस्य मार्गनिर्देशने एव प्रचलन्ति।

- विश्वविद्यालये शिक्षकैः शिक्षणेतरकर्मचारिभिर्वा यत्किमपि कार्यं निष्पादितं भवति ततः प्राक् आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रे (IQAC) तत्सम्बद्धां चर्चां विधाय अनुमोदनं च प्राप्य अनन्तरमेव तत्कार्यस्य अग्रिमं सोपानं परिकल्प्यते।
- विश्वविद्यालये छात्राणां गुणवत्ताप्रवर्धनाय परिसंवादः, शास्त्रार्थस्पर्धा, भाषणस्पर्धा, वाग्वर्धिनी सभा, कार्यशालाः च समये समये आयोज्यन्ते।
- प्रत्येकवर्षे विविधविभागानाम् अभ्यासक्रमनिर्माणाय BOS द्वारा प्रामाणीकरणं कृत्वा शैक्षणिकपुरोगत्यै मार्गदर्शनं प्रददाति। ततः तस्य अनुमोदनं आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रद्वारा क्रियते। शैक्षणिकप्रगत्यै मध्ये समीक्षादिकमपि आयोज्यन्ते।
- Smart Class – छात्रेभ्यः शास्त्राणां तत्तद्विषयवस्तूनां सम्पूर्णज्ञानाय विश्वविद्यालये Smart Class इत्यस्य व्यवस्थापि प्रकोष्ठद्वये सङ्कल्पितास्ति। अपेक्षितं निर्माणं क्रियमानमस्ति। तद्द्वारा दृश्य-श्रव्यमाध्यमेन ज्ञानं सरलतया अवगन्तुं दृढीकर्तुं च शक्नुवन्ति छात्राः।
- विश्वविद्यालयानुदानायोगस्य नियमानुसारं विश्वविद्यालयस्य ग्रन्थालये डिजिटलीकरणं कृतमस्ति। तथा च विश्वविद्यालयपरिसरे अन्तर्जालव्यवस्थया सह आधुनिकशिक्षणप्रणाली अपि प्रारब्धा वर्तते।
- Information and Communication Technology (ICT) : श्रीसोमनाथसंस्कृतविश्वविद्यालये छात्रेभ्यः यान्त्रिककार्येषु प्रवृत्त्यै ICT इत्यस्य उपयोगः क्रियते। तत्र Pen drive, Printer, Scanner, Xerox, Projector, Multiple Printer, Plagiarism आदीनामुपयोगः क्रियते। येन छात्राः आधुनिकविज्ञानेन सह सम्बद्धाः भवेयुः। तदर्थं सङ्गणककक्षायां ग्रन्थालये च व्यवस्था कृतास्ति।
- विश्वविद्यालयस्य विभिन्नाध्यापकैः विभिन्नविषयाणामुपरि लेखनकार्यप्रकाशनानि विधीयन्ते; येषाम् आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रद्वारा पारदर्शिकतामाश्रित्य विषयविशेषज्ञानां मतानि स्वीकृत्य प्रकाशनसमितिद्वारा प्रकाश्यन्ते।
- विश्वविद्यालयद्वारा संशोधनप्रवृत्तेः प्रोत्साहनार्थं संशोधनकेन्द्रस्य प्रारम्भः कृतः वर्तते। भारत-राजपत्राधिनियममाश्रित्य विश्वविद्यालय-अनुदान-आयोगद्वारा शोधार्थिभ्यः प्रकाशित-नूतननियमानुसारं शोधनिर्देशकानां विषये आन्तरिकगुणवत्ता-आश्वासन-केन्द्रद्वारा चर्चां विधाय शोधविद्यार्थिनां स्व-स्व-विषयानुगुणं मार्गदर्शकानां निर्धारणविषये किञ्च शोधकार्यसम्बद्धाः कार्यकलापाः आन्तरिकगुणवत्ता-आश्वासन-केन्द्रद्वारा निर्धारिताः भवन्ति।

### विश्वविद्यालय-आन्तरिकगुणवत्ता-आश्वासनकक्षद्वारा समित्यां विचार्य सफलतया सम्पादितकार्यक्रमद्वयस्य विवरणम्—

1. **संस्कृतसप्ताहोत्सवः** - श्रीसोमनाथसंस्कृतविद्यालयद्वारा श्रावणपूर्णिमां संस्कृतदिनमुपलक्ष्य संस्कृतसप्ताहोत्सवस्य आयोजनं प्रति वर्षं क्रियते। उत्सवोऽयं साप्ताहिकं भवति। सप्तसु दिवसेषु संस्कृतसम्बद्धाः बहुविधाः स्पर्धाः विसिष्टव्याख्यानानि अपि आयोज्यन्ते। यथा – कथाकथनस्पर्धा, समूहगानस्पर्धा, रङ्गावल्लीस्पर्धा, भाषणस्पर्धा, स्तोत्रकण्ठपाठस्पर्धा, निबन्धलेखनस्पर्धा, समस्यापूर्तिस्पर्धा, स्फूर्तिस्पर्धा

इत्यादयः। तत्रैताः स्पर्धाः स्तरद्वयेन आयोज्यन्ते। विद्यालयस्तरः, महाविद्यालय-विश्वविद्यालयस्तरश्च। स्तरद्वयेऽपि पुरस्काराः भिन्नभिन्नतया प्रदीयन्ते। स्पर्धानाम् आयोजनं भिन्न-भिन्नसमयेषु भवति। सर्वासु स्पर्धासु सर्वेऽपि छात्राः भागं ग्रहीतुमर्हन्ति। स्पर्धासु अन्तिमस्पर्धा भवति स्फूर्तिस्पर्धा। स्पर्धैषा केवलं महाविद्यालय-विश्वविद्यालयच्छात्रेभ्यः भवति। अस्यां स्पर्धायां भागग्रहणाय छात्रैः न्यूनातिन्यूनं चतसृषु स्पर्धासु भागं गृहीतं स्यात् तर्हि एव अत्र भागः प्रदीयते।

तत्र कथाकथनस्पर्धायां छात्राः कामपि एकां नीतिकथां वा हास्यकथां श्रावयितुं शक्नुवन्ति। स्पर्धायां द्वौ निर्णायकौ भवतः। निर्णयः भाषाशुद्धिं, कथनशैलीं, संस्कृतस्योच्चारणादिविषयेभ्यः क्रियते। समूहगानस्पर्धायां चत्वारः वा पञ्चच्छात्राः सम्भूय संस्कृतगीतमेकं गातव्यं भवति। तत्र रागः, तालः, संस्कृतस्योच्चारणदिभिः निर्णयः क्रियते। रङ्गावल्लीस्पर्धायां च्छात्रेभ्यः कश्चन विषयः 'स्वच्छभारतम्' 'उत्सवः' इत्यादि प्रदीयते। तं विषयं छात्राः रङ्गवल्यां प्रदर्शयन्ति। तत्रापि वर्णसाधर्म्यं, शुद्धत्वम्, वषयप्रतिपादनादयः निर्णायकैः संवीक्ष्य निर्णयः प्रदीयते।

एवं स्पर्धासु पुरस्कारप्राप्तेभ्यः पुरस्कारसहितं प्रमाणपत्रं प्रतिभागिभ्यः प्रतिभागिप्रमाणपत्रं च वितीर्यते, अग्रिमवर्षेषु भागग्रहणाय प्रेरणाऽपि प्रदीयते।

1. **अनुसन्धानविचारसमितिः (Research Discussion Committee)** -- विश्वविद्यालयानुदानायोगस्य नियमानुसारं प्रतिवर्षं शोधच्छात्राणां प्रवेशपरीक्षा सञ्चाल्यते। तत्र उत्तीर्णानां योग्यानां शोद्धार्थिनां पुनः शास्त्रपरीक्षामाध्यमेन चयनं कृत्वा उत्तमरीत्या तेषां शोधकार्यसम्पादनाय शोधपाठ्यक्रमः (Course work) पाठनपूर्वकं कक्षाः प्रचलन्ति। ततः परं शोधच्छात्रस्य इच्छानुगुणं शोधविषयं एवं लघुशोधप्रबन्धस्य च निर्माणं कारयित्वा तस्य गुणवत्तापूर्वकं परीक्षणं विधाय तस्य विषयानुसारं R.D.C द्वारा मार्गदर्शकस्य नियुक्तिः नियमानुसारं क्रियते। तथा शोद्धच्छात्रस्य पञ्जीकरणादिकं कारयित्वा शोधः प्रारभ्यते। पुनः प्रतिषाण्मासाभन्तरे शोधच्छात्रस्य कार्यप्रगतिः R.D.C द्वारा क्रियते। एवं च गुणवत्तायै साधु शोधकार्यसम्पादनाय विश्वविद्यालयस्थ संशोधनसमितिद्वारा सततं विधिः निर्वहते। तस्य फलत्वेन अद्य विश्वविद्यालयेऽस्मिन् २०१५-१६ तः २०१९-२०२० यावत् ५३ शोधच्छात्राः पदवीं प्राप्तवन्तः अथ च ७१ छात्राश्च संशोधनं कुर्वन्तः दृश्यन्ते।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

***6.5.3 Number of quality initiatives by IQAC for promoting quality culture per year***

## प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थम् आयोजितानां गुणवत्तोपक्रमाणां सङ्ख्या।

**Answer:** 13

6.5.3.1 Number of quality initiatives by IQAC for promoting quality year-wise for the last five years

प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण (आ. गु. आ. के.) गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां विगतपञ्चवर्षाणां सङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 09 | 01 | 01 | 01 | 01 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

| | |
|---|---|
| Number of quality initiatives by IQAC per year for promoting quality culture (Data Template) (आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्)) | View Document |
| IQAC link(आ.गु.आ.के.द्वारा आयोजितस्य गुणवत्तोपक्रमस्य सन्धानम्।) | View Document |

*6.5.4 Quality assurance initiatives of the institution include:*

*1. Regular meeting of Internal Quality Assurance Cell (IQAC);*

*2. Timely submission of Annual Quality Assurance Report (AQAR) to NAAC*

*3. Academic Administrative Audit (AAA) and initiation of follow up action*

*4. Participation in NIRF*

*5. UGC Recognition for any other Academic Excellence or any other quality audit recognized by state, national agencies.*

**संस्थायाः गुणवत्ताश्वासनोपक्रमेषु अन्तर्भूताः सन्ति -**

**1. आ.गु.आ.केन्द्रस्य नियमितमुपवेशनम्,**

**2. रा.मू.प्र.परिषदे समयेन वार्षिकगुणवत्ताश्वासनप्रतिवेदनसमर्पणम् ।**

**3. शैक्षिकं प्राशासनिकं लेखापत्रम्, अनुगतक्रियाणामुपक्रमणम् ।**

**4. राष्ट्रियसांस्थिकश्रेणिकरूपरेखायां भागग्रहणम् ।**

**5. विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तः यः कश्चन शैक्षिकोत्कर्षः अथवा राष्ट्र/राज्य अभिकरणैः मान्यताप्राप्तं किमपि गुणावत्ताङ्केक्षणम्।**

**Answer:** D. Any 1 of the above (ई. उपर्युक्तेषु कश्चन एकः)

| File Description | Document |
|---|---|
| Upload e-copies of the accreditations and certifications(प्रत्यायनानां, प्रमाणपत्राणां च वैद्युतप्रमाणपत्रम् उपारोपयतु।) | View Document |
| Upload details of Quality assurance initiatives of the institution (Data Template)(संस्थायाः गुणवत्तोपक्रमाणां विवरणम्। (दत्तांशप्रारूपम्)) | View Document |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

*6.5.5 Incremental improvements made during the preceding five years (in case of first cycle)*

*Post accreditation quality initiatives (second and subsequent cycles)*

**गतपञ्चवर्षेषु सम्पादिताः क्रमविकासाः *(प्रथमचक्रसन्दर्भे)***

**प्रत्यायनोत्तरं कृताः गुणवत्तोपक्रमाः *(द्वितीयादिचक्रेषु)***

**Answer:**

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयः स्वकीयं ध्येयवाक्यं केन्द्रे स्थापयन् आन्तरिक-गुणवत्ता-आश्वासनकेन्द्रमाश्रित्य(IQAC) प्रतिवर्षं नूतनं नूतनं कार्यं करोति। तस्मिन्नेव सन्दर्भे विश्वविद्यालयः स्वकीयप्रकाशनविभागद्वारा संशोधनप्रधानग्रन्थानां प्रतिवर्षं विश्वविद्यालयस्य प्रकाशननियमानुसारं ग्रन्थमालायां पञ्चविंशतिः ग्रन्थाः, विश्वविद्यालयस्य शोधग्रन्थमालायां त्रयः ग्रन्थाः एवं शास्त्रग्रन्थमालायां पञ्च ग्रन्थाः २०१५ तः २०२० वर्षं यावत् आहत्य त्रयस्त्रिंशत्(३३) ग्रन्थाः प्रकाशिताः सन्ति। एवञ्च सोमज्योतिरिति एका त्रैमासिकी वृत्तपत्रिकाऽपि प्रकाश्यते। विगतपञ्चसु वर्षेषु प्रकाशननियमानुसारम् एवञ्च प्रकाशनसमित्यनुशंसानुसारं सम्पादित-सम्पद्यमानकार्यक्रमाणां विवरण-प्रधानसूचनाः सङ्गृह्य अत्र प्रकाश्यन्ते।
2. विश्वविद्यालयस्य पञ्च अध्यापकेभ्यः आन्तरिक-गुणवत्ता-आश्वासनकेन्द्रसंस्तुत्या मान्यकुलपतेः अनुमोदनञ्च प्राप्य सेवाप्रोन्नतिः प्रदत्तास्ति एवं सहाचार्यतः आचार्यपदं प्रति संस्तुतिः कृताऽस्ति। तथैव चतुर्णां नियमितसहायकाचार्याः तथा च संशोधनाधिकारिणा सहितं पञ्चकर्मचारिणां स्टेज्-१ तः स्टेज्-२ इति सेवाप्रोन्नतियोजनाद्वारा (CAS) पदोन्नत्यै आवेदनपत्राणि आन्तरिक-गुणवत्ता-आश्वासनकेन्द्रं (IQAC) प्रति प्राप्तान्यासन्। तेषां पदोन्नत्यै पञ्चसहायकाचार्याणां प्रकाशनानि, API इत्यस्य परिशोधनं मूल्याङ्कनं च कृत्वा अभिलेखानाम् उपयोगं च कृत्वा तद्विधानेन सर्वाणि पत्राणि यथानियमं प्राप्तान्यासन्। तेषां मूल्याङ्कनं कृत्वा विवरणमपि प्रस्तुतम् आन्तरिकगुणवत्ता-आश्वासनकेन्द्रेन संस्तुतं तथा तेभ्यः पदोन्नतिः प्रदत्तापि। अन्येषां पदोन्नत्यै संस्तुतिः अपि कृतास्ति।
3. तथैव विश्वविद्यालयस्य अन्यशैक्षणिकगतिविधौ राष्ट्रिय-अन्ताराष्ट्रिय-प्रादेशिकसङ्गोष्ठ्यः विभिन्नान् विषयान् आश्रित्य आयोज्यन्ते। संस्कृतवाङ्मये निहितज्ञानविज्ञान-धर्मसंस्कार-काव्यशास्त्रादितत्त्वान्तर्गत-निहित-विषयविशेषमाश्रित्य अन्वेषणदृष्ट्या सङ्गोष्ठ्यः समायोज्यन्ते। येन कार्यक्रमेण शोधार्थिनाम् अन्येषां छात्राणाञ्च लाभो जायते। तथैव अध्यापकेषु अनुसन्धानगुणवत्तायाः संस्कारः दृढो भवति। तत्र २०१६ वर्षे **अन्ताराष्ट्रियसङ्गोष्ठ्याः** आयोजनं कृतमस्ति। तत्र '**संस्कृतसाहित्ये शिवतत्त्वम्**' इति विषयमादाय आयोजितायां संगोष्ठ्यां विश्वविद्यालयस्य आचार्याः, प्राध्यापकाः, प्रशासनिकाधिकारिणः, शिक्षणेतरकर्मचारिणः छात्राश्च अनिवार्यतया भागं गृहीत्वा सोत्साहं कार्यं सफलीकृतवन्तः। तस्यां विभिन्नप्रान्तेभ्यः देशेभ्यश्च विविधविषयनिष्णातारः, पण्डिताः विद्वांसः, शोधकार्यरताः शोधच्छात्राः च स्वस्वशोधपत्राणां पत्रवाचनं कृतवन्तः। तत्रापि (३०)त्रिंशद् यावत् विशिष्टविद्वांसः समागता आसन्। तथा ४२९ यावत् प्रतिभागिनः समागता आसन्। अन्ताराष्ट्रियसङ्गोष्ठ्याः उद्घाटनकार्यक्रमः माननीयस्य राज्यपालमहोदयस्य **ओ. पी. कोहली** (गुजरातसर्वकारः, गान्धीनगरम्) महाभागस्य करकमलाभ्यां सम्पादितः। कार्यक्रमोयं सर्वैः विश्वविद्यालयपरिवारसदस्यैः महदानन्देन अनुष्ठितः। तदनु भाष्यपरम्परा ज्ञानप्रवाहश्चेति अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः आयोजनं कृतं वर्तते। तदनु अखिलभारतीयदर्शनसङ्गोष्ठ्याः अपि आयोजनं विहितमस्ति। एवमेव विभिन्नसङ्कायेषु राष्ट्रियसङ्गोष्ठ्यः, राज्यस्तरीयसङ्गोष्ठ्यः अपि आयोजिताः सन्ति। यथा – विगतपञ्चवर्षेषु विहितानां कार्यशालानां विवरणमित्थमस्ति-

- २०१५-१६तमे वर्षे विविधसङ्कायेषु चतस्रः कार्यशालाः आयोजिता आसन्।
- २०१६-१७तमे वर्षे व्याकरणसङ्काये सङ्गोष्ठी एवं साहित्यसङ्काये कार्यशालायाः आयोजनं कितम्।
- २०१७-१८तमे वर्षे वेद-व्याकरणसङ्कायेषु कार्यशालाद्वयं आयोजनं कृतम्।
- २०१८-१९तमे वर्षे दर्शनसङ्काये राष्ट्रियसङ्गोष्ठी तथा च व्याकरण-ज्योतिषविभागेषु कार्यशालाद्वयी आयोजिता वर्तते।
- २०१९-२०तमे वर्षे एका अन्ताराष्ट्रियसङ्गोष्ठी, साहित्यविभागे अका राष्ट्रियसङ्गोष्ठी एवञ्च विविधसङ्कायेषु कार्यशालानाञ्च आयोजनं कृतमस्ति।

1. श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा भारतीयसंस्कृतेः संस्कृतस्य च संरक्षणाय **४९तमस्य** अखिल-भारतीय-प्राच्यविद्या-सम्मेलनस्य आयोजनं २०१८ वर्षे विश्वविद्यालयपरिसरे आयोजितम्। सम्मेलनेऽस्मिन् वेद-वेदाङ्ग-वैदिकगणित-आयुर्वेद-योगविज्ञान-व्याकरण-दर्शन-साहित्य-पुराणेतिहास-अरबिक् स्टडीज्, इस्लामिक् स्टडीज्, द्राविडियन् स्टडीज्, Indian Linguistics आदिविषयेषु ७०० तः अधिकानि शोधपत्राणि पठितानि आसन्। नागपुरे आयोजितस्य 50th अखिल-भारतीय-प्राच्यविद्यासम्मेलने Indian Linguistics इति विषयस्य अध्यक्षेण प्रो.विनोदकुमार झा महोदयः आसीत्।

तदनुगुणमेव विश्वविद्यालयः स्वकीये सङ्कायमाध्यमेन प्रतिसङ्कायं योजनानुसारं अपेक्षितञ्च धनराशिं तत्तत्सङ्कायं प्रति दत्त्वा शास्त्रप्रावीण्यार्थं तन्माध्यमेन च शास्त्रसिक्षणपद्धतौ अभिनवप्रज्ञाविकासाय सङ्कायानुसारं शास्त्रं निर्धार्य कार्यशालाः आयोजयति। यत्र मूर्धन्याः विद्वांसः विशिष्टव्याख्यानाय सादरम् आहूयन्ते। एवञ्च निर्धारितविषयं केन्द्रीकृत्य व्याख्यानानि ते ददति। येन व्याख्यानसमवायेन छात्राः लाभान्विताः भवन्ति। एवञ्च गूढशास्त्रे रुचिशीलाः जायन्ते।

तदनु अस्मिन् आन्तरिक-गुणवत्ता-विवर्धनसन्दर्भे शास्त्रीयव्याख्यानमाला अपि विश्वविद्यालयेन प्रतिवर्षम् आयोज्यन्ते। यत्र शास्त्रनदीष्णाः विद्वांसः सादरम् आमन्त्र्यन्ते। तत्र अध्यापकैः सह छात्रा अपि अम्मिलिताः भवन्ति। एवं व्याख्यानान्ते शास्त्रीयजिज्ञासासमाधानमपि क्रियते। तदतिरिच्य विश्वविद्यालयोऽयं संस्कृतसंस्कृतिसंवर्धनसन्दर्भे एवं लोककल्याणाय शास्त्रीयपद्धतेरतिरिक्तं भारतीयसंस्कृतीमूलाधारभूतानि रामायणादीनि शास्त्राण्याश्रित्य सामान्यव्याख्यानान्यपि अनुष्ठापयति। तत्रैव कस्यचिद्विशेषकवेः परिचये कालिदास-भास-भारव्याद्यष्टकवीनां परिचयव्याख्यानमाला, भागवतव्याख्यानमाला तथैव विविधविषयाश्रितानि व्याख्यानानि आयोजयति।

- विश्वविद्यालयः शास्त्रीयसंवर्धनस्य एतानि कार्याणि कुर्वन् आधुनिकजीवनवृत्त्युद्देश्यमाश्रित्य UGC NET/SLET/JRF इति पात्रतापरीक्षायै छात्राणां कृते विशेषव्यवस्थां प्रवर्तयति। तत्फलरूपेण विगतपञ्चवर्षेषु विश्वविद्यालयस्य छात्राः विभिन्नासु परीक्षासु साफल्यं प्राप्तवन्तः। तेषां विवरणमित्थमस्ति- तत्र २२ छात्राः सेट् परीक्षायाम् उत्तीर्णातां प्राप्तवन्तः, नेट् परीक्षायाम् २१ छात्राः उत्तीर्णतां प्राप्तवन्तः, तथा (३)त्रयः छात्राः कनिष्ठशोधवृत्तिञ्च(JRF) प्राप्तवन्तः।

विगतपञ्चवर्षेषु विश्वविद्यालयेन सफलतया बहवः कार्यक्रमाः समायोजिताः येषां प्रातिनिध्यं सम्प्रति सर्वत्र दृश्यमानमस्ति यथा – प्राध्यापक-प्रशासनिकानां, विविधभवनानां, ग्रन्थालये शास्त्रानुसारं पुस्तकानां, छात्राणाम्, विश्वविद्यालयस्य अनुदानस्य परिसरे हरितवातावरणस्य, यानस्थानादीनां च प्रगतिः सञ्जाता वर्तते।

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**7.Institutional Values and Best Practices**

**7.1 Institutional Values and Social Responsibilities**

***7.1.1 Number of gender equity promotion Programmes organized by the institution during the last five years.***

**विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां सङ्ख्या।**

**Answer:** 10

7.1.1.1 Number of gender equity promotion Programmes organized by the institution year-wise during the last five years

विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या।

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 02 | 02 | 02 | 02 | 02 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Report of the event कार्यक्रमस्य प्रतिवेदनम् | View Document |
| List of gender equity promotion Programmes organized by the institution (Data Template) संस्थया लैङ्गिकसमतायाः संवर्धनार्थं निर्वर्तितानां कार्यक्रमाणां सूची। (दत्तांशप्रारूपम्) | View Document |

*7.1.2 Institution shows gender sensitivity in providing facilities such as:*

*1. Safety and Security*

*2. Counselling*

*3. Common Room*

**संस्था अधोलिखितसौविध्यानि प्रदाय लैङ्गिकसंवेदनशीलतां व्यवस्थापयति।**

***1.* निरुपद्रवता सुरक्षा च**

***2.* परामर्शः**

***3.* समानप्रकोष्ठः**

**Answer:**

## लैङ्गिकसंवेदनशीलता

श्रीसोमनाथसंस्कृतविश्वविद्यालयः छात्राणां सुरक्षायै शिक्षणजगति उत्तरोत्तरं विकासाय विविधप्रकल्पान् करोति । छात्राः सुखेन अध्ययनम्, सुरक्षासहितमावासम्, गुणवत्तायुतं भोजनम्, सरलतया सहजतया च गुरूणां मार्गदर्शनम्, स्वकीयप्रतिभायाः सुष्ठु प्रदर्शनम्, विविधेषु कार्यक्षेत्रेषु स्वकीयं नेतृत्वमित्यादीन् सर्वानपि लाभान् प्राप्नुवन्ति, एतदर्थं विश्वविद्यालयः छात्राणां निरुपद्रवता सुरक्षा परामर्शः समानप्रकोष्ठश्चेत्यादिविषये निरन्तरः यतमानः वर्तते ।

श्रीसोमनाथसंस्कृतविश्वविद्यालये लैङ्गिकसंवेदनशीलताविषये नैके कार्यक्रमाः भवन्ति । तत्र विशेषतः युवमहोत्सवे विविधाः स्पर्धाः भवन्ति, तत्र सर्वकारद्वारा ये कार्यक्रमा अस्मिन्सन्दर्भे समाचर्यन्ते तेषां परिपालनमस्माभिः क्रियते । स्पर्धायां तादृशाः विषयाः संस्थाप्यन्ते यत्र लैङ्गिकसंवेदनशीलताविषये छात्रा अवगच्छन्ति एवञ्च स्त्रीपुंसमानतायाः लक्ष्यं सिद्धं भवति ।

1. श्रीसोमनाथसंस्कृतविश्वविद्यालये कन्यापालनाय कन्यापाठनाय बालिकानां प्रवेशादिशुल्कं न्यूनं स्थापितमस्ति येन अधिकाधिकाः बालिकाः पठेयुः । विश्वविद्यालयेनानेन प्रतिवर्षं लैङ्गिकसंवेदनशीलताविषये स्पर्धाः शोभायात्रा (Rally) क्रियते । विषयेऽस्मिन् वर्गखण्डेऽपि गुरुभिः शास्त्राभ्यासावसरे एतन्महत्त्वप्रतिपादकान्युदाहरणानि प्रदीयन्ते । शास्त्रीयस्पर्धासु सांस्कृतिककार्यक्रमे, यज्ञशालायां, स्वच्छताभियाने, प्रार्थनायां, विश्वविद्यालयस्य कुलगीते, मेधापत्रिकायां, राष्ट्रियसेवायोजनाकार्यक्रमे, सङ्गोष्ठ्यां, परिसंवादेषु, सरस्वत्याः मन्दिरे सेवा-पूजायां सर्वत्र लैङ्गिकसमानतां दृष्टौ निर्धार्यैव आयोजनानि भवन्ति ।
2. **निरुपद्रवता सुरक्षा च (Safety & Security)**
    1. परिसरेऽस्मिन् सर्वत्र CCTV Camera इत्यस्य व्यवस्थाऽस्ति । महत्त्वपूर्णेषु स्थानेषु इयं व्यवस्था सदैव नियन्त्रणे वर्तते । CCTV Camera मध्ये प्राशासनिक-शैक्षणिक-कुमारछात्रावासेषु स्थानत्रयेषु सर्वमपि Recording सुरक्षितं पुनश्च तस्य डेटासंरक्षणं (Maintenance) परीक्षणं जागरूकतापूर्वकं विश्वविद्यालये भवति । अत्र छात्राणां सुरक्षायै छात्रावासद्वये CCTV Camera इत्यस्य व्यवस्था वर्तते । विश्वविद्यालयस्य सम्पूर्णेऽस्मिन् परिसरे छात्रा अनया व्यवस्थया निर्भीकतया पठन्ति ।
    2. परिसरेऽस्मिन् गार्गी-कन्या-छात्रालयस्य व्यवस्थास्ति । बालिकानां कन्यानां सुरक्षायै विश्वविद्यालयेन विविधानि सुरक्षाकवचानि स्थापितानि सन्ति । तेषु सुरक्षाकवचेषु- परिसरेऽस्मिन् बालिकानां सुरक्षायै विश्वविद्यालयेन द्वयोः गृहमात्रोः व्यवस्था कृता वर्तते । द्वावपि क्रमेणाहर्निशं वसतः । चन्द्रमौलि-कुमारछात्रालयेऽपि गृहपति अहर्निशं छात्राणां सुरक्षायै वसति । पुनश्च तैः सर्वविधचिन्ता कुमार-कुमारीणां क्रियते । येषां निरीक्षणे सर्वेऽपि छात्राः निर्भये वातावरणे निजाध्ययनकार्यं कुर्वन्ति ।
    3. विश्वविद्यालयस्य मुख्यद्वारेऽहर्निशं रक्षकाणां (Security Guard) व्यवस्थाऽस्ति । क्रमेण त्रयः रक्षकाः ८-८ होरात्मकं कार्यभारं वहन्ति । परिसरे आगन्तृणां परीक्षणं कृत्वा विवरणं विलिख्य आगन्तुकस्य प्रवेशं कारयन्ति ।
3. परिसरे पठतां छात्राणां स्वास्थ्यविषयकं गभीरं चिन्तनं तन्निवारणोपायाश्च क्रियन्ते । विषयमिमं सार्थकीकर्तुं छात्राणां स्वास्थ्यसम्बन्धिनः कार्यक्रमाः स्वास्थ्यविषयकाः व्यवस्थाः कल्प्यन्ते । तत्र थेलेसेमिया (Thalassemia) इत्यस्य रोगनिवारणाय विविधानि शिबिराण्यायोज्यन्ते । परिसरे एकस्य आरोग्यकेन्द्रस्यापि व्यवस्था वर्तते यत्र

सर्वेषां स्वास्थ्यपरीक्षणाय सप्ताहे वारद्वयं डॉ.निशाबहन गोहिलमहोदया स्थानीयवैद्या आगत्य छात्राणां चिकित्सां करोति । रुग्णानां छात्राणां धनव्ययो न भवेत्तदर्थं परिसरैव औषधव्यवस्था वर्तते ।

4. अत्र कन्यानां कुमाराणां च रक्षायै समस्यानिवारणकेन्द्रस्यापि व्यवस्थाप्यस्ति तत्र बालिकानां बालकानां च कृते ०६ प्रकोष्ठे व्यवस्था कृता वर्तते । कन्यानां समस्यानिवारणाय या समितिः रचिता तत्र प्रो.अर्चनाकुमारी दूबे महोदया अध्यक्षा वर्तते । कुमाराणां सस्यानिवारणसमितेः अध्यक्षश्च डॉ.पङ्कजकुमार एस. रावलमहोदयः वर्तते । कक्षायां गुरवोऽप्येतस्मिन्सन्दर्भे समस्यानिवारणाय मार्गदर्शनं कुर्वन्ति ।
5. बालिकानां कृते अभ्यासाय विशिष्टप्रकोष्ठस्य व्यवस्था कृता वर्तते । यत्र सर्वाः छात्राः स्वकीयमध्ययनं निर्विघ्नतया कुर्वन्ति । कन्यानां साधारणीकक्ष्या (**Common Room**) सुरक्षिते स्थाने वर्तते । साधारणप्रकोष्ठेऽस्मिन् ३० बालिकानामुपवेशनव्यवस्था बालिकानामावश्यकवस्तूनां च सर्वविधव्यवस्था प्रकोष्ठेऽस्मिन् विद्यते ।
6. परिसरे उत्पातोपशमनसमितिः (**Anti-Ragging Committee**) अनुशासनसमितिश्च (**Discipline Committee**) वर्तते यन्माध्यमेन छात्रा अनुशासनस्य पालनं कुर्वन्ति । परिसरे छात्रशोषणसम्बन्धिसमस्यानां निवारणाय सर्वासु भित्तिकासु छात्रशोषणविरोधिफलकानि लेपितानि वर्तन्ते । तस्यां समित्यां कन्यानां यौन-उत्पीडनविषयिकी-समस्यानां निवारणाय व्यवस्था विमर्शश्च भवति ।
7. श्रीसोमनाथसंस्कृतविश्वविद्यालये 01/08/2015 तः 14/08/2015 एतेषु पञ्चदशदिवसेषु एकस्य महिलासशक्तीकरणपाक्षिककार्यक्रमस्यायोजनं सञ्जातं अनेन आयोजनेन परिसरस्थानां बालिकानां स्वमानपूर्वकं जीवनयापनं, जीवनयापनाय विश्वासः वर्धितः तथा च बालिकानां मनोबलवृद्धिर्जाता । **महिलाजागृतिविषयक-कार्यक्रमः 16/09/2017 दिनाङ्के श्रीसोमनाथसस्कृतविश्वविद्यालयपरिसरे सञ्जातः ।** अत्र पठन्त्यः सर्वाः बालिकाः जागृतेः कार्यक्रमेऽस्मिन् संलग्नाश्चासन् । विश्वविद्यालयोऽयं महिलानां कृते कन्यारक्षणाय पाठनायायोजनानि करोत्येव यथा मान्यस्य कुलपतिवर्यस्य प्रो.गोपबन्धुमिश्रमहोदयस्य प्रेरणया महिलाजागृति-सशक्तीकरणविषये एवं स्वस्मिन् निहितशक्तिजागरणं स्पर्धया भवेत्तदर्थं मान्येन कुलपतिना समस्यापूर्तिस्पर्धायां **'कन्यका पाल्यताम् कन्यका पाठ्यताम्'** विषयोऽयं प्रदत्त आसीत् ।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

***7.1.3 Alternate Energy initiatives such as:***

***Percentage of power requirement of the university met by the renewable energy sources (preceding academic year data)***

**वैकल्पिकस्य ऊर्जसः उपक्रमाः यथा-**

**विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः प्रतिशतता-*(*प्रगताध्ययनवर्षस्य दत्तांशः*)***

**Answer:** 0

7.1.3.1 Annual power requirement met by renewable energy sources (in KWH)

आवश्यक्याः वार्षिकविद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तिः।

Answer: 00
7.1.3.2 Annual power requirement of the institution (in KWH)

संस्थायाः वार्षिकविद्युच्छक्तेः आवश्यकता।

Answer: 00

| File Description | Document |
|---|---|
| Upload details of power requirement of the university met by renewable energy sources (Data Template) विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः विवरणम्। (दत्तांशप्रारूपम्) | View Document |

***7.1.4 Waste Management steps including:***

***1. Solid waste management***

***2. Liquid waste management***

***3. E-waste management***

**व्यर्थवस्तुप्रबन्धनप्रक्रिया यथा**

***1.* घनव्यर्थवस्तुप्रबन्धनम्**

***2.* तरलव्यर्थवस्तुप्रबन्धनम्**

***3.* वैद्युतव्यर्थवस्तुप्रबन्धनम्**

**Answer:**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः वृक्षैः हरितः प्रायः कर्गदरहितः प्लास्टिकमुक्तश्च (Plastic-free) वर्तते । विश्वविद्यालयेन यथा एतादृशाः प्रकल्पाः समादृताः सन्ति तद्वदेव केचन उपक्रमाः अपि समनुष्ठिताः सन्ति । यत्र व्यर्थवस्तुप्रबन्धने सर्वादौ त्रिवर्णात्मिकाः (हरित-पीत-रक्ताः) अवकरपेटिकाः तत्तदवकरस्य सङ्ग्रहं कुर्वन्ति । हरितवर्णपेटिकायां तरलत्याज्यवस्तूनां विनियोगः क्रियते, पीतवर्णपेटिकायां कर्गद-Plastic-पुनरुपयोगार्हवस्तूनां विनियोगः क्रियते तथा च रक्तवर्णपेटिकायां पुनरुपयोगानर्ह (**Non-Recyclable**) वस्तूनां विनियोगः क्रियते । येषां प्रकल्पानाम् अनुष्ठानेन विश्वविद्यालयस्य लाभः भवति । एतादृशेषु प्रकल्पेषु प्रथमः प्रकल्पः वर्तते विश्वविद्यालयस्य -

1. **घनत्याज्यवस्तुप्रबन्धनम् । (Solid-waste Management)**

श्रीसोमनाथसंस्कृतविश्वविद्यालये Solid-waste Management इत्यस्य प्रबन्धाय प्रप्रथमं सर्वेभ्यः कर्मचारिभ्यः प्रशिक्षणं दीयते विशेषतः सेवकगणेभ्यः येन परिसरे जातस्य अवकरस्य प्रबन्धनं भवेत् । सेवकाः मिलित्वा उत्पन्नस्य अवकरस्य एकस्मिन् भागे सञ्चयं कृत्वा पदार्थानुसारं विभाजनं कुर्वन्ति । पुनश्च पर्यावरणप्रश्नपत्रमाध्यमेन छात्रेभ्यः अपि स्वच्छतायै त्याज्यवस्तूनां प्रबन्धनाय प्रशिक्षणं दीयते । अनेन प्रशिक्षणेन सर्वेषु कर्मचारिषु एका जागृतिः समागच्छति यया व्यवस्थया परिसरे कर्गद-Plasticपदार्थः लेखिनी, अवकरः, काष्ठांशाः, पाषाणाः, इष्टिकाः, लोहखण्डाः, Wire, Rubber, इत्येतेषां पदार्थानाम् एवञ्च पुरातनवृत्तपत्राणां पाक्षिक-मासिक-सामयिकानां त्याज्यलोह-Plastic-वस्तूनां विक्रयणं क्रियते । उत्तरपत्रिकाणां योग्यप्रक्रियया त्रिवर्षाधिककालान्ते विक्रयणं क्रियते । तस्मादुत्पन्नं धनं विश्वविद्यालय-विकासाय वित्तसमित्या उपयुज्यते । अनया क्रियया परिसरोऽयं शुद्धः स्वच्छश्च भवति । जनानां, प्रकृतेः, पशूनां, पक्षिणां, समाजस्य, वेरावलप्रान्तस्य, परिसरस्य, वातावरणस्य पर्यावरणस्य च रक्षणं भवेत् तदर्थं विश्वविद्यालयेन एषः उपक्रमः समनुष्ठीयते।

विश्वविद्यालयस्य परिसरे विविधेषु स्थानेषु प्रत्येकं कर्मचारिणः, अधिकारिणः, प्राध्यापकानां, प्राचार्याणां, अध्यक्षाणां च कार्यालये एवं च विविधेषु सामान्यस्थलेषु अपि अवकरसङ्ग्रहणाय अवकरकरण्डस्य व्यवस्था कृता वर्तते । तत्रापि विविधासु अवकरकरण्डेषु विभाजनं कृत्वा छात्रालयस्य तत्रापि भोजनालयस्य एवं च शैक्षणिकभवनस्य प्राशासनिकभवनस्य च विविधावकराणाम् अवकरसङ्ग्रहप्रबन्धः क्रियते । तमवकरं वेरावल-पाटणनगरपालिकायानेन नीयते ।

घनत्याज्यपदार्थानां विश्वविद्यालयेन प्रबन्धनं क्रियते एवञ्च विश्वविद्यालयपरिसरे छात्रेषु जागृतिः आगच्छेत् तदर्थं तेषां पुरस्तादेव पक्षे मासे वा एकवारं सामूहिकं घनत्याज्यपदार्थानां निवारणाय स्वच्छताभियानं क्रियते ।

1. **तरलव्यर्थवस्तुप्रबन्धनम् (Liquid-waste Management)**

तरलव्यर्थवस्तुषु अन्नपानादीनां, शौचालयजलस्य, वस्त्रप्रक्षालनजलस्य, भोजननिर्माणप्रक्रियायां पात्रप्रक्षालनजलस्य, भोजनालयप्रक्षालनजलस्य, तरलव्यर्थवस्तुत्वेन ग्रहणं भवति । एतादृशस्य मलिनजलस्य त्यागाय छात्रालयपृष्ठे गभीरं भूमिखननं कृत्वा गर्ताः निर्मिताः सन्ति तत्र समग्रस्य परिसरस्य दूषितं जलं गच्छेत् तादृशी व्यवस्था कृता वर्तते । विश्वविद्यालयेन तरलव्यर्थपदार्थानां विनिमयाय तत्रापि पाकगृहस्य भोजनालयस्य Organic Waste इत्यस्य च व्यवस्था कृता वर्तते । तदर्थं तरलव्यर्थपदार्थाय आयोजनं कल्पितं वर्तते । एस.टी.पी.(STP- Sewage Treatment Plants) इत्यस्यापि अनुसन्धानं कृत्वा प्रयुक्तस्य व्यर्थजलस्यापि व्यवस्थापनं कृत्वा वृक्षेषु जलसेचनाय प्रबन्धः कल्पितः वर्तते ।

परिसरस्यास्य व्यर्थवस्तुप्रबन्धनं विलोक्य वेरावलप्रान्तस्य नगरपालिकया अपि स्वच्छपरिसराय प्रमाणपत्रं दत्तं वर्तते इति प्रमाणेन एषः एकः गौरवस्य विषयो भवति विश्वविद्यालयस्य कृते ।

1. **वैद्युतव्यर्थवस्तुप्रबन्धनम् (E-waste management)**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः वैद्युतव्यर्थवस्तूनां निराकरणे अग्रे स्थितोऽस्ति । विश्वविद्यालयस्य शैक्षणिके भवने, "त्रिवेणी" इत्याख्ये प्राशासनिके भवने, "शारदा" भवनाख्ये ग्रन्थालये च यत्किमपि यन्त्रादिकात्मकं यथा- सङ्गणकम्(Computer), Hard-Disc, CPU, Printer, Scanner, Mouse, Keyboard, Camera, Refrigerator, Television, Washing-machine, Mobile, CD-DVD, Tube-Light, Lamp, Calculator, Laptop, AC, Modem, Electronic भारमापनयन्त्रं, पिङ्ख:, व्यजनम् इत्येतेषां वस्तूनां विश्वविद्यालयेन अद्यावधि सङ्ग्रहः कृतो वर्तते न त्यागः ।

इत्थं विश्वविद्यालयेन प्रकल्पत्रयस्य घनव्यर्थवस्तुप्रबन्धनस्य, तरलव्यर्थवस्तुप्रबन्धनस्य तथा च वैद्युतव्यर्थवस्तुप्रबन्धनस्य अनुष्ठानेन पर्यावरणसंरक्षणे स्वकीयं महत् योगदानं प्रदत्तमस्ति । व्यर्थवस्तूनां प्रबन्धनेन पर्यावरणं शुद्धं, परिसरः स्वच्छः सदैव तिष्ठति ।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document |

***7.1.5 Rain water harvesting structures and utilization in the campus***

**वृष्टिजलसङ्ग्रहणसंरचना, परिसरे वृष्टिजलोपयोगश्च**

**Answer:**

**परिसरे वृष्टिजलसङ्ग्रहव्यवस्था, सङ्ग्रहः विनियोगश्च ।**

**(Rain Water Harvesting, Structures & Utilization in the Campus)**

श्रीसोमनाथसस्कृतविश्वविद्यालयस्य परिसरे वृष्टिजलसङ्ग्रहणाय एका विशिष्टा योजना क्रियमाणा वर्तते । भूमिजलसंवर्धनाय व्यवस्था कृता वर्तते । परिसरेऽस्मिन् चन्द्रमौलिरिति कुमारछात्रालयः, गार्गीति कन्याछात्रालयः, प्रभासज्योतिरिति शैक्षणिकभवनम्, त्रिवेणीति प्राशासनिकभवनम्, मान्यस्य श्रीकुलपतिनिवासस्तथा च सेवकसदनम् इत्थं नैकानि भवनानि सन्ति । समुद्रतटे रमणीयेऽस्मिन् परिसरे प्रतिवर्षं वर्षायाः प्रमाणमपि सुयोग्यम् आवश्यकतानुसारं भवति । अतः विश्वविद्यालयेन अनेन जलसङ्ग्रहः क्रियते । विश्वविद्यालयेन बहु विचिन्त्य परिसरेऽस्मिन् वृष्टिजलसङ्ग्रहणाय विविधानि सोपानानि गृहीतानि सन्ति, एतेषां सोपानानां लाभमावर्षं छात्राः कर्मचारिणश्च गृह्णन्ति ।

1. **परिसरे वर्षाजलव्यवस्था (Rain Water Structural Facility in the Campus)**

विश्वविद्यालयस्य परिसरे यावन्ति भवनानि सन्ति यानि शैक्षणिकभवनं प्राशासनिकभवनं निवासस्थानानि सर्वाण्यपि जलसुविधापूर्णानि सन्ति । भवतु भवनं नूतनं स्याद्वा पुरातनं, तत्र जलस्य सङ्ग्रहणाय नगरपालिकाद्वारा मधुरजलस्य व्यवस्था तु कृतैव वर्तते । यतो हि समुद्रतटे परिसरः वर्तते अतः क्षारजलैर्भरितः परिसरः वर्तते किन्तु नगरपालिकाद्वारा वृष्टिजलस्य सङ्ग्रहेण मधुरजलस्य समस्यानां निवारणमावर्षं भवति चलति च । परिसरे भूगर्भजलं क्षारजलेन भरितं भवति मधुरजलस्य व्यवस्था एका नगरपालिकया द्वितीया च वृष्टिजलसङ्ग्रहेण भवति । परिसरेऽस्मिन् मधुरजलस्यावश्यकतायाः पूर्तिरनेन वृष्टिजलसङ्ग्रहेण भवति ।

वृष्टिजलं परिसरात् बहिर्न गच्छेत्तदर्थं विश्वविद्यालयेनानेन परिसीमायाः आयोजनं निर्माणकार्यञ्च कृतमस्ति । विश्वविद्यालयं परितः भित्तिकानिर्माणेन परिसरस्थं जलं परिसरैव सुरक्षितं भवति । विश्वविद्यालये वृष्टिजलसङ्ग्रहणाय अहर्निशं जलप्राप्त्यै Rechargeable Bore इत्यस्य व्यवस्था वर्तते । जलस्य स्तरमुपरि आगच्छेत् तदर्थमस्मिन् परिसरे वृक्षाणां वपनमधिकमात्रायां कृतमस्ति ।

1. **परिसरे वृष्टिजलसङ्ग्रहः (Rain Water Collection Facility in the Campus)**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरस्थे 'प्रभासज्योतिः' इति शैक्षणिकभवने छात्रालये च वर्षाकाले यज्जलं वर्षति तज्जलं भवनछदिमार्गेण भवनस्थायां नलिकायां ताभिर्नलिकाभिश्चैकस्मिन् स्थाने तस्माच्चैकं लघुकूपसदृशं सुविशालं जलसङ्ग्रहस्थानं विश्वविद्यालयेनानेन निर्मितं वर्तते, यत्र जलस्य सङ्ग्रहक्षमता अधिकमात्रायां भवति ततश्च संशोधितं जलमुपभोगाय परिसरे सर्वेषु स्थानेषु प्राप्यते । जलकूपस्य वृष्टिजलसङ्ग्रहक्षमतैकलक्षलिटर् (१,००,०००) परिमिता वर्तते । येन एकेन सङ्ग्रहेण परिसरस्य बहुषु स्थानेषु तत् मधुरं वर्षाजलं सङ्ग्रहितं भवति ततश्च प्रसारितं भवति । अन्यानि यानि निर्माणाधीनानि भवनानि सन्ति तानि तु सर्वकारस्य सर्वेषां नियमानामाधारेण वृष्टिजलसङ्ग्रहव्यवस्थायुतानि निर्मीयमाणानि सन्ति । वर्तमानकाले विश्वविद्यालयस्य परिसरेऽस्मिन् शैक्षणिकभवनस्य कुमारछात्रावासस्य च समीपे जलसङ्ग्रहोऽयं भवति । तस्य च प्रयोगः उपयोगः सम्पूर्णेन विश्वविद्यालयेन क्रियते ।

विश्वविद्यालयस्य समग्रोऽयं परिसरः सुरक्षितभित्तिकयावृतो वर्तते । विश्वविद्यालयपरिसरस्य यावत् क्षेत्रफलमस्ति तावत् सम्पूर्णमपि भित्तिकया परिवेष्टितं वर्तते । अर्थात् तां भित्तिकां दृष्ट्वा विश्वविद्यालयस्य क्षेत्रफलं ज्ञातुं शक्यते यदेतावत् परिमितं स्थानं क्षेत्रं विश्वविद्यालयस्य वर्तते पुनश्च अनया भित्तिकया वृष्टिजलसङ्ग्रहः अधिकमात्रायां भवति इति । विश्वविद्यालयस्य सर्वासु दिक्षु छात्राणां सुरक्षायै भित्तिकायाः व्यवस्थापनं विश्वविद्यालयेन कल्पितं वर्तते ।

परिसरेऽस्मिन् समुद्रं प्रति जलविनिमयात् प्राग् समुचितजलोपयोगायास्माभिः जलसङ्ग्रहः क्रियते पश्चात् विविधेषु स्थानेषु भवनेषु च प्राप्यते । विश्वविद्यालयपरिसरे वर्षाजलस्य तादृशं व्यवस्थापनं वर्तते यावत् जलं स्यात् परिसरात् बहिः एवमेव व्यर्थनिर्यातः तस्य न स्यात् तदर्थं जलकूपव्यवस्था वृक्षारोपणव्यवस्था च कृतास्ति । विश्वविद्यालयस्य परिसरः तादृशे विस्तारे वर्तते यच्च स्थानं भौगोलिकदृष्ट्या भौतिकदृष्ट्या च उन्नतं वर्तते अतः वर्षाजलसङ्ग्रहः परिसरे एव यथाकथमपि सुरक्षितं पादपानां जलपानाय तथा च अधिकं जलं निर्मितेषु जलकूपेषु सुरक्षितं भवति ।

1. **परिसरे वर्षाजल-उपयोगः (Rain Water Utilization in the Campus)**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः वृक्षैः हरितः आच्छादितः परिसरः वृष्टिजलसङ्ग्रहफलरूपेणैवास्ति । परिसरे अधिकाधिकवृक्षाणां वपनेन लघुजलसङ्ग्रहकूपेन वर्षायाः जलं सुदीर्घकालं यावत् सङ्ग्रहितं भवति । पुनश्च परिसरस्य सर्वेषु भवनेषु एतस्य जलसङ्ग्रहस्य निर्यातः भवति । परिसरेऽस्मिन् यानि निवासभवनानि सन्ति तत्र विशेषतः अधिकः एतस्य वर्षाजलस्य उपयोगः क्रियते । वेरावले प्रतिवर्षं वर्षायाः प्रमाणं सम्यक् भवति । वृष्टिकाले वर्षाजलस्यैव उपयोगः भवति ततश्च जलसङ्ग्रहव्यवस्थायां सुरक्षितस्य जलस्य उपयोगः सर्वेषु भवनेषु समग्रेऽस्मिन् परिसरे च भवति ।

इत्थं वृक्षैर्हरितः परिसरः वृष्टिजलसङ्ग्रहस्य फलेनैव अस्ति । भित्तिकाभिः वृष्टिजलसङ्ग्रहकूपेन परिसरस्थं क्षारजलयुक्तं यज्जलस्तरम् अस्ति तत् आभ्यां द्वाभ्यां प्रकल्पाभ्यां पेयजलस्तरं उन्नतं भवति ।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां | View Document |

| | |
|---|---|
| सन्धानम्। | |
| Provide link for additional information अतिरिक्ताः सूचनाः | View Document |

*7.1.6 Green Practices*

***1. Students, staff using***

***a) Bicycles***

***b) Public Transport***

***c) Pedestrian Friendly Roads***

***2. Plastic free campus***

***3. Paperless office***

***4. Green landscaping with trees and plants***

**हारित्यपरिपाटयः**

***1. छात्राः, अध्यापकाः, अध्यापकेतरकर्मचारिणश्च उपयुञ्जन्ति -***

***(क) द्विचक्रयानम्***

***(ख) सार्वजनिकपरिवहणम्***

***(ग) पादयात्र्यनुकूलमार्गान्***

***2. प्लास्टिक्मुक्तपरिसरः***

***3. कर्गदरहितकार्यालयः***

***4. वृक्षैः पादपैश्च हरितः परिसरः***

**Answer:**

**प्लास्टिकरहितः परिसरः, कर्गदरहितः कार्यालयः वृक्षैः हरितः परिसरश्च**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरः वृक्षैर्हरितः पादपैराच्छादितश्च वर्तते । प्रसङ्गेऽस्मिन् विश्वविद्यालयस्य सर्वेषां कर्मचारिणामधिकारिणां दैनिकव्यवहारः प्राकृतिकवातावरणसंरक्षणाय भवेत्तदत्र जागरूकतया भवति ।

1. विश्वविद्यालयपरिसरे अधिकारिणः कर्मचारिणः खनिजतैलेन प्रचलितयानस्योपयोगं कुर्वन्ति, तेषु केचन सेवकाः, उद्यानपालकाः, वैद्युत्कर्मप्रवीणः, ग्रन्थालय-अस्थायिकर्मकरः इमे सर्वे विश्वविद्यालयपरिसरं द्विचक्रयानेन समागच्छन्ति । विश्वविद्यालयेन तादृशं परिपत्रमपि कृतमस्ति यत् कर्मचारिभिः द्विचक्रयानस्योपयोगं कृत्वा प्रकृतिः रक्षणीया ।
2. परिसरे मान्यात् कुलपते आरभ्य सर्वेषां कर्मचारिणां यानस्य व्यवस्थायै एकं सुनिश्चितं स्थानं विश्वविद्यालयेन निर्मितं वर्तते । यत्र एकस्मिन् कोणे परिसरे स्थितानां तथा च बहिस्तात् समागतानां सर्वेषां यानानां कृते सुचारु यानस्थानकस्य (Parking) व्यवस्था कृतास्ति । तत्रापि द्विचक्रिकाणां चतुश्चक्रिकाणां च पृथग्व्यवस्था कल्पिता वर्तते । विश्वविद्यालयस्य प्रवेशद्वारात् प्रविश्य परिसरे कस्यापि आगन्तुकस्य यानमधिकं न चलेत्तदर्थं प्रवेशद्वारनिकटे एव यानस्थानकं निर्मितं वर्तते । ततः आगन्तारः सर्वेऽपि चलित्वा भवनात् भवनं चलन्तः गच्छन्ति येन चालकस्य स्वास्थ्यम् सुरक्षितं भवति तथा च विश्वविद्यालयस्य मनोहरं परिसरमपि पश्यन्तः गच्छन्ति । विश्वविद्यालयपरिसरे एकोनचत्वारिंशत् (३९) द्विचक्रियानानि त्रयोदश (१३) चतुश्चक्रियानानि एवमाहत्य द्विपञ्चाशत् (**५२**) यानानि सन्ति ।

3. ये कर्मचारिणः द्विचक्रयानं न प्रयुञ्जन्ति ते सार्वजनिकपरिवहणेन **(Public Transport)** विश्वविद्यालयं प्रति समायान्ति । अन्येऽपि अधिकारिणः पक्षे मासे वा स्वस्य वाहनस्योपयोगम् अकृत्वा लोकयानमाध्यमेन गमनागमनं प्रकुर्वन्ति । प्रकृतिसंरक्षणाय विश्वविद्यालयस्य कतिपयकर्मचारिणः परस्परसहयोगेन एकेन यानेन विश्वविद्यालयं प्रति समागच्छन्ति ।
4. विश्वविद्यालयपरिसरे मार्गाः सुदृढाः परिपक्वाः स्वच्छाः घट्टाश्च सन्ति । यत्र विश्वविद्यालयपरिसरे नूतनभवनानां निर्माणकर्मणि लोह-इष्टिका-पाषाण-धूलिकापूरितानि भारयुक्तानि यानानि सुखेन यान्तुं प्रयान्तुं च शक्नुवन्ति तथा च विश्वयोगदिवसे कार्यक्रमानुकूलाः मार्गाः, व्यायामाय परिचालनं भवेत्तदनुकूलाः मार्गाः परिसरेऽस्मिन् सन्ति । दिव्याङ्गः परिसरं प्रविशति चेत् तेनापि कष्टं नानुभूयते तादृशाः मार्गाः सन्ति । पुनश्च सम्पूर्णे परिसरे सुखेन चलित्वा स्थानात् स्थानं सुखेन गन्तुं शक्यते तादृशाः पादयात्र्यनुकूलाः **(Pedestrian Friendly Roads)** मार्गाः परिसरेऽस्मिन् सन्ति ।
5. स्वच्छताभियानान्तर्गतः परिसरोऽयं प्लास्टिकपदार्थानां वर्जनाय अतीव जागरितः प्लास्टिकमुक्तत्वेनोद्घोषितः वर्तते । अत एव शैक्षणिकभवनस्य द्वारे एवास्माभिः बहिस्तात् समागतानां सामाजिकानां प्लास्टिकमुक्तपरिसरे **(Plastic-Free Campus)** स्वागतमस्तीति उद्घोष्यते । विश्वविद्यालय-अनुदान-आयोगस्य मार्गदर्शिकानुसारं शास्त्रिकक्षायां प्रश्नपत्रेणैकेन पर्यावरणसंरक्षणोपायाः पाठ्यन्ते । छात्राणामपि एतस्मिन् विषये जागृतिर्भवेत्तदर्थं विश्वविद्यालयस्थैः आबालवृद्धैः परिसरे स्वच्छताभियानं च क्रियते । प्लास्टिक इति पदार्थस्य वर्जनाय प्लास्टिकपदार्थेन का हानिः एतस्मिन् सन्दर्भे व्याख्यानानि भवन्ति ।
6. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कार्यालयानुगुणः पत्राचारात्मको व्यवहारः अधिकतया Whats App, Web-site, Online माध्यमेन च क्रियते । आधुनिकयुगे सर्वैः सह समकक्षतायाः प्राप्त्यर्थं विश्वविद्यालयेऽपि सर्वत्र सर्वोऽपि व्यवहारः **"Electronic Media"** इत्यनेन माध्यमेनैव भवति। **"Electronic Media"** इत्यनेन माध्यमेन जनाः समयस्य धनस्य च रक्षणं कुर्वन्ति। अनेन माध्यमेन कर्गदस्य अधिकोपयोगो न भवति। परिसरोऽयं पूर्णतया कर्गदरहितकार्यालयत्वेन **(Paperless Office)** तद्दिशि यतमानः वर्तते । छात्राणाम् प्रवेशपत्रम् (Enrollment Form), परीक्षापत्रम् (Exam Form), शिष्यवृत्तिपत्राणि (Scholarship Form), शुल्कप्रदानपत्रम् (Fees Payment Form), स्थानान्तरीयप्रमाणपत्रम् (Transfer Certificate), स्थलान्तरीयप्रमाणपत्रम् (Migration Certificate) एतादृशानि सर्वाण्यपि पत्रकाणि विश्वविद्यालयवेबसाइटमाध्यमेन प्रसारितानि सन्ति, येषां समुपयोगेन कर्गदरहितः कार्यालयव्यवहारः सुचारुतया भवति । विश्वविद्यालयपरिसरेऽपि प्रायः सर्वे कार्यालयादेशाः कर्गदरहितव्यवहारत्वात् मोबाइलयन्त्रमाध्यमेन प्रसारिताः भवन्ति ।
7. श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे हरितक्रान्तिरूपेण नैके वृक्षाः समारोपिताः सन्ति । परिसरेऽस्मिन् वृक्षारोपणकार्यक्रमः प्रतिवर्षं भवति । अत्र छात्रैः, प्राध्यापकैः, कर्मचारिभिः, अधिकारिभिश्च सम्मिल्य वृक्षारोपणं, वृक्षे जलसेचनं, वृक्षान् परितः आलवालानां स्वच्छताविषयकं कार्यं च क्रियते । वृक्षारोपणाय वृक्षसंवर्धनाय च विविधाः संस्थाः कार्यरताः सन्ति । ताः विश्वविद्यालयाय स्वयोगदानं प्रयच्छन्ति । यथा **"Aaditya Birla", "गुजरातसर्वकारस्य वनविभागः"** इत्यादयः ।

विश्वविद्यालयस्य परिसरेऽस्मिन् पञ्चसप्तत्यधिकचतुश्शतं (४७५) वृक्षाः सन्ति । एतेषु वृक्षेषु वैविध्यमपि दृश्यते यथा- Geleseriya-१४, अशोकवृक्षः(Asopalav)-११, Sharu-२५५, वटः(Vad)-४२, पिप्पला(Pipper)-१६, Ficas Decorative-११, Badam-२०, Karen-५, Saragavo-२, नीम्बः(Limda)-१५, नारिकेलवृक्षः(Naliyeri)-२०, पिप्पलः(Pipla)-८, Garmalo-३, Gul-mahor-२, Paras-Piplo-३०, सप्तपर्णी(Saptaparni)-५, चम्पा(Champa)-१६ एतावन्तः वृक्षाः सन्ति । विगतयोः द्वयोः वर्षयोः वृक्षविकासक्रमः वृक्षारोपणे समारोपितानां पादपानां सङ्ख्या पञ्चत्रिंशदधिकद्विशतम् **(२३५)** वर्तते ।

इत्थम् अनेन विश्वविद्यालयेन हारितपरिपाटयः **(Green Landscaping with Trees and Plants)** परिपाल्यन्ते ।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

***7.1.7 Average percentage of expenditure on green initiatives and waste management excluding salary component during the last five years.***

**विगतपञ्चवर्षेषु वेतनाद् ऋते हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च कृतस्य व्ययस्य प्रतिशततायाः मध्यमानम्-**

**Answer:** 0.36

7.1.7.1 Total expenditure on green initiatives and waste management excluding salary component year-wise during the last five years (INR in lakhs)

विगतपञ्चवर्षेषु वेतनाद् ऋते हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च आहत्य कृतः वार्षिकव्ययः (लक्षशः)

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 4.6056 | 0.064 | 2.54016 | 1.3326 | 3.4541 |

| File Description | Document |
|---|---|
| Green audit report हारित्योपक्रमस्य अङ्केक्षणप्रतिवेदनम्। | View Document |
| Details of expenditure on green initiatives and waste management during the last five years (Data Template) विगतपञ्चवर्षेषु हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च कृतस्य व्ययस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***7.1.8 Differently abled (Divyangjan) Friendliness Resources available in the institution***

***1. Physical facilities***

***2. Provision for lift***

***3. Ramp / Rails***

***4. Braille Software/facilities***

***5. Rest Rooms***

***6. Scribes for examination***

***7. Special skill development for differently abled students***

***8. Any other similar facility (Specify)***

***संस्थायाम् अन्यथाशक्तजनानाम् (दिव्याङ्गानाम्) अनुकूलसंसाधनानाम् उपलब्धिः।***

***1. भौतिकसौविध्यानि***

***2. उत्तोलनफलकव्यवस्था***

***3. समतलोद्गमनी/ हस्तालम्बदण्डाः***

***4. अन्धसहकृतितन्त्रांशः/सुविधाः***

***5. विश्रान्तिप्रकोष्ठः***

***6. परीक्षायाम् अनुलेखकः***

*7.* **अन्यथाशक्तच्छात्रेषु विशिष्टकौशलस्य विकासः**

*8.* **अन्याः समरूपाः सुविधाः** *(***नामसहितो निर्देशः***)*

**Answer:** A. 5 and more of the above (अ. उपर्युक्तेषु पञ्च, ततोऽधिकानि वा)

| File Description | Document |
|---|---|
| Upload resources available in the institution for Divyangjan (Data Template) संस्थायाम् अन्यथाशक्तजने (दिव्याङ्गजने) साहाय्यकारि-साधनसम्पदाम् उपलब्धिसूचकं सन्धानम्। (दत्तांशप्रारूपम्) | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Link to photos and videos of facilities for divyangjan अन्यथाशक्तजनानाम् (दिव्याङ्गानाम्) अनुकूलसंसाधनानाम् चित्राणां चलनचित्राणां च सन्धानं दीयताम् | View Document |

***7.1.9 Number of specific initiatives to address locational advantages and disadvantages during the last five years***

### विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां सङ्ख्या

**Answer:** 9

7.1.9.1 Number of specific initiatives to address locational advantages and disadvantages year-wise during the last five years

विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां वार्षिकसङ्ख्या -

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 02 | 02 | 01 | 03 | 01 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Number of Specific initiatives to address locational advantages and disadvantages (Data Template) स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्) | View Document |

***7.1.10 Number of initiatives taken to engage with and contribute to local community during the last five years (Not mentioned elsewhere)***

### विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां सङ्ख्या *(*अन्यत्र अनुल्लिखितानाम्*)*

**Answer:** 13

7.1.10.1 Number of initiatives taken to engage with and contribute to local community year-wise during the last five years

विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां वार्षिकसङ्ख्या

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 02 | 03 | 01 | 03 |

| File Description | Document |
|---|---|
| Upload the report of the event कार्यक्रमस्य प्रतिवेदनम्। | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Details of initiatives taken to engage with local community during the last five years (Data Template) गतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं योगदानाय च कृतानाम् उपक्रमाणां विवरणम्। (दत्तांशप्रारूपम्) | View Document |

***7.1.11 Existence code of Conduct Handbook exists for students, teachers, governing body, administration including Vice Chancellor / Director / Principal /Officials and support staff***

***(Yes/No)***

**कुलपति-निदेशक-प्राचार्य-अधिकारिप्रभृतीनां प्रशासनाधिकारिणां सह-कार्यकर्तृगणानां, छात्राणाम् अध्यापकानां, शासिपरिषन्निकायानां च मार्गदर्शनाय संस्थित-नीतिनियमावलीयुता करदीपिका वर्तते।**

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| URL to Handbook on code of conduct for students and teachers , manuals and brochures on human values and professional ethics छात्राणाम् अध्यापकानां, शासिपरिषन्निकायानां च मार्गदर्शनाय नीतिनियमावलीयुतायाः करदीपिकायाः सन्धानम्। | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |

***7.1.12 Display of core values in the institution and on its website***

***(Yes/No)***

**संस्थायां, संस्थायाः जालस्थाने प्रधानमूल्यानां प्रदर्शनम्**

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचना | View Document |
| Provide URL of website that displays core values जालस्थानस्य सन्धानं यत्र प्रधानमूल्यानां प्रकाशनं विद्यते। | View Document |

***7.1.13 The institution plans and organizes appropriate activities to increase consciousness about national identities and symbols; Fundamental Duties and Rights of Indian citizens and other constitutional obligations***

*(Yes/No)*

**भारतीयनागरिकेषु राष्ट्रियाणाम् अभिज्ञानानां, प्रतीकानां, मूलकर्तव्याधिकारयोः, अन्येषाञ्च संवैधानिकोत्तरदायित्वानां विषये संवेदनाम् अभिवर्धयितुं संस्था योग्यकार्यक्रमाणां योजनां निर्वर्तनञ्च करोति।**

***(आम् / न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Details of activities organized to increase consciousness about national identities and symbols (Data Template) भारतीयनागरिकेषु राष्ट्रियाणाम् अभिज्ञानानां, प्रतीकानां, मूलकर्तव्याधिकारयोः, अन्येषाञ्च संवैधानिकोत्तरदायित्वानां विषये संवेदनाम् अभिवर्धयित | View Document |

***7.1.14 Does the institution offer a course on Human Values and professional ethics on the basis of Vedic and Sanskrit literature.***

*(Yes/No)*

**संस्था वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य मानवीयमूल्यानि वृत्तिनीतिं चाधिकृत्य पाठ्यपत्रं प्रवर्तयति किम्।**

***(प्रवर्तयति/न प्रवर्तयति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Provide link to Courses on Human Values and professional ethics on Institutional website वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य मानवीयमूल्यानि वृत्तिनीतिं चाधिकृत्य पाठ्यपत्राणां प्रवर्तनस्य संस्थायाः जालपुटस्य सन्धानम्। | View Document |

***7.1.15 The institutional functioning is as per professional code prescribed / suggested by statutory bodies / regulatory authorities for different professions.***

*(Yes/No)*

**विविधवृत्तिप्राधिकाराणां परिनियमानुसारेण / संवैधानिकनिकायसंस्तुत्यनुसारेण संस्था कार्यं निर्वर्तयति।**

***(आम्/न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Provide URL of supporting documents to prove institution functions as per professional code विविधवृत्तिप्राधिकाराणां | View Document |

| | |
|---|---|
| परिनियमानुसारेण/ संवैधानिकनिकायसंस्तुत्यनुसारेण संस्था कार्यं निर्वर्तयतीत्युपस्थापयितुं सहायकाभिलेखानां सन्धानम्। | |

***7.1.16 Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion on the basis of Vedic and Sanskrit literature as well as for observance of fundamental duties during the last five years***

### विगतपञ्चवर्षेषु वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिकसमरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां सङ्ख्या

**Answer:** 11

7.1.16.1 Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion as well as for observance of fundamental duties year-wise during the last five years

विगतपञ्चवर्षेषु, वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिक-समरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या

Answer:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 03 | 03 | 01 | 01 | 03 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| University code of conduct for teachersअध्यापकानां कृते विश्वविद्यालयस्य आचारसंहिता | View Document |
| University code of conduct for students छात्राणां कृते विश्वविद्यालयस्य आचारसंहिता | View Document |
| Report on the student attributes facilitated by the University छात्राणां गुणार्जनाय विश्वविद्यालयस्य सहकारिताविषयकं प्रतिवेदनम्। | View Document |
| List of activities conducted for promotion of universal value (Data Template) वैश्विकमूल्यानां संवर्धनाय आयोजितानां गतिविधीनां सूची। | View Document |
| Handbooks, manuals and brochures on human values and professional ethics मानवीयमूल्यानि, वृत्तिनीतिं च अधिकृत्य प्रकाशिता हस्तपुस्तिका, दिग्दर्शिका, परिपत्रिका च | View Document |

***7.1.17 Institution conducts Value based Moral Education Programmes based upon Ancient Indian Texts like Bhagavadgeeta, Ramayana etc, and organizes national festivals and birth / death anniversaries of the great Indian personalities.***

### संस्था रामायण-भगवद्गीताप्रभृतीन् प्राचीनभारतीयग्रन्थान् आश्रित्य नैतिकशिक्षापाठ्यक्रमान् चालयति । राष्ट्रियमहोत्सवान्, विशिष्टानां गण्यानां भारतीयव्यक्तीनां वार्षिकं जन्मदिनं/पुण्यतिथिं च समायोजयति।

**Answer:**

**प्राचीनभारतीयग्रन्थानां नैतिकशिक्षाः, वैश्विकमूल्यानि, सार्वत्रिकमूल्यशिक्षा, राष्ट्रियमूल्य-राष्ट्रभक्तिशिक्षा च**

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन भारतीयप्राचीनपरम्परायाः संरक्षणपूर्वकं पाठ्यक्रमाः प्रचाल्यन्ते । संस्कृतविश्वविद्यालयत्वात् अत्र षड्शास्त्राणामध्ययनमध्यापनञ्च भवति । तेषु सर्वेषु शास्त्रेषु नैतिकशिक्षणम्, मूल्यशिक्षणमागच्छत्येव यथा- **'अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥'** विश्वविद्यालयपरिसरे आवर्षं मूल्यवर्धनाय नीतिशिक्षायै नैके कार्यक्रमाः भवन्ति । अभ्यासक्रमेण सह सहाभ्यासिकाः प्रवृत्तयः स्पर्धाः व्याख्यानानि कार्यशालाः परिसंवादाः वाग्वर्धिनी सभा वाक्यार्थपरिषद् युवमहोत्सवः पदवीदानसमारम्भः शास्त्रीयस्पर्धाः कण्ठपाठस्पर्धाः संस्कृतसप्ताहोत्सवः संस्कृतभाषया एवाध्ययनाध्यापनं राष्ट्रियमहोत्सवाः एतत्सर्वमावर्षं चलति अतः विविधैः मार्गैः छात्रेषु मूल्यशिक्षणस्य च सञ्चारः भवति ।

1. **नैतिकशिक्षाः (Moral Education)**
    - **सत्यम् (Truth)**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अभ्यासक्रमे वेदोपनिषद्रामायणमहाभारतपुराणादीनि शास्त्राणि सन्ति यत्र **'सत्यं वद'**, **'सत्यं परं धीमहि'** तद्वत् **'सत्यं ब्रूयात् प्रियं ब्रूयात्'** तथा च सत्यवादी राजाहरिश्चन्द्रस्य चरित्रं सत्यप्रतिज्ञस्य श्रीरामचन्द्रस्य पवित्रं चरित्रमभ्यासक्रमेऽस्ति तेन छात्रेषु सत्यभाषणस्य सत्याचरणस्य गुणः विकसितः भवति । अनेन सह राष्ट्रियपर्वोत्सवेषु **०२ अक्तूबरदिनाङ्के महात्मागान्धिनः जन्मजयन्त्यां** सत्य-अहिंसायाः आदर्शाः श्राव्यन्ते निबन्धलेखनादयः स्पर्धाः भवन्ति ।

- **न्यायीवर्तनम् (Righteous Conduct)**

विश्वविद्यालयस्यास्य अभ्यासक्रमे **'न्याय्यात्पथः प्रविचलन्ति पदं न धीराः'** इति ज्ञानदं नीतिशतकं विदुरनीतिः प्राचीनराजनीतिशास्त्रं श्रीकृष्णनीतित्वेन श्रीमद्भगवद्गीतासदृशाः ग्रन्थाः सन्ति । तेषां ग्रन्थानामध्ययनेन न्यायपूर्णेन व्यवहारेण कः लाभः भवति ? इति छात्राः विविधैः ग्रन्थैरधिगच्छन्ति ।

- **प्रेम (Love)**

वेदेषु पुराणेषु नैकानि सूक्तानि नैके प्रसङ्गाः कथाः आगच्छन्ति येषु परस्परं जीवदयापूर्णः प्रेमभावः सर्वेषु विकसितः भवेत् तादृशानि उदाहरणानि कथाश्च अभ्यासक्रमे समायान्ति पुनश्च युवमहोत्सवेऽपि छात्राणां परस्परः प्रणयभावः विकसितो भवेत् तदर्थम् आयोजनम् एतद् भवति ।

- **अहिंसा (Non-Violence)**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अभ्यासक्रमे प्रायः अध्यात्मग्रन्थाः शास्त्राणि च सन्ति येषु अहिंसायाः महत्त्वं फलञ्च प्रतिपादितमस्ति । विशेषतः वेदव्यासविरचितः महाभारताख्यो ग्रन्थः शास्त्रि-आचार्यकक्षायामागच्छन्ति यस्य ध्येयवाक्यमेवास्ति **'अहिंसा परमो धर्मः' एवञ्च 'अहिंसया परं रूपम्'** । पुनश्च महात्मागान्धिनः अहिंसोपदेशः राष्ट्रियपर्वोत्सवेषु पठ्यते श्रूयते पाठ्यते च । अनेन छात्रेषु अहिंसावृत्तेः विकासो भवति पुनश्च परोपकारः पुण्याय परपीडनमित्यत्र परपीडनमप्येका हिंसा एवास्तीति सम्यगधीत्य छात्राः अहिंसामार्गस्य बोधं सम्प्राप्य आचरणं कुर्वन्तः भवन्ति ।

- **शांतिः (Peace)**

शास्त्राध्ययनस्य परमं चरमं च लक्ष्यं भवति शान्तिप्राप्तिः । इति हेतुत्वात् विश्वविद्यालयस्याभ्यासक्रेषु प्रायः सर्वेषु ग्रन्थेषु त्रिभिः तापैः शान्तिः भवेत् तादृशं ज्ञानं निहितमेवास्ति । विशेषतः शास्त्रीयाभ्यासक्रमे श्रीमद्भगवद्गीता आगच्छति तत्र **'त्यागाच्छान्तिरनन्तरम्'**, **'स शान्तिमधिगच्छति'**, **'अशान्तस्य कुतः सुखम् ?'**, **'ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति'** एतादृश्यः सूक्तयः अभ्यासक्रमे सन्ति तासामध्ययनं कृत्वा शान्तिप्राप्त्युपायै छात्राः शास्त्राणि पठन्ति । पुनश्च अस्माकं परम्परायामपि कार्यक्रमान्ते कर्मान्ते च **ॐ शान्तिः शान्तिः शान्तिः** इति वारत्रयमुच्यते ।

महात्मागान्धी अपि युद्धं नेच्छति स्म शान्त्या समाधानं कृत्वा स्वतन्त्रताप्राप्त्यै यत्नशीलः आसीत् तदपि महापुरुषाणां दिवसाचरणेन छात्राः पठन्ति ।

- **राष्ट्रियमूल्यानि (National Values)**

विश्वविद्यालयपरिसरे पठतां छात्राणां जीवने राष्ट्रियमूल्यविकासः भवेत्तदर्थं वेदपुराणेतिहासविषयमाध्यमेन **'राष्ट्रदा राष्ट्रं मे देहि'** राष्ट्रसूक्तम्, भूमिसूक्तम्, राजभक्तिः, रामायण-महाभारतयोः युद्धकथा तथा च समग्रे वर्षे येषां क्रान्तिकारी-पुरुषाणां दिवसाः आगच्छन्ति तेन समं तन्महत्त्वं ज्ञात्वा छात्रेषु राष्ट्रियमूल्यविकासः देशभक्तिश्च वृद्धिमेति ।

- **मानवमूल्यानि (Human Values)**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्याभ्यासक्रमे ये ग्रन्थाः सन्ति तेषां ग्रन्थानां कविपरिचयेनैव मानवमूल्यानां विकासाय छात्राणां प्रवृत्तिर्भवति । यथा- व्यास-वाल्मीकि-पाणिनी-पतञ्जलि-कालिदास-माघ-वराहमिहिर-भास्कराचार्य-कणाद-गौतम-महीधर-सायणादीनां ग्रन्थाध्ययनेन छात्रेषु मानवमूल्येषु विकासः भवति । मानवमूल्यानां विकासाय शास्त्रीयग्रन्थेषु युधिष्ठिरः, नचिकेता, भरतः, हनुमान्, ध्रुवप्रह्लादौ तथैवाधुनिककालानुगुणं डॉ. सर्वपल्ली राधाकृष्णन्, स्वामिविवेकानन्दः, डॉ. बाबासाहेब-आम्बेडकरः इत्यादीनां महापुरुषाणां जीवनचरित्राणि छात्राः पठन्ति ।

- **राष्ट्रिय-एकीकरणम् (National Intiegration)**

श्रीसोमनाथसंस्कृतविश्वविद्यालये संस्कृतग्रन्थैः सह इतिहास-अर्थशास्त्रादीनां ग्रन्थानामप्यध्ययनं भवति तत्र च इतिहासग्रन्थाधारेण राष्ट्रिय-एकीकरणस्य पाठः छात्रैः पठ्यते तद्वत् **३१ अक्तूबर**दिवसविशेषे **सरदारवल्लभभाईपटेल**महोदयानां दिवसाचरणेन राष्ट्रिय-एकीकरणस्य बोधः छात्रैः प्राप्यते ।

- **साम्प्रदायिकसंवादितता सामाजिक-एकता च (Communal Harmony & Social Cohesion)**

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्याभ्यासक्रमे छात्रेषु भेदबुद्धिः न भवेत् परस्परं सद्भावः विकसितः भवेत् तदर्थं **समानी व आकूतिः समाना हृदयानि वः, वसुधैव कुटुम्बकम्, यत्र भवति विश्वैकनीडम्, परस्परं भावयन्तः श्रेयः परमवाप्स्यथ** एतादृशैर्वाक्यैरेव उच्चनीचभेदरहितेन ज्ञानेन छात्राणां संस्कृतभाषायां प्रवेशो भवति पुनश्च एतान्येव वाक्यानि श्रुत्वा साम्प्रदायिकभेदात् विमुखो भवति । षड्शास्त्राणामध्ययनेन विविधग्रन्थाधारेण च सामाजिकैकतायाः ज्ञानं च प्राप्नोति ।

| File Description | Document |
|---|---|
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

*7.1.18 The institution maintains complete transparency in its financial, academic, administrative and auxiliary functions*

### संस्था स्वकीयेषु आर्थिक-शैक्षिक-प्राशासनिकेषु इतरेषु च कार्यक्रमेषु सम्पूर्णरूपेण पारदर्शिताम् अवलम्बते।

**Answer:**

### संस्था स्वकीयेषु आर्थिक-शैक्षिक-प्राशासनिक-इतरेषु कार्यक्रमेषु सम्पूर्णरूपेण पारदर्शिताम् अवलम्बते

श्रीसोमनाथसंस्कृतविश्वविद्यालयः पूर्णता गौरवायेति ध्येयवाक्येन सह कार्यं करोति । पूर्णतया गौरवयार्थिकव्यवहारः, अर्थशुचिता परमावश्यकी वर्तते । विश्वविद्यालयीयव्यवहारः पारदर्शितमाश्रित्य क्रियते तद्यथा -

1. **आर्थिकी पारदर्शिता**

श्रीसोमनाथसंस्कृतविश्वविद्यालयः "अर्थशुचिः स शुचिः" सूक्तिमिमामनुसृत्य स्वकीयं सर्वमपि कार्यं करोति । विश्वविद्यालयेऽस्मिन् सर्वेषामधिकारिणामध्यापकानां, कर्मचारिणाञ्च वेतनं तेषां वित्तकोषैव सङ्क्रमितं भवति । विश्वविद्यालयस्य परिसरेऽस्मिन् विविधविभागेषु बाह्यस्रोतसा (**Out-Source**) अस्थायिरूपेण कर्मकराणां नियुक्तिर्भवति, एतेषामपि वेतनव्यवस्था वित्तकोषैव सङ्क्रमिता भवति । तद्वच्छात्राणां प्रवेशशुल्कादारभ्य शिष्यवृत्तिः, आर्थिकलाभः, परीक्षाशुल्कम्, सत्रशुल्कमित्यादिकान् सर्वशुल्कान् वित्तालयादेव (**Through Bank**) विश्वविद्यालयः स्वीकरोति ।

विश्वविद्यालयस्य छात्रोपकारकः समग्रोऽप्यार्थिकव्यवहारः साक्षाल्लाभान्तरितः (**Direct-Benefit-Transfer**) भवति । विश्वविद्यालयस्य वित्तीयव्यवहारः पारदर्शकश्च भवेत्तदर्थं विविधानां वित्तीयसमितीनां व्यवस्थापनमस्ति । यत्र वस्तुक्रयण-भवननिर्माण-कार्यकारिणि-विद्वत्-वित्तादयः समितयः सन्ति यासां मार्गदर्शने नियन्त्रणे च विश्वविद्यालयस्यार्थिको व्यवहारः पारदर्शकत्वेन चलति । समितिष्वेतासु विविधदृष्ट्याऽऽर्थिककार्यं भवति येन सर्वकारस्यानुदानविनियोगः सम्पूर्णरूपेण पारदर्शितामवलम्बते । विश्वविद्यालयस्य माननीयः कुलपतिः, कुलसचिवः तथा सर्वाः समितयः सर्वकारीय-अनुदानं (**Grant**) जनानामेव करधनं अस्तीति मत्वा सावधानेनार्थविनिमयाय प्रेरयन्ति । विश्वविद्यालये प्रविष्टच्छात्रः विद्यावारिधिं यावत् स्वां विद्यायात्रां करोति, तत्र प्रत्यक्षरूपेणार्थत्वं न भवेत्तदर्थं विश्वविद्यालयेनानेन छात्राणां सवित्तः प्रत्यक्षसम्पर्कः नानुष्ठीयते।

प्रायः प्रतिवर्षं विश्वविद्यालये वित्तशाखायामार्थिकीं पारदर्शितां द्रष्टुमर्थविनिमयपरीक्षणाय मूल्याङ्कनं (**Audit**) भवति ।

1. **शैक्षिकी पारदर्शिता**

श्रीसोमनाथसंस्कृतविश्वविद्यालये छात्राणां ज्ञानवर्धनाय विविधाः शैक्षणिककार्यक्रमाः समायोज्यन्ते। तत्र छात्राणां संस्कृते प्राथमिकी रुचिर्भवेत्तदर्थं संस्कृतसम्भाषणवर्गः प्रचाल्यते। अनन्तरं भिन्न-भिन्नविषयाणामध्यापकाः स्वकीयविषयाणां मार्गदर्शनं ददति। एवञ्च छात्राणां वाक्कौशल्यविकासाय विश्वविद्यालयेऽस्मिन् वाग्वर्धिनी-सभा प्रतिगुरुवासरे, पक्षैकवारं वाक्यार्थपरिषच्चायोज्यते एताभिः शैक्षिकप्रवृत्तिभिः प्रत्येकं छात्राणामावर्षं सततं मूल्याङ्कनं भवति । विश्वविद्यालयेन प्रतिवर्षं युवमहोत्सवः श्रावणीपूर्णिमायां संस्कृतसप्ताहोत्सवाख्यश्च कार्यक्रमः समायोज्यते, तत्रापि युवमहोत्सवे विश्वविद्यालयीयाः तत्सम्बद्धमहाविद्यालयीयाश्च छात्राः समग्रगुजरातराज्यात् समागच्छन्ति तथैव संस्कृतसप्ताहोत्सवे वेरावलप्रान्तस्य विविधाभ्यः माध्यमिकोच्चतरमाध्यमिकशालाभ्यः, महाविद्यालयेभ्यश्च छात्राः समागच्छन्ति सोत्साहेन च भागं गृह्णन्ति। युवमहोत्सवेनानेन संस्कृतसप्ताहोत्सवेन च छात्राणामान्तरिकप्रतिभायाः सर्वाङ्गिणविकासोऽभिजायतेऽभिवर्धते च । विजेतारश्छात्राः प्रमाणपत्र-पदक-स्मृतिचिह्नादिभिः सभाज्यन्ते । पुनश्च विभन्नस्पर्धासु निर्णायकत्वेन विषयनिष्णातारः बहिस्तात् समागच्छन्ति तेषामपि बहुमानङ्क्रियते । विश्वविद्यालयेनानेन प्रतिवर्षं कुलाधिपतिवर्यस्य समुपस्थितौ गौरवपूर्णः दीक्षान्तसमारोहः (Convocation) समायोज्यते । तद्वदेव स्वातन्त्र्यदिनम्, गणतन्त्रदिनम्, संस्कृतसम्भाषणशिबिराणि, शिक्षकदिवसः, अन्ताराष्ट्रिययोगदिवसादयः नानाविधकार्यक्रमाः कुलपतेः, कुलसचिवस्य, विद्वत्परिषदः, कार्यकारिणिपरिषदः, अनुस्नातकाध्यक्षस्य, विश्वविद्यालयसम्बद्धमहाविद्यालयस्याचार्यस्य च मार्गदर्शनानुसारं पारदर्शितायां समायोज्यन्ते।

शैक्षिकी पारदर्शिता अर्थाच्छात्रेषु अभ्यासक्रमेषु शैक्षणिकप्रवृत्तिषु कुलपतेः आरभ्य प्राध्यापकं यावत्सर्वेषु कार्यकारिणिपरिषदः विद्वत्परिषदश्च मार्गदर्शने नियन्त्रणे च विश्वविद्यालयस्याभ्यास-सहाभ्यासप्रवृत्तयः भवन्ति तस्य सततं मूल्याङ्कनम् । विश्वविद्यालये छात्रेषु भेदभावरहितत्वेनाध्यापनं भवति एवञ्च छात्राणामान्तरिकपरीक्षया सह प्रश्नपत्रलेखने सम्पूर्णपरीक्षाप्रक्रियायां च गोपनीयतां प्रामाणिकतां चानेतुं विश्वविद्यालयेन **CCTV Camera** माध्यमेन एवञ्च आकस्मिकनिरीक्षकैः (**Squad**) पारदर्शिता अवलम्ब्यते । विविधासु स्पर्धासु विविधेषु स्तरेषु छात्राणाम् प्रगत्यै गुरुभिः पारदर्शितामाश्रित्य योग्यच्छात्रस्य चित्वा विश्वविद्यालयस्य गौरवं वर्धयितुं स्पर्धायां छात्राः सम्प्रेष्यन्ते । व्यवहारेणाचरणेनानेन छात्रेष्वपि पारदर्शितायाः संस्कारस्य बीजारोपणं भवति सर्वासु विश्वविद्यालयसंलग्नसंस्थासु मैत्रीभावेन व्यवह्रीयते च ।

1. **प्राशासनिकी पारदर्शिता**

**ईश्वरं विहाय सर्वतन्त्रस्वतन्त्रः न कोऽप्यस्ति ।** विश्वविद्यालयेऽस्मिन् प्राशासनिकीं पारदर्शितामानेतुं सर्वकारस्य विविधाः विभागाः सन्ति विश्वविद्यालयस्य च विविधाः समितयः सन्ति । शैक्षणिकसंस्थानां सञ्चालनाय तत्राप्यादर्शसञ्चालनाय पारदर्शिता अतिमहत्त्वपूर्णास्ति । शासनं सुशासनं कर्तुं पारदर्शितापूर्णं प्रशासनमनिवार्यमस्ति । विश्वविद्यालयस्य मान्यासु समितिषु कार्यकारिणिविद्वत्परिषदौ वर्तेते । समित्योरेतयोः कार्यमिदमेवास्ति यद्विश्वविद्यालयस्य सर्वक्षेत्राण्यपि सर्वशाखाः सर्वविभागाः पारदर्शितामाश्रित्य कार्यं कुर्वन्ति वा न तन्निरीक्षणाय दायित्वं वर्तते । समितिभ्यामाभ्यां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पारदर्शकव्यवहारः दरीदृश्यते । कर्मचारिणां नियुक्तये विश्वविद्यालयस्य विकासाय च विज्ञापनानि सर्वकारनियमानुसारं प्रदीयन्ते । विश्वविद्यालयपरिसरे गार्गीछात्रावासस्य (Girls-Hostel) चन्द्रमौलिच्छात्रावासस्य (Boys-Hostel) प्रशासनमपि प्राशासनिकविद्भिः यथासमयं अधिव्यवस्थं परिशील्यते ।

1. **इतरकार्यक्रमेषु पारदर्शिता**

श्रीसोमनाथसंस्कृतविश्वविद्यालयेनावर्षं नानाविधकार्यक्रमाः क्रियन्ते किन्तु विश्वविद्यालयस्य वैशिष्ट्यमस्ति यद् सर्वेऽपि कार्यक्रमाः महापुरुषाणामागमनेन मार्गदर्शनेन च पारदर्शितायां भवन्ति । विश्वविद्यालयेन वर्षैकवारं संस्कृतकविसम्मेलनं राष्ट्रियपरिसंवादश्च क्रियते । परिसंवादे पठितशोधपत्राणामन्येषाञ्च समयानुगुणं विश्वविद्यालयद्वारा ग्रथितग्रन्थानां प्रकाशनमपि भवति । सर्वविभागानां कार्यशाला भवति, यस्यां संलग्नमहाविद्यालयेभ्यः छात्राः समागच्छन्ति, निवसन्ति अधीत्य च गच्छन्ति । परिसंवादे कार्यशालायाञ्च विषयविशेषज्ञत्वेनाभारतवर्षाद्विद्वांसः समायान्ति, तेषां बहुमानञ्च क्रियते भागगृहीतेभ्यश्छात्रेभ्यः प्रमाणपत्रञ्च प्रदीयते ।

विश्वविद्यालयस्य समग्रोऽपि व्यवहारः योग्यतया चलति वा नेति ज्ञातुं जनैः RTI (Right to Information) माध्यमेन पृच्छते तस्य सन्तोषप्रदमुत्तरं विश्वविद्यालयेन प्रदीयते ।

इत्थं विश्वविद्यालयेऽस्मिन् आर्थिकी-शैक्षिकी-प्राशासनिकीतराश्च पारदर्शिता वर्णनानुसारं परिपाल्यते ई-गवर्नन्स माध्यमेन दरीदृश्यते च ।

| File Description | Document |
| --- | --- |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

**7.2 Best Practices**

***7.2.1 State at least two institutional best practices (as per NAAC format)***

**रा.मू.प्र.परिषदः प्रपत्रानुसारेण संस्थायाः सर्वोत्तमं परिपाटिद्वयम् उल्लिख्यताम्।**

**Answer:**

**प्रथमपरिपाटिः**

1. **सर्वोत्तमपरिपाटेः शीर्षकम्-** सर्वत्र संस्कृतमयता
2. **सर्वोत्तमपरिपाटेः उद्देश्यानि**- अस्याः परिपाटेरुद्देश्यमस्ति यद्-
    1. विश्वविद्यालयस्य सर्वविधव्यवहारे सर्वविधक्रियाकलापे च संस्कृतमयता स्यात् ।
    2. विश्वविद्यालस्य शैक्षणिकक्रियाकलापेषु विविधेषु च कार्यक्रमेषु संस्कृतमयतानिमित्तं विशिष्टोपक्रमाः करणीयाः तद्यथा- संस्कृतप्रशिक्षणायोजनं संस्कृतसम्भाषणवर्गायोजनं संस्कृतशिबिराभियानम् अतिरिक्तकक्षासु भाषाशिक्षणव्यवस्था, सरलमानकशैल्या संस्कृतमाध्यमेन शास्त्राध्ययन-अध्यापनव्यवस्था, सेतुपाठ्यक्रमाः, वाग्वर्धिनिसभा, वाक्यार्थपरिषद्, भाषानैपुण्यवर्गः, शास्त्रपुनश्चर्याकार्यशाला, संस्कृतकविसम्मेलनम्, भित्तिकासु संस्कृतफलकानि, प्रश्नपत्राणामुत्तरपत्रेषु, शोधप्रबन्धेषु, प्रचार-प्रसारकार्येषु, छात्राणामध्यापकानां परस्परव्यवहारे च संस्कृतम् ।
    3. विश्वविद्यालयस्य प्राशासनिकक्रियाकलापेषु संस्कृतमयता-अन्वयार्थं विविधोपक्रमाः चिन्तिताः तद्यथा- सञ्चिकासु निश्चितवाक्यव्यहारे संस्कृतम्, संस्कृतेतरकर्मचारिणामधिकारिणां च संस्कृतसम्भाषणवर्गायोजनम्, संस्कृतमाध्यमेन कतिपयकार्यालय-आदेशाः एवं प्रकारेण संस्कृतविश्वविद्यालये सर्वत्र सस्कृतमयता स्यादिति लक्षीकृत्य विश्वविद्यालयोऽयं समीपवर्तिक्षेत्रेषु, गीरसोमनाथजनपदेषु तथा समग्रराज्ये संस्कृतवायुमण्डलनिर्माणार्थं सततं प्रवर्तते ।
    4. परिपाटिरियं सफलीकर्तुं विविधकार्यक्रमाः कर्तव्याः तद्यथा- जनपदसम्मेलनम्, जनपदेषु शिबिराभियानम्, स्वर्णिमगुजरातसंस्कृतमहाकुम्भः, शिक्षकप्रशिक्षणवर्गः, गृहं गृहं प्रति संस्कृतम् । एवं शिक्षणात्मकाः, प्राशासनिकाः, प्रचारात्मकाः कार्यक्रमाः विश्वद्यालयस्तरे समीपवर्तिक्षेत्रस्तरे जनपदस्तरे तथा राज्यस्तरे विश्वविद्यालयेन करणीयाः इति ।
3. **सन्दर्भः**- श्रीसोमनाथसंस्कृतविश्वविद्यालये द्वादशकक्षोत्तीर्णाः सामान्यछात्राः तथा परम्परागतछात्राः उच्चशिक्षां प्राप्तुं प्रविशन्ति । सामान्यविद्यालयात् समागतेभ्यः छात्रेभ्यः सत्रारम्भे सेतुपाठ्यक्रमरूपेण मासात्मकं संस्कृतभाषाशिक्षणं प्रदीयते । किञ्च परम्परागतछात्रेभ्यः प्रगतभाषाशिक्षणव्यवस्था क्रियते । ततः मन्दगतीनां छात्राणां कृते आवर्षं संस्कृतभाषाशिक्षणव्यवस्था कल्पिता वर्तते तथैव त्वरितगतीनां छात्राणां कृते भाषानैपुण्यवर्गादीनाम् आयोजनं क्रियते । पुनश्च सरलमानकसंस्कृतमाध्यमेन शास्त्रपठनेन संस्कृतसम्भाषणस्य संस्काराः दृढाः भवन्ति छात्रेषु । कक्षातिरिक्तव्यवहारेऽपि अध्यापकाः परस्परं छात्रैः सह संस्कृतेन सम्भाषणं

कुर्वन्ति तेन कारणेन छात्राणां संस्कृतश्रवणभाषणकौशलं विकसति । ज्येष्ठाः छात्राः अपि संस्कृतेन सम्भाषणं कुर्वन्ति तेन नूतनाः छात्राः अपि प्रभाविताः भवन्ति एवं शैक्षणिकः व्यवहारः संस्कृतमयः भवति । परिसंवाद-सङ्गोष्ठी-विशिष्टव्याख्यान-सांस्कृतिककार्यक्रम-स्पर्धादयः किञ्च पदवीदान-युवमहोत्सवादयः कार्यक्रमाः अपि संस्कृतेन प्रचाल्यन्ते । तेन कारणेन परिसरेऽस्मिन् सम्पूर्णं वातावरणं संस्कृतमयं सञ्जायते । संस्कृकसम्भाषणप्रशिक्षकाणां निर्माणार्थं संस्कृतप्रशिक्षणपदविकापाठ्यक्रमः (Diploma IN Sanskrit Teaching) कल्पितो वर्तते । तत्र प्रशिक्षणं प्राप्य छात्राः विश्वविद्यालयस्य समीपस्थवर्तिक्षेत्रेषु संस्कृतसम्भाषणशिबिराणाम् आयोजनं कृत्वा जनान् संस्कृतं पाठयन्ति । तत्र पठितानां जनानां सहयोगेन संस्कृतजनपदसम्मेलनकार्यक्रमः अपि विधीयते । परिसरस्थानां कर्मचारिणाम् अधिकारिणां च संस्कृतसम्भाषणार्थं दशदिनात्मकवर्गाणाम् आयोजनं भवति । तत्र विश्वविद्यालयस्य संस्कृतेतरकर्मचारिणः अधिकारिणश्च कार्यालयातिरिक्तसमये दशदिनानि यावत् संस्कृतसम्भाषणशिबिरं कुर्वन्ति । तेन निर्दिष्टसञ्चिकासु निर्दिष्टपत्रव्यवहारेषु च संस्कृतस्य उपयोगं कुर्वन्ति । अनेनापि विश्वविद्यालयेन संस्कृतमयता विषये महान् लाभो भवति ।

4. **परिपाटिः**- प्रतिवर्षं शास्त्रिप्रथमवर्षे तथाचार्यप्रथमवर्षे प्रविष्टेभ्यः सर्वेभ्यः छात्रेभ्यः मासात्मकः निरन्तरं सम्भाषणवर्गस्यायोजनं भवति तेषु परम्परागतछात्राः भवन्तु उत सामान्यविद्यालयादागताः छात्राः भवन्तु । एतस्मिन् सेतुपाठ्यक्रमे अतिरुचिकरशैल्या, साभिनयेन, चित्रमाध्यमेन, सरलपद्धत्या, मनोरञ्जकशैल्या, प्रत्यक्षप्रदर्शनमाध्यमेन च सरलसम्भाषणबिन्दवः अध्यापकः पाठयति । येन छात्राः सरलतया संस्कृतभाषाशिक्षणं प्राप्नुवन्ति ।

विश्वविद्यालयेन २०१० तमे वर्षे एकलक्षजनानां संस्कृतसम्भाषणस्य सङ्कल्पः कृतः, न केवलं सङ्कल्पः अपि तु तत्सङ्कल्पपूर्तये सम्पूर्णगुजराते संस्कृतसम्भाषणशिबिराणामायोजनं कृत्वा लक्षजनेभ्यः संस्कृतसम्भाषणं पाठितम् । तस्याङ्गतया स्वर्णिमगुजरातसंस्कृतमहाकुम्भस्यायोजनं कृतम् ।

तद्वदेव परिसरे संलग्नसंस्थासु च शिक्षकप्रशिक्षणवर्गस्याप्यायोजनं क्रियते तत्र संलग्नसंस्थाभ्यः छात्राः आगत्य वर्गेऽस्मिन् भाषाभ्यासं कुर्वन्ति यथा विश्वविद्यालयेन २०१३ तमे वर्षे शिक्षकप्रशिक्षणवर्गायोजितः ।

विश्वविद्यालयद्वारा प्राप्तप्रशिक्षणशिक्षकैः संस्कृतशिबिराभियानमपि नगरेषु जनपदेषु क्रियते । यथा- २०१५ तमे वर्षे संस्कृतजनपदसम्मेलनस्याङ्गतया संस्कृतशिबिराभियानमायोजितम् । २०१४ तमे वर्षे ५४ संस्कृतसम्भाषणशिबिराणामायोजनं वेरावल-पाटणनगरे कृतं तत्र नगरस्थनागरिकाः भागं गृहीतवन्तः ।

परिसरेऽस्मिन् काले काले छात्राणां भाषास्तरवर्धनाय भाषाप्रशिक्षणाय च भाषानैपुण्यवर्गस्यायोजनं विधीयते यथा-२०१९ तमे वर्षे नवम्बर-दिसम्बरमासयोर्मध्ये समायोजितः चतुर्दिनात्मकः भाषानैपुण्यवर्गः । भाषाधिगमः अध्यापनेन समं तद्भाषायाः वातावरणनिर्मित्या भवतीति कृत्वा वर्गोऽयं समनुष्ठीयते । तत्र प्रत्यक्षपाठनम्, गणकार्यपाठनम् क्रीडाद्वारा च संस्कृतपाठनं भवति ।

संस्कृतसम्भाषणशीलछात्राणां भाषास्तरवर्धनाय विश्वविद्यालयः प्रतिवर्षमतिरिक्तकक्षासु प्रगतभाषाशिक्षणव्यवस्थां कल्पयति । तत्र संस्कृतसम्भाषणेन सह व्याकरणशास्त्रस्य सामान्यनियमपाठनमपि भवति । किञ्च श्रवण-लेखनकौशलयोः विविधैरभ्यासैः पाठनं क्रियते ।

प्रतिवर्षं परिसरेऽस्मिन् श्रावणमासे संस्कृतसप्ताहोत्सवः अनुष्ठीयते । तत्र सप्तदिनानि यावत् कथाकथन-स्तोत्रकण्ठपाठ-संस्कृतगीतगान-वक्तृत्वादिस्पर्धाः आयोज्यन्ते तासु विजेतृभ्यः छात्रेभ्यः प्रमाणपत्रं पुरस्कारं च प्रदीयते । युवमहोत्सवोऽपि प्रतिवर्षं विश्वविद्यालयेनायोज्यते यत्र संलग्नमहाविद्यालयेषु छात्राः विभिन्नस्पर्धायां भागग्रहणेन पदक-पारितोषिक-प्रमाणपत्रादिकं लभन्ते । प्रतिवर्षं तैत्तिरीयोपनिषदः शिक्षावल्ल्याः वचनान्यनुसरन् विश्वविद्यालयः दीक्षान्तसमारोहं दिव्यविधिपूर्वकं समाचरति । दीक्षान्तसमारोहस्य सम्पूर्णविधिः संस्कृतमाध्यमेन मान्यराज्यपालमहोदयस्य गरिमामयसमुपस्थितौ विधीयते । संस्कृतसप्ताहादिकार्यक्रमेष्वागताः विशिष्टसारस्वतातिथयः स्वकीयविचारान् संस्कृतेन प्रस्तुवन्ति ।

शैक्षणिकभवने प्रातःकाले अनौपचारिकवर्गस्यायोजनं भवति यत्र छन्द-अलङ्कार-व्याकरणादिविषयाः पाठ्यन्ते । छात्राणां संस्कृतसम्भाषणे भाषाशुद्धिः स्यात्तदर्थं प्रातःकाले प्रार्थनासभायां प्रतिदिनं शब्दरूप-धातुरूपाणां छात्रद्वारैव रटनाभ्यासं कार्यते । रात्रिकाले छात्रावासे अतिरिक्तकक्षायोजनं कृतमस्ति । आयोजनानुसारं सर्वेऽध्यापकाः छात्रावासे स्वकीयं शास्त्रं सरलशैल्या पाठयन्ति । शैक्षिकपरिसरेऽस्मिन्नेकस्याः मेधाभिधानायाः पत्रिकायाः सञ्चालनं छात्राः कुर्वन्ति । यस्यां संस्कृतभाषया छात्राः मौलिकरचनाः कुर्वन्ति ।

षड्विभागानां वेद-व्याकरण-दर्शन-ज्योतिष-पुराण-साहित्यविषयाणां विविधकक्षासु विविधशास्त्राणामध्ययनाध्यापनं सरलमानकसंस्कृतेन दृश्य-श्रव्यमाध्यमेन च रुचिपूर्णं शिक्षणं भवति । तत्रापि अध्यापकैः छात्रस्तरमवलोक्य प्रयोगमुखेन संस्कृतं पाठ्यते । तेन शास्त्रसिद्धान्ताः सरलतया छात्रैरवगम्यते ।

विश्वविद्यालयेनानेनैकः संस्कृतप्रशिक्षणपदविकापाठ्यक्रमोऽपि प्रचाल्यते । तत्र रुचिमन्तः छात्राः अन्ये द्वादशकक्षोत्तीर्णाः प्रवेशं स्वीकृत्य एकवर्षं यावत् संस्कृतप्रशिक्षणं कुर्वन्ति । पाठ्यक्रमेऽस्मिन् मौखिक-अभियोग्यता लिखित-अभियोग्यता पाठन-अभियोग्यता चेति प्रश्नपत्राणि भवन्ति । संस्कृतसम्भाषणवर्गस्य बिन्दवः कथं पाठनीयाः इत्यस्य प्रशिक्षणं पाठ्यक्रमेऽस्मिन् क्रियते । श्रवण-भाषण-पठन-लेखनकौशलानां विकासपूर्वकं सम्भाषणशिक्षकत्वमानीयते छात्रेषु । पाठ्यक्रमस्य अङ्गतया प्रशिक्षणं प्राप्य इमे छात्राः नगरेषु विविधस्थानेषु संस्कृतसम्भाषणशिबिरं चालयन्ति ।

आवश्यकतानुगुणं विश्वविद्यालयस्य अधिकारि-कर्मचारिणां कृते सम्भाषणवर्गस्यायोजनं विदधाति । प्राशासनिकदृष्ट्या प्राशासनिकशब्दान् वाक्यानि च लक्षीकृत्य विशिष्टपद्धत्या तेषां प्रशिक्षणं क्रियते । अत्र पठित्वा ते अधिकारि-कर्मचारिणः प्राशासनिकसञ्चिकासु पत्रेषु च नियतसंस्कृतसूचनाः उपयुञ्जन्ति ।

छात्राणां वाक्कौशलवर्धनाय प्रतिगुरुवासरं वाग्वर्धिनिसभायोज्यते यत्र छात्राः अध्यापकानां मार्गदर्शनानुसारं स्वशास्त्रविषयं प्रस्तुवन्ति । प्रतिमासं वाक्यार्थपरिषदप्यायोज्यते यत्र द्वित्राः प्राध्यापकाः स्वशास्त्रस्य विशिष्टविषयं स्वीकृत्य स्वशोधपत्रं प्रस्तुवन्ति । तत्र पठितानि शोधपत्राणि वाक्यार्थज्योतिरिति ग्रन्थत्वेन प्रकाश्यते ।

सर्वासां कक्षाणां संस्कृतस्य सर्वाण्यपि प्रश्नपत्राणि संस्कृतेन विरच्यन्ते। तेषामुत्तरभाषा संस्कृतमेव भवति । पुनश्च तत्त्वाचार्य-विद्यावारिधिकक्षीयाच्छात्राः स्वशोधप्रबन्धं संस्कृतमाध्यमेन प्रस्तुवन्ति । तेषां शोधप्रबन्धानां मूल्याङ्कननिवेदनमपि संस्कृतमाध्यमेनैव भवति ।

एवं शैक्षिक-परिसंवाद-सङ्गोष्ठी-विशिष्टव्याख्यान-कार्यशाला-युवमहोत्सव-पदवीदानादिविशिष्टकार्यक्रमाणां सर्वविधक्रियाकलापानां सर्वविधव्यवहारभाषा संस्कृतमेव भवति । विश्वविद्यालयस्य भित्तिपत्रेषु, फलकेषु, क्वचिच्च कार्यालयादेशेषु प्राशासनिकसञ्चिकासु संस्कृतभाषा भवति । सर्वत्र संस्कृतं सर्वेषां संस्कृतमिति विश्वविद्यालयेन सुदृढतया समाचर्यते ।

1. **सर्वोत्तमपरिपाटेः साफल्यस्य प्रमाणम्**-
    1. उपर्युक्तक्रियमाणैः क्रियाकलापैः विश्वविद्यालये कार्यरतानां सर्वेषां जनानां मुखे संस्कृतसम्भाषणं विलसितम् ।
    2. शास्त्राणामध्ययनाध्यापनभाषा संस्कृतं वर्तते । तत्रापि सरलमानकसंस्कृतप्रयोगेण अध्यापकाः दृश्य-श्रव्योपकरणैः स्वशास्त्रगततत्त्वान् रुचिपूर्वकमध्यापयन्ति ।
    3. कक्षासु संस्कृतमयता निर्मिता वर्तते ।
    4. शैक्षिकभवने, छात्रावासे, परिसरे च छात्राः अध्यापकाः परस्परं संस्कृतेन व्यवहरन्ति । तेन शैक्षिकभवने छात्रावासे च संस्कृतवायुमण्डलं निर्मितं भवति ।
    5. शैक्षिकभवने द्वित्राः कार्यरताः लिपिकाः सेवकाश्चापि शनैः शनैः संस्कृतवातावरणप्रभावेण संस्कृतेन व्यवहारं कर्तुं प्रेरिताः । तेऽपि लघु-लघु संस्कृतवाक्यानां व्यवहारे प्रयोगं कुर्वन्ति । एते लिपिकाः अध्यक्षस्य आचार्यस्य च सूचनानुगुणं कार्यालयादेशानां संस्कृतेन टङ्कणं कृत्वा सूचनाफलकेषु सामाजिकमाध्यमेषु प्रसारयन्ति ।
    6. प्राशासनिकभवने कार्यरताः लिपिकाः अपि मान्यस्य कुलपतेः कुलसचिवस्य अधिकारिणां चादेशानुसारं क्वचित् संस्कृतेन उट्टङ्क्य कार्यालयादेशान् परिपत्राणि च प्रसारयन्ति ।
    7. प्राशासनिकभवने कार्यरताः लिपिकाः सेवकाश्च सञ्चिकायां निर्दिष्टसंस्कृतवाक्यानां प्रयोगपूर्वकं टिप्पणीं लिखन्ति ।
    8. व्यवहारेऽपि लघु-लघु वाक्यानि संस्कृतेन वदन्ति एवं प्राशासनिकभवनेऽपि शनैः शनैः संस्कृतवातावरणं निर्मितं जायमानं वर्तते ।
    9. विश्वविद्यालयस्य सर्वेषां प्रश्नपत्राणाम् उत्तरपुस्तिकानां माध्यमभाषा संस्कृतमेव वर्तते ।
    10. सर्वेषामपि कार्यक्रमाणां सञ्चालनं मुख्यातिथेः सारस्वतातिथेः विशिष्टातिथेः उद्बोधनानि प्रवचनानि भाषणानि व्याख्यानानि च संस्कृतेनैव भवन्ति ।
    11. सर्वेऽपि शैक्षिककार्यक्रमाः सम्पूर्णतया संस्कृतेन प्रचाल्यन्ते ।
    12. क्रियाकलापेषु संस्कृतमयता दरीदृश्यते ।

13. प्राशासनिकभवने, शैक्षिकभवने छात्रावासे परिसरे च सर्वविधसूचनाफलकेषु भित्तिपत्रेषु कार्यालयपट्टिकासु च संस्कृतभाषया सूचनालेखनं भवति ।
14. सर्वेषु भवनेषु प्रकोष्ठानां नामानि ऋषिसंज्ञया कविसंज्ञया उट्टङ्कितानि वर्तन्ते । प्रकोष्ठानाम् अङ्कसङ्ख्यापि संस्कृताङ्कैः लिखिता वर्तते ।
15. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे प्रवेशद्वारात् एव संस्कृतभाषायाः निदर्शनं भवति । परिसरे प्राशासनिकभवनस्य शैक्षिकभवनस्य मान्यस्य कुलपतेः निवासस्य कुमारच्छात्रालयस्य कन्याछात्रालयस्य यज्ञशालायाः तथैव निर्माणाधीनानां भवनानां नामानि अपि संस्कृतभाषया एव उट्टङ्कितानि सन्ति ।

एवं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे दृष्टिमात्रेण सर्वत्र संस्कृतमयता दृष्टिपथमायाति ।

1. **अभिमुखीकृताः समस्याः आवश्यकानि संसाधनानि च**-
    1. आदौ संस्कृतेतरकार्यरतानां कर्मचारिणाम् अधिकारिणां च संस्कृतं वक्तुं काठिन्यमासीत् किन्तु मान्यस्य कुलपतेः प्रेरणया वातावरणप्रभावेण, संस्कृतसम्भाषणवर्गायोजनेन, शिबिरायोजनेन, कार्यक्रमाणां संस्कृतेन सञ्चालनेन, विदुषाम् आगमनेन भाषणेन, सूचनाफलकैः, परस्परं सद्भावयुक्तेन सम्भाषणेन, कार्यक्रमारम्भे गीयमानेन संस्कृतकुलगीतेन, कार्यक्रमान्ते पूर्णतामन्त्रेण च शनैः शनैः तेऽपि संस्कृतेन व्यवहारं भाषणञ्च कृतवन्तः ।
    2. इतोऽपि ते धाराप्रवाहेण संस्कृतं वक्तुं यतमानाः वर्तन्ते । सेवकाः संस्कृतभारतीद्वारा समायोजितां गौरवपरीक्षां सफलतया उत्तीर्णतां प्राप्तवन्तः ।
    3. विश्वविद्यालयस्य कुलसचिवोऽपि संस्कृतप्रशिक्षणपदविकापाठ्यक्रमं प्रविश्य संस्कृतशिक्षणं लब्धवान् ।
    4. धैर्येण छात्रैः अध्यापकैः सह व्यवहारेण विश्वविद्यालये कार्यरताः लिपिकाः सेवकाः कर्मचारिणोऽपि संस्कृतेन व्यवहर्तुं प्रवृत्ताः सन्ति ।
    5. नगरेषु जनपदेषु कृतकार्यक्रमैः संस्कृतवायुसञ्चारस्तु जातः नैके नागरिकाः संस्कृतसम्भाषणशिबिरप्रविष्टाः सन्तः संस्कृतेन व्यवहारं कर्तुं यतमानाः सन्ति ।
    6. संस्कृतवातावरणेनानेन संस्कृतमाध्यमेन अध्ययन-अध्यापनेन बुद्धिमन्तः नैके छात्राः काव्यरचनाकौशलमपि लब्धवन्तः ।
    7. विश्वविद्यालयोऽयं सम्पूर्णे राज्येऽपि संस्कृतवायुमण्डलनिर्माणाय स्वर्णिमसंस्कृतमहाकुम्भसदृशैः कार्यक्रमैः कार्यरतोऽस्ति ।
    8. एकलक्षाधिकजनान् प्रागुक्तकार्यक्रमेण संस्कृतसम्भाषणं पाठितवान् । तेन गुजरातराज्ये संस्कृतवायुमण्डलनिर्माणं जातम् ।

एवं शैक्षिक-प्राशासनिक-सामाजिकक्रियाकलापेषु संस्कृतमयता कारणेन विश्वविद्यालयस्य श्वासः निःश्वासः सर्वमपि संस्कृतमयं वर्तते । विश्वविद्यालये कार्यरतानाम् अध्यापकानाम् अधिकारिणां छात्राणां मुखेषु सदा सर्वदा संस्कृतं विलसति । एवं विश्वविद्यालये सर्वत्र संस्कृतम्, सर्वेषां संस्कृतमिति सार्थकताम् अवाप्नोति ।

**टिप्पणी-** प्रतिवर्षं विश्वविद्यालयपक्षतः दैनन्दिनी, पञ्चाङ्गं (Calendar) आयोजनपुस्तिका (Planner) च प्रकाश्यते । तत्र दैनन्दिन्यां प्रतिपृष्ठं वैदिक-लौकिक-संस्कृतसुभाषितवचांसि हिन्द्यनुवादसहितानि ससन्दर्भं मुद्राप्यन्ते । येन दैनन्दिन्याः व्यवहर्तारः प्रतिदिनं वेदपुराणादिशास्त्राणां संस्कृतसाहित्यग्रन्थानां च क्वचित् मूलसंस्कृतेन क्वचित् अनुवादेन शास्त्रबोधः प्राप्यते तेन विश्वविद्यालयस्यापि तथा च भारतीयसनातनसंस्कृतेः परम्परायाश्च शास्त्रोक्तपरिचयः सामाजिकैः प्राप्यते । तैश्च सद्वाक्यैः सुभाषितैश्च सुतरां प्रेरिताः लाभान्विताः भवन्ति । विश्वलविद्यालयेन प्रकाशिते पञ्चाङ्गे विगतेवर्षे यस्मिन् मासे यः प्रमुखः कार्यक्रमः कृतः तस्योल्लेखः सचित्रं प्रकाशिते पञ्चाङ्गे प्रकाश्यते येन विश्वविद्यालये कस्मिन् मासे संस्कृतविषयात्मिकाः काः प्रवृत्तयः भवन्ति तासां प्रचारः प्रसारश्च भवति । अनेन कारणेन एकस्य संस्कृतपञ्चाङ्गस्य समाजे प्रस्थापनं भवति ।

**द्वितीया सर्वोत्तमपरिपाटिः**

1. **सर्वोत्तमपरिपाटेः शीर्षकम्-** गुणवत्तायुक्तं ग्रन्थप्रकाशनम्
2. **सर्वोत्तमपरिपाटेः उद्देश्यानि-** श्रीसोमनाथसंस्कृतविश्वविद्यालयः ग्रन्थप्रकाशनाय पूर्णता गौरवायेति ध्येयवाक्येन ग्रन्थप्रकाशनेऽपि पूर्णतां प्राप्तुं यतमानः वर्तते ।
    1. गुणवत्तायुक्तसर्जनात्मकसाहित्यस्य सततं प्रकाशनम् ।

2. प्रादेशिकभाषागतगद्यग्रन्थानां संस्कृतेन अनुवादः ।
3. उत्तमशोधप्रबन्धान् समीक्ष्य तेषां प्रकाशनम् ।
4. उत्तमानां शास्त्रीयग्रन्थानां, विमर्शात्मकग्रन्थानां सन्दर्भग्रन्थानां च प्रकाशनम् ।
5. शास्त्रीयग्रन्थानां सरलमानकसंस्कृतेन अनुवादः ।
6. अप्रकाशितपाण्डुलिपिग्रन्थानां प्रकाशनम् ।
7. विश्वविद्यालयस्य प्रकाशनं संस्कृतजगति आदर्शभूतं स्यात् ।
8. प्रकाशनगुणवत्तावर्धनाय विविधकार्यशालानां समये समये आयोजनं प्रशिक्षणं च ।
9. दुर्लभग्रन्थानामप्राप्यग्रन्थानां च पुनःप्रकाशनम् ।
10. समाजोपकारकं सङ्कलनात्मकं प्रकाशनम् ।
11. अभिनवकविभ्यः गवेषकेभ्यः विवेचकेभ्यश्च मानदेयप्रदानं तेनोत्साहवर्धनम् ।
12. गुणवत्तायुक्तशोधपत्राणां प्रस्तुत्यर्थं राष्ट्रियान्ताराष्ट्रियपरिसंवादानामायोजनम् तेन शोधार्थिनामुत्साहवृद्धिश्च ।
13. छात्राणामध्यापकानाञ्च स्तरवर्धनाय वाक्यार्थपरिषदः वाग्वर्धिन्याश्चायोजनं तेन शास्त्रीयलेखानां संशोधनानाञ्च प्रकाशनम् ।
14. ग्रन्थप्रकाशने विश्वविद्यालयस्य केन्द्रस्थाने गुणवत्तास्ति न तु अर्थोपार्जनम् ।
15. अन्याभिः राष्ट्रिय-अन्ताराष्ट्रियप्रतिष्ठितसंस्थाभिस्सह शैक्षिक-अभिबन्धद्वारा शैक्षिककार्यक्रमायोजनं तत्फलश्रुतिरूपेण संयुक्तोपक्रमेण ग्रन्थप्रकाशनम् ।

3. **सन्दर्भः**- श्रीमद्वाल्मीकिरामायणस्य समीक्षिता आवृत्तिः महाराजासयाजीरावगायकवाडविश्वविद्यालयः, बरोडातः प्रकाशिता वर्तते । महाभारतस्य समीक्षितावृत्तिः भाण्डारकर ओरिएन्टल रिसर्च इन्स्टीट्यूट (BORI), पूणेतः प्रकाशितास्ति । श्रीमद्भागवतमहापुराणस्य समीक्षितावृत्तिः भो.जे.विद्याभवन, कर्णावतीतः प्रकाशिता । एतैः सन्दर्भैः पुनश्च संस्कृतजगति चौखम्बाप्रकाशनम्, मोतीलाल बनारसीदास प्रकाशनम्, संस्कृतसम्बद्ध-शोधसंस्थानानाम्, अन्यसंस्कृतविश्वविद्यालयानामपि प्रकाशनं विश्वविद्यालयस्य संस्कृतग्रन्थानां प्रकाशनाय सन्दर्भाः स्वीक्रियन्ते । अतः प्रथितयशसां प्रकाशनानाम् आधारेण विश्वविद्यालयेनानेनापि स्वगुणवत्तायुक्तं प्रकाशनं विधीयते । प्राचीनान्यादर्शप्रकाशनानि मनसि निधाय विश्वविद्यालयोऽयं स्वग्रन्थप्रकाशनरूपरेखां निर्माति । ग्रन्थप्रकाशने क्रियान्वयने च मौलिभूतानां प्रकाशनानां सन्दर्भः गृह्यते तस्य विशिष्टलक्षणेषु नूतनशब्दानामाविष्कारः आदर्शपद्धत्या भवेत् । पाठकानां शब्दवैभवं वृद्धिं गच्छेत् बहूनां विदुषां च मार्गदर्शनं लभ्येत, ततः विश्वविद्यालयेन प्रकाशनविषये विचार्यते । **'स्पर्धया वर्धते ज्ञानम्'** इति कृत्वा विश्वविद्यालयस्य गुणवत्तायुक्तं प्रकाशनाय अन्यैस्सर्वोत्तमप्रकाशनैस्सह सात्त्विकी स्पर्धा भवति । विश्वविद्यालयस्य गुणवत्तायुक्तं प्रकाशनं दृष्ट्वा जायमानाः संस्थाः अपि प्रेरणां लब्ध्वा स्पर्धायामवतरन्ति । प्रकाशनक्षेत्रे साफल्यं गतानां संस्थानां रूपरेखाविषयकमभ्यासं कृत्वा मुखपृष्ठादारभ्य ग्रन्थप्रकाशनावसरे ग्रन्थस्य मूल्यनिर्धारणं यावत् सर्वं समीक्ष्य एतच्च मनसि निधाय विश्वविद्यालयः कार्यरतोऽस्ति । विश्वविद्यालयेन प्रकाशितः ग्रन्थः मुद्रणालयात् सहृदयानां पाठकानां विदुषां च कृते उपलब्धं यथा भवेत् तथा सर्वविधम् आयोजनं विश्वविद्यालयः विदधाति । अन्यप्रकाशनेभ्यः प्रकाशितग्रन्थानां मूल्यं, छात्रहितम्, अध्यापकहितं जनानां क्रयणशक्तिं च विचिन्त्य विश्वविद्यालयः स्वप्रकाशितग्रन्थस्य मूल्यनिर्धारणं करोति ।

4. **परिपाटिः**- गुजरातसर्वकारस्य केन्द्रसर्वकारस्य गौरवं वर्धमानोऽयं विश्वविद्यालयः भारतस्य प्राणभूतान् संस्कृत-संस्कार-संस्कृतिसमर्थकसद्विचारान् ग्रन्थीकर्तुं बद्धपरिकरः वर्तते । भारतस्योच्चतरशिक्षासन्दर्भे ग्रन्थप्रकाशने यद्विशिष्टाः परिपाटयः वर्तन्ते ताः लक्षीकृत्य विश्वविद्यालयेन स्वप्रकाशनानि जगतः पुरस्तात् प्रकाशनाय संशोधनसमितेः प्रकाशनसमितेश्च रचना कृता वर्तते । किञ्च तत्समितिभ्यामेकाचारसंहिता संरचिता । 'विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजनाः न परित्यजन्ति' इति वचनमनुसृत्य विश्वविद्यालयस्य ग्रन्थप्रकाशनेऽपि नैकेऽवरोधाः समायान्ति तथापि-
    1. प्रकाश्यमानग्रन्थोऽयं पूर्वप्रकाशितो वर्तते वा नेति तत्सन्दर्भे समस्या समुत्पद्यते । तन्निवारणाय विश्वविद्यालयेनाप्रकाशितग्रन्थसम्पादनाय २०१२ तमे वर्षे चत्वारिंशद्दिवसानामेका कार्याशाला समनुष्ठितासीत् । तद्वदेव तत्त्वाचार्यपाठ्यक्रमे विद्यावारिधेश्च प्रवेशपरीक्षायामपि शोधप्रविधिपाठसमीक्षयोरध्यापनं विधीयते । छात्राणां मातृकायाः समीक्षात्मक-आलोचनात्मकसम्पादने प्रावीण्यप्राप्तये विविधप्रकाशनानां ग्रन्थसूचीनामभ्यासः क्रियते ।
    2. संस्कृतभाषायामन्यभाषागतग्रन्थानुवादसमये अनुवादविधौ नूतनशब्दनिर्माणविधौ च समस्या सम्भवति । तन्निवारणाय विश्वविद्यालयेन अनुवादकार्याशालायोजितासीत् । प्रादेशिकशब्दानामनुवादावसरे शब्दप्राधान्यादर्थप्राधान्यं भावप्राधान्यं च पूर्वापरसन्दर्भेण पुरःसरं विद्वद्भिः परामृश्य प्रादेशिकशब्दस्योल्लेखः पादटिप्पण्यां कृत्वा रचितस्य शब्दस्यानुवादे स्थाप्यते ।

3. विश्वविद्यालयेनानेन विविधाभिः नवदश (१९) राष्ट्रिय-अन्ताराष्ट्रियप्रतिष्ठितसंस्थाभिः सह सम्मिल्य परिसंवादाः आयोजिताः तत्र विद्वद्भिः नैकानि संशोधनानि प्रस्तुतानि ततोऽपि उत्तमानां शोधलेखानां चयनार्थं समस्या भवति । तत्समाधानाय विश्वविद्यालयद्वारा नामोल्लेखमकृत्वा विदुषां पुरस्तात्तत्तल्लेखाः मूल्याङ्कनाय सम्प्रेष्यन्ते । एवं प्रक्रियां कृत्वा चितानां गुणवत्तायुतशोधलेखानामेव ग्रन्थरूपेण प्रकाशनं विधीयते ।
4. गुणवत्तायुतग्रन्थप्रकाशनायान्येषामनुभवसम्पन्नानां संस्थानां विदुषां च मार्गदर्शनमपेक्षितमासीत् तत्समाधानाय विश्वविद्यालयेन विभिन्नाभिः एकोनविंशति (१९) राष्ट्रिय-अन्ताराष्ट्रियप्रतिष्ठितसंस्थाभिः सह शैक्षिक-अभिबन्धः विहितः वर्तते । तस्याङ्गतया फ्रेन्च इन्स्टीट्यूट ऑफ पॉण्डीचेरी इति संस्थायाः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'वैयाकरणसिद्धान्तभूषणम्' इत्यस्य ग्रन्थस्य प्रथमभागः प्रकाशितः। फ्रेन्च इन्स्टीट्यूट ऑफ पॉण्डीचेरी तथा इकोले फ्रेन्चाईज इत्यनयोः संस्थयोः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयेन 'वैयाकरणसिद्धान्तभूषणम्' इत्यस्य ग्रन्थस्य द्वितीयभागः प्रकाशितः ।
5. अन्यसंस्कृतविश्वविद्यालयानां सामान्यविश्वविद्यालयानां च शोधपत्रिकामवलोक्य अस्माकं विश्वविद्यालयस्यापि गुणवत्तासम्पन्ना अन्यतमा शोधपत्रिका स्यादिति विचिन्त्य विदुषां मार्गदर्शनं स्वीकृत्य शोधपत्रिकानिर्माणाय सनियमपूर्विका एका आचारसंहिता (Policy) निर्धारिता । अस्याः शोधपत्रिकायाः प्रकाशनाय कार्यकारिणिपरिषदः संस्तुतेरनन्तरं शोधनियमाः रचिताः, यदनुसारं संस्कृत-हिन्दी-आङ्ग्ल-गुजरातीभाषासु शोधलेखाः विद्वद्भ्यः समामन्त्र्यन्ते तथा च गुणवत्तां परिरक्षितुं ये आमन्त्रितलेखाः सङ्कलिताः भवन्ति, तेषां स्तरसमीक्षणाय विषयविशेषज्ञानां पार्श्वे प्रेष्यन्ते ।
शोधलेखानामदर्शितलेखकनामपूर्वकं विशेषज्ञानां पार्श्वे प्रेषणात्पूर्वं प्रकाशनप्रक्रियानुसारं प्रधान-सम्पादकमहोदयस्यानुमतिं प्राप्य सम्पादक-मण्डलस्योपवेशनं विधीयते यत्रेमे लेखाः प्रवरसमीक्षितशोधार्थं प्रस्तूयन्ते । अस्याः शोधज्योतिषः पत्रिकायाः पदेन प्रधानसम्पादकः भवति विश्वविद्यालयस्य मान्यः कुलपतिः । प्रधानसम्पादक-सम्पादकमण्डलयोः अनुमोदनानन्तरं विषयविशेषज्ञानां पार्श्वे शोधलेखानां भाषा-विषय-प्रतिपादनशैलीनां गुणवत्तासमीक्षणाय प्रेष्यन्ते । विश्वविद्यालयनियमानुसारं प्रवरमूल्याङ्कनार्थं द्वयोः विषय-विशेषज्ञयोः पार्श्वे लेखाः प्रेष्यन्ते । विषयविशेषज्ञयोः प्रतिवेदनाधारेण शोधलेखानां प्रकाशनाय व्यवस्था विधीयते । तत्र विश्वविद्यालयस्य ध्येयवाक्यानुसारं विश्वविद्यालयस्य अन्यतमोद्देश्यञ्च लक्षीकृत्य अस्यां शोधपत्रिकायां क्रमशः भारतीयभाषाणामाद्यतादृष्ट्या आदौ संस्कृतभाषायाः, ततः हिन्दीभाषायाः, ततः गुजरातीभाषायाः ततश्चाङ्ग्लभाषायाः लेखाः मुद्राप्यन्ते । तदनुगुणं अस्याः प्रथमोऽङ्कः जनवरी-दिसम्बर-२०१९तमे वर्षे प्रकाशितोऽस्ति ।
6. विश्वविद्यालयद्वारा ये ये कार्यक्रमाः शैक्षिक-प्राशासनिकगतिविधयः छात्रोपलब्धयः अध्यापकोपलब्धयः सन्दर्भाः क्रियाकलापाश्च क्रियन्ते तेषां समेषां विवरणं सङ्गृहीतं स्यात् तथा तस्य प्रचारः प्रसारश्च यथा स्यात् तथा कार्यं विधातुं सोमज्योतिः इति मुखपत्रिकया तद्विवरणं प्रकाशताम् आनीयते । इयं पत्रिका सरलसंस्कृतमाध्यमेन प्रकाश्यते ।
7. विश्वविद्यालयेऽस्मिन् इदानीं पर्यन्तं ८५ छात्राः विद्यावारिधिपदवीं लब्धवन्तः तत्र के शोधग्रन्थाः उत्तमाः ? तत्परीक्षितुं प्रस्तावितशोधप्रबन्धानां निर्दिष्टविदुषयोः अभिप्रायं स्वीकृत्य परीक्षणं च विधाय प्रकाशनार्हानां शोधग्रन्थानां विधिपूर्वकं प्रकाशनं क्रियते ।
8. सर्जनात्मकं साहित्यं तु विरलं वर्तते यतो हि 'कवित्वं दुर्लभं लोके' । विश्वविद्यालयस्य विदुषां प्रतिभावतां कवीनां सर्जनात्मकं साहित्यं विश्वविद्यालयेन प्रकाश्यन्ते । अन्ये विश्वविद्यालयेतरसंस्कृतकवयः अपि स्वकीयां काव्यरचनां प्रकाशनाय विश्वविद्यालयं प्रेषयन्ति । तेषां काव्यरचनानां नियमानुसारं परीक्षणं विधाय प्रकाशनं क्रियते ।

1. **सर्वोत्तमपरिपाटेः साफल्यस्य प्रमाणम्**-
    1. अप्रकाशितग्रन्थप्रकाशने विश्वविद्यालयेन डॉ. जानकीशरण आचार्यद्वारा सम्पादितः कैवल्यदीपिकाख्यः ग्रन्थः प्रकाशितः ।
    2. अन्यभाषागतगद्यग्रन्थानां संस्कृतमाध्यमेन प्रकाशने विश्वविद्यालयेन सौराष्ट्रस्य रसधारा, केसरीसिंहः चारणः, चन्द्रशेखरः आझादः, खुदीरामः बोझः, राजा महेन्द्रप्रतापः, भाई परमानन्दः, बिपिनचन्द्रपालः, स्वामीश्रद्धानन्दः, नरसिंहः, नर्मदादर्शनम्, जयसोमनाथः, संस्कृतस्य विद्वांसः पण्डिताश्चेति ग्रन्थाः प्रकाशिताः ।
    3. विश्वविद्यालयेन अन्याभिः राष्ट्रिय-अन्ताराष्ट्रियप्रतिष्ठितसंस्थाभिस्सह सम्मिल्य विविधाः परिसंवादाः समायोजिताः तत्फलस्वरूपेण कर्मकाण्डसंस्कारविज्ञानम्, संस्कृतवाङ्मये नगरसंरचना,

भारतीयदर्शनसिद्धान्तप्रभा, भाष्यपरम्परा ज्ञानप्रवाहश्चेति ग्रन्थाः प्रकाशिताः ।

4. विश्वविद्यालयेन विभिन्नाभिः राष्ट्रिय-अन्ताराष्ट्रियप्रतिष्ठितसंस्थाभिस्सह शैक्षिक-अभिबन्धः विहितः तस्य फलरूपेण वैयाकरणभूषणसारस्य प्रथमभागः तथा वैयाकरणसिद्धान्तभूषणस्य भागद्वयं प्रकाशितं वर्तते ।
5. विश्वविद्यालयेन शोधज्योतिरिति वार्षिकी शोधपत्रिकापि प्रकाशितास्ति ।
6. अध्यापकानां शोधलेखानां सङ्ग्रहरूपेण वाक्यार्थज्योतिरिति ग्रन्थः प्रकाशितः ।
7. विश्वविद्यालयेन बहुवर्णा सोमज्योतिरिति मुखपत्रिका प्रकाशिता तत्र विश्वविद्यालयस्य शैक्षिक-प्राशासनिकसर्वविधक्रियाकलापानां विवरणं प्रकाश्यते । अद्यावधि २२ अङ्कानां प्रकाशनं जातम् ।
8. अध्यापकानां तथा छात्राणां उत्तमशोधप्रबन्धाः अपि विश्वविद्यालयेन प्रकाशिताः तद्यथा- शिशुपालवधस्य सन्देहविषौषधी-सर्वङ्कषाटीकयोः विवेचनात्मकमध्ययनम्, Error Analysis of Modern Sanskrit Literature ।
9. सर्जनात्मकसाहित्येषु जगतीविंशतिका, सुभाषिकशतकम्, गुर्जरधरे विभासि इत्यादिग्रन्थाः प्रकाशिताः ।
10. दार्शनिकी शिक्षाधारा, काव्यगुणादर्शः, रघुवंशविमर्शः, शोधप्रविधिप्रवेशः, अभिज्ञानशाकुन्तलम्, मुद्राराक्षसम्, काव्यलक्षणम्, वैदिकसाहित्ये नारी, वैदिकसाहित्ये जीवाः, वैदिकसाहित्यचरितम्, शिक्षादार्शनिकराद्धान्ताः, भक्तिविषयकाः सिद्धान्ताः, श्रीराज्ञीदेविसहस्रनामनिरूपणम्, कश्मीरशाक्तदर्शनमेवञ्च भवानीसहस्रनामनिरूपणम्, छन्दशास्त्र से विकल्पगणित का विकास इत्यादयः गुणवत्तायुताः सन्दर्भग्रन्थाः अपि प्रकाशिताः वर्तन्ते ।
11. सरलमानकसंस्कृतेन काव्यप्रकाशाचमनम्, दशरूपकप्रभा इत्येते प्रकाशिते ।
12. सङ्कलनात्मकग्रन्थरूपेण सुभाषितपीयूषस्य तथा शास्त्रपरिचयप्रकल्पाख्यस्य ई-पुस्तकस्य प्रकाशनं कृतं वर्तते ।
13. विश्वविद्यालयस्य प्रकाशनमिदं गुणवत्तासम्पन्नं, सामान्यशुल्कयुतं, नवोदयानां लेखकानां अनुवादकानां कवीनां च कृते उत्साहवर्धकं प्रेरणामूलं, संस्कृत-उच्चशिक्षालोके लाभप्रदं प्रतिष्ठाप्राप्तं गौरववर्धकं ज्ञानप्रदं रसवर्धकं सुलभ्यं विषयवैविध्यसम्पन्नं च वर्तते ।
14. प्रकाशनेष्वेतेषूत्तमानि काव्यानि, उत्तमाः लेखाः, उत्तमाः समीक्षात्मकग्रन्थाः, सुयोग्याः शोधप्रबन्धाः, उत्तमानि गीतानि च राराज्यन्ते ।

2. **अभिमुखीकृताः समस्याः आवश्यकानि संसाधनानि च**- उपर्युक्तानां गुणवत्तायुक्तग्रन्थानां प्रकाशने क्रियान्वयने च काश्चन समस्याः अभिमुखीकृताः ।
   1. तास्वेका समस्या वर्तते मुद्रणालयस्याभावः । विश्वविद्यालये मुद्रणालयस्य व्यवस्था नास्ति तेन कारणेन निविदाप्रक्रियामाध्यमेन (Tender Process) ग्रन्थमुद्रणकार्यं विधीयते । यद्यपि ग्रन्थप्रकाशनार्थं सर्वकारद्वारा निर्दिष्टधनराशिः दीयते तथापि क्वचित् न्यूनधनराशिकारणेन स्थूलग्रन्थाः प्रकाशयितुं न शक्यन्ते ।
   2. अनुवादग्रन्थानां निर्माणावसरे प्रादेशिकशब्दानुवादसमये कष्टमनुभूयते तत्समाधानाय कश्चन प्रादेशिकसंस्कृतशब्दकोषः उभयभाषाविदां मार्गदर्शनं च नितरामपेक्ष्यते ।
   3. विदुषां समयाभावेन नियतसमयावधौ संशोधनलेखानां परीक्षणकार्यं न सम्भवति । परीक्षणकार्ये विलम्बे सति प्रकाशनकार्यमपि विलम्बितं भवति । पुनश्च केचन विद्वांसः शोधलेखप्रस्तोतारः लेखं विलम्बेन प्रेषयन्ति तेन कारणेनापि तस्य ग्रन्थस्य प्रकाशनं विलम्बितं भवति ।
   4. संस्कृते टङ्कण-मुद्रण-संशोधन-परिष्करणानि संस्कृतज्ञाः एव कर्तुं शक्नुवन्ति किन्तु मुद्रणालये ये कर्मकराः वर्तन्ते ते संस्कृतज्ञाः न भवन्ति तेन कारणेन वारं वारं परिष्करणीयं भवति तेन ग्रन्थप्रकाशने विलम्बो भवति ।
   5. सोमज्योतिरिति मुखपत्रे विवरणेन सह भावचित्राणां प्रदर्शनं भवति किन्तु क्वचित् भावचित्राणि विलम्बेन प्राप्यन्ते अथवा विवरणानुकूलं भावचित्रं नोपलभ्यते तदा तस्य विवरणस्य प्रकाशनं कष्टाय भवति ।

यद्यपि एतादृश्यः समस्याः गुणवत्तायुतप्रकाशनस्य क्रियान्वयनावसरे अभिमुखीभूयन्ते तथापि विश्वविद्यालयस्याध्यापकाः ज्येष्ठानामाचार्याणां मार्गदर्शनपूर्वकमहोरात्रं कार्यं कृत्वा कदाचित् समये प्रकाशनं विधातुं स्वयमेव टङ्कणं, संशोधनं, परिष्करणं च विधाय कथितसमस्यानां समाधानम् आविष्कुर्वन्ति ।

**टिप्पणी-** प्रतिवर्षं विश्वविद्यालयपक्षतः दैनन्दिनी, पञ्चाङ्गं (Calendar) आयोजनपुस्तिका (Planner) च प्रकाश्यते । तत्र दैनन्दिन्यां प्रतिपृष्ठं वैदिक-लौकिक-संस्कृतसुभाषितवचांसि हिन्द्यनुवादसहितानि ससन्दर्भं मुद्राप्यन्ते । येन दैनन्दिन्याः व्यवहर्तारः प्रतिदिनं वेदपुराणादिशास्त्राणां संस्कृतसाहित्यग्रन्थानां च क्वचित् मूलसंस्कृतेन क्वचित् अनुवादेन शास्त्रबोधः प्राप्यते तेन विश्वविद्यालयस्यापि तथा च भारतीयसनातनसंस्कृतेः परम्परायाश्च शास्त्रोक्तपरिचयः सामाजिकैः प्राप्यते । तैश्च सद्वाक्यैः सुभाषितैश्च सुतरां प्रेरिताः लाभान्विताः भवन्ति । तद्वदेव आयोजनपुस्तिकया विश्वविद्यालयीयाः

अधिकारिणः, कर्मचारिणः अध्यापकाश्च स्वकार्यायोजनं कर्तुं स्मर्तुं व्यवहर्तुं च शक्नुवन्ति । लघु-आयोजनपुस्तिका वर्षान्ते विश्वविद्यालयस्य गुरुकार्यं करोति ।

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

**7.3 Institutional Distinctiveness**

***7.3.1 Describe/Explain the performance of the institution in one area distinctive to its vision, priority and thrust***

**संस्थया स्वस्य दूरदृष्टिं, प्राथम्यं, प्रधानविषयञ्च मनसि निधाय एकस्मिन् विशिष्टक्षेत्रे स्वेन कृतस्य कार्यनिष्पादनस्य विवरणं दीयताम् ।**

**Answer:**

**छात्राणां सर्वाङ्गीणविकासः योग्यनागरिकनिर्माणञ्च**

गुर्जरराज्ये राराज्यमानः श्रीसोमनाथसंस्कृतविश्वविद्यालयः शास्त्रद्वारा छात्राणां सर्वाङ्गीणविकासाय नैकान् प्रयत्नान् विदधाति। शास्त्रविकासस्य ध्येयम् उररीकृत्य विश्वविद्यालयोऽयं प्रवर्तते । शास्त्रस्य प्रचारः प्रसारश्च कथं भवेत् तदर्थं स्वकीयं श्रेष्ठं कौशलं विश्वविद्यालयः प्रदर्शयति । विश्वविद्यालयस्य केन्द्रस्थाने छात्रः वर्तते । अतः तस्य सर्वङ्गीणविकासाय विश्वविद्यालयोऽयं निरन्तरं यतमानो वर्तते ।

1. संस्थायामस्यां शास्त्राध्ययनेन सह व्यक्तित्वविकासायापि विभिन्नाः अवसराः प्रदीयन्ते। छात्रगण: विश्वविद्यालये शास्त्रकौशलं स्वात्मनि धारयेत् तदर्थं विश्वविद्यालयः निःशुल्कभोजनावासप्रबन्धनं करोति। विश्वविद्यालये नैकानि पुराण-न्याय-साहित्य-वेद-व्याकरण-ज्यौतिष-योगादीनि शास्त्राणि विभिन्नपदविकाः अल्पकालीनाः पाठ्यक्रमाश्च अध्याप्यन्ते अधीयन्ते च सर्वैः गुरुभिः छात्रैश्च।
2. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सद्भाग्येन यः कश्चित् संस्कृतविद्वान् प्रथमज्योतिर्लिङ्गं सोमनाथं प्रति दर्शनार्थम् आगच्छति सः सोमनाथदर्शनेन सह विश्वविद्यालयस्य आदर्शस्वरूपं ज्ञातुं समागच्छति आगत्य पुनश्च विश्वविद्यालये उषित्वा स्वकीयज्ञानविज्ञानशास्त्रलाभं विश्वविद्यालयस्थछात्रेभ्यः प्रददात्येव यथा- प.पू.मोरारीबापु, प.पू.अध्यात्मानन्दस्वामी इत्यादयः। अनेन शास्त्राध्ययनप्रसादेन विश्वविद्यालयीयाः छात्राः लाभान्विताः भवन्ति एवं च स्वज्ञानवृद्धिं कुर्वन्ति।
3. विश्वविद्यालयस्यास्य परिसरे संस्कृतसम्भाषणं प्रचाल्यते। संस्कृतलेखनस्य सम्भाषणस्य च विशिष्टं शिक्षणमपि प्रदीयते विश्वविद्यालयेन। तद्वदेव छात्राणाम् आन्तरिकप्रतिभायाः विकासाय सोत्साहं शिक्षकदिवसः समायोज्यते। अस्मिन् दिवसे छात्राः गुरोः स्थानम् अवाप्य स्वकीयप्रतिभानुगुणम् अध्यापनं कुर्वन्ति, विविधाः कक्षाः गृह्णन्ति तथा च अस्मिन् दिने छात्रा: गुरोः स्थाने कार्यं कृत्वा विविधाः शिक्षाः प्राप्नुवन्ति। शैक्षणिकभवने प्राध्यापकैः वाक्यार्थपरिषदः आयोजनं क्रियते अनेनायोजनेन छात्राणां सर्वशास्त्रप्रवेशो भवति वाक्यार्थपरिषदि स्वगुरून् प्राध्यापकान् श्रावं श्रावं छात्राः वाग्वर्धिनीसभायां स्वाभिलषितविषयेषु विवक्षवः भवन्ति । तथा च छात्राणां वाक्कौशलवर्धनाय प्रतिगुरुवासरं वाग्वर्धिनीपरिषदः आयोजनं भवति तस्मिन् छात्राणां सभासञ्चालनवृत्तिः विकसति । अस्यां परिषदि छात्राः स्वकीयं विषयम् आधारीकृत्य स्ववक्तव्यं स्वशास्त्राध्ययनं प्रस्तुवन्ति। अनेन उपक्रमेण छात्राणां सम्भाषणकौशलं वर्धते। विश्वविद्यालयेऽस्मिन् छात्राणाम् अध्यापकानां शारीरिक-मानसिक-आध्यात्मिकस्वास्थ्यसंरक्षणाय आधुनिकयन्त्रयुक्ता व्यायामशाला, यज्ञशाला, क्रीडाङ्गणम्, सङ्गणकप्रयोगशाला, सुसिद्धः ग्रन्थालयः इत्यादिकाः सर्वाः व्यवस्थाः सन्ति। विश्वविद्यालये मुख्यविषयैः सह आधुनिकविषयाणाम् आङ्ग्ल-गुजराती-हिन्दी-भाषाणां, सङ्गणकादियन्त्रशिक्षणमपि प्राप्यते नैपुण्यम् अवाप्यते तथा च राजनीतिशास्त्र-समाजशास्त्र-अर्थशास्त्र-इतिहासादीनां पाठनमपि क्रियते।
4. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन शास्त्रीयसांस्कृतिकचित्रक्रीडादिषु रुचिनिर्माणाय प्रतिवर्षं युवमहोत्सवस्य आयोजनं क्रियते। अस्मिन् युवमहोत्सवे विविधेभ्यः महाविद्यालयेभ्यः छात्राः समागत्य भागं गृह्णन्ति । नैकाः स्पर्धाः भवन्ति यासु स्पर्धासु शारीरिकविकासात्मिकाः यथा कूर्दनस्पर्धा, धावनस्पर्धा, क्षेपणस्पर्धा इत्यादयः स्पर्धाः भवन्ति । तद्वत् बौद्धिकविकासाय चतुरङ्गस्पर्धा, समस्यापूर्तिस्पर्धा, शीघ्रवक्तृत्वस्पर्धा इत्यादयः भवन्ति । ताभिः सह सङ्गीतकौशलं प्राप्तुं वादनस्पर्धा एककगानस्पर्धा, शास्त्रीयगानस्पर्धा, समूहगानस्पर्धाः च भवन्ति । तथा च

आयोजनकौशलम्, नेतृत्वम्, सभाधैर्यम् इत्यादीनां प्रतिभानां विकासाय विश्वविद्यालयेन प्रतिवर्षं वार्षिकमहोत्सवस्यापि आयोजनं क्रियते यत्र छात्राणाम् आन्तरिकप्रतिभाप्रदर्शनाय गीतगान-एकपात्राभिनयादिकौशल्यानि परिवर्धितानि भवन्ति ।

5. विश्वविद्यालयपरिसरे माननीयस्य राज्यपालमहोदयस्य उपस्थितौ प्रतिवर्षं दीक्षान्तसमारोहः समायोज्यते। तेन समारोहेण छात्राः उपनिषत्शिक्षायाः दीक्षान्तप्रवचनेन स्वजीवनाय उदात्तां दृष्टिं प्राप्य नीतिमत्तापूर्णादर्शजीवनाय बद्धपरिकराः भवन्ति । तद्वदेव प्रतिवर्षं अन्ताराष्ट्रिययोगदिवसः समनुष्ठीयते। अस्मिन् अन्ताराष्ट्रिययोगदिवसे अनुस्नातकविभागस्य छात्रैः सह संस्कृतमहाविद्यालयस्य छात्राः, वेरावलनगरस्थाः विविधविद्यालयानां छात्राः, अध्यापकाः, प्रबुद्धाः नागरिकाः च सोत्साहं भागं गृह्णन्ति। अवसरेऽस्मिन् सर्वे सम्मिल्य योगशास्त्रप्रतिपादितानि आसनानि शारीरिकव्यायामप्रदर्शनं च कुर्वन्ति। तथा च प्रतिवर्षं आषाढमासमुद्दिश्य गुरुपूर्णिमामहोत्सवस्यापि छात्रैः आयोजनं क्रियते । परिसरेऽस्मिन् वेदव्यासस्य प्रतिमा प्रस्थापिता वर्तते तस्याः पूजनेन सह छात्राः परिसरस्थानां गुरूणामपि पूजनं कुर्वन्ति गुरुशिष्यपरम्परया च सुपरिचिताः भवन्ति । पुनश्च स्वतन्त्रतागणतन्त्रदिवसयोः परिपालनेन सह तद्दिने सांस्कृतिककार्यक्रमः विधीयते। एवञ्च छात्रैः देशभक्तिगानेन नाटकेन योगेन स्वप्रतिभाकौशलं राष्ट्रभक्तिश्च प्रदर्श्यते । गुजरातसर्वकारेण निर्दिष्टः जनपदस्तरीयः वनमहोत्सवोऽपि विश्वविद्यालयेन समनुष्ठितः अनेनोत्सवेन छात्राणां वृक्षान् प्रति सद्भावः समुदेति । पर्यावरणविषयिकी जागरूकता समायाति । एवञ्च राष्ट्रिय सेवा योजना (N.S.S.) इति योजनान्तर्गताः प्रवृत्तयोऽपि विश्वविद्यालये प्रचलन्ति। तथैव राष्ट्रियसेवायोजनया छात्रेषु राष्ट्रसेवायै सद्भावना समुदेति तथा च स्वदेशगौरवानुभवः जनेषु यथा भवेत् तथा विविधाः कार्यक्रमाः विधीयन्ते । विश्वसिंहदिवसस्य पालनेन छात्रेषु पशुषु अपि प्रेमभावः समुदेति । वेरावलनगरे संस्कृतसम्भाषणशिबिराणि समायोज्यन्ते। तेन वेरावलवासिनोऽपि संस्कृतानुरागिणः तथा च विश्वविद्यालयं प्रति गौरवान्विताश्च भवन्ति, येन समाजस्थाः अन्यक्षेत्रीयाः जना अपि संस्कृतभाषायाः विश्वविद्यालयस्य च प्रचाराय प्रसाराय च प्रयतन्ते। इत्थं श्रीसोमनाथसंस्कृतविश्वविद्यालयः विविधाः समाजोपयोगिनीः प्रवृत्तीः समनुष्ठाय स्वकीयं पूर्णता गौरवाय इति ध्येयवाक्यं परिपालयति।

6. विविधकार्येषु श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राथम्यम् आभिमुख्यं च वर्तते । वास्तविक्या आन्तर्जालव्यवस्थाद्वारा प्रचाल्यमानः अल्पकालीन-अभ्यासक्रमः (Short Term Course), तद्वदेव इमां व्यवस्थाम् अनतिक्रम्य प्रचालिताः विशिष्टदिवसोत्सवाः, विविधाः शैक्षणिकाः कार्यक्रमाः, विद्यावारिधीनां छात्राणां सार्वजनिकसाक्षात्कारः (Open Viva Voce) इत्यादिषु कार्येषु विश्वविद्यालयस्यास्य सन्निष्ठा नीतिः प्राथम्यम् आभिमुख्यं च भजते ।

7. छात्राणां ज्ञानविकासाय, बौद्धिकविकासाय, कार्यसम्पादनाय च विविधाः उपायाः विश्वविद्यालयेन अहर्निशं क्रियन्ते । तत्र NET/SLET इत्यादीनां स्पर्धात्मकपरीक्षाणां कृते प्रशिक्षणवर्गाणाम् आयोजनं क्रियते तथा च निश्चिते समये छात्रावासे अपि निवसतां छात्राणां ज्ञानवर्धनाय मान्येन कुलपतिना सह सर्वे अपि प्राध्यापकाः विविधान् विषयान् स्वीकृत्य स्वकीयानि व्याख्यानानि प्रतिपादयन्ति । अनेन छात्राणां परीक्षालेखनकौशलविकासः तदर्थं प्रोत्साहनं च भवति । तत्फलस्वरूपेण मौखिकपरीक्षायां तत्त्वाचार्य-विद्यावारिधिकक्षासु सार्वजनिकसाक्षात्कारः (Open Viva Voce) उत्साहम् अनुभवम् आत्मविश्वासं च प्राप्नुवन्ति ।

8. विश्वविद्यालयस्य विविधसङ्कायाध्यक्षैः स्व-स्वविषयाधारितानां कार्यशालानाम् आयोजनं प्रतिवर्षं अनुष्ठीयते । तत्र साहित्य-व्याकरण-पुराण-वेद-ज्योतिष-दर्शनादीनां विषयाणाम् उपरि कार्यशालायाः आयोजनं क्रियते तासु कार्यशालासु संलग्नमहाविद्यालयेभ्यः छात्राः समायान्ति तथा च समग्रभारतवर्षात् विद्वांसः पण्डिताः समागत्य स्वकीयं विशिष्टं ज्ञानं व्याख्यानं च प्रतिपादयन्ति तेन विश्वविद्यालयस्य छात्राणां ज्ञानं बौद्धिकविकासः परस्परमैत्रीभावश्च वर्धते । कार्यशालासु विशिष्टं ज्ञानं प्राप्य छात्राः स्वविषयेषु स्वकीयस्य उत्कृष्टस्य ज्ञानस्य प्रदर्शनं कुर्वन्ति । छात्रैः परीक्षायाम् आत्मविश्वासेन पदच्छेद-पदार्थोक्त्यादिविधिमवाप्य उत्तराणि विलिख्यन्ते । कार्यशालाभिश्च सप्ताहेनैव वा त्रिभिर्चतुर्भिर्दिवसैः चितस्य ग्रन्थस्य ज्ञानं प्राप्यते । कार्याशालायां प्रतिदिनं व्याख्यानान्ते छात्राणां ज्ञानपरीक्षणाय लघुपरीक्षायाः आयोजनं क्रियते तेन छात्राणां ज्ञानं सुदृढं भवति । लक्षणोदाहरणपूर्वकं पाठनशैल्या अपि विशिष्टो परियचो भवति । विविधानां विदुषां प्रायोगिकप्रत्यक्षशैल्या पाठनकौशलं सम्प्रेषणकौशलं च वृद्धिमेति ।

9. सरदारवल्लभभाईपटेलमहोदयानां पुरुषार्थेन सङ्कल्पबलेन च प्रभासतीर्थे अयं गुजरातराज्यस्य एक एव संस्कृतविश्वविद्यालयः स्थापितः वर्तते । अस्मिन् विश्वविद्यालये चतुर्दशवर्षात्मके काले सङ्गोष्ठ्यः, राष्ट्रियपरिसंवादाः, अन्ताराष्ट्रियपरिसंवादाः सञ्जाताः सञ्जायमानाश्च वर्तन्ते । एतस्य विश्वविद्यालयस्य कार्यपद्धत्या परिसरे पठिताः छात्राः नैकेषु विविधक्षेत्रेषु अर्थोपार्जनं अर्थवृत्तिं व्यवसायं च लब्धवन्तः सन्ति । ४३ छात्राः NET/SLET परीक्षामुत्तीर्य ..... छात्रवृत्तिं लब्ध्वा संशोधनकर्मणि व्यापृताः वर्तन्ते ८५ शोधार्थिनः विद्यावारिधिपदवीं प्राप्तवन्तः । श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्ययन-अध्यापनकार्यं राज्येऽस्मिन् विशिष्टं विलक्षणं च वर्तते । अत्र प्राच्यार्वाचीनपद्धत्या कार्यं भवति तथा च स्वल्पेन कालेन महती प्रगतिः साधिता वर्तते तद् एका विशिष्टा दृष्टिः

वर्तते । संस्कृतक्षेत्रे लब्धकीर्तयः सर्वे कुलपतयः अत्र स्वदूरदर्शितां दीर्घदर्शितां दृष्टिम् आश्रित्य कार्यप्रणाल्या कार्यं कृतवन्तः विश्वविद्यालयस्य प्रगतिं च साधितवन्तः । विश्वविद्यालयेऽस्मिन् छात्रस्य सर्वाङ्गीणविकासाय नैकाः प्रवृत्तयः भवन्ति । बहवः पदविका-पाठ्यक्रमाश्च अत्र प्रचलन्ति यैः पाठ्यक्रमैः व्यवसायं लब्धवन्तः तत्र विशिष्टतया मन्दिरव्यवस्थापनपदविकया (Diploma in Temple Management) विदेशेषु मन्दिरे पूजकरूपेण सनातनधर्मस्य रक्षां कुर्वन्तः छात्राः नैकानि स्थानानि प्राप्तवन्तः ।

10. **श्रीसोमनाथसंस्कृतविश्वविद्यालयः अन्वयानां संस्करणस्य केन्द्रं वर्तते** एतत् लक्ष्यं निधाय संस्कृतक्षेत्रे संशोधनदृष्ट्या सह ज्ञानवृद्धिः, विविधक्षेत्रे राष्ट्रस्तरीयः विकासः, स्पर्धाभिश्च विविधः ज्ञानलाभः संस्कृत-संस्कार-संस्कृतीनां संरक्षणाय विश्वविद्यालयोऽयं स्थापितो वर्तते तच्छात्राणां प्रगत्यानुभूयते । विश्वविद्यालयेऽस्मिन् विदुषां तपः चरित्रनिर्माणाय च दृष्टिः गौर्वसम्पादनाय कटिबद्धाश्च सपाठ्यक्रमाः प्राध्यापकाश्च सन्ति ।
11. गुणवत्तामाधारीकृत्य विश्वविद्यालयस्य विविधाः छात्राः शास्त्रसज्जतां कृत्वा राज्यस्तरे राष्ट्रियस्तरे च स्वकीयं प्रतिभाप्रदर्शनं कृत्वा पुरस्कारपूर्वकं पदकप्रमाणपत्राणि विजित्य समग्रे भारते वर्षे उत्तमं स्थानम् अवाप्तवन्तः । एवं श्रीसोमनाथसंस्कृतविश्वविद्यालयः सततं छात्राणां सर्वाङ्गीणविकासाय विविधैः कार्यक्रमैः सह अध्यायन-अध्यापनरतो भूत्वा गुणवत्ता अस्माकं काचिद् यात्रा न तु लक्ष्यम् इति स्वकीयं ध्येयं सम्पादयन् राष्ट्रनिर्माणाय चरित्रनिर्माणं शास्त्ररक्षणाय तपः उत्तमोपलब्धये श्रमः एतैः विचारैः छात्राः स्वात्माभिमुखाः भवन्ति । एवं पूर्णतां प्रति गच्छन् विश्वविद्यालयोऽयं छात्राणां सर्वाङ्गीणविकासद्वारा योग्यनागरिकनिर्माणं कृत्वा स्वजीवनयात्रां चालयति तथा च यावद् गौरवप्राप्तिः न स्यात् तावन्न विश्रामः इति मत्वैव स्वविद्यायात्रां करोति ।
12. छात्राणां सर्वाङ्गीणविकासाय विश्वविद्यालयोऽयं समये समये अभिनवसंस्कृतकवीनां प्रथितयशसां कवीनां काव्यसम्मेलनम् आयोजयति । छात्रावस्थायाः प्रारम्भे एव एतान् कवीन् श्रुत्वा काव्यसमुल्लासे निपुणाः भवन्ति । श्रीसोमनाथविन्यासेन समायोजितेषु विविधेषु पर्वसु उत्सवेषु छात्राणां गमनेन पाठेन मन्त्रोच्चारणेन संस्थायाः परस्परविकासः भवति संवादकौशलमपि छात्रेषु विकसितं भवति । परिसरस्थायां लक्ष्मीनारायणयज्ञशालायां विविधेषु पर्वसु प्रसङ्गेषु च यज्ञानुष्ठानायोजनं भवति । यत्र छात्राः स्थापननिर्माणादिकं यज्ञसज्जतापूर्वकं ऋषिपरम्परां जानन्तः पठितस्य शास्त्रोक्तविधिविधानस्य प्रायोगिकं कुर्वन्ति ।

इत्थं अनेन विश्वविद्यालयेन क्रियमाणैः कलापैः छात्रो बहुमुखीप्रतिभासम्पन्नः सन् समाजे प्रतिष्ठां प्राप्नोति योग्यनागरिको भूत्वा समाजोपकारकाणि कार्याणि च करोति ।

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

**Extended Profile**

**Program**

*Number of Programmes offered year-wise for last five years*

## विगतपञ्चवर्षेषु समायोजितानां पाठ्यक्रमाणां वार्षिकसङ्ख्या

**Answer:**

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 30 | 30 | 30 | 30 | 30 |

**Students**

*Number of students year-wise during the last five years*

## विगतपञ्चवर्षेषु प्रविष्टानां छात्राणां वार्षिकसङ्ख्या

**Answer:**

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 186 | 151 | 167 | 180 | 176 |

***Number of outgoing / final year students year-wise during the last five years***

**विगतपञ्चवर्षेषु उत्तीर्णानां छात्राणां वार्षिकसङ्ख्या**

**Answer:**

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 063 | 69 | 66 | 68 | 46 |

***Number of students appeared in the University examination year-wise during the last five years***

**विगतपञ्चवर्षेषु, विश्वविद्यालये परीक्षासु सम्मिलितछात्राणां वार्षिकसङ्ख्या**

**Answer:**

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 186 | 151 | 167 | 180 | 176 |

**Teachers**

***Number of full time teachers year-wise during the last five years***

**पूर्णकालिकाध्यापकानां विगतपञ्चवर्षाणां वार्षिकक्रमेण समष्टिसङ्ख्या**

**Answer:**

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 22 | 14 | 15 | 15 | 15 |

***Number of sanctioned posts year-wise during the last five years***

**विगतपञ्चवर्षेषु अनुमोदितानां पदानां वार्षिकसङ्ख्या**

**Answer:**

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 29 | 29 | 29 | 29 | 29 |

**Institution**

***Total Expenditure excluding salary year-wise during the last five years (INR in Lakhs)***

**विगतपञ्चवर्षेषु वेतनाद् ऋते संस्थाया वार्षिकः व्ययः *(लक्षशः)***

**Answer:**

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 1525 | 1372 | 589 | 877 | 372 |

**Conclusion**

***Additional Information :***

Additional Information

वर्तमानस्य भविष्यतश्च अत्यधिकस्पर्धायुते जगति प्रतिष्ठाप्राप्तये गुणवत्तामेव आश्रयते विश्वविद्यालयोऽयम्। अतः कश्चित् छात्रः अत्र प्रविशति तदा सः राष्ट्रस्य एकः भविष्णुः प्रतिनिधिः वर्तते इति मत्वा तस्य तादृशीं भविष्णुतां पूरयितुं विश्वविद्यालयः प्रवर्तते। अनेन विश्वविद्यालयेन अनौपचारिकरूपेण शास्त्रशिक्षणम्, काव्यकलाकौशलप्रशिक्षणं च प्रदीयते। तस्य फलरूपेण नैके छात्राः सर्जनात्मककाव्यकर्मणि व्यापृताः सन्ति। विश्वविद्यालयस्य अध्यापकाः एवं च कर्मचारिणः सर्वकारादेशानुसारं निर्वाचनकार्याणि तथा च आपन्निवारणप्रबन्धनकार्येषु अपि स्वकर्तव्यं निर्वहन्ति। एतत् अतिरिच्य केन्द्रसर्वकारेण राज्यसर्वकारेण तथा च विविधनियामकसंस्थाभिः प्राप्तानाम् आदेशानुसारं छात्रोपयोगि-समाजोपयोगिकार्यक्रमाणाम् आयोजनम् अपि विश्वविद्यालयेन नित्यशः क्रियते। विश्वविद्यालयेन कोरोना-सङ्क्रमकाले वेरावलपाटण-संयुक्त-नगरपालिकाद्वारा सैनेटाइज-स्वच्छताकार्यं बहुवारं कारितम्। अध्यापकानां छात्राणां कर्मचारिणां च कोरोना-रोग-परीक्षणम् अपि विश्वविद्यालयप्रेरणया सर्वकारीयचिकित्सालयेन कृतम्।

वेरावलनगरस्य समीपस्थक्षेत्रेषु विद्यमानाः शैक्षणिक-धार्मिक-सामाजिकसंस्थाः कार्यक्रमाणाम् आयोजनं कुर्वन्ति तदा तेषाम् अवश्यकतानुसारं विश्वविद्यालयस्य छात्राः प्राध्यापकाः कर्मचारिणश्च भागं गृहीत्वा सहयोगम् उद्वहन्ति तथा च ताभिः संस्थाभिः आयोज्यमानासु स्पर्धासु अपि भागं गृह्णन्ति। विश्वविद्यालयस्य योगच्छात्राः समीपस्थेषु क्षेत्रेषु गत्वा निःशुल्करूपेण सामाजिकेषु योगस्य प्रशिक्षणं दत्त्वा तेभ्यः योगस्य महत्त्वं प्रतिपादयन्ति। गीरसोमनाथजनपदस्य प्राथमिकशालासु कार्यरतानां भाषाशिक्षकाणां प्रशिक्षणाय अस्य विश्वविद्यालयस्य छात्राः गत्वा मार्गदर्शनं कुर्वन्ति। गुजरातस्थ-एकतामूर्तिः (स्टेच्यु-ऑफ्-युनिटि) इत्यत्र वनवासिच्छात्रेभ्यः संस्कृतसम्भाषणपाठनपूर्वकं यथा ते संस्कृतेन मार्गदर्शनं कुर्युः तादृक्पाठ्यक्रमं विधाय मासद्वयस्य प्रशिक्षणं विश्वविद्यालयेन प्रदत्तम्। तस्य फलश्रुतिरूपेण माननीयेन प्रधानमन्त्रिणा मनोवाणी (मन की बात) इत्यत्र एतत्संस्कृतप्रशिक्षणस्य फलश्रुतिविषयिणी चर्चा अपि विहिता।

श्रीसोमनाथसंस्कृतविश्वविद्यालयः सोमनाथन्यासेन आयोजितेषु विविधेषु कार्यक्रमेषु योजनासु च समुचितं सहभागं वहति। सोमनाथ-प्रभासक्षेत्र-जूनागढ-द्वारका-पोरबन्दर इति सम्पूर्णक्षेत्रस्य पर्यटनक्षेत्ररूपेण विकासाय मार्गनिर्देशकानां निर्माणार्थं सोमनाथन्यासेन सह मिलित्वा अयं विश्वविद्यालयः अग्रेसरः वर्तते।

गुजरातप्रान्तस्य योगविश्वविद्यालयः, आयुर्वेदविश्वविद्यालयः, विधिविश्वविद्यालयः, प्रौद्योगिकविश्वविद्यालयः इत्यादिविश्वविद्यालयैः सह मिलित्वा आधुनिकनवीनपरिकल्पनाः विचारयन् तदनुसारं कार्यसंयोजनं च कुर्वन् अस्ति।

Link for English Version:

https://sssu.ac.in/images/NAAC_Criteria/doc/additional%20information%20English.DOCX

***Concluding Remarks:***

उपसंहारः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः गुजरातसर्वकारेण पवित्र-प्रभासतीर्थक्षेत्रस्य वेरावलनगरे २००५ वर्षे संस्थापितः। विश्वविद्यालयानुदानायोगस्य 2 (f) अन्तर्गततया २००६ वर्षे अयं विश्वविद्यालयानां सूच्यां योजितः। "पूर्णता गौरवाय" इति ध्येयवाक्यम् उररीकृत्य संस्कृत-संस्कृति-संस्काराणाम् अधिकाधिकं प्रचारप्रसाराय, आधुनिकज्ञानविज्ञानसमन्वयाय, व्यावसायलक्षीपाठ्यक्रमाणां व्यापकतावर्धनाय तथा नूतनस्पर्धाऽऽह्वानानां समाधानाय तकनीक्याः अधिकाधिकम् उपयोगकरणं च विश्वविद्यालयस्य मुख्यं लक्ष्यं वर्तते। एतल्लक्ष्यानुसारं विश्वविद्यालयः स्वकीयां शैक्षणिकगतिविधिं प्रचालयति। राष्ट्रस्य सांस्कृतिकरक्षणहेतवे राष्ट्रियभावजागरणार्थं विश्वविद्यालयः स्वकीयपाठ्यक्रमे शास्त्रेभ्यः राष्ट्रियजागृतिविषयकान् तान् कतिपयांशान् निर्धारितवान् अस्ति। विश्वविद्यालयस्य पाठ्यक्रमसंरचना उद्यमिता, आमूलशास्त्राध्ययनम्, सर्जनात्मकं लेखनम्, कौशलविकासः, उद्योगप्राप्तिसामर्थ्यम् इत्येतान् बिन्दून् लक्ष्यीकृत्य कृता विद्यते। अस्यां पाठ्यचर्यायां शैक्षणिकनमनीयता, स्त्रीपुरुषसमानता, पर्यावरणजागरूकता, मानवीयमूल्यसंवर्धनम्, चरित्रनिर्माणम्, नीतिमत्ता, सहिष्णुता, सात्त्विकता, कर्मकाण्डकौशलम्, शिक्षकप्रशिक्षणम्, संस्कृतसम्भाषणशिक्षणम्, भारतीयपरम्पराज्ञानम्, वास्तुशास्त्रीयविषयाणां ज्ञानम्, सरलभाषाशिक्षणम्, ज्योतिष-मन्दिरप्रबन्धनमित्यादिविषयाः पाठ्यचर्यायां सन्निविष्टाः सन्ति। छात्राणां सर्वाङ्गीणविकासाय शास्त्राध्ययनेन सह शिक्षणेतरक्रीडादिप्रवृत्त्यर्थं विविधाः अवसराः प्रदीयन्ते।

परिसरे सञ्चाल्यमानेषु पाठ्यक्रमेषु छात्राणां प्रवेशार्थं तान् आक्रष्टुं व्यूहान् अवलम्ब्य विभिन्नेषु पाठ्यक्रमेषु छात्राणां प्रवेशप्रक्रिया उत्तमप्रशासितप्रक्रियायुक्ता पारदर्शिनी चास्ति। विभिन्नवर्गीयच्छात्राणाम् अधिगमस्तरस्य मूल्याङ्कनाय अभिगमप्रणाली विद्यते। अयं विश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनार्थं गुरुकुलकेन्द्ररूपं संस्कृतवातावरणं जनयित्वा छात्रेषु सर्जनात्मकतया सह मूल्यव्यवस्थाम् उत्पादयति। परीक्षायाम् उत्तरलेखने, शोधप्रबन्धेषु, लघुशोधप्रबन्धेषु च संस्कृतभाषायाः अभिव्यक्तिमाध्यमत्वेन उपयोगः भवति। विश्वविद्यालयपरिसरे यज्ञशाला, सूचनासम्प्रेषणप्रविधिप्रयोगशाला, योगशिक्षणकेन्द्रम्, अनुसन्धानकेन्द्रम्, पाण्डुलिपिसंरक्षणकेन्द्रम्, क्रीडाङ्गणम् इत्यादीनि सौविध्यानि सन्ति। अनुसन्धानस्य प्रोन्नत्यै गुणात्मकशोधकार्यप्रवृत्तये च शोधनीत्यनुसारं सुचारुयोजनायुताः नियमाः सन्ति। अनुसन्धानाय आर्थिकस्रोतसां संग्रहार्थं साहाय्यं कृत्वा अध्यापकाः अनुसन्धानाय प्रेर्यन्ते। अनुसन्धानकार्ये कृतिचौर्यं कदाचारं निरोद्धुं अन्योन्यसहभावयुतः नवाचारः विद्यते। श्रीसोमनाथसंस्कृतविश्वविद्यालयः राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिभिः एकोनविंशति-संस्थाभिः सह शैक्षिक-अभिबन्धं कृतवान्। विश्वविद्यालये शैक्षणिकपाठ्यक्रमाणां सम्यङ् निर्वहणाय भौतिकसुविधानां पर्याप्तता वर्तते।

अन्तर्जालयुता स्फूर्तकक्षा, पाण्डुलिपिसंसाधनकेन्द्रम्, पाण्डुलिपिसंरक्षणकेन्द्रम्, सङ्गणकप्रयोगशाला, योगकेन्द्रम्, संस्कृते विज्ञानमिति चित्रविथी, सुभाषितफलकानि, ध्यानकेन्द्रम्, क्रीडासाधनानि, दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला इत्यादीनां माध्यमेन विश्वविद्यालयः स्वीयसाधनसामग्रीसम्बद्धव्यवस्थाः वर्धयति। ग्रन्थालये छात्राणां पाठ्यक्रमसम्बद्धाः सूचनाः, ज्ञानम्, कौशलानि च सम्पादयितुं छात्रान् समर्थान् कर्तुं ग्रन्थाः, शोधपत्रिकाः, 'ज्योतिः'-इति संस्थाकीयज्ञाननिधिः, तदितराधिगमसामग्र्यश्च उपलब्धाः सन्ति। अध्यापकेभ्यः कर्मचारिभ्यः छात्रेभ्यः च संस्थाकीय-विद्युत्पत्रसङ्केताः प्रदत्ताः सन्ति। विश्वविद्यालये प्रतिदशच्छात्रम् एकं सङ्गणकयन्त्रम् अस्ति। विश्वविद्यालये विविधसाधनानां समुपयोगाय, उद्यानपालनाय, काष्ठकार्याय विद्युत्समीकरणाय अन्यसम्बद्धकार्याय च वार्षिकः अनुबन्धः कृतो वर्तते। अस्मिन् विश्वविद्यालये पठतां छात्राणां प्रोद्बलनार्थं परिसरे परामर्शकेन्द्रम्, छात्रसमस्यानिवारणकेन्द्रम्, प्रतियोगितापरीक्षाप्रशिक्षणकेन्द्रम् इत्याद्याः प्रकल्पाः विद्यमानाः सन्ति। अधिगमे काठिन्यमनुभवतां छात्राणां कृते विशिष्टाः अन्तरांशाः अपि कल्पिताः सन्ति। अस्मिन् परिसरे शास्त्राणि वैदिकवाङ्मयं च अध्येतुं समाजस्य सर्ववर्गीयाः छात्राः विद्यार्थिन्यश्च समानावसरं लभेरन् तदर्थम् उपायाः क्रियन्ते। कार्यफलकमुद्रणम्, सर्जनात्मकलेखनम्, मातृकासंशोधनमित्यादिकार्यक्रमेषु प्रशिक्षणद्वारा तेषां छात्राणां कौशलानि अभिवर्धयितुं छात्राणां कृते अवसराः कल्प्यन्ते। अयं विश्वविद्यालयः सामाजिकन्यायलाभग्राहिभिः सह सम्बद्धानां विकासाय सर्वसमावेशिव्यवहारान् प्रवर्तयति। विश्वविद्यालयस्य ध्येयलक्ष्ययोः पूर्तये संस्थाद्वारा परिपाल्यमानाः पूर्वयोजनाः प्रयोगविधयः, प्रशासनप्रणाल्यः, अध्यापकानां प्रवृत्तयः, वित्तसम्बद्धानि संसाधनानि यथानियमं कार्यं कुर्वन्ति। शैक्षणिक-प्राशासनिक-क्रियाकलापेषु गुणवत्ताम् आनेतुम् आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रं विद्यते। विश्वविद्यालयेन उत्तमपरिपाटयः अनुष्ठीयन्ते, यत्कारणात् नियमितकार्येषु उत्तमः प्रभावः प्रतिफलति। विश्वविद्यालयेन सर्वत्र संस्कृतमयता गुणवत्तायुक्तं ग्रन्थप्रकाशनं चेति परिपाटिद्वयम् अत्युत्तमरूपेण अनुष्ठीयते।

Link for English Version:

https://sssu.ac.in/images/NAAC_Criteria/doc/Conclusion.DOCX

**EXCLUDED METRICES**

No Metrices are Excluded

**ANNEXURE**

**1.Metrics Level Deviations**

| Metric ID | Sub Questions and Answers before and after DVV Verification |
|---|---|
| 1.1.2 | Percentage of programe where syllabus revision was carried out during the last five years<br>विगतपञ्चवर्षेषु विहितस्य पाठ्यक्रमपुनरीक्षणस्य प्रतिशतता। |
| | 1.1.2.1. How many Programmes were revised out of total number of Programmes offered |

year-wise during the last five years विगतपञ्चवर्षेषु सञ्चालिताः कति पाठ्यक्रमाः प्रतिवर्षं पुनरीक्षीताः?
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 02 | 30 | 01 | 00 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 02 | 22 | 00 | 00 |

1.1.2.2. Number of all Programmes offered by the institution year-wise during the last five years विगतपञ्चवर्षेषु संस्थायां कति पाठ्यक्रमाः प्रतिवर्षं सञ्चालिताः?
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 50 | 50 | 49 | 48 | 47 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 50 | 50 | 48 | 46 | 43 |

1.2.2 Percentage of Programmes in which Choice Based Credit System (CBCS)/ elective course system has been implemented (Preceeding academic year data)

विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां प्रतिशतता। (प्रगतवर्षस्य दत्तांशः)

1.2.2.1. Number of Programmes in which CBCS/ Elective course system implemented. विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां सङ्ख्या।
Answer before DVV Verification : 12
Answer after DVV Verification: 24

Remark : As per the HEI statement in the response dialogue box and the data provided by the HEI during clarification.

1.3.2 Number of value-added courses imparting transferable and life skills offered during the last five years.

विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धकानाञ्च पाठ्यपत्राणां सङ्ख्या।

1.3.2.1. How many new value-added courses are added within the last 5 years विगतपञ्चवर्षेषु कति मूल्यसंवर्धक-पाठ्यपत्राणि योजितानि?
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 14 | 16 | 15 | 08 | 08 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 14 | 10 | 10 | 08 | 08 |

Demand Ratio (Average of last five years)

अभियाचनायाः अनुपातः (विगतानां पञ्चानां वर्षाणां मध्यमानम्)

2.1.2.1. Number of eligible applications received for admissions to all the Programmes year-wise during the last five years विगतपञ्चवर्षेषु प्रचाल्यमानेषु पाठ्यक्रमेषु प्राप्तार्हताणाम् आवेदनपत्राणां वार्षिकक्रमेण समष्टिसङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 287 | 254 | 195 | 220 | 229 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 96 | 58 | 53 | 91 | 72 |

2.1.2

2.1.2.2. Number of seats available year-wise during the last five years. विगतेषु पञ्चवर्षेषु प्रतिवर्षम् उपलब्धानां स्थानानां सङ्ख्या।

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 717 | 794 | 719 | 567 | 575 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 260 | 260 | 260 | 260 | 260 |

Remark : As per the HEI statement in the response dialogue box and the data provided with the Metric during clarification. The HEI data includes diploma and PhD level programmes. Number of sanctioned seats and applications received for UG/PG programmes only (excluding Ph.D. and Diploma) considered.

2.1.3 Average percentage of seats filled against seats reserved for various categories (SC, ST, OBC, Divyangjan, etc.) as per applicable reservation policy during the last five years

विगतेषु पञ्चसु वर्षेषु, आरक्षणनीत्यनुसारेण, नानाप्रवर्गेभ्यः (अनुसूचितजातिः, अनुसूचितजनजातिः, अन्य-अप्रगतजातिः, दिव्याङ्गजनाः, इत्यादयः) निर्दिष्टेषु आरक्षितस्थानेषु, सम्पूरितानाम् आरक्षितस्थानानां प्रतिशतं मध्यमानस्य प्रतिशतता।

2.1.3.1. Number of actual students admitted from the reserved categories year-wise during the last five years विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् आरक्षितप्रवर्गेभ्यः प्राप्तप्रवेशानां छात्राणां सङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 215 | 191 | 170 | 180 | 165 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 37 | 22 | 21 | 31 | 23 |

2.1.3.2. Number of seats earmarked for reserved category as per GOI/State Govt. rule year-wise during the last five years विगतपञ्चवर्षेषु भारतशासनस्य अथवा राज्यशासनस्य नियमानुरूपम् आरक्षितप्रवर्गेभ्यः निर्दिष्टानां स्थानानां वार्षिकक्रमेण समष्टिसङ्ख्या
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 717 | 794 | 719 | 567 | 575 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 127 | 127 | 127 | 127 | 127 |

Remark : The HEI has claimed numbers combined for all the students from reserved categories. HEI was advised to provide only fresh admission data. The state has 49% reservation for the categories. Based on the annual intake the number of seats earmarked year wise are calculated as recommended. Since the HEI has included Diploma students the UG/PG number is estimated on pro-rata basis of admissions.

2.3.2 Percentage of teachers using ICT for effective teaching with Learning Management Systems (LMS), E-learning resources etc.

अधिगम-प्रबन्धन-प्रणाली(अ.प्र.प्र)-वैद्युत-अधिगम-संसाधन(वै.अ.स)-प्रभृतिभिः सह सूचना-संप्रेषण-प्राविधिकीं (सू.सं.प्रा) प्रभाविशिक्षणार्थम् उपयुञ्जताम् अध्यापकानां प्रतिशतता।

2.3.2.1. Number of teachers using ICT सूचना-सम्प्रेषण-प्राविधिकीम् (सू.सं.प्रा) उपयुञ्जताम् अध्यापकानां सङ्ख्या
Answer before DVV Verification : 21
Answer after DVV Verification: 21

2.3.3 Ratio of mentor to students for academic and stress related issues (preceding academic year data)

शैक्षिकसमस्याविषये, उद्वेगविषये च छात्राणां कृते उपलब्धानाम् उपदेष्टृणाम् अनुपातः (प्रगतवर्षस्य दत्तांशः)

2.3.3.1. Number of mentors उपदेष्टृणां सङ्ख्या

Answer before DVV Verification : 15
Answer after DVV Verification: 15
Average percentage of full time teachers with Ph.D. during the last five years

गतेषु पञ्चसु वर्षेषु, विद्यावारिधिः (पीएच.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।

2.4.2 2.4.2.1. Number of full time teachers with Ph.D. year-wise during the last five years
विगतपञ्चवर्षेषु, विद्यावारिधिः (पीएच्.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 16 | 13 | 15 | 15 | 14 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 16 | 13 | 15 | 15 | 14 |

2.4.3 Average teaching experience of full time teachers in number of years

पूर्णकालिकाध्यापकानाम् अध्यापनानुभवस्य वर्षप्रमाणेन मध्यमानम्

2.4.3.1. Total experience of full-time teachers पूर्णकालिकाध्यापकानाम् अध्यापनानुभवस्य समष्टिसङ्ख्या
Answer before DVV Verification : 307
Answer after DVV Verification: 253

2.5.1 Average number of days from the date of last semester-end/ year-end examination till the declaration of results during the last five years

विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां सङ्ख्यायाः मध्यमानम् -

2.5.1.1. Number of days from the date of last semester-end/ year-end examination till the declaration of results year-wise during the last five years. विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां वार्षिकसङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 23 | 75 | 34 | 19 | 76 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 31 | 35 | 34 | 30 | 36 |

2.5.2 Average percentage of student complaints/ grievances about evaluation against total number appeared in the examinations during the last five years.

विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्ञाम्/ अभियोगं वा कृतवतां छात्राणां मध्यमानस्य प्रतिशतता।

2.5.2.1. Number of complaints/ grievances about evaluation year-wise during the last five years. विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्ञाम्/ अभियोगं वा कृतवतां छात्राणां वार्षिकी सङ्ख्या।

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 15 | 19 | 14 | 14 | 29 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 11 | 13 | 10 | 08 | 18 |

Remark : As per the HEI statement in the response dialogue box and the data provided with the Metric during clarification. Only Number of applications for revaluation year-wise during the last five years of the UG/PG students and scholars of PhD/MPhil programmes considered.

2.5.3 Average percentage of applications for revaluation leading to change in marks

पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां प्रतिशतं मध्यमानस्य मानं, यत्र अङ्कानां परिवर्तनं जातम्।

2.5.3.1. Number of applications for revaluation leading to change in marks year-wise during the last five years विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या, यत्र अङ्कानां परिवर्तनं जातम्।

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 07 | 02 | 04 | 07 | 16 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 07 | 02 | 04 | 05 | 13 |

2.5.3.2. Number of revaluation applications year-wise during the last five years. विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 15 | 19 | 14 | 14 | 29 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| 11 | 13 | 10 | 08 | 18 |

Remark : As per the attached data with the Metric during clarification. Only Number of applications for revaluation leading to change in marks year-wise during the last five years of the UG/PG students and scholars of PhD/MPhil programmes considered.

Average pass percentage of students

छात्राणाम् उत्तीर्णताप्रतिशततायाः मध्यमानम्

2.6.3

2.6.3.1. Total number of final year students who passed the university examinations विश्वविद्यालयस्य परीक्षासु उत्तीर्णानाम् अन्तिमवर्षीयाणां छात्राणां सङ्ख्या
Answer before DVV Verification : 118
Answer after DVV Verification: 70

2.6.3.2. Total number of final year students who appeared for the examinations अन्तिमवर्षपरीक्षासु सम्मिलितानां छात्राणां योगः
Answer before DVV Verification : 136
Answer after DVV Verification: 86

The institution provides seed money for in-depth Shastric training/ inter-disciplinary training to its teachers for research during the last five years

विगतपञ्चवर्षेषु संस्था अध्यापकेभ्यः अनुसन्धानाय तलस्पर्शिशास्त्रप्रशिक्षणाय अन्तःशास्त्रीयप्रशिक्षणाय च मूलनिधिं ददाति।

3.1.2

3.1.2.1. The amount of seed money provided by institution to its faculty year-wise during the last five years (INR in lakhs) संस्थया विगतपञ्चवर्षेषु अध्यापकेभ्यः प्रदत्तस्य मूलनिधेः वार्षिकसङ्ख्या (लक्षशः)।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 3.13043 | 1.78039 | 1.13480 | 0.35159 | 0.78755 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 00 | 00 | 00 |

3.1.3 Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and any other research fellowships in the University enrolled during the last five years.

विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां(JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातृणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां सङ्ख्या-

3.1.3.1. The Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and other research fellows in the university enrolled year-wise during the last five years विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां(JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातृणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां वर्षक्रमेण सङ्ख्या-
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 03 | 00 | 00 | 00 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 03 | 00 | 00 | 00 |

3.1.4 University has the following facilities

1. Central Instrumentation Centre/ Language Laboratory ComputerLab/ ICT Lab

2. Museum

3. Studios/ Recording Studio for Audio-Video/ e-P.G.Pathashala Facilities

4. Research/ Statistical Databases

5. Manuscript Resource Centre (MRC)

6. Manuscript Conservation Centre(MCC)

7. Yoga Training Centre

8. Yoga Therapy Centre with modern equipments

9. Observatory/ Yajnashala

10. Psychology Laboratory

विश्वविद्यालये अधोलिखितानि सौविध्यानि सन्ति-

1. केन्द्रीयम् उपकरणकेन्द्रम्/ भाषाप्रयोगशाला/ सङ्गणकप्रयोगशाला/ सूचना-सम्प्रेषण -प्रविधिप्रयोगशाला

2. पुरातत्त्वसङ्ग्रहालयः

3. दृश्य-श्रव्य-सामग्रीनिर्माणाय चित्राङ्कनशालायाः ध्वन्यङ्कनशालायाः ई.पी.जी पाठशालायाः वा सौविध्यानि

4. अनुसन्धानम्/ सांख्यकीयो दत्तांशनिधिः

5. पाण्डुलिपिसंसाधनकेन्द्रम्

6. पाण्डुलिपिसंरक्षणकेन्द्रम्

7. योगप्रशिक्षणकेन्द्रम्

8. आधुनिकयन्त्रसहितं योग-उपचारकेन्द्रम्

9. वेधशाला/ यज्ञशाला

10. मनोविज्ञानप्रयोगशाला

Answer before DVV Verification : A. Any six facilities exist (अ. उपर्युक्तेषु कानिचित् षट्सौविध्यानि सन्ति)

Answer After DVV Verification: A. Any six facilities exist (अ. उपर्युक्तेषु कानिचित् षट्सौविध्यानि सन्ति)
Remark : As per the HEI statement in the response dialogue box and the data provided with the Metric during clarification.

3.4.3 Number of Patents acquired/Creative writing / or critical Shastric writing composed in Sanskrit / copyright generated / hitherto unknown manuscripts brought to light through publication and awarded by State and National bodies during the last five years

विगतपञ्चवर्षेषु प्राप्तानां स्वत्त्वाधिकाराणां/ सर्जनात्मकलेखानाम्/ अथवा संस्कृतभाषया लिखिता विमर्शात्मकशास्त्रीयलेखानाम्/ उत्पादितप्रतिलिपीनां/ अप्रकाशितमातृकाणां/ प्राकाश्यमानीतानां मातृकाणां कृते राज्य/राष्ट्रीयनिकायैः सम्मानितपुरस्काराणाम् सङ्ख्या।

3.4.3.1. Total number of the above awards - year-wise during the last five years विगतपञ्चवर्षेषु प्राप्तपुरस्काराणां संवत्सरशः सङ्ख्या -
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 07 | 05 | 06 | 07 | 04 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 7 | 05 | 6 | 7 | 04 |

Remark : As per the HEI statement in the response dialogue box the Univ is a State Public institution specially meant for Sanskrit language and literature. Creative/scholarly /critical/ traditional works are published in Sanskrit. All the University publications and innovations are in the form of literature and encrypting /translating in/from Sanskrit. Non availability of patents in Sanskrit language and in literature is a challenge. Based on the certificate attached during clarification, the HEI clarification is considered.

3.4.4 Number of Ph.D.s awarded per teacher during the last five years

विगतपञ्चवर्षेषु प्रत्येकम् अध्यापकस्य निर्देशने विद्यावारिध्युपाधिभाजां शोधच्छात्राणां सङ्ख्या।

3.4.4.1. How many Ph.D's are awarded year-wise during the last 5 years - विगतपञ्चवर्षेषु कतिभिः छात्रैः विद्यावारिध्युपाधयः प्राप्ताः? (संवत्सरक्रमेण) -
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 00 | 08 | 21 | 20 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 04 | 10 | 15 | 20 |

3.4.4.2. Number of teachers recognized as guides year-wise during the last five years -

विगतपञ्चवर्षेषु मार्गदर्शकत्वेन मानितानाम् अध्यापकानां वार्षिकसङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 17 | 15 | 16 | 21 | 34 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 17 | 15 | 16 | 09 | 34 |

Remark : As per the HEI data attached with the Metric during clarification. The PhD awarded to Bhatt, Rajgor, Vaghela and Vasoya is of 2018-19 (as per the notification). Similarly notification dates in the attached document and the template claimed dates are different.

Number of research papers per teacher in the Journals notified on UGC website/ recognised peer reviewed journals/ reputed journals published by Sanskrit/ General Universities/ Departments/ Research Institutes and notified journals by the Rashtriya Samskrit Sansthan in its website and Conference Proceedings.

विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु, संस्कृतविश्वविद्यालयैः तद्विभागैः प्रकाशितासु शोधपत्रिकासु राष्ट्रियसंस्कृतसंस्थानस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु सम्मेलनकार्यवृत्तेषु वा प्रत्येकम् अध्यापकस्य प्रकाशितशोधपत्राणां सङ्ख्या।

3.4.5

3.4.5.1. Number of research papers in the Journals notified on UGC website year-wise during the last five years विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु प्रकाशितशोधपत्राणां वार्षिकसङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 15 | 15 | 14 | 10 | 14 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 15 | 15 | 14 | 10 | 14 |

3.4.6 Number of books edited and chapters in edited volumes/ books published, monographs in Sanskrit and other languages, original creative writing in Sanskrit, Sanskrit Shastras etc. (excluding awarded works), per teacher during the last five years

विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ प्रकाशितशोधपत्राणां/ संस्कृते एवं संस्कृतशास्त्रेषु सर्जनात्मकलेखानां सङ्ख्या। (पुरस्कारप्राप्तग्रन्थान् विहाय)

3.4.6.1. Total number of books and chapters in edited volumes / books published, and papers in national/international conference-proceedings monographs, creative writing year-wise during the last five years - विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ राष्ट्रिय-अन्ताराष्ट्रिय-सङ्गोष्ठीकार्यवृत्तिषु प्रकाशितशोधपत्राणां/ सर्जनात्मकलेखानां

वार्षिकसङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 43 | 14 | 40 | 50 | 11 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 17 | 09 | 15 | 27 | 11 |

3.6.2 Number of awards and recognition received for extension activities from Government /recognised bodies during the last five years

विस्तारगतिविधीनां कृते सर्वकारात्/मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्ताः पुरस्काराः/ सम्मानानि

3.6.2.1. Total number of awards and recognition received for extension activities from Government/ recognised bodies year-wise during the last five years विस्तारगतिविधीनां कृते सर्वकारात्/ मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकयोगः।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 01 | 02 | 01 | 02 | 01 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 01 | 00 | 01 | 00 |

3.6.3 Number of extension and outreach Programmes conducted in collaboration with industry, community and Non- Government Organisations through NSS/ Swaccha Bharata Abhiyana/ NCC/ Red cross/ YRC etc., during the last five years

विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च सङ्ख्या।

3.6.3.1. Number of extension and outreach Programmes conducted in collaboration with industry, community and Non-Government Organisations through NSS/Swaccha Bharata Abhiyana/NCC/Red cross/YRC etc., year-wise during the last five years विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च वार्षिकी सङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 14 | 22 | 14 | 29 | 11 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 14 | 14 | 12 | 15 | 11 |

Average percentage of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras /Yoga camps/ etc. during the last five years.

विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः मध्यमानस्य प्रतिशतता।

3.6.4 3.6.4.1. Total number of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras/ Yoga camps/ etc. year-wise during the last five years. विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः वार्षिकसङ्ख्या।

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 215 | 191 | 170 | 180 | 165 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 137 | 152 | 149 | 145 | 165 |

Percentage of classrooms and seminar halls with ICT - enabled facilities such as smart class, LMS (Learning Management System), etc. (preceeding academic year data)

सूचनासंप्रेषणप्रविधf-स्फूर्तकक्ष्या-अधिगमप्रबन्धप्रणालीप्रभृतिभिः उपोद्बलितकक्ष्याणां, सङ्गोष्ठीकक्ष्याणां च प्रतिशतता। (गताध्ययनवर्षस्य दत्तांशः)

4.1.4

4.1.4.1. Number of classrooms and seminar halls with ICT facilities उपोद्बलितकक्ष्याणां, सड्गोष्ठीकक्ष्याणां च सङ्ख्या।

Answer before DVV Verification : 21

Answer after DVV Verification: 03

4.1.4.2. Total number of classrooms and seminar halls कक्ष्याणां सङ्गोष्ठीकक्ष्याणां सङ्ख्या

Answer before DVV Verification : 21

4.1.5 Average percentage of expenditure, excluding salary for infrastructure augmentation during the last five years (INR in Lakhs)

विगतेषु पञ्चसु वर्षेषु वेतनाद् ऋते मूलभूतसौविध्यसंवर्धनाय कृतस्य व्ययस्य प्रतिशततायाः साधरणमानम् (लक्षशः)

4.1.5.1. Expenditure for infrastructure augmentation, excluding salary year-wise during the

last five years (INR in lakhs) विगतेषु पञ्चसु वर्षेषु वेतनाद् ऋते मूलभूतसौविध्यसंवर्धनाय कृतः व्ययः वार्षिकक्रमेण। (लक्षशः)
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 44.17 | 6.44 | 13.63 | 202.3 | 202.06 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 44.2 | 6.4 | 13.6 | 202.3 | 202.1 |

4.2.4 Average annual expenditure for purchase of books and journals during the last five years (INR in Lakhs)

पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य वार्षिकं मध्यमानम्। (लक्षशः)

4.2.4.1. Annual expenditure for purchase of books and journals year-wise during the last five years (INR in lakhs) पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य वार्षिकव्ययः (लक्षशः)
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 7.09787 | 7.24375 | 3.74142 | 4.94477 | 0.35547 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 7.1 | 7.24 | 3.74 | 4.945 | 0.355 |

4.3.2 Student - Computer ratio (preceding academic year data)

छात्र-गणकयन्त्रानुपातः (गताध्ययनवर्षस्य दत्तांशः)

4.3.2.1. Total number of computers in the campus for academic purpose पठनप्रक्रियार्थं विश्वविद्यालयपरिसरेषु वर्त्तमानानां गणकयन्त्राणां सङ्ख्या
Answer before DVV Verification : 31
Answer after DVV Verification: 18

5.1.1 Average percentage of students benefited by scholarships/ freeships provided by the Government/ UGC/ Rashtriya Samskrit Sansthan/ any other body during the last five years.

विगतपञ्चवर्षेषु सर्वकारद्वारा/ वि.अ.आ द्वारा/ राष्ट्रियसंस्कृतसंस्थानद्वारा/ अन्यसंस्थाद्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां प्रतिशततायाः मध्यमानम्।

5.1.1.1. Number of students benefited by scholarships and freeships provided by the Government year-wise during the last five years विगतपञ्चवर्षेषु सर्वकारद्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः

शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां वार्षिकसङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 44 | 24 | 76 | 95 | 05 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 44 | 23 | 98 | 95 | 05 |

Average percentage of students benefited by guidance for competitive examinations and career counselling offered by the institution during the last five years.

विगतपञ्चवर्षेषु संस्थया प्रदत्तेन स्पर्धात्मकपरीक्षामार्गदर्शनेन, वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां प्रतिशततायाः मध्यमानम्।

5.1.4

5.1.4.1. Number of students benefited by guidance for competitive examinations and career counselling offered by the institution year-wise during the last five years विगतपञ्चवर्षेषु संस्थया प्रदत्तेन स्पर्धात्मकपरीक्षामार्गदर्शनेन, वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां वार्षिकसङ्ख्या।
Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 98 | 28 | 00 | 64 | 69 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 71 | 28 | 00 | 64 | 69 |

5.2.2

Percentage of student progression to higher education (previous graduating batch) (preceeding academic year data)

उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां प्रतिशतता (पूर्वतनं स्नातकवर्गम् आश्रित्य) (प्रगताध्ययनवर्षस्य दत्तांशः)।

5.2.2.1. Number of outgoing students progressing to higher education उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां सङ्ख्या
Answer before DVV Verification : 26
Answer after DVV Verification: 26

5.2.3 Average percentage of students qualifying in state/ national/ international level examinations during the last five years. (eg: NET/ SLET/ TOEFL/ Civil Services/ State government examinations)

विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्रस्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां मध्यमानस्य प्रतिशतता (उदा.नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

5.2.3.1. Number of students qualifying in state/ national/ international level examinations (eg:

NET/SLET/TOEFL/ Civil services/State government examinations) year-wise during the last five years विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्- टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 26 | 12 | 04 | 07 | 00 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 18 | 08 | 02 | 04 | 00 |

5.2.3.2. Number of students appearing in state/ national/ international level examinations (eg: NET/SLET/GRE/TOEFL/ Civil Services/State government examinations) year-wise during the last five years विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु भागं गृहीतवतां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 26 | 28 | 04 | 64 | 69 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 18 | 28 | 04 | 64 | 69 |

5.3.1 Number of awards/ medals for outstanding performance in sports/ cultural activities at State/ national/ international level (award for a team event should be counted as one) during the last five years.

विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्ट-योग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां सङ्ख्या। (गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)

5.3.1.1. Number of awards/medals for outstanding performance in sports/cultural activities at State/ national/ international level (award for a team event should be counted as one) year-wise during the last five years विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्टयोग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां वार्षिकसङ्ख्या। (गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 07 | 06 | 00 | 04 | 01 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| | | | | |

| | | | | |
|---|---|---|---|---|
| 06 | 04 | 00 | 03 | 01 |

Average number of sports and cultural activities / competitions organised at the institution level per year.

प्रतिवर्षं संस्थया आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां / स्पर्धानां सङ्ख्यायाः मध्यमानम्

5.3.3

5.3.3.1. Number of sports and cultural activities / competitions organised at the institution level year-wise during the last five years विगतपञ्चवर्षेषु आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां वार्षिकसङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 01 | 02 | 02 | 06 | 03 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 00 | 00 | 01 | 01 | 02 |

Alumni contribution during the last five years (Amount in Rupees)

विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घेन प्रदत्तम् वित्तीयं योगदानम्- (रूप्यकेषु)

5.4.2

Answer before DVV Verification : A. ≥ 1.00 Lakhs (अ. ≥ 1.00 लक्षाः)

Answer After DVV Verification: C. Rs. 50,000/- to Rs. 75,000/- (इ. रू. 50,000/- तः रू. 75,000/- पर्यन्तम्)

6.3.4 Average percentage of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes during the last five years

विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां मध्यमानस्य प्रतिशतता।

6.3.4.1. Total number of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes year-wise during the last five years विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां वार्षिकसङ्ख्या।

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 04 | 02 | 06 | 03 | 09 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| | | | | |

| | | | | |
|---|---|---|---|---|
| 04 | 02 | 06 | 02 | 07 |

Number of quality initiatives by IQAC for promoting quality culture per year

प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थम् आयोजितानां गुणवत्तोपक्रमाणां सङ्ख्या।

6.5.3 6.5.3.1. Number of quality initiatives by IQAC for promoting quality year-wise for the last five years प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण (आ. गु. आ. के.) गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां विगतपञ्चवर्षाणां सङ्ख्या।

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 09 | 01 | 01 | 01 | 01 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 09 | 01 | 01 | 01 | 01 |

Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion on the basis of Vedic and Sanskrit literature as well as for observance of fundamental duties during the last five years

विगतपञ्चवर्षेषु वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिकसमरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां सङ्ख्या

7.1.16 7.1.16.1. Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion as well as for observance of fundamental duties year-wise during the last five years विगतपञ्चवर्षेषु, वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिक-समरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 03 | 03 | 01 | 01 | 03 |

Answer After DVV Verification :

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 03 | 03 | 01 | 01 | 03 |

**2.Extended Profile Deviations**

| ID | Extended Questions |
|---|---|

1.1 Number of Programmes offered year-wise for last five years विगतपञ्चवर्षेषु समायोजितानां पाठ्यक्रमाणां वार्षिकसङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 29 | 30 | 29 | 25 | 23 |

Answer After DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 30 | 30 | 30 | 30 | 30 |

2.1 Number of students year-wise during the last five years विगतपञ्चवर्षेषु प्रविष्टानां छात्राणां वार्षिकसङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 215 | 191 | 170 | 180 | 165 |

Answer After DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 186 | 151 | 167 | 180 | 176 |

2.2 Number of outgoing / final year students year-wise during the last five years विगतपञ्चवर्षेषु उत्तीर्णानां छात्राणां वार्षिकसङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 63 | 69 | 66 | 68 | 46 |

Answer After DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 063 | 69 | 66 | 68 | 46 |

2.3 Number of students appeared in the University examination year-wise during the last five years विगतपञ्चवर्षेषु, विश्वविद्यालये परीक्षासु सम्मिलितछात्राणां वार्षिकसङ्ख्या

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 186 | 151 | 167 | 180 | 176 |

Answer After DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 186 | 151 | 167 | 180 | 176 |

Number of full time teachers year-wise during the last five years पूर्णकालिकाध्यापकानां विगतपञ्चवर्षाणां वार्षिकक्रमेण समष्टिसङ्ख्या

3.1

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 21 | 16 | 15 | 16 | 18 |

Answer After DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 22 | 14 | 15 | 15 | 15 |

Total Expenditure excluding salary year-wise during the last five years (INR in Lakhs) विगतपञ्चवर्षेषु वेतनाद् ऋते संस्थाया वार्षिकः व्ययः (लक्षशः)

4.1

Answer before DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 1537.29 | 1371.83 | 588.97 | 876.18 | 373.28 |

Answer After DVV Verification:

| 2019-20 | 2018-19 | 2017-18 | 2016-17 | 2015-16 |
|---|---|---|---|---|
| 1525 | 1372 | 589 | 877 | 372 |